संस्कृतपरिषद्ग्रन्थमाला - १८

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। पर्वतो वह्निमानिति प्रतिज्ञा।

# अवयवः

धूमवत्त्वादिति हे... ...न् इत्युदाहरणम्।

तथा चायमिति उपनयः। तस्मात्तथेति निगमनम्।


प्रधानसम्पादकः

डा. वि. श्रीनिवास शर्मा

प्रभारी निदेशकः

सम्पादकौ

विद्वान् जालिहाळ सुकेशाचार्यः,

डा. वि. सुब्रह्मण्यम्

उपनिदेशकः



संस्कृतपरिषत्

(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)

उस्मानिया विश्वविद्यालयः, हैदराबाद्

२०१३

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतपरिषद्ग्रन्थमाला - ९८

Public Domain, Digitization Muthulakshmi Research Academy

श्री मद्गङ्गेशोपाध्यायविरचितः तत्त्वचिन्तमण्यन्तर्गतः

# अवयवः

(श्रीमन्महामहोपाध्यायरघुनाथशिरोमणिविरचितया दीधित्या,
श्रीमन्महामहोपाध्यायगदाधरभट्टाचार्यविरचितया गादाधर्या,
श्रीमन्महामहोपाध्यायकृष्णम्भट्टविरचितेन विवरणेन च संवलितः)

प्रधानसम्पादकः
**डा. वि. श्रीनिवास शर्मा**
*प्रभारी निदेशकः*

सम्पादकौ
**विद्वान् जालिहाळ सुकेशाचार्यः,**
**डा. वि. सुब्रह्मण्यम्**
*उपनिदेशकः*

**संस्कृतपरिषत्**
(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद्
2013

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतपरिषद्ग्रन्थमाला - 98
अवयवः, सम्पादकौ - डा. वि. सुब्रह्मण्यम्, विद्वान् सुकेशाचार्यः

ISBN - 978-93-80171-33-3

देहलीस्थ भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनस्य राष्ट्रियसंस्कृतसंस्थानस्य (मानितविश्वविद्यालयस्य) वित्तीयसाहाय्येन प्राकाशितोऽयं ग्रन्थः।

| | | |
|---|---|---|
| प्रकाशकः | : | निदेशकः, संस्कृतपरिषद् |
| | | © सर्वाधिकाराः संस्कृतपरिषदः |
| पृष्ठानि | : | xxxv + 269 |
| प्रथममुद्रणम् | : | 2013 |
| प्रतयः | : | 300 |
| मूल्यम् | : | Rs/-275<br>$ 27 |

**ग्रन्थप्राप्तिस्थानम्**

निदेशकः
संस्कृतपरिषद्
(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः
हैदराबाद् - 500007
दूरभाषा - 040 27070281
ईपत्रम् - sanskritacademyhyd@gmail.com

**मुद्रणम्**

कर्षक आर्ट् प्रिन्टर्स्
हैदराबाद्

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series – 98

# Avayavaḥ

with

Śrī Gaṅgeśopādhyāya's Tattvacintāmaṇiḥ
Śrī Raghunāthaśiromaṇi's Dīdhitiḥ
Śrī Gadādharabhaṭṭācārya's Gādādharī
Śrī Kṛṣṇambhaṭṭa's Vivaraṇam

General Editor
**Dr. V. Srinivasa Sharma**
*Director I/c*

Editors
**Vidvān Sukeshachar,**
**Dr. V. Subrahmanyam**
*Deputy Director*

**SANSKRIT ACADEMY**
(Recognised as Adarsha Shodha Sanstha by
Rashtriya Sanskrit Sansthan, New Delhi)
Osmania University, Hyderabad
2013

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series - 98
Avayavaḥ, Edited by Dr. V. Subrahmanyam and Vidvān Sukeshachar

ISBN - 978-93-80171-33-3

This publication has been brought out with the financial assistance of Rashtriya Sanskrit Sansthan, (Deemed University) under Ministry of Human Resource Development Govt. of. India, New Delhi.

| | | |
|---|---|---|
| **Publisher** | : | Director, Sanskrit Academy |
| **© Sanskrit Academy** | | |
| **First Edition** | : | 2013 |
| **Copies** | : | 300 |
| **Pages** | : | xxxv + 269 |
| **Price** | : | Rs/-275 |
| | | $ 27 |

**Copies can be had from:**

Director
Sanskrit Academy
(Adarsha Shodha Sanstha)
Osmania University Campus,
Hyderabad – 500 007
Phone & Fax: 040 - 27070281
Email: sanskritacademyhyd@gmail.com
Web: osmania.ac.in\sanskritacademy

**Printed at:**

Karshak Art Printers,
Hyderabad

In Public domain. Digitization Muthulakshmi Research Academy

# आमुखम्

मोहं रुणद्धि विमलीकुरुते च वुद्धिं सूते च संस्कृतपदव्यवहारहेतुः।
शास्त्रान्तराऽभ्यसनयोग्यतया युनक्ति तर्कश्रमं न कुरुते किमिहोपकारम्।।

इत्युक्तदिशा तर्कशास्त्राभ्यासेन पदार्थज्ञानं स्पष्टं भवति। तत्त्वज्ञानं विमलं भवति। वुद्धितीक्ष्णता वर्धते। विचारविवेचनसरणिः दृढीभवति। वाक्यार्थकौशल्यं सिद्ध्यति। अत एव उक्तं स्यात् "काणादं पाणिनीयं च सर्वशास्त्रोपकारकमि"ति।

तर्कशास्त्रं न्यायशास्त्रमित्यप्यभिधीयते। न्यायशास्त्रं तावत् प्राचीनं नवीनञ्चेति द्विविधम्। प्राचीननव्यन्यायययोः वहवो ग्रन्थाः विलसन्ति। तत्र नव्यन्यायप्रवर्तकानां श्रीमतां गङ्गेशोपाध्यायानां तत्त्वचिन्तामणिस्तु चिन्तामणिरेवास्ति तर्कवुभुत्सूनाम्। एतस्योपरि नैयायिकशिरोमणिः श्री रघुनाथशिरोमणिः दीधितिनामिकां व्याख्यां चकार। सा च व्याख्या अतिगम्भीरा, अतिसङ्क्षिप्ता, विद्वद्भिरव्याता, विद्वदादृता च विद्यते। तदुपरि महामहोपाध्याय तार्किकचूडामणिः श्रीगदाधरभट्टाचार्यविरचितः दीधितिव्याख्यारूपः प्रवन्धविशेषः। गदाधर-भट्टाचार्यस्य पाण्डित्यपराकीष्टता विद्वद्वृन्दे प्रसिद्धा। इयं कृष्णम्भट्टव्याख्यानपर्यालोचनया स्पुटं भवति। उक्तञ्च 'अवयवेषु गदाधरः' इति। कृष्णम्भट्टीयव्याख्यानन्तु गदाधरवाक्यानाम् उपरि कोटिक्रमशङ्कोपशङ्कासमाधानपुरस्सरं वहुविस्तृतम्, अतिगम्भीरपदगुम्फितं, युक्तायुक्तविचारपुञ्जं च विराजते।

गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणिः, रघुनाथशिरोमणेः दीधितिः, गदाधरभट्टाचार्यस्य गादाधरी, कृष्णम्भट्टस्य विवरणाख्यव्याख्यनचतुष्टयोपेतः 'अवयवः' संस्कृत अकाडमीतः प्रकाश्यते इति महानयं प्रमोदविशेषः।

ग्रन्थस्यास्य प्रकाशनानुमोदकेभ्यः भाग्यनगरस्थ उस्मानियाविश्वविद्यालयस्य उप-कुलपतिमहोदयेभ्यः आचार्य. एस्. सत्यनारायणमहोदयेभ्यः, ग्रन्थप्रकाशनाय द्रव्यानुदान-प्रदायकेभ्यः राष्ट्रियसंस्कृतसंस्थानस्य उपकुलपतिमहोदयेभ्यः आचार्य. ए. पि. सच्चिदानन्द-महोदयेभ्यः तथा कुलसचिवेभ्यः डा. विनोद् कुमार् सिङ्ग् महोदयेभ्यः धन्यवदान् वितरामि।

ग्रन्थस्यास्य सम्पादकयोः अन्यतराय न्यायव्याकरणवेदान्तादिनैकशास्त्रनिष्णात्रे पण्डितसुकेशाचार्याय, अकाडम्याः अस्याः उपनिदेशकाय डा. वि. सुब्रह्मण्याय, अन्येभ्यः सहकृतवद्भ्यः संस्कृतपरिषदः कर्मकर्तृभ्यः सर्वेभ्यश्च साधुवादान् वितरामि।

डा. श्रीनिवासशर्मा, प्रभारी निदेशकः

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy 

# Preface

*Shrinivasa Varakhedi,*
*Professor and Dean*
*Director (Academic affairs)*
*Karnataka Sanskrit University, Bangalore - 18*

It gives me immense happiness to write a preface to the work Avayava edited by Pandit Sukeshachar Jalihal and Dr. V. Subrahmanyam Deputy Director at Sanskrit Academy. This work is getting published in the Nyaya Publication series started by me in 2009. I am extremely happy that my colleague Dr. Subrahmanyam continued this tradition without a break. I thank him as well as the Director Dr. Shrinivasa Sharma for their interest and initiation in continuing this series.

It is not unknown to the scholars who have studied any of Indian schools of thought that the Nyaya school is greatly influential among all others as it is a rich with plenty of concepts and methodologies that are content neutral for which they are highly useful to other schools of thought in many aspects.

Nyaya school mainly deals with the epistemology namely the science of knowledge. The Navya Nyaya school (Neo school) of thought later combined with Vaisheshika school a sister school that deals with ontology, has grown as a prominent study discipline in India.

The technical language developed by the Navya-Nyaya school a unique tool in Indian Philosophy that later became the language of all Shastric discourses. Hence Navya Nyaya is famous for its contribution and influence on other schools. The Navya-Nyaya language was used in different dialectics of ontologically opposite philosophies, for example, in the Advaitasiddhi by Madhusudana Sarasvati, in the Purvamimamsa by Khandadeva and in the Bhattarahasya and so on. It is also employed in later grammatical works of Paninian school, poetics, Hindu law, and other branches of Indic Studies. In one sense this language is considered as language of philosophy in India. It is therefore, strongly recommended to undertake the study of Navya-Nyaya language and the ontology of Vaisheshikas for the students of any Indian Shastric school, without which one cannot paraphrase a single line of Shastric monograph written in Navya-Nyaya style. Hundreds of monographs dealing

In Public domain. Digitization Muthulakshmi Research Academy

with different subjects in different disciplines are authored in Navya-Nyaya language that show the influence of this language on Indian schools of thought.

Any school that comes down from ages of thousands of years will find many shifts in its life. The Nyaya school is not an exception. It has shows its readiness to accept new changes and took many directions whenever need arose. If we look at the history of Nyaya Philospophy we could understand the tendency of this school to grow in different directions. This tradition continued till recently with the development of Navya Nyaya from the dialectic mode to a Representational and defining way. The central theme of these works was Vyapti - the concomitance relation between reason and the syllogism of logical arguments.

The term Nyaya is defined by Gotama as the evaluation of the concepts, ideas and categories with the aid of pramanas - evidences. Among the pramanas - the means of knowledge, anumana or inference has been placed in a prominent role. For this reason, this school always had an opportunity to improve its theories. the inference enjoys tremendous freedom in postulating and floating new ideas. The Vaisheshika school which deals with the ontology has been considered as a sister school of thought to the Nyaya school. These two have a lot to share in common. Hence, in later developments these two streams became one and gave birth to a new logician school called 'Navya Nyaya' the Neo-Nyaya school. Avayava which literary means 'part' refers to the Part of the whole of Nyaya the complete syllogism. There are five parts according to Nyaya school.

Pratijna = proposition, Hetu = reason, Udaharana = illustration, Upanaya = application and Nigamana = conclusion are the five parts of a syllogism. These parts find very important role in the tenets of Nyaya school. They are defined with a rigorous and meticulous technical language. The inferential argument in Nyaya school shall be five-membered syllogism that makes the reasoning complete. This is sea of having five members is contested by opponent schools of Nyaya like Meemamsa and Vedantins. They reduce the number to two to three. The commentary on Gadadharas commentary on the text of Tatva Chintamani Deedhiti by Raghunatha Shiromani on the portion called Avayava. This work is a part of studies in the Post Graduation level.

In Public domain. Digitization Muthulakshmi Research Academy



krishnam Bhattiya a commentary of Gadadharas work on Avayava is a very erudite and useful commentary. Unfortunately it was not available in print for many years. The need of hours is met by the publication of this work.

I wholeheartedly appreciate the efforts put by the young and promising Scholar Pandit Sukeshacharya Jalihal with the assistance of Dr. V. Subrahmanyam, Deputy Director, a highly skilled and qualified editorial staff of the Sanksirt Acadmy. I wish that this series on Nyaya works may be continued that bring may Nyaya works to light of the day. I on behalf the Nyaya fraternity thank the editors and the authorities.

**With Pranams**
**Dr. Shrinivasa Varakhedi**

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy 

# भूमिका

आपादमौलिपर्यन्तं गुरूणामाकृतिं स्मरेत्।

तेन विघ्नाः प्रणश्यन्ति सिध्यन्ति च मनोरथाः॥

## अनुमानम्

'आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति श्रुत्या दर्शनस्य निश्श्रेयससाधनताप्रतिपादनात् प्रत्यक्षस्यैव प्राबल्यमित्यनुमानं प्रमाणत्रयमध्ये द्वितीयं भवति। यद्यपि

"प्रत्यक्षागममाहात्म्यादनुमानं प्रमाणताम्।

याति नैवान्यथा तस्य नियतत्वं क्वचिद्भवेत्॥" इति ब्रह्मतर्कवचनादनुसृत्य मानमनुमानमिति अभियुक्तनिर्वचनोक्तेश्च आगमापेक्षयापि दुर्बलमेवेदमिति तथ्यम्। अत एव श्रवणानन्तरमेव युक्त्यनुसन्धानरूपमननस्यावतार इति अनुमानं तृतीयमेव भवितव्यम्। तथापि वाक्यार्थावधारणात्मकश्रवणस्य तात्पर्यनिर्णायकलिङ्गावलम्बित्वात् अनुमानं द्वितीयतयैव परिगण्यते सर्वत्रेति स्थितिः। ततश्च अज्ञातकरणं हि प्रत्यक्षं ज्ञातकरणादुत्कृष्टमिति स्पष्टतमेऽपि अनुमानस्य प्रमाणराजतां ये खलु मन्यन्ते तद्वादः केवलं प्रज्ञावाद इत्येव भवति।

तत्रैके ब्रुवन्ति - प्रवृत्तिसामर्थ्य-तज्जातीयत्वान्यतर-लिङ्गादन्यत्रानभ्यासादि-दशापन्न-ज्ञानसामान्ये प्रमात्वावधारणेऽपि लिङ्गग्राहिणश्च ज्ञानस्य मानसप्रत्यक्षात्मकस्यादृष्टव्यभिचारितया परितो निरस्तसमस्तविभ्रमाशङ्कस्य स्वतः प्रामाण्यमिति अनवस्थाऽप्रसक्तेः अनुमानमेव प्रामाण्यनिश्चयकत्वात्प्रमाणराजताया भाजनम्। बृहदारण्यके श्रवणानन्तरं मननविधानात्, छान्दोग्येऽपि 'ग्रामाद्ग्रामं गच्छन् पण्डितो मेधावी' इति मेधाविपदेनानुमानावलम्बनस्यावश्यकतोक्त्या च श्रुतिसम्मतोऽयं विचारः। 'चक्षुर्वै सत्यम्' इत्याद्यागमास्तु अर्थवादमात्रमिति अनुमानमेव प्रमाणराजतां भजत इति वाचस्पतिमिश्रादिवचनसमुद्धारपुरस्सरं स्वाशयमाविष्कुर्वन्ति।

अत्रेदं वक्तव्यम्। अस्वप्रकाशज्ञानमात्रस्वीकारे स्वतः प्रमाण्यस्य एकत्राप्यशक्यत्वात्, ज्ञानमात्रे लिङ्गाद्यनुसन्धानप्रक्रियाया अनुभवानारोहात्, दृष्टव्यभिचाराव्यभिचारज्ञानसामान्यधर्म-समुत्थापितशङ्काकलङ्कनिष्कासनार्थमप्यव्यभिचार एव सङ्गतस्य वीजान्तरस्य साक्षिपर्यन्तानुधावन एव सम्भवात्, प्राशस्त्यपरस्याप्यर्थवादस्य स्वार्थे प्रामाण्यस्याकारे समर्थनाच्च नव्यानामयं

In Public domain. Digitization Muthulakshmi Research Academy

अनुमानप्रमाणराजताविचारः सर्वात्मनाऽसमञ्जस एव। 'अन्वीक्षिकी' शब्दभाजनस्य शास्त्रस्यायं वादः कथं खलु सम्मतस्स्यादिति नातिवक्तव्यमस्ति।

## अनुमानद्वैविध्यम्

तच्चानुमानं द्विविधं स्वार्थं परार्थमिति प्रायः समस्तदार्शनिकसम्मतः प्रमाणारूढश्च विभागः। "परोपदेशमनपेक्ष्य स्वयमेव व्याप्तिं ज्ञात्वा व्याप्त्यनुसारेण विवक्षितस्थले व्याप्यं च प्रतीत्य व्याप्तिं च स्मृत्वा व्याप्यमनुसन्धत्ते यत्तत्स्वार्थानुमानम्। इदमेव व्याप्त्यादिज्ञानं परोपदेशमपेक्ष्योत्पद्यते चेत्तदा परार्थानुमानमित्युच्यते।" इति **टीकाचार्योक्त्या,**

"यदा पुनः स एवार्थः परवाक्येन बोध्यते।
तदा परार्थमित्याहुस्तयोरेतावती भिदा॥"

इति **मीमांसकोक्त्या** च वैदिकदार्शनिकानामप्ययं विभागः सम्मत इति स्पष्टम्।

**विशिष्टाद्वैतिनस्तु**-"सर्वेषामप्यनुमानानां स्वप्रतिसन्धानवलेन प्रवृत्ततया स्वव्यवहार-मात्रहेतुत्वेन स्वार्थत्वात्, यदि वाक्यप्रतिपादितत्वमात्रेणानुमानस्य परार्थत्वं तदा प्रत्यक्षागमयोरपि तथा विभागप्रसङ्गः केषुचिदर्थेषु प्रमाणतया तयोरेवाभिधेयत्वात्" इत्यादिकारणपुरस्सरमस्या-नुमानविभागस्यायुक्ततां मन्यन्ते।

तत्रेदं त्ववधेयम्। लिङ्गज्ञानात्मकस्यानुमानस्य ज्ञानजनकभेदाद्द्वैविध्यवदज्ञातकरणे प्रत्यक्षे तदापादनाप्रसक्तेः, शब्दज्ञानस्य तु शब्दग्राहकमात्रग्राह्यतया वाक्यप्रतिपाद्यत्वासम्भवात्, शब्दस्य शब्दार्थोभयवोधनसामर्थ्ये च तत्त्वस्य शब्दमात्रेऽव्यभिचारितया विभागासाधकत्वात्, अवयवसङ्ख्यानियमादिमात्रविमर्शेऽपि ब्रह्मतर्के विभागप्रतिक्षेपाभावाच्च स्वार्थपरार्थभेदेनानुमान-द्वैविध्ये न कोऽपि क्षुद्रोपद्रव इति।

**वस्तुतस्तु** - सर्वं हि प्रत्यक्षं स्वार्थमात्रपर्यवसायि शब्दस्तु परार्थैकपर्यन्त इति लिङ्गज्ञानमात्रं हि स्वपरोभयार्थतयानेकान्तमिति वैलक्षण्यं स्पष्टमेव। न हि स्वप्रयुक्तशब्देन स्वशाब्दवोधः कुत्रचिदुपयुक्तः अर्थं बुद्ध्वा शब्दस्य रचितत्वात्।

## स्वार्थपरार्थशब्दार्थः

इदमत्रालोचनीयम्। किमयं विभागः प्रयोजनभेदादुत प्रयोजकभेदादिति। अनुमानस्य प्रयोजनन्त्वनुमितिः। न हि तत्र किञ्चित् वैजात्यम्। **प्राञ्चस्तु** - विभिन्नसामग्रीप्रयोज्यत्वात्

In Public domain. Digitization Muthulakshmi Research Academy


अनुमित्योः, तत्र प्रयोज्यतावच्छेदकतया वैजात्यमुपयन्ति। स्वार्थनुमितौ अप्रामाण्यज्ञानानास्कन्दितपरामर्शत्वेन हेतुता। परार्थानुमितौ तु - अप्रामाण्यज्ञानास्कन्दितत्वेऽपि न्यायप्रयोज्यविजातीयपरामर्शत्वेन हेतुता। तथा च प्रयोज्यतावच्छेदकतया स्वार्थत्वपरार्थत्वरूपानुमिति -वैजात्यसिद्ध्या स्वार्थानुमितिकरणत्वं स्वार्थत्वं परार्थानुमितिकरणत्वं परार्थत्वमिति प्राचां वादः। परन्तु परार्थस्थले अप्रामाण्यज्ञानास्कन्दितादनुमित्यभ्युपगमे न्यायजन्यज्ञानस्यैवोपनयार्थविषयकत्वेनानुमितिहेतुतासम्भवात्परामर्शान्तरस्वीकारवैय्यर्थ्यापत्त्यादिदोषग्रस्तत्वादयुक्तोऽयं वाद इति। अधिकं **कृष्णम्भट्टीये** स्पष्टम्।

तर्हि प्रयोजकभेदादयं विभाग इति युक्तम्। अत एवाभियुक्तैः 'इदमेव व्याप्त्यादिज्ञानं परोपदेशमपेक्ष्योत्पद्यते चेत्तदा परार्थानुमानमित्युच्यत' इति उक्तम्। अत्र 'इदमेव' इति कथनात् न स्वरूपे भेदः किन्तु प्रयोजकमात्रे भेद इति विज्ञायते।

**यद्यपि** न्यायसूत्रभाष्यादौ – 'अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं च' इति त्रैविध्यमेव गदितम्। वृत्तौ विश्वनाथोऽपि न स्वार्थपरार्थभेदं निजगाद। "तच्चानुमानं त्रिविधं केवलान्वयि-केवलव्यतिरेकि-अन्वयव्यतिरेकिभेदादि"ति मणिकारकृतः विभागः। 'तच्चानुमानं परार्थं न्यायसाध्यमिति' अवयवप्रकरणारम्भवचनन्तु न्यायसाध्यतानिष्ठविधेयतानिरूपितोद्देश्यतावच्छेदकसमर्पकं न विभागपरम्। तस्मादयं विभागः न्यायनयसम्मतः कथमिति जिज्ञासा भवत्येव। **तथापि** – न्यायसारादिप्राचीनप्रबन्धेषु तर्कसङ्ग्रहादिष्वर्वाचीनेषु च समादृतोऽयं विभाग इति स्पष्टं न्यायमतसम्मतोऽयं विभागः।

**अवयवसंज्ञाया औचित्यम्**

"तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञा-हेतू-दाहरणो-पनय-निगमनानि निरूप्यन्त" इत्यादिमवाक्यघटिततया समारब्धोऽयं प्रकृतः तत्त्वचिन्तामणिग्रन्थभागः 'अवयवप्रकरणम्' इत्येव यत् प्रसिद्धं विद्यते तत् कुतः? 'न्यायस्तदवयवाश्च निरूप्यन्त' इति प्रतिज्ञासङ्गततया प्राथमिकन्यायपदाभिधेता किमर्थमुपेक्षिता? परार्थानुमानप्रकरणाख्या वा कुतो न विहिता? इत्यादिजिज्ञासायां, दार्शनिकानां यदवयवस्वरूपसङ्ख्यादिविषये महान् विवादः नियमानियमविचारावसानस्तदनुपेक्षणीयं वीजमस्यावयवाख्यालाभ इत्युक्तिर्नानुचिता भाति। निश्श्रेयसाधिगमसाधनतत्त्वज्ञानविषयाणां परिगंणनावसरे प्राथमिके गौतमसूत्रेऽपि "प्रामाण-

In Public domain. Digitization Muthulakshmi Research Academy


प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव" इत्यवयवशब्दनिर्देशोऽपि तत एव समुचितो भवति। "समूहमपेक्ष्यावयवा उच्यन्ते" इति कथयता तद्भाष्यकृतापि नायमवयवः समवायिकारणार्थ इति स्पष्टीकृतं यत्तदपि तच्छब्दवेद्यस्य मतभेदभागितां सूचयतीति स्फुटम्॥

**अवयवसङ्ख्यायां मतभेदः**

साधनीयस्यार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते तस्य न्यायसंज्ञस्य वाक्यसमूहस्य घटकतामापन्नां इमे अवयवा एक-द्वि-त्रि-चतुः-पञ्च-दशत्वात्मकानेकसङ्ख्या-साहित्येन बहुधा वादिभिः परिगणिता इति तु "पिण्डे पिण्डे मतिर्भिन्ने"त्यत्र दृढं निदर्शनम्। "प्रतिज्ञा-हेतु- उदाहरण-उपनय-निगमनान्यवयवा" (1-1-32) इति सूत्रोक्तावयवपञ्चकेन सह "जिज्ञासा-संशयः- शक्यप्राप्तिः-प्रयोजनं संशयव्युदास" इति तदन्यपञ्चकस्यावयवतां वदन्ति **जरन्नैय्यायिकाः**। तत्र च जिज्ञासादिपञ्चकं केवलं कथाप्रवृत्त्युत्थापकं न तु परप्रतिपादकमिति वहिर्निष्कासितं न्यायभाष्य-वार्तिकादिनिवन्धेषु। तस्मात् प्रतिज्ञादिपञ्चकस्यैवावयवत्वमिति न्यायमतम्। "प्रतिज्ञा-अपदेश-निदर्शन-अनुसन्धान-प्रत्याम्नाया" इति शब्दान्तरं प्रयुञ्जानैः **वैशेषिकैरपि** तदेव पञ्चकमङ्गीकृतम्। विभागोद्देशस्य नियमार्थतां मन्यमानेन वार्तिककारेण दशावयववादवत् त्र्यवयववादोऽपि कटाक्षीकृतः। यद्यपि "प्रतिज्ञा-हेतु-उदाहरण-उपनयभेदेन चतुरवयवमिति मीमांसका" इति कुत्रचिदुल्लेखेऽपि भाट्ट-प्राभाकरादिभेदेन द्विविधेऽस्मिन् **मीमांसकदर्शने** प्रसिद्धप्रवन्धेषु त्र्यवयववाद एव समुपलभ्यत इति वार्तिके तदेव साक्षान्नियन्तव्यतया निर्दिष्टमिति नास्पष्टम्। यथा हि गतार्थताशङ्कामुत्थाप्य पञ्चावयववादं तिरस्कुर्वाणैः मीमांसकैस्त्र्यवयववादः समुट्टङ्कितस्तथैव तन्मार्गगामिनः मायातनयानुयायिनः 'उदाहरण-उपनयौ द्वावेव' इति स्वाशयमाविष्कुर्वन्ति। अत्रान्तरे **धर्मकीर्तिना** एकावयववादोऽपि समुपस्थापित इति ज्ञायते। विना चावयविनमियमवयवाह्वा परिभाषामात्रमिति नातिवक्तव्यमत्र। तदेवमवयवसङ्ख्यायां मतभेदः वहुधा प्रसिद्धः॥

**आकाङ्क्षानुसारं पञ्चानामवतारः**

**गौतमीया** मन्यन्ते - वाक्यप्रयोगस्य आकाङ्क्षानुसारित्वात् साध्यानुपस्थितौ हेत्वाकाङ्क्षा-नुदयात् तदुपस्थापनाय आदौ प्रतिज्ञावाक्यं भवति। ततः कस्मात् प्रमाणादिदं ज्ञेयमित्याकाङ्क्षायां साधनताभिव्यञ्जकविभक्तिमल्लिङ्गवचनं समुचितमिति हेतूपन्यासः। ततः 'कथमस्य गमकत्वम्'

In Public domain. Digitization Muthulakshmi Research Academy



इति सामर्थ्यजिज्ञासायां व्याप्तिपक्षधर्मतारूपयोः सामर्थ्ययोः प्रतिपादनावश्यम्भावात् तयोश्च व्याप्तेः प्राथम्यात् तत्प्रदर्शनार्थमुदाहरणस्यावतारः युक्तः। मध्यस्थनिष्ठानुमितिकारणतृतीय-परामर्श-विषयताया व्याप्तिपक्षधर्मतयोः समानतायामपि प्रकारतावच्छेदकभानपुरस्सरं प्रकारभानं भवतीति प्रथमं प्रकारीभूतव्याप्यावच्छेदकीभूतव्याप्तेः प्रदर्शनं समीचीनम्। ततः पक्षधर्मता-प्रतिपादनार्थम् उपनयस्य, सर्वस्यैकवुद्ध्युपारूढत्वार्थम् अवाधितत्व-असत्प्रतिपक्षितत्वलाभाय च निगमनस्यागमनमिति गौतमीयसमादृतः पञ्चानां सक्रमो नियमः॥

**मीमांसकास्तु** – न्यायवौद्धदर्शनपरीक्षां विदधानाः स्वप्रवन्धेषु

तच्च पञ्चतयं केचिद्द्वयमन्ये वयं त्रयम्।

उदाहरणपर्यन्तं यद्वोदाहरणादिकम्॥ (शास्त्रदीपिका पृष्ठम् - 64)

तदेवं पौनरुक्त्येन तथाध्याहारदोषतः।

तर्कवौद्धमते हित्वा वयं त्र्यवयवे स्थिताः॥ (मानमेयोदयः)

इति प्रतिज्ञया निगमनस्य हेतुना चोपनयस्य गतार्थतामुपस्थाप्य द्व्यवयवसौगतवादे तु साध्याध्याहारदोषं प्रदर्श्य त्र्यवयवनियमवद्धादराः दृश्यन्ते। व्यवहारे भट्टनया इति प्रथिता **शाङ्करास्तु** त्र्यवयवनियमनिष्ठाः प्रतिज्ञादित्रिकम् उदाहरणादित्रिकं वावश्यकमिति ब्रुवाणा अपि,

"प्रथमं साध्यनिर्देशाभावे व्याप्त्यभिधानस्याप्राप्तकालत्वात्" इति (वेदान्तपरिभाषा-शिखामणिः) हेतुमुपस्थाप्य प्रतिज्ञादित्रिकावश्यकतापक्ष एव स्वनिष्ठां प्रकटयन्तीतीषद्वैषम्यम्।

तत्र **पञ्चावयवमतावलम्बिनामाशयस्तु** – जिज्ञासाभेदाद्वाक्यभेदप्रसक्तिरिति प्रथमं साध्यगमकजिज्ञासामात्रे हेतुसमुत्थानात्, पक्षधर्मतावगमकवाक्यावतारेऽजिज्ञासितार्थाभिधाना-पत्तेः पृथगेव तज्जिज्ञासोत्थानपुरस्सरम् उपनयाभ्युपगमस्तथा अवाधितत्वादिलाभाय निगमनावतारश्चावश्यक इति।

**तदपरे न क्षमन्ते**। अनुमित्युपयोगिवोधस्यैवावयवप्रयोजनत्वात् तस्य च वाक्यत्रयेणापि सम्भवात्, अन्यथा त्र्यवयववादिसमीरितपरार्थानुमानतः बोधासम्भवे परवादिना तन्निराकरणो-द्योगायोगात्, प्रतिवन्धकाभावस्यावयवफलत्वायोगात्, तथात्वे वाधविधूननाय निगमनमिव कामिनीजिज्ञासादिनिरासार्थमवयवान्तरप्रयासापत्तेः न युक्तोऽयं दशार्धावयवनियमसमय इति॥

In Public domain. Digitization Muthulakshmi Research Academy

**नियमानौचित्यविचारः**

"न हि वादिवाक्यमाप्तवाक्यतया व्याप्त्यादिविशिष्टलिङ्गप्रमापकम्। येनाकाङ्क्षाक्रमेणावयवनियमः स्यात्। वादिनोः परस्परमनाश्वासात्। किन्तु गृहीतव्याप्त्यादिकं प्रति तत्स्मारकत्वेनागृहीतव्याप्त्यादिकं प्रति तु तज्जिज्ञासाजनकत्वेनोपयुज्यते। तथा च व्याप्तिपक्षधर्मताभ्यां वा व्याप्तिसमुचितदेशसिद्धिभ्यां वा विशिष्टलिङ्गस्मृतिः यावता भवति तावदेव वक्तव्यम्। अन्यथा आधिक्यापातात्" इत्यादिरीत्या प्रकृतः अवयवसङ्ख्यानियमविचारः सर्वोऽप्यकाण्डताण्डवायित इति **तर्कताण्डवकाराः श्रीमद्व्यासतीर्थाः** समर्थनं कुर्वन्ति। प्रतिज्ञाद्येकैकवचनविन्यासवैलक्षण्येन स्मृतिजिज्ञासान्यतरफलकवाक्यप्रयोगप्रकारं प्रदर्शयन्तः अवयवनियमानौचित्यं विस्तरेण निरूपयन्ति। पक्षधर-रुचिदत्त-दीधितिकारप्रभृतीनां तर्कताण्डवोत्तरकालीनतार्किककृतिकाराणां परामर्शार्थमवतारिताभिनवताण्डवाः **श्रीसत्यनाथश्रीपादास्तु** "परस्य परस्मिन्नाप्त्यनिश्चयेन 'तस्मात्तथा' इति प्रयोगेऽपि अवाधितत्वाद्यलाभात्" इति निगमनवैयर्थ्यं रीत्यन्तरेण सङ्गमयन्ति॥

तदेवमवयवसङ्ख्यानियमादिविवादे समसमयकटाक्षभाजने प्रकृतचिन्तामणिप्रकरणस्य योऽयं प्रचलितः 'अवयव' इति संज्ञाविशेषः तस्यौचित्ये नाधिकं प्रतिपाद्यं वीजमवशिष्टमिति, प्रकृत-मणि-दीधिति-गादाधरी अधिकृत्य यत्किञ्चिदिह वाच्यमित्येव साम्प्रतं समुचितम्॥

**न्यायलक्षणम्**

अत्र समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यत्वं न्यायत्वमिति पक्षे अत्रैव वाक्येऽतिव्याप्तिरिति मणावुक्ते, प्रतिपादकत्वप्रतिपादकत्वादस्मिन् वाक्ये कथमतिव्याप्तिरिति शङ्कायाः समाधानार्थं 'समस्तरूपोपपन्नलिङ्गमि'ति वाक्येऽतिव्याप्तिरिति गादाधरी प्रवृत्ता। एवमपि विशेषरूपेण पक्षसत्व-सपक्षसत्व-विपक्षासत्व-अवाधित्व-असत्प्रतिपक्षितत्वरूपाणां निवेशेनात्रानतिव्याप्तौ 'पक्षसत्त्वादि-नानाधर्मवत् लिङ्गम्' इति वाक्येऽतिव्याप्तिः भवत्येवेति कृष्णम्भट्टीये स्पष्टीक्रियते। तदेवमतिव्याप्त्या उदाहरणादित्रिकेऽपि समावेशाल्लक्षणमिदमुपेक्ष्य "अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वम्।" इति मणिकारेण निष्कृष्यते। तत्र प्रयोजकान्तस्य परिचायकतां प्रतिपाद्य "तादृशयत्किञ्चिच्छाब्दवोधनिरूपिता या या कारणता तदवच्छेदककोटिप्रविष्टयत्किञ्चिज्ज्ञानीय विषयताश्रयवर्णत्वव्यापकसमुदायत्वम्" इति पर्यवसानं विहितं

In Public domain. Digitization Muthulakshmi Research Academy



गादाधर्याम्। अत्र वर्णत्वव्यापकत्वनिवेशसार्थक्यनिरूपणावसरे कृष्णम्भट्टीयं विवरणं नानामत-विमर्शवन्धुरमतिसुन्दरं समाकर्षत्यखिलकोविदमनस्सङ्कुलमित्यविशयविषयः विशेषाशयः। अग्रे चावच्छेदकताकूटादिनिवेशविचारश्च विपश्चितामतीव चारुतरश्चकास्ति।

दीधितिकारास्तु – मण्युक्तलक्षणे दोषं विचिन्त्य "उचितानुपूर्वीकप्रतिज्ञादिपञ्चक-समुदायत्व"मिति न्यायलक्षणं वर्णयामासुः। तत्र उचितानुपूर्वीकत्वनिष्कर्षः "स्वाश्रयीभूत-प्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्ति यद्यत्समुदायत्वं तदन्यत्वम्" इति गादधार्यां सुन्दरतया निरूपितः। अत्रैव प्रसङ्गात् शाब्दवोधप्रक्रियोपयोगिविचारश्चानेके प्रदर्शिताः। तत्र "गुणानां च परार्थत्वात् असम्बन्धः समत्वात् स्यात्" इति जैमिनिसूत्रमुदाहृत्य विधेयतया भासमानयोः अवच्छेद्यावच्छेदकभावापन्नविषयिताकत्वरूपसम्वन्धः न युक्त इति प्रतिपादनावसरे कृष्णम्भट्टीये असम्बन्धे परार्थत्वमात्रस्य हेतुत्वानुपपत्त्या समत्वस्यापि हेतुतया स्वीकारस्यौचित्यं सम्यग् विवेचितं दृश्यते॥

## अवयवलक्षणम्

'अनुमितिचरमकारमलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वम्' इति मणिकारेण अवयवलक्षणं प्रदर्शितम्। 'न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वम्' इति दीधितिकृता निष्कर्षः प्रकाशितः। तत्र प्रतिज्ञाद्यन्यतमत्वशब्दार्थविचारे नानाप्रकारेण परिष्कारेऽन्ततो गत्वा गादाधर्यामति-गौरवदोषं प्रदर्श्य प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाद्यटितत्वमिति लक्षणान्तरमवतारितम्। तत्र कृष्णम्भट्टीये अतिगौरवशब्दार्थविवेचनपरतया प्रतिज्ञाद्यन्यतमत्व-परिष्कारान्तरविमर्शः यः प्रदर्शितस्तत्र विपश्चिताञ्चेतश्चमत्कारसमाकुलं चञ्चरीकति। एवमेव स्वानवच्छेदकविषयिताविशिष्टजनकतानाश्रयत्वं ज्ञाने विशेषणमिति वस्तुतस्तु कल्पे लक्षण-गमनाशङ्कापरिहारादिविचारः, वाक्यद्वयपर्याप्तोदाहरणत्वनिर्वचनविवेचनप्रकारश्च नूनमुल्लेखार्ह-विशेषविषया इत्यसंशयम्।

## प्रतिज्ञालक्षणम्

साध्यनिर्देशः प्रतिज्ञा इति सूत्रकारीयलक्षणे दोषमनीषया मणिकारेण स्वाभिमत-लक्षणम् अनुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकवाक्यत्वरूपं न्यायावयवत्वसहितं प्रति-पादितम्। परन्तु सूत्रकारीयलक्षण एव सौष्ठवं प्रकटयन् दीधितिकारः मणिकृद्विहितप्राचीन-

In Public domain. Digitization Muthulakshmi Research Academy

तान्त्रिकविमर्शनेनापक्षपातभावं मणिकारविषय एव समन्वयति यत्तदेव तार्किकसमये परसमयतो अतिशयं वैलक्षण्यं च व्यवस्थापयति। तावदेव न, मणिकृल्लक्षण एव दोषप्रदर्शनपुरस्सरं संशय-निवर्तकवोधजनकत्वपर्यवसायि लक्षणान्तरमितिरीत्या वहुपराक्रान्तं दीधितिकृता नैकप्रकार-लक्षणप्रणयनकौशलेनेति तत्र च गदाधरभट्टाचार्यचातुर्यमतिशायीति 'अवयवेषु गदाधर' इत्याभाणकसार्थक्ये विपश्चितः प्रमाणम्। कृष्णम्भट्टीयन्तु विवरणं ततोऽप्यतिजटिलविचार-समाकुलं परिभाषामात्रेण विवरणाभिधाभाजनमिति स्पष्टमेव।

अस्मिन् प्रकरणे शाब्दवोधप्रक्रियोपयोगिविचाराश्च अनेके प्रसङ्गतः प्रतिपादिता दृश्यन्ते। तत्र च "पचति चैत्र इवायम्" इति पाककर्तृचैत्रसदृशोऽयमित्यर्थविवक्षया प्रयोगापत्ति-वारणार्थं आख्यातार्थस्य इतरविशेषणविशेषणतया भानस्याव्युत्पन्नत्वं गादाधर्यां प्रतिपादितम्। तत्र 'पश्य मृगो धावति' इत्यत्र दर्शनविशेषणमृगविशेषणतया धावानानुकूलकृतिरूपाख्याता-र्थस्य भानं कथं घटत इति शङ्कामुत्थाप्य, तद्वाक्यस्यानेकधाऽर्थवर्णनविमर्शं निरूप्य, धात्वर्था-तिरिक्तविशेषणतावच्छेदकतया आख्यातार्थभानस्य अनभ्युपगमपरतया गादधर्यांशयं प्रकटयत् कृष्णम्भट्टीयं विवरणं, "नीलो घटो भवति", "आमन्त्रय शिष्यो धावति", "अस्ति तण्डुलः पचति", "क्रमादमुं नारद इत्यवोधि सः" इत्यादिनानास्थलेषु शाब्दवोधनिरूपणं विदधद-पूर्वार्थसमृद्धं सद्विदुषां तोषातिशयकारणं विलसति॥

हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं, लिङ्गाविषयकलिङ्गिविषयकज्ञानजनक-न्यायावयवत्वम्, इति नैकधा प्रतिज्ञालक्षणप्रकारं प्रदर्श्य प्रतिज्ञात्वं जातिरूपं नाभ्युपेयमिति व्यवस्थाप्य प्रतिज्ञाया साधनाङ्गत्वं मणिकारेण सम्यक् समर्थितमिति तत्तत एवाधिकमव-गन्तव्यम्॥

## हेतुलक्षणम्

1. अनुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्यविषयकशाब्दधी-जनकहेतुविभक्तिमच्छब्दत्वं, 2. हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वम्, 3. उदाहरणप्रयोजक-शाब्दज्ञानजनकन्यायावयत्वम्, 4. साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वम्, 5. प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्तकज्ञानजनकहेतुविभक्तिमद्वाक्यत्वम्, 6. पञ्चम्यन्त-लाक्षिणिकपदवदनुमितिपरवाक्यत्वम् इति नानाप्रकारेण मणिकारेण हेतुलक्षणानि प्रदर्शितानि।

In Public domain. Digitization Muthulakshmi Research Academy


तानि च हेतुजन्यवोधविषयतावैलक्षण्येन, अभिधायकशब्दस्वरूपव्यत्यासेन, आकाङ्क्षोत्थापकत्वनिवर्तकत्ववैजात्येन, पञ्चावयवक्रमप्रयोजकरूपवैशिष्ट्येनेति नानाविधवीजैरङ्कुरितानि इति आपातत एव स्पष्टीभविष्यति। तत्र विशेषतः दीधिति-गादाधर्योः एकेन एकस्यागतार्थता यथा न भवेत्तथा व्यवस्थापिता-विचारविशेषाः तत्रैवाधिकमनुसन्धेयाः।

## उदाहरण-उपनय-निगमनलक्षणानि

अनुमितिहेतुलिङ्गपरामर्शप्रयोजकजन्यज्ञानजनकव्याप्यत्वाभिमतवन्निष्ठनियतव्यापकत्वाभिमतसम्बन्धवोधजनकशब्दत्वमिति सामान्यम् उदाहरणलक्षणम्। तत्र साध्यसाधनसम्बन्ध-साध्यसाधनाभावसम्बन्धविवक्षया विशेषलक्षणद्वयमभिप्रेतम्। दृष्टान्तप्रयोगस्यासार्वत्रिकत्वं व्यवस्थाप्य दृष्टान्तवचनत्वरूपप्राचीनोक्तलक्षणे स्वासम्मतिः मणिकारेण प्रदर्शिता। ततः उदाहरणे वीप्सा आवश्यकी न वेति विचारः, आवश्यकत्वेऽपि तत्पदे नेति विचारश्च निरूप्यते। उपनयलक्षणन्तु – अनुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वमिति। अनुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारणव्याप्तिपक्षधर्मताधीप्रयुक्तसाध्यधीजनकवाक्यत्वमिति निगमनलक्षणम्। तत्र च निगमनप्रयोजनविचारादिनिरूपणतः तदावश्यकतां मणिकृदभिप्रैति यत्तत्र च युक्तायुक्तविचारः पूर्वमेव प्रस्तापित न पिष्टपेषणप्रक्रियामाश्रयाम इति सङ्क्षेपः।

## ग्रन्थकारपरिचयः

चिन्तामणिकारस्य गङ्गेशोपाध्यायस्य दीधितिकृतः रघुनाथशिरोमणेः तद्व्याख्यान -धुरीणस्य गदाधारभट्टाचार्यस्य विषये तु परिचयप्रदानार्थं वचसां प्रसारः केवलं रविसोमादि-परिचायकपुरुषवत् तद्दृष्टिमात्रहेतुः तत्परिचायकमात्रफलक इत्यफलः प्रयासः। प्रज्ञा-प्रतिभा-परिश्रम-प्रावीण्य-परिपूर्ण-परमाद्भुत-पराक्रमस्वरूपाणामेतेषां मणिकार-शिरोमणि-भट्टाचार्यापर-नामधेयप्रसिद्धानां प्रवन्धसन्दोह एव तत्परिचयं सुष्ठु विधत्त इति देश-काल-वंश-ऐतिह्य-प्रभृतिविचारे न लेखनीं व्यापारयामः। सम्पादकाभ्यामेव तत्र प्रयत्नो विधास्यत इत्यपि तत्र नावश्यकतां मन्यामहे।

परं कृष्णम्भट्टविषये तु किञ्चिदिह वक्तव्यं भवति। अयं किल महानुभावः गादाधरी-व्याख्याकारेषु प्राथम्यं वहन् यां किल विद्यापरम्परां समुदजीवयत् तत्र उपाध्यायकाशी-तिम्मणाचार्यः प्रविष्ट ,इति ज्ञाते तदीयविद्याप्रसार एव मैसूरुप्रभृतिदाक्षिणात्यपण्डितमण्डलीषु

In Public domain. Digitization Muthulakshmi Research Academy

प्रवहित सुस्पष्टं भवति। मुम्मुडिकृष्णभूपालमहाराजस्य आस्थाने भट्टत्र्यम्बकादिप्रतिवादिभयङ्कर-पण्डितप्रकाण्डानपि स्ववादकौशलेन स्तब्धान् विधाय मैसूरुसंस्थानमर्यादातिशयं संरक्ष्य महाराजादिसम्मानितनिजवैदुष्यवतः व्युत्पत्तिवादादिषु क्रोडपत्रविशेषं विरचितवतः वेदान्तेऽपि न्यायशैलीमनुसृत्य परिष्कारवन्धुरप्रवन्धसन्दोहप्रणयनतः प्रथितदिव्ययशसः श्रीकाशीतिम्मणाचार्यस्य न्यायशास्त्रोपदेशकः तत्पितृव्यः श्रीरमणशर्मा अस्य कृष्णम्भट्टस्य साक्षादन्तेवासिप्रवर इति श्रीमतो कृष्णम्भट्टस्य विद्यापरम्पराया समृद्धतायां नाधिकं वक्तव्यं शिष्यते। ततश्च अष्टादशशतकस्यापरार्धेऽयं स्यादिति समुचितस्तत्कालविचारः। देशस्तु विठलेशोपाध्यायच्छात्रता किंवदन्त्या महाराष्ट्रप्रान्त इति सम्भाव्यते। विलुप्तसामाग्रीकेण नाधिकं वक्तुं प्रभूयत इति सर्वे जानन्त्येवेति विरमामोऽस्माद्विचारात्।

**अभिनन्दनीयः प्रकाशनोद्यमः**

यद्यपि कृष्णम्भट्टीयसहित-गादधर्या अवयवप्रकरणग्रन्थः पूर्वं मुद्रापित एव, तथापि शतवर्षपुरातनमुद्रितपुस्तकानामनुपलम्भात्, उपलम्भेऽपि जीर्णपत्रभूयिष्ठपुस्तकानामनुपयोगात्, कथञ्चिदुपयोगार्थमुद्यमेऽपि तेलुगुलिपिविन्यासतः अध्ययनाध्यापनयोः क्लेशावहत्वाच्च, सर्वैस्तर्करसिकैरस्य ग्रन्थस्य देवनागरीलिपिसंयुक्ततया मुद्रणमत्यन्तमपेक्षितमिदानीं 'संस्कृत अकाडमी' संस्थातः संसाध्यत इति समभिनन्दनीयोऽयं प्रवन्धप्रकाशनोद्यमः। तत्र च ये ये अधिकारिणः प्रोत्साहकाः, अथ च सम्पादनकर्मणि मुद्रणशोधनादिपरिश्रमेण विशेषतः सन्नद्धौ पं. सुकेशाचार्यः तथा डा. सुब्रह्मण्यशर्मा चेति तरुणौ विद्वांसौ, सहयोगकारिणश्चेति सर्वेऽपि, तर्कवुभुत्सुसहृदयसमुदयेन नितरामभिनन्दनीयाः, एवमेव भविष्यत्यपि काले विद्वज्जनोपयोगि प्रवन्धान्तरप्रकाशनतः सुधीसमुदायसम्मुदो निदानतामासादयन्त्विति भगवति विद्यापतौ भारतीपतिसंसेवितलक्ष्मीहयग्रीवे सप्रार्थनमाशास्यन्ते। तत्रापि विशेषतः मत्प्रदत्तन्यायादिविद्याभ्यासस्य साफल्यं विदधत्, मामपि अस्मिन् प्रकाशनोद्यमे भागग्राहितामासादयन् आयुष्मान् सुकेशाचार्यः, भूमिकालेखनार्थं वारं वारं दूरभाषाकरणश्रमभारं धरन् डा. सुब्रह्मण्यशर्मा च समस्तश्रेयोविशेषभाजने भूयास्तामिति सतोषविशेषं भृशं समाशासे।

अन्ते च मुद्राराक्षसकटाक्षदूषितस्थलविशेषं स्वयं संशोध्य हंसक्षीरन्यायेनास्य प्रकाशनस्य साफल्यं सहृदयविद्वत्समुदायायत्तमिति तान् सप्रश्रयं निवेद्य, "पश्यन्तोऽपि न

In Public domain. Digitization Muthulakshmi Research Academy



पश्यन्ति मेरो रूपं विपश्चित" इति सूक्तितुल्यतया अस्य महार्थगर्भितप्रकरणस्य इयं भूमिका भासेत इति सम्भाव्य, गुणान् गुरुचरणसरोजरजोरञ्जितानथेतरांश्च मदीयभागधेयमात्रमित्यावेद्य प्रकरणरसास्वादनसमातुराणामुत्साहसहकारितया

गदाधरपदोल्लसत्प्रथिदीधितिद्योतित-

प्रकृष्टसुगुणागुणोऽवयवतत्त्वचिन्तामणिः।

विभूषित इति प्रधीमहितकृष्णम्भट्टोक्तिभिः

सदा भवतु सम्मुदः पदमिदं सुधीसंसदः॥ इति समाशास्य विरमामो विस्तरात्।

इति सुधीजनविधेयः

वाळगारु रुचिराचार्यः

In Public domain. Digitization Muthulakshmi Research Academy

# पुरोवाक्

अथेदानीं संस्कृतपरिषदा प्रकाश्यते कृष्णम्भट्टविरचितविवरणाख्यव्याख्यासंवलितः महा-महोपाध्याय-दुरवगाहन्यायशास्त्रसागरावगाहनिपुण-तार्किकचूडामणिचक्रवर्ति-पण्डितेन्द्र-श्रीगदाधर-भट्टाचार्य-प्रणीतावयवप्रकरणप्रवन्धः। अज्ञानपङ्कनिमग्नस्य जगतः समुद्धारणाय क्षेमाय च प्रवृत्तस्य वेदान्तशास्त्रस्य अध्ययने अध्यापने च महत्तरपाण्डित्यर्थमत्यन्तमुपकारमादधानः अयं ग्रन्थः अस्मत् परिसरतः प्रकाशं नीयत इति मोमुद्यते चेतः।

न्यायशास्त्रं वेदाङ्गमिति विदितमेव विपश्चिताम्। न्यायशास्त्रं तावत् द्विविधम्, वैशेषिकं तथा गौतमीयञ्चेति। तत्र प्रमेयप्रधानतया प्रवृत्तं शास्त्रं वैशेषिकन्यायशास्त्रं, प्रमाणप्रधानतया निर्मितं शास्त्रं गौतमीयन्यायशास्त्रमिति। प्रत्यक्षानुमानोपमानशव्दभेदात्प्रमाणं चतुर्विधमिति गौतमीयसूत्रोक्त-विचारमवलम्व्य उदयनाचार्यादिविरचितन्यायकुसुमाञ्जलिप्रभृतिकृतिरत्नानि प्राचीनन्यायशास्त्राणीति प्रकीर्त्यन्ते। गौतमीयसूत्रमवलम्व्य विद्वत्कुलचूडामणिना मैथिलपण्डितप्रवरेण गङ्गेशोपाध्यायेन निवद्धोऽयं प्रमाणचतुष्टयनिरूपणपरः तत्त्वचिन्तामण्याख्यप्रवन्धविशेषः जगद्विख्यातकीर्तिमान् विद्वदादृतश्च विराजते। अस्यैव नव्यन्यायेति संज्ञा। इत्थं प्राचीनं नवीनञ्चेति द्विविधं न्यायशास्त्रमेव वेदाङ्गमिति अनेकेषां प्रवादः प्रलापश्च। परन्तु

> ब्रह्मतर्कस्तर्कशास्त्रं विष्णुना यत्समीरितमिति,
> ब्रह्मतर्कं च भगवान् स एव कृतवान् प्रभुः।
> पञ्चाशत्कोटिविस्तारान्नारायणतनौ कृतात्।।

उद्धृत्य पञ्चसाहस्त्रं कृतवान् वादरायणः। इत्यादिप्रमाणपर्यालोचनया अवगम्यते यत् विष्णुना समीरितं शास्त्रं ब्रह्मतर्कशास्त्रमिति, तदुद्धृत्य स्वयं भगवता व्यासरूपेण कृतः ब्रह्मतर्क एव तर्कशास्त्रं नान्यदिति, श्रीमदानन्दतीर्थभगवत्पादाचार्याः स्वग्रन्थेषु अभेद्यप्रमाणेन प्रदिपादयाञ्चक्रुः।

आन्वीक्षिकीतर्कविद्यामनुरक्तो निरर्थकः, शुष्कतर्कं च वर्जयेत् इत्येवं प्रकारेण नैकवेदान्तदार्शनिकैः तत्र तत्र स्वीयग्रन्थेषु अनेकपुराणेषु च तर्कनिन्दा कृता। तस्मात् वेदाङ्गतया प्रवृत्तं शास्त्रं व्यासप्रणीतमेव ब्रह्मतर्कं नान्यदिति निश्चयेन वदामः।

यद्यपि वेदान्तादिशास्त्रेषु न्यायशास्त्रस्य अनुपादेयत्वं प्रदर्शितं तत्प्रमाणानि च दूषितानि तथापि नव्यन्यायप्रवन्धार्थाः अनायासेन ज्ञातुं न शक्याः। इत्यतः ते ग्रन्थाः गुरुमुखेन अवश्यमेव पठनीयाः ज्ञेयाश्च। वस्तुतः गौतमीयतर्कशास्त्रं व्युत्पत्त्यर्थं प्रवृत्तम्, उक्तञ्च "काणादं पाणिनीयं च

In Public domain. Digitization Muthulakshmi Research Academy

सर्वशास्त्रोपकारक"मिति। विशेषतः मणिकारादिप्रवर्तितनिरूपणसरणिं सर्वे दार्शनिकाः अनुसरन्तीति प्राचां वचः। वादकथासु च तार्किकरीत्यैव प्रोक्ताः वादाः विजयन्ते। न्यायशास्त्रेण च सम्यक्संस्कार-मासादिताविमर्शकधी-शाणसंस्कृतधारा असिरिव विपक्षान् क्षपयितुं क्षमा च भवति।

## मणिकाराणां परिचयः

गङ्गेशोपाध्यायः श्रीहर्षात्परं वर्धमानोपाध्यायात्पूर्वं चेति, इतःपूर्वतनः किञ्चिदधिकसप्तशत-तमवत्सरः एकादशशततमशकाब्दस्य चरमार्द्धमभूदिति निर्णयः[1] अनेकन्यायावतरणिकासु ज्ञेयः।

## चिन्तामणिव्याख्या-दीधितिः

असङ्ख्याताः खलु किरणायमानाः तस्य चिन्तामणिग्रन्थस्य व्याख्यानोपव्याख्यानसन्दर्भाः चिन्तामणित्वमन्वर्थं कुर्वन्ति। विश्वविश्रुतवैदग्धीकस्य काणभट्टतया प्रथितस्य रघुनाथतार्किक-शिरोमणेः कीर्तिवैजयन्ती दीधितिनामिका व्याख्या विश्वविख्याता।

यद्यपि दीधितेः अपि बहूनि व्याख्यानानि विद्यन्ते भवानन्दः-मथुरानाथः-जगदीशः-गदाधरः इत्यादिभिः विरचितानि, तेष्वपि जगदीशकृतव्याख्यनं गदाधरकृतव्याख्यनं चेति द्व एव प्रायः पठनपाठन सम्प्रदाये वर्तेते। तत्रापि समग्रः भागः एकेन पुरुषायुषा यथावन्नाध्येतुं शक्यते इति आलोच्य केचनभागा अध्ययनाध्यापनसम्प्रदाये विद्वद्भिः समुपयोजिताः विराजन्ते। ते यथा पञ्चलक्षणी, चतुर्दशलक्षणी, सिद्धान्तलक्षणी, पक्षता, अवयवः, हेत्वाभाससामान्यनिरुक्तिः, सव्यभिचारसामान्यनिरुक्तिः, सत्प्रतिपक्षः, बाधः इति। एतदतिरिक्ताः ग्रन्थाः अपि पठ्यन्ते यथा व्युत्पत्तिवादः, प्रामाण्यवादः, शक्तिवादः, शब्दशक्तिप्रकाशिका इत्यादयः।

दीधितेः प्राक् पक्षधरमिश्रविरचितः आलोकः एवं दीधितिव्याख्यानानन्तरमागतः रुचिदत्त-मिश्रविरचितः प्रकाशः इत्यादीनि बहूनि व्याख्यानानि अवतीर्णानि येषां व्याख्यानोपव्याख्यानपरम्परा च महती चकास्ति। परन्तु यदा दीधितिग्रन्थः प्रादुर्भूतः तदा सर्वेऽपि छात्राः पण्डिताश्च दीधितिमेव पठन्ति पाठयन्ति च। तेन च ज्ञायते इतरव्याख्यानापेक्षया अस्याः दीधितेः महत्वं सुव्यक्तमेव।

## दीधितिकाराणां परिचयः

[2]सप्तवर्षदेशीयः पितृहीनः रघुनाथः मातृनिर्देशेन स्वगृहासन्नायां सार्वभौमपाठशालायाम् अग्न्याहरणार्थमुपस्थितः, पचन्तमेकम् अन्तेवासिनम् अग्निमर्थयामास च। सचान्तेवासी तं

---

1,2. श्री न्यायपञ्चाननभट्टाचार्यविरचितावतरणिकान्तर्गतः निर्णयः।

In Public domain. Digitization Muthulakshmi Research Academy



रिक्तपाणिम् अवलोक्य सकौतुकं सद्य एवाग्निवर्णमङ्गारमुखाया दर्वीमुखेन निष्कास्य अवादीत् आदत्स्वाग्निमिति। प्रत्युत्पन्नमतिर्बालो रघुनाथोऽपि तत्क्षणान्निजमञ्जलिं धूलीपुञ्जेन पूरयित्वा प्रसार्य च पुरतो जगाद दीयतामग्निरिति। दैवात्तदानीमेव समागतः सार्वभौमः बालचेष्टितेन तेन प्रतिभाविशेषदर्शनतुष्टः तन्मातृसम्मतिमादाय अनुकूलदिने रघुनाथस्य विद्यारम्भं समपादयत्। रघुनाथस्य तदानीमेव वर्णोपदेशकं सार्वभौममपृच्छत् कथमेवं ककारस्य प्राथम्यं न खकारादेरिति। अनेन प्रश्नेन तुष्टतमः सार्वभौमः अवादीत् यद्यपि विदुषा ब्राह्मणेन विद्यारम्भं प्रत्यारभ्य दिनयोः बालस्य वर्णोपदेशः क्रियते तृतीयादिदिनात् लिपिशिक्षकाः कायस्थादयोऽपि भवन्तीति देशाचारः, तथापि एनं बालकं स्वयमेव सर्वमध्यापयिष्यामीति तद्दिनमारभ्य तमन्तेवासित्वेन स्वीचकार।

समा॰विद्यो लब्धतार्किकशिरोमण्युपनामा पाण्डित्यविजितमिश्रादिः चतुर्दशाधिकचतुर्दशतमशकाब्देः नवद्वीपं प्रत्याजगाम। निशितमतिः सङ्क्षिप्तोक्तावतिदक्षः रघुनाथशिरोमणिः वर्षपञ्चकाभ्यन्तर एव दीधितिनामानं ग्रन्थकुसुममनन्यासाधारणशैल्या निर्माय न्यायशास्त्रबुभुत्सूनां हृदये कञ्चनापूर्वमानन्दमाचकारेत्यत्र नाकापि संशीतिः।

## गादाधरीकाराणां परिचयः

दीधितेः विस्तृतरूपव्याख्यानकर्ता न्यायाचार्यभर्ता तर्कबुभुत्सूनां हृन्हर्ता तर्ककर्कशप्रतिभाप्रज्ञाप्रभावविहितानेकप्रबन्धकर्ता वङ्गदेशीयविद्वन्मण्डलमण्डनायितः तार्किककुलकौरववन्धुः विद्वदग्रेसरः विमत्सरः श्रीजीवाचार्यसुतः नवद्वीपान्ते क्रिस्तीयसप्तदशशताब्धावभूदिति अनेकनव्यतर्कग्रन्थमुखबन्धेषु लब्धपरिचयः।

## विवरणकाराणां परिचयः

गदाधरवाक्यार्थविशदीकरणाय निर्मितः अयं ग्रन्थः कृष्णम्भट्टीयव्याख्याग्रन्थः। अतीव प्रौढशैल्या गदाधरवाक्यानामुपरि शङ्कोपशङ्कासमाधानप्रदर्शनपूर्वकं प्रवृत्तः। गदाधरमूलवाक्यार्थबुभुत्सूनामल्पमुपकारमावहति। एवञ्च अध्ययनमध्यापनं कुर्वतां विद्यार्थिनां, विदुषां चानुभवारूढं भविष्यत्येव। एषः कृष्णम्भट्टः अष्टादशशतकान्त एव आसीदिति ज्ञायते। कृष्णम्भट्टस्तु पण्ढरपुरे अद्वैतसिद्धिलघुचन्द्रिकाव्याख्यानकर्तुः महामहोपाध्यायश्रीविठलेशमहोपाध्यायस्य शिष्योऽभूदिति श्रूयते।

In Public domain. Digitization Muthulakshmi Research Academy

**प्रकृतावयवग्रन्थः**

चिन्तामणेः व्याख्या दीधितिस्तु अतिगम्भीरा अतिसङ्क्षिप्ता। सा क्वचिन्मूलं न व्याचष्टे। यथा अस्मिन् ग्रन्थे **अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशब्दज्ञानजनकवाक्यत्वं न्यायत्वमिति** मणावुक्तम्। दीधितिकारः रघुनाथशिरोमणिस्तु तत्र काञ्चन अनुपपत्तिं मनसि निधाय तत्परिहर्तुं परिष्कारान्तं लक्षणं स्वयं जगाद। **उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वमिति**। अत्र किमिदमुचितानुपूर्वीकत्वमिति विचार्य स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्ति यद्यत्समु-दायत्वं तत्तदन्यत्वमिति परिष्कृतं गदाधरभट्टाचार्यैः। गदाधरभट्टाचार्यास्तु प्रथमं मण्युक्तं लक्षणं सम्यक् विशदीकृत्य तदुत्तरमेव दीधितिं व्याख्याति। **प्रतिज्ञाहेतूदाहरणोपनयनिगमनावयवाः** इति अवयवानां पञ्चसङ्ख्याकत्वं न्यायसूत्रे उक्तम्। मणौ **तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायः तदवयवाश्च..............निरूप्यन्ते** इत्युक्तम्।

न्यायस्य प्रतिज्ञाद्यवयवपञ्चकवाक्यरूपतया अवयवेषु अनिरूपितेषु तत्समुदायः न्यायः न निरूपयितुं शक्यते इत्यभिप्रायेण न्याय तदवयवाश्च निरूप्यन्ते इति मूलकाराणामभिप्रायः। अतः न्याचलक्षणं प्रथममादृतम्। समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यत्वं न्यायत्वमित्युक्तम्।

समस्तैः रूपैः उपपन्नं युक्तं यत् लिङ्गं तत्प्रतिपादकं ज्ञानजनकं वाक्यमित्यर्थः। पक्षसत्व, सपक्षसत्व, विपक्षासत्व, अवाधितत्व, असत्प्रतिपक्षत्वरूपधर्माः तैः युक्तमित्याद्यर्थः गादाधर्यामुक्तं **पक्षसत्वादिपञ्चरूपेत्यर्थ** इति।

पक्षसत्वं नाम हेतोः पक्षसम्वन्धः। **तथाचायम्** इति उपनयवाक्येन ज्ञायते अतः उपनयस्य पक्षसत्वविशिष्टहेतुप्रतिपादकत्वम्। यत्र यत्र धूमः तत्र तत्र वह्निः इति व्याप्तिविशिष्टस्य लिङ्गस्य उदाहरणवाक्येन (यथा महानस इति वाक्येन) प्रतिपादनात् व्याप्तेः प्राचीनमते साध्यवत् अन्यावृत्तित्वे सति साध्यसामानाधिकरण्यरूपतया विपक्षावृत्तित्वस्य, सपक्षसत्वस्य च प्रतिपादनाच्च व्याप्तिघटकविपक्षासत्वसपक्षसत्वविशिष्टलिङ्गप्रतिपादकत्वम्। एवं **तस्मात्तथा** इति निगमनवाक्यस्थ-तच्छब्दस्य अवाधितत्वासत्प्रतिपक्षितत्वविशिष्टहेतुत्वमर्थः। अतः निगमनस्य तादृशलिङ्गप्रतिपादकत्व-मिति अभिप्रायः। एतन्न्यायलक्षणं दोषग्रस्तमिति मणिकारैः प्रतिपादितं अत्रैव वाक्येऽतिव्याप्तेः इति। तदर्थस्तु न्यायलक्षणप्रतिपादकं यद्वाक्यं समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यमिति तद्घटकीभूते समस्तरूपोपपन्नलिङ्गे इति वाक्ये अतिव्याप्तेः इति। समस्तरूपोपपन्नलिङ्ग इत्यनेन समस्तरूपविशिष्टं लिङ्गमिति ज्ञानं जायते। अतः समस्तरूपोपन्नलिङ्गप्रतिपादकत्वं समस्तरूपोपपन्नलिङ्गशब्दरूपे वाक्येऽस्तीति अतिव्याप्तिः।

In Public domain. Digitization Muthulakshmi Research Academy



अतः मणिकारेण स्वसम्मतं न्यायलक्षणमभिहितम्। **अनुमितिचरमकारणलिङ्गपरामर्श-प्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः**। अनुमितिं प्रति चरमकारणीभूतः यः लिङ्गपरामर्शः तस्य प्रयोजकं यत् शाब्दबोधात्मकं ज्ञानं तज्जनकं वाक्यं न्याय इत्यर्थः। न्यायश्रवणानन्तं पञ्चावयवार्थ-विषयकसमूहालम्बनात्मकः शाब्दबोधः जायते। तादृशशाब्दबोधरूपसहकारियुक्तेन मनसा परामर्शः जायते। ततः अनुमितिः जायते। एवञ्च अनुमितिकारणीभूतपरामर्शजनकमनस्सहकारिशाब्दज्ञान-जनकत्वं न्यायवाक्येऽस्तीति समन्वय इति चिन्तामणिकाराणामभिप्रायः। दीधितिकारैस्तु न्याय-लक्षणमन्यथा परिष्कृतम्। **उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वमिति** मणिकारोक्तं यथा श्रुतन्यायलक्षणं समीचीनं न भवतीति दीधितिकाराणामभिप्रायः। अतः दीधितौ प्रथमपङ्क्तावेव न्याय-लक्षणं परिष्कृम्। **एतेनेति** दीधितिपङ्क्तौ मणिकारोक्तलक्षणम् असमीचीनमिति प्रदर्शितम्। तथाहि न्यायघटकयोः द्वयोः अवयवयोः एव मिलित्वा एकार्थप्रतिपादकत्वाभावेन पञ्चानां वाक्यानां सम्भूय एकार्थप्रतिपादकतायाः सुतरामभावात्। प्रतिज्ञानिगमनयोस्तावत् सम्भूय न एकार्थप्रतिपादकत्वम्। एवमुदाहरणस्य अवयवान्तरस्य च न एकविशिष्टार्थबोधकत्वम्। यत्तत्पदघटितभागयोरपि एक-विशिष्टार्थबोधकत्वाभावेन उदाहरणावयवान्तरयोः न सम्भवति। परन्तु प्रतिज्ञाहेतोः एवमुपनय-निगमनयोः एकविशिष्टार्थबोधकत्वं वक्तुं शक्यते। धूमज्ञानज्ञाप्यवह्निमदभिन्नः पर्वतः, धूमज्ञानज्ञाप्य वह्निमदभिन्नः वह्निव्याप्यधूमवत्पर्वतः। तथापि पञ्चानामवयवानामेकविशिष्टार्थबोधकत्वं न सम्भवति इति कृत्वा असम्भवः प्रदर्शितः। प्रतिज्ञादीनां पञ्चानामेकवाक्यताव्यवहारः कथमितिचेत् मानस-विशिष्टपरामर्शतात्पर्येण प्रयुक्तत्वात् एकवाक्यताव्यवहारः इत्यादिविचारधारा दीधितिचिन्तामणि-ग्रन्थावलोकनेन इतोऽपि स्पष्टतया अवगम्यते।

गदाधरभट्टाचार्यास्तु - उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायकत्वं न्यायत्वमिति यत् दीधितिकारोक्तलक्षणमपि मणिग्रन्थादेव लभ्यते। मणौ शाब्दज्ञानपदं प्रतिज्ञादिप्रतिपाद्य-तत्तद्विशिष्टार्थज्ञानपञ्चकपरम्। जनकवाक्यपदं च प्रत्येकं तत्तद्बोधजनकवाक्यपञ्चकपरमतः प्रतिज्ञादि-वाक्यपञ्चकलाभः सम्भवती इति अवदन्।

**उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वमिति** दीधितिकाराणां लक्षणविचारं विमृश्य उचितानुपूर्वीकत्वस्य परिष्कारः उक्तः **स्वाश्रयीभूतयत्किञ्चित्प्रतिज्ञाद्यव्यवहितोत्तरत्वशून्य-हेत्वादिवृत्तियद्यत्सुमुदायत्वं तदन्यत्वस्य समुदायत्वे विशेषणीयत्वादिति दिक्** इति। एतदसमीचीनं न वा इति युक्तायुक्तविचारमाला कृष्णम्भट्टीयव्याख्याने कालीशङ्करिव्याख्याने सुधीभिः अधिकं द्रष्टव्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्वमवयवत्वमिति मणिकारोक्तावयवलक्षणम्। अनुमितेः चरमकारणीभूतः यः लिङ्गपरामर्शः तत्प्रयोजकं यत् शब्दज्ञानं, तस्य जनकं यच्छाब्दज्ञानं तज्जनकत्वे सति वाक्यत्वमवयवलक्षणम्। यथाश्रुतार्थे अनुपपत्तिः वर्तते इति मानसि निधाय दीधितिकारैः अन्यथा व्याख्यातं तच्च न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वं, प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाघटितत्वं वा वक्तव्यमिति। अत्र गदाधरभट्टाचार्यकृताः न्यायान्तर्गतत्वं, प्रतिज्ञाद्यन्यतमत्वं, प्रतिज्ञाद्यघटकत्वम्, उभयघटकभागद्वयाघटितत्वमित्यादीनां परिष्काराः बहुजटिलाः गम्भीराः मन्दबुद्धिनामगम्याश्च विराजन्ते।

**प्रतिज्ञालक्षणपरिचयः**

साध्यनिर्देशः प्रतिज्ञा इति प्रतिज्ञायाः लक्षणमुक्तं सूत्रकृता। साध्यं विधेयं, तस्य निर्देशः प्रतिपादकः शब्दः। तथा च विधेयप्रतिपादकः शब्दः प्रतिज्ञा इति यथासूत्रात् लभ्यते। अतः दीधितौ साध्यः विधेयविशिष्टधर्मी इत्युक्तम्। तथाच विधेयविशिष्टधर्मिप्रतिपादकशब्दत्वं प्रतिज्ञायाः निष्कृष्टं लक्षणम् अभिहितम्। तेन वह्निपदे अतिव्याप्तिः न सम्भवतीति सूत्रकारीयप्रतिज्ञालक्षणमेव समर्थनं करोति दीधितिकारः। विधेयविशिष्टधर्मिप्रतिपादकत्वं प्रतिज्ञायाः लक्षणमित्युक्तावपि धूमादित्यादिषु हेतुवाक्यादिषु अतिव्याप्तिः स्यात्। उद्देश्यत्वविधेयत्वयोः केवलान्वयितया आधेयतासम्बन्धेन धूमविशिष्टं हेतुत्वमिति बोधस्य धूमरूपविधेयविशिष्टहेतुत्वरूपोद्देश्यविषयकताया तज्जनकस्य हेतुवाक्यादेरपि विधेयविशिष्टधर्मिप्रतिपत्तिजनकत्वात्। अतः प्रतिज्ञालक्षणं परिष्कृतं दीधितिकारैः। तदर्थस्तु प्रकृतपक्षतावच्छेदकविशिष्टे प्रकृतसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिबोधजनकः न्यायावयवः प्रतिज्ञेति। मणिकारोक्तप्रतिज्ञालक्षणमपि विमर्शितं दीधितिकारैः। उद्देश्यानुमितिचरमकारणलिङ्गपरामर्शप्रयोजतकवाक्यार्थज्ञानजनकत्वे सति उद्देश्यानुमिति अन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकवाक्यत्वं प्रतिज्ञायाः लक्षणम्। तदर्थस्तु उद्देश्यानुमितेः हेतुभूतः यः लिङ्गपरामर्शः तत्प्रयोजकं यत् वाक्यार्थज्ञानं तज्जनकत्वे सति प्रकृतानुमित्यन्यूनानतिरिक्तविषयकं यत् शाब्दज्ञानं तज्जनकवाक्यत्वं प्रतिज्ञायाः लक्षणम्। अनुमितिहेतुपरामर्शप्रयोजकत्वं च महावाक्यर्थज्ञानद्वारा प्रतिज्ञादिवाक्यजन्यस्य शाब्दबोधस्य वर्तते। एवं प्रकृतानुमित्यन्यूनानतिरिक्तविषयकत्वं च अस्तीति समन्वयप्रकारः ज्ञेयः। अस्मिन् पक्षे अनेकान् दोषान् दृष्ट्वा दीधितिकारः **यादृशपक्षसाध्यकाः पक्षे यादृशविशिष्टार्थबोधिकाः प्रतिज्ञाः सम्प्रदायसिद्धाः तादृशानां बोधानानन्यतमेनात्यनिवर्तनीयस्य संशयस्यानिवर्तकः यः तावतामन्यतमः बोधः तज्जनकत्वं प्रतिज्ञालक्षणम्** अवोचत्। तत्र परिष्कारः दीधिति-

In Public domain. Digitization Muthulakshmi Research Academy



गादाधर्योः सम्यक् विस्तृतः ज्ञेयः। एवं हेतुलक्षणम्, उदाहरणलक्षणम्, उपनयलक्षणं, निगमनलक्षणं परिष्कारजालजटिलं गदाधरभट्टाचार्यैः कृतं सावधानतया अध्येतव्यम्। कृष्णम्भट्टीयव्याख्यानं तावत् बहुविस्तृतं, गम्भीरं, सूक्ष्ममतिभिरपि ज्ञातुमशक्यं, परिष्कारजटिलम्। तत्र मूलसमन्वयः अधिकं न दृश्यते। एवं कालीशङ्करी अपि अवच्छेदत्वावच्छिन्नत्वप्रतियोगित्वानुयोगित्वव्याप्यत्वव्यापकत्वादिपारिभाषिकशब्दजालजटिला, अपरिचितैतच्छास्त्राणामतीव दुरवगाहा, अतीवप्रौढशैल्या गदाधरवाक्यार्थानामुपरिकोटिक्रमपद्धत्यनुसारेण निर्मिता। विना गुरुमुखोपदेशेन एतादृशवाक्यानि दुरवबोधानि।

## कृतज्ञताविनिवेदनम्

काव्यव्याकरणतर्कवेदान्तादिशास्त्रेषु शुकवत् मां पाठितवद्भ्यः पण्डितेन्द्रविद्वत्कुलतिलकचतुरशास्त्रकोविदेभ्यः, परमपूज्येभ्यः पण्डितराजश्रीजालिहाळश्रीनिवासाचार्यविद्यापुत्रेभ्यः मम (सुकेशाचार्यस्य) गुरुभ्यः (बाळगारु) श्रीनिवासाचार्येभ्यः नमश्शतम्।

राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिचरेभ्यः आचार्यराधावल्लभत्रिपाठिमहोदयेभ्यः, कुलपतिभ्यः आचार्यसच्चिदानन्द उडुपमहोदयेभ्यः, कुलसचिवेभ्यः विनोदकुमारसिंहमहोदयेभ्यः, संस्कृत -परिषदः प्रबन्धनसमितेः अध्यक्षेभ्यः आचार्यसत्यनारायणवर्येभ्यः हार्दिकीं कृतज्ञताञ्जलिं समर्पयामि।

अभूतपूर्वां भूमिकां विरचय्य ग्रन्थसंशोधनकर्मणि तत्र तत्र स्वाशयनिवेदनेन महदुपकारकारकेभ्यः न्यायव्याकरणमीमांसावेदान्तादिनैकशास्त्रकोविदेभ्यः पं.बाळगारु रुचिराचार्येभ्यः प्रणति -शतं समर्पयामि। संस्कृतपरिषदि न्यायग्रन्थमालायाः प्रकाशनमारम्भं कृत्वा तत्कार्यमनुवर्तनार्थं प्रेरयन्तः ग्रन्थस्यास्य मुद्रणे प्रतिपदं मार्गदर्शनं दत्तवद्भ्यः स्वरस्यभूमिकाप्रदातृभ्यः आचार्यश्रीनिवासवरखेडिमहोदयेभ्यः प्रणतिशतं समर्पयामि। तथैव ग्रन्थस्यास्य संशोधनकर्मणि गुणदोषान् प्रदर्शयन्तः मामुपकृतवद्भ्यः वीरनारायणपाण्डुरङ्गिवर्येभ्यः, आञ्जनेयप्रसादमहोदयेभ्यः सादराभिवादान् समर्पयामि।

श्रीमन्महीशूरसंस्थानस्य विद्यातरङ्गिण्याख्यमुद्रणालये 1896 तमे वर्षे अवयवग्रनथस्य मुद्रितामम्मूल्यां पुरातनप्रतिं दत्त्वा तस्याः संस्कृतपरिषदा प्रकाशयितुं सङ्कल्पञ्च विधाय शीघ्रमुद्रणाय प्रेरयित्वा परोक्षेण सहकृतवद्भ्यः काकिनाडस्थ आचार्य ऐ.वि.एन्.नरसिंहाचार्यवर्येभ्यः स्वाभिवादान् सादरं समर्पयामि।

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थस्य कञ्चनभागमुट्टङ्कनं कृत्वा सहकृतवत्यै श्रीमतीहैमवतीमहोदयायै भूरिशः धन्यवादान् समर्पयामि। अन्येभ्यः महदस्मिन् कार्ये सहकृतवद्भ्यः संस्कृतपरिषद् सदस्येभ्यः धन्यवादान् समर्पयामि। वाचा वर्णयितुमशक्यं विशिष्टं साहाय्यं कृतवद्भ्यः पं.नम्बि वासुदेवाचार्येभ्यः अभिवादान् समर्पयामि।

संशोधनसम्पादनकर्मणि पुरुषमात्रसाधारणाः भ्रमप्रमादादिजनिताः दोषाः अत्रावश्यं भवेयुरेव, तथापि ये गुणैकपक्षपातिनो विद्वांसः क्षाम्यन्तु।

अस्तु श्रीः

विजयपौषशुक्लैकादशी

11.01.2014

जालिहाळ सुकेशाचार्यः

विरिवेण्टि सुब्रह्मण्यम्

In Public domain. Digitization Muthulakshmi Research Academy



## कृतिसमर्पणम्

श्री सात्त्विकगुरुराजाचार्ययमुनाम्बादम्पतीतपःपरिपाकदिव्यस्वरूपाणां, श्री 1008 श्रीमत्सत्यध्यानतीर्थश्रीचरणप्रियान्तेवासिप्रवराणां, चतुस्तन्त्रपारावारपारीणपरिपूर्णधिषणानां, न्यायामृतार्णव- न्यायसुधाकण्टकोद्धार- अभिनवशरदागम- विजयीन्द्रविजयवैजयन्ती- सिद्धान्तभूषणेत्यादिप्रौढानैकशास्त्रप्रवन्धप्रणेतॄणां गुरुवैभव-विप्रसन्देश-विष्णुसहस्र-तीर्थक्षेत्रविलास- अलङ्कारसङ्ग्रह-मध्वसहस्र-लक्ष्मीसहस्रप्रभृतिमहाकाव्यखण्डकाव्यप्रणयनचतुराणां सङ्गीत-साहित्य- ज्योतिष्य-सरसप्रवचन-कला-विलसिततेजोरूपिणाम्

अशनवसनप्रदानपूर्वकमनेकच्छात्रसन्ततिविद्यामृतप्रदातॄणां

परमपूज्यपण्डितराजश्रीजाळिहालश्रीनिवासाचार्याणां शुभजयन्ती शतमानोत्सवसन्दर्भे सादरं कृतिरियं समर्प्यते।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

# विषयसूची


| विषयः | पृष्ठसङ्ख्या |
|---|---|
| डा.श्रीनिवासशर्मणः आमुखम् | v |
| Dr. Shrinivasa Varakhedi's Preface | vii-ix |
| बळगारु रुचिराचार्यस्य भूमिका | xi-xxi |
| सम्पादकयोः पुरोवाक् | xxiii-xxx |
| कृतिसमर्पणम् | xxxi |
| तत्त्वचिन्तामणौ न्यायलक्षणम् | 1 |
| दीधितौ न्यायलक्षणम् | 1 |
| तत्त्वचिन्तामणाववयवलक्षणम् | 2 |
| दीधितावयवलक्षणम् | 2 |
| तत्त्वचिन्तामणौ प्रतिज्ञालक्षणम् | 3-7 |
| दीधितौ प्रतिज्ञालक्षणम् | 3-7 |
| तत्त्वचिन्तामणौ हेतुः | 7-9 |
| दीधितौ हेतुः | 7-10 |
| दीधितावुपनयनिगमने | 10 |
| तत्त्वचिन्तामणावुदाहरणम् | 10-11 |
| तत्त्वचिन्तामणावुपनयः | 11 |
| तत्त्वचिन्तामणौ निगमनम् | 12 |
| गदाधरीये न्यायलक्षणम् | 13-42 |
| कृष्णम्भट्टीये न्यायलक्षणम् | 13-42 |
| गदाधरीये अवयवलक्षणम् | 43-82 |
| कृष्णम्भट्टीये अवयवलक्षणम् | 43-82 |
| गदाधरीये प्रतिज्ञालक्षणम् | 83-200 |
| कृष्णम्भट्टीये प्रतिज्ञालक्षणम् | 83-202 |
| गदाधरीये हेतुः | 203-241 |
| कृष्णम्भट्टीये हेतुः | 203-241 |
| गदाधरीये प्रतिज्ञादिलक्षणानि | 242-255 |
| कृष्णम्भट्टीये प्रतिज्ञादिलक्षणानि | 242-255 |

In Public domain. Digitization Muthulakshmi Research Academy

गदाधरीये अवशिष्टहेतुलक्षणम् 256-259
गदाधरीये परिशिष्टावयवमण्यर्थप्रकाशः 260-263
कृष्णम्भट्टीये उदाहरणम् 263-265
कृष्णम्भट्टीये उपनयः 265-266
कृष्णम्भट्टीये निगमनम् 266-269

In Public domain. Digitization Muthulakshmi Research Academy

# अवयवः

# Avayavaḥ

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

# । अथ अवयवग्रन्थः प्रारभ्यते ।

## । अथ तत्त्वचिन्तामणाववयवः।

। श्रीः।

तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनय-निगमनानि निरूप्यन्ते। तत्र न समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यं न्यायः। अत्रैव वाक्ये अतिव्याप्तेः। किन्त्वनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः। प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते। तेन च विशिष्टवैशिष्ट्यावगाहि मानान्तरमुत्थाप्यते। तेन चरमः परामर्श उत्पाद्यत इति न्यायजन्यशाब्दज्ञानस्य परामर्श-प्रयोजकता।

। इति तत्त्वचिन्तामणौ न्यायलक्षणम् ।

---

## । अथ दीधितावववयवः।

। श्रीः।

उचितानुपूर्विकप्रतिज्ञादिपञ्चकसमुदायत्त्वं न्यायत्वम्। प्रतिज्ञात्वादिकं पुनरुदासीन-वाक्यवारकन्यायान्तर्गतत्वादिविशेषशून्यमेवोपादेयम् इति नान्योऽन्याश्रयः। साध्यादिविशेष-नियन्त्रिताश्च प्रतिज्ञादयो वाच्या इति न विभिन्नसाध्यादिकप्रतिज्ञादिसमुदायेऽतिव्याप्तिः। व्याप्त्यादेरिव साध्याद्यननुगमादननुगमो न्यायादेरपीष्यत एव। एतेन प्रतिज्ञानिगमनयोरुदाहरणावयवान्तरयोश्च न सम्भूयैकार्थप्रतिपादकत्वम्। द्रागेव तु पञ्चानामवयवानाम्। परन्तु प्रतिज्ञाहेत्वोः कथञ्चिदुपनय-निगमनयोः। एकवाक्यताव्यवहारस्तु विशिष्टैकार्थप्रतिपत्तिपरतामात्रेण। तादृशपरामर्शप्रयोजकत्वञ्च यदि तद्विषयतत्तत्पदार्थोपस्थापकतया (तत्तत्पदार्थोपस्थापकतया) तदा उदाहरणोपनययोरेव तत् पर्यवस्यति। अथ तदानुकूल्यपरतामात्रेण। तदा को वह्निमान्? पर्वतो वह्निमान् कुतो धूमवत्त्वादि-त्यादैरपि तथात्वम्? इत्यादिकं समाहितम्।

। इति दीधितौ न्यायलक्षणम् ।

In Public domain. Digitization: Muthulakshmi Research Academy

अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्व-मवयवत्वम्। अत एव वह्निव्याप्यधूमवानयमिति वाक्ये तदवयवे च न न्यायतदवयवलक्षणाति-व्याप्तिः। तेन परामर्शस्य तदवयवेन परामर्शजनकस्य जननात्। यत्तु सङ्क्षेपतः परामर्श-प्रयोजकवाक्यत्वेन विशेषाभावात्सोऽपि न्याय एवेति। तन्न कथायामाकाङ्क्षाक्रमेणैवाभिधान-मिति प्रथमं विशिष्टवैशिष्ट्ये आकाङ्क्षा नास्तीति तदभिधाने निग्रहादिति वक्ष्यते। अन्यथा चक्षुरादेरपि परामर्शजनकतया न्यायत्वापत्तिः। आकाङ्क्षाविरहस्तुल्य एव। अन्ये तु पञ्चावयव-वाक्याद्विजातीयमेव शाब्दज्ञानमुत्पद्यत इति तद्धीजनकवाक्यत्वं न्यायत्वम्। एवं प्रतिज्ञाद्यवय-ववाक्यादपि प्रत्येकं विजातीयं शाब्दज्ञानमिति तत्तद्धीजनकवाक्यत्वमेव तत्तल्लक्षणमिति। तन्न ज्ञानविशेषजनकत्वं तज्जनकत्वज्ञानं वा (तत्तज्ज्ञानजनकत्वं वा) न्याये प्रतिज्ञादौ चानति-प्रसक्तमनुगतरूपमन्तरेण दुर्निरूपमिति तत्स्वीकारे तस्यैव लक्षणत्वात्। अन्यथा जातिसङ्कर-प्रसङ्गात्।

। इति तत्त्वचिन्तामणाववयवलक्षणम् ।

---

अवयवत्वन्तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वम्। प्रतिज्ञाद्यघटकत्वे सत्युभयघटक-भागद्वयाघटितत्वं वा वक्तव्यम्। उभयञ्चप्रतिज्ञाहेतू हेतूदाहरणे उदाहरणोपनयौ उपनयनिगमने इति विशिष्य वक्तव्यमिति। प्रतिज्ञादिप्रतिपाद्य तत्तद्विशिष्टार्थविषयकज्ञानपञ्चकान्यतमज्ञानजनकवाक्यत्वं तत्त्वमित्यपि केचित्। *तस्यैवेति* तथा च तादृशजातौ साधकाभाव इति भावः। बाधकमप्याह। *अन्यथेति* न्यायजन्यज्ञाने पञ्चावयवजन्यत्वात्पञ्च, द्वित्रादिजन्ये च द्वित्राद्याः, एकैकजन्ये च एकैका जातय इति जातिसङ्कर इत्यर्थः। तत्र तत्र भिन्नभिन्नजातिकल्पने सुतरां मानाभावः। केचित्तु, यदि चानुगतकारणमन्तरेमापि तादृशजातिमत्वसम्भवः। तदाकदाचित्प्रतिज्ञादिजन्येऽपि हेत्वादि-जन्यवृत्तिः हेत्वादिजन्ये च प्रतिज्ञादिजन्यवृत्तिर्जातिस्स्यादिति सङ्कर इत्यर्थः। एवं सर्वेषां सर्व-जातीयत्वमेकजातीयत्वं वा स्यादित्यपि द्रष्टव्यमित्याहुः।

। इति दीधितावयवलक्षणम् ।

In Public domain. Digitization Muthulakshmi Research Academy

तत्र प्रतिज्ञा, न साध्यनिर्देशः। साध्यपदेऽतिव्याप्तेः। किन्तूद्देश्यानुमिति चरमकारण-लिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सत्युद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्द-ज्ञानजनकवाक्यम्।

---

साध्यनिर्देशः प्रतिज्ञेति सूत्रम्। साध्यो विधेयविशिष्टो धर्मी। तथा च पक्षतावच्छेदकपर्वत-त्वादिविशिष्टे साध्यतावच्छेदकवह्नित्वादिविशिष्टवैशिष्ट्यज्ञानजनको न्ययावयव इति पर्यवसितोऽर्थः। उदाहरणाच्च न पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यज्ञानम्। उपनयाच्च पक्षतावच्छेदकविशिष्टे न साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानमिति तयोर्व्युदासः। *किन्त्वित्यादि* प्रकृतन्यायवहिर्भूतवारणाय सत्यन्तम्। प्रकृतन्ययावयवत्वपर्यवसितार्थकम्। *उद्देश्येति* प्रकृतेत्यर्थः। वह्निसाध्यकोपनयस्य वह्निव्याप्यधूमसाध्यकानुमित्यन्यूनानतिरिक्तविषयकज्ञानजनकस्य वारणाय प्रकृतद्वयम्। तथा च, यादृशपक्षसाध्यकन्यायावयवत्वं तादृशपक्षसाध्यकानुमित्यन्यूनानतिरक्तविषयकशाब्दज्ञानजनकत्वं पर्यवसितोऽर्थः। धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादावंनतिरिक्तविषयकज्ञानजनकस्य हेतोर्वार-णायान्यूनेति। निगमनवारणायानतिरिक्तेति। यद्यपि निगमने साक्षात्पक्षवाचकपदं न श्रूयते। तथापि न्यूनताभङ्गायोपनयस्थायमादिपदानुषङ्गात्तथाबोध्यम्। इत्थमेव च प्रसक्तामतिप्रसक्तिं निगमनं चेत्यादिना निराकरिष्यति। तदर्थश्च निगमनमन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं सन्नपरामर्श-हेतुः। येन निरुक्तन्यायावयवत्वरूपं प्रतिज्ञात्वं तदपि व्याप्नुयात्। अबाधितत्त्वादेस्तद्बोधौपयिकविशिष्ट-हेतुसम्बन्धस्य वा बोधकतया तस्यातिरिक्तविषयकज्ञानजनकत्वादिति। यत्तु। पृथिवीतरेभ्यो भिद्यते पृथिवीत्यादित्यादौ यन्न पृथिवीतरेभ्यो भिद्यते तन्न पृथिवीत्युदाहरणवारणाय तदिति। तत्तुच्छम्। तेन पृथिव्यामितरभेदस्याविषयीकरणात्। तात्पर्यभ्रमेण तादृशबोधजनकत्वस्यातिप्रसक्तत्वात्। न च तावताप्युदाहरणस्य तथात्वसम्भवः। यन्नेत्यादेरनन्वयात्। यदि च निगमने नायमादिपदं निविशते वाक्यैकवाक्यतयैव विशिष्टलाभादिति विभाव्यते। तदा हेतौ साध्यसामानाधिकरण्यभाने सामान्यतः पक्षेऽपि, साध्यवत्त्वभानात् पक्षे हेतुव्यापकसाध्यसामानाधिकरण्यविशिष्टहेतुमत्ताबोधकस्योपनयस्य, यत्र पक्षसाध्ययोस्ताद्रूप्येण दृष्टान्तत्वहेतुत्वाभ्यामुपन्यासः, तादृशसिषाधयिषया च न्यायप्रयोगः तत्रोदाहरणोपनययोः। यत्र च पर्वतत्वाद्यवच्छेदन साध्यसिद्धेरुद्देश्यतायामेतत्पर्वतत्वादिना दृष्टान्तस्यो-पन्यासः तत्रोदाहरणस्य, सत्यन्तस्य वा अवयवाघटकन्यायान्तर्गतत्वपरतया हेत्वन्यस्यायमादि-निगमनान्तस्य च वारणाय तत्। यद्यपि सर्वमभिधेयं प्रमेयमित्यादावतिरिक्ताप्रसिद्धिः। न च कोट्य-प्रसिध्या प्रमेयं न वेति विप्रतिपत्तेः संशयस्य चायोगात् न तादृशीप्रतिज्ञा, प्रकृतानुमितिविषयता-समव्याप्तविषयताकत्वं, प्रकृतानुमितिप्रकारतासमव्याप्तप्रकारताकत्वं वा वक्तव्यमिति वाच्यम्। सकला

In Public domain. Digitization Muthulakshmi Research Academy

-भिधेयवृत्तिधर्मवत्सकलाभिधेयनिष्ठात्यन्ताभावाप्रयोग्याकाशाभाववद्धेदं द्रव्यमित्यादौ विषिष्टपक्षबोध-कोपनयेऽतिव्याप्तेः। तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयकत्वं, तदन्यूनविषयकत्वम्। प्रकृत-पञ्चम्यर्थपक्षकप्रतिज्ञास्थले तु पक्षे प्रकृत्यर्थस्य वैशिष्ट्यबोधको हेतुर्न तु प्रकृतसाध्यस्य। तादृश-विषयताविलक्षणविषयताशून्यत्वम्। प्रकृतहेतुकप्रकृतसाध्यसिध्यौपयिकव्याप्त्यविषयकत्वं वा तदनति-रिक्तविषयकत्वम्। वह्निव्याप्यालोकवत्सधर्मा पर्वतो वह्निमान्धूमादिन्धनव्याप्यधूमवान्पर्वतो वह्निमान् धूमादित्यादौ तस्यास्सङ्ग्रहाय प्रकृतहेतुसाध्ययोरुपादानम्। वह्निव्याप्यधूमवान्पर्वतो वह्निमान् धूमात् सत्तादिव्याप्यद्रव्यत्ववदिदं सत्त्वादिमद्द्रव्यत्वादित्यादिकस्तु न प्रयोगः। विशिष्टपक्षोपस्थापकादेव तादृशव्याप्तिप्रतीतावाकाङ्क्षाविरहेणोदाहरणानुत्थानात्। अन्यथाऽतिप्रसङ्गात्। अत एव नैकदोभय-व्याप्त्युपन्यासोऽपि। यदि च मैत्रः पचति अयं गैरित्यादेरेव प्रतिज्ञायाः तथोपवर्णितविशिष्टज्ञान-जनकत्वसम्भवः। तादात्म्येन गोस्साध्यत्वात् गोत्वत्वाद्यनुपस्थित्या गोत्वादेस्साध्यत्वानुपपत्तेः। पदार्थतावच्छेदकजातौ हेत्वर्थस्यान्वयायोगाच्च। वह्निमानित्यादौ पुनरनुमितौ पक्षे साध्यस्य वह्नेस्सं-योगात्मकस्सम्बन्धो भासते। तथैव वह्निव्याप्यधूमवानयमित्युपनयसङ्गमात्। शाब्दज्ञाने तु वह्निमतो अभेदः। एवं भेदे साध्ये भिद्यते भिन्नमित्यादावपि वैलक्षण्यमिति सूक्ष्ममीक्ष्यते। तदा यादृशपक्ष-साध्यकाः पक्षे यादृशविशिष्टार्थबोधिकाः प्रतिज्ञाः सम्प्रदायसिद्धाः तादृशानां बोधानामन्यतमेनाप्यनि-वर्तनीयस्य संशयस्यानिवर्तको यः तावतामन्यतमो बोधः तज्जनकत्वं वक्तव्यम्। एवञ्च तादात्म्येन गवि साध्ये पक्षे गवाभेदस्य, संयोगेन समवायेन वा वह्नौ, वह्निमदभेदस्य, समवायेन पाकस्य कृतौ, पाककृतिमत्वस्य, पाककर्त्रभेदस्य, विशेषणतया इतरेभ्यो भेदे, इतरभेदवत्त्ववत्वस्य, इतरान्याभेदस्य, इतरभेदवत्वस्य, इतरभिन्नाभेदस्य, बोधा विशिष्य धर्तव्या इति दिक्। तावद्बोधानिवर्त्यसंशयानिवर्तक-तावद्बोधनिवर्त्ययावत्संशयनिवर्तकबोधजनकत्वं वाच्यमित्यपि केचित्। चैत्रः पचति घटो नेतराणीति प्रतिज्ञायां साध्ये विषयित्वानुयोगित्वयोः सम्वन्धविधयैवानुप्रवेशात् यथोपदर्शितसाध्यगमकतौपयिक-व्याप्तिविशिष्टहेतुमत्त्वस्य च पक्षे उपनेयत्वात्तथाचायमित्याकारकः सुवच एव प्राचामुपनयः। नव्यानां पुनरनन्यगतिकतया तद्व्याप्यहेतुमान् तद्वान्वेत्याकारो योग्यतावशाच्च तदा साध्यस्य तद्व्याप्यस्य वा परामर्शः। केचित्तु वह्निमान्नवेति विप्रतिपत्तौ संशये च वह्निमत्तदन्योऽन्याभावयोस्तादात्म्यविशेषण-त्वाभ्यां कोटित्वेन जिज्ञासितत्वादिति तादात्म्येन वह्निमानेव साधयितुमुचितः। न तु वह्निरजिज्ञासित-त्वात्। तथाचायमित्याकारको वह्निमद्व्याप्य धूमवांश्चायमित्याकारको वा उपनयः। न तु वह्निव्याप्य धूमवांश्चायमित्याकारकः अर्थान्तरत्वादिति प्राहुः। यत्र चान्तरा तादृशबोधो न जनितस्तत्रापि तादृशाकाङ्क्षायोग्यतादिशालित्वरूपं तज्जननयोग्यत्वमक्षतम्। तल्लाभश्च जातिविशेषोपस्थापकशाब्द-

In Public domain. Digitization: Muthulakshmi Research Academy

अन्यूनातिरिक्तपदं विहाय लिङ्गाविषयकत्वं वा ज्ञानविशेषणम्। तेनोदाहरणादिव्युदासः। निगमनञ्च न परामर्शहेतुः। अवाधितासत्प्रतिपक्षितत्त्वज्ञानजनकत्वात्। हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं वा। लिङ्गाविषयकलिङ्गिविषयकज्ञानजनकन्याया-

---

वाक्यपदयोरुपसन्धानादेवेति। *अन्यूनेत्यादि* तथाचोद्देश्यानुमितिसमानविषयकलिङ्गाविषयकशाब्दज्ञानजनकन्यायावयवत्वमर्थः। व्यतिरेकिणि ह्रदो निर्धूम इत्यादौ निर्वह्नित्वहेतुके यथा ह्रदभिन्नमित्यादिदृष्टान्तवतो ह्रदावृत्तिधर्मशून्यत्वादिहेतुके वा उदाहरणस्य वारणाय समानविषयकान्तं पक्षमुख्यविशेष्यकार्थकम्। उपनयवारणाय *लिङ्गाविषयकेति*। यद्यपि प्रकृतलिङ्गाविषयकत्वं पृथिवीतरेभ्यो भिद्यते पृथिवीत्वात् गन्धवती वा तथा गन्धादित्यादावव्यापकम्। न चात्रोपनयासम्भवः इदमा गन्धवत्त्वेन परामृष्टे हेतुभूतगन्धवत्वान्वयायोगादिति वाच्यम्। साध्याभावव्यापकगन्धाभावाभावत्वेनान्वयात्। अत एव व्यतिरेकिणि न च नेयं पृथिवीत्यादिकः प्राचां प्रयोगः। यदि च दण्डवान् रक्तदण्डवानित्यस्यान्वयो नानुपपन्नः तद्विशिष्टे शुद्धतद्विशिष्टान्वयस्यैवाव्युत्पन्नत्वादित्युच्यते। तदा नानुपपत्तिगन्धोऽपि। पक्षाविशेषणत्वेन तदविषयकत्वञ्चायं वह्निसामग्रीमान् वह्नेरित्यादौ। पक्षाविशेषणत्वेन साध्याविशेषणत्वेन तदविषयकत्वञ्च दधि द्रव्यं दध्नः प्रमेयत्वमभिधेयं प्रमेयत्वात् गोत्वाभावो न सास्नादिमान् गोत्वाभावादित्यादावव्यापकमतिव्यापकं चोपनयस्य। तथापि पक्षतावच्छेदकविशिष्टे पक्षे यत्साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वं तद्बहिर्भावेन लिङ्गविषयकत्वस्याभावो वाच्यः। वस्तुतो लिङ्गं लिङ्गत्वम्। तथा च प्रकृतहेतुतावच्छेदकावच्छिन्नस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नगमकतौपयिकं यद्व्याप्तिविषयकत्वं तच्छून्यत्वमर्थः। तच्च हेतौ साध्यव्याप्यत्वावगाहित्वं हेतुभूताभावप्रतियोगितावच्छेदकावच्छिन्ने साध्याभाव व्यापकत्वावगाहित्वम्। द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवानयं द्रव्यत्ववान् गुणात्। गुणव्याप्यरूपवानयं स्पर्शवान् रूपादित्यादौ प्रतिज्ञासङ्ग्रहायावच्छेदकद्वयोपादानम्। अन्यूनानतिरिक्तेति च मूलमुद्देश्यानुमित्यन्यूनानतिरिक्तभागपरम्। हेतुत्वमभिधेयं प्रमेयत्वा-दित्यादौ पञ्चम्यर्थपक्षकहेतुवारणाय पञ्चम्यन्तान्यत्वस्य हेत्वन्यत्वस्य वाऽवश्यं वाच्यत्वात्। सङ्ख्यातिरिक्तसुबर्थस्य प्रकृत्यर्थविशेष्यत्वेनैवान्वयात्। प्रातिपदिकार्थयोः क्रियाप्रातिपदिकार्थयोश्च साक्षाद्भेदेनान्वयस्याव्युत्पत्तेर्वक्ष्यमाणत्वात्। चैत्रस्येदं न मैत्रस्य, मैत्रस्येदं न चैत्रस्य, द्वयोरिदं नेदमेकस्यापीत्यादौ चैत्रादिसम्बन्धाभावबोधस्य विभक्त्यर्थविशेष्यतां विनानुपपत्तेः। चैत्रो न पचतीत्यादौ तिङर्थस्येव विनाप्यनुयोगिनि सप्तमी सुबर्थस्याप्यभावान्वयात्। हेतुविषयकज्ञानजनकत्वव्याप्यावयवावच्छेदकरूपशून्यत्वे सत्युदाहरणान्यन्यायावयवत्वं तत्त्वम्। तादृशावच्छेदकं हेतुत्वादिकमिति केचित्। *हेत्वाभिधानेति* जिज्ञासाजनकत्वं तद्योग्यता। *वाक्यत्वम्* न्यायावयवत्वम्।

In Public domain. Digitization Muthulakshmi Research Academy

वयववाक्यत्वं वा। इतरावयवानां लिङ्गविषयकज्ञानजनकत्वादिति। प्रतिज्ञात्वं जातिः अनुगतानतिप्रसक्ततान्त्रिकव्यवहारादिति केचित्। तन्न। देवदत्तप्रभवत्त्वादिना जातिसङ्करप्रसङ्गात्। प्रतिज्ञाजन्यं विजातीयं ज्ञानं व्यवहारादिति तज्जनकवाक्यं प्रतिज्ञेत्यपि न। तज्जनकत्वं जनकत्वज्ञानं वा नानुगतरूपमन्तरेण सम्भवतीत्युक्तस्यानुसरणीयत्वात्।

एतेन शब्दोऽनित्य इति लिङ्गिधीपरवाक्यजन्यज्ञानवृत्तिकृतकत्वादित्यादि वाक्यजन्यज्ञानावृत्तिजातिप्रतियोगिज्ञानजनकवाक्यं प्रतिज्ञेति निरस्तम्। ननु प्रतिज्ञा, न साधनाङ्गम्। विप्रतिपत्तेः पक्षपरिग्रहे तत्र प्रमाणाकाङ्क्षायां हेत्वभिधानस्य प्राथम्यादिति चेन्न। विप्रतिपत्यग्रे हि समयबन्धानन्तरं शब्दानित्यत्वं साधयेति मध्यस्थस्य वादिनो वा आकाङ्क्षायां शब्दानित्यत्वं साध्यम्। न च साध्यनिर्देशं विना हेतुवाक्यं निष्प्रतियोगिकमन्वयं बोधयितुमीष्टे। न च वादिवाक्येऽनुपस्थितमपि योग्यतयाऽन्वेति। अतिप्रसङ्गात्। न च विप्रतिपत्तितः साध्योपस्थितिः। तस्याः प्रतिवादिविप्रतिपत्या प्रमाणादिव्यवस्थया चान्तरितत्वात्। परविप्रतिपत्तिं समयबन्धञ्च विना स्थापनाया अभावात्। विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहेण पर्यवसिततया निराकाङ्क्षत्वाच्च।

आवृत्तौ तु सैव प्रतिज्ञा। न चावयवान्तरात्। हेत्वन्वययोग्या साध्योपस्थितिः। (पञ्चम्यर्थान्वययोग्यपक्षान्वितसाध्याबोधकत्वात्) नाप्यवयवान्तरेणाक्षेपात्। साध्यान्वये तदभिधानं तदभिधाने च साध्यान्वय इत्यन्योन्याश्रयात्। तस्मात्प्रतीत्यनुपपत्या प्रतीतानुपपत्या वा नेहाक्षेपः। अन्ये तु शब्दानित्यत्वे प्रमाणं वदेति यदि मध्यस्थस्यानुयोगः तथापि प्रमाणमात्रे नाकाङ्क्षा किन्तु विशिष्टे विशिष्टं तु विशेषणं साध्यमनभिधाय न शक्याभिधानम्।

---

*लिङ्गेत्यादि* लिङ्गाविषयकेति पूर्वोपदर्शितार्थकम्। अभावहेतुकव्यतिरेक्युदाहरणवारणाय लिङ्गीति। *लिङ्गि* साध्यम्। *तद्विषयकम्* तद्वद्विशेष्यकम्। तेनेदं जलं निस्नेहत्वप्रकारकप्रमाविषयत्वशून्यत्वात्, इदं द्रव्यं जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वादित्यादौ यन्न जलं तन्निस्नेहत्वप्रकारकप्रमाविषयः इत्युदाहरणे नातिप्रसङ्गः। लिङ्गाविषयकेत्यस्य पूर्वोक्तव्याप्यत्वाविषयकार्थकत्वे तु हेतुवारणाय लिङ्गीति। लिङ्गिविषयकत्वं च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयताबहिर्भावेण वाच्यम्। तेन वह्निमान् वह्निसामग्रीमत्वात् अयं हेतुरिदं वा हेतुत्वं तत्वेन प्रतीयमानत्वादित्यादौ हेतौ नातिप्रसङ्गः। लिङ्गविषयकज्ञानजनकत्वानियतलिङ्गिविषयकज्ञानजनकत्वनियतावयवतावच्छेदक

In Public domain. Digitization Muthulakshmi Research Academy

न च वस्तुतो यत्साध्यं तत्र प्रमाणं वदेति मध्यस्थनियोगः। वादिद्वयमध्ये तदसम्भवात्। तस्मात्साध्याभिधानं विना न हेतोराकाङ्क्षा, न वाऽन्वयबोधकत्वमिति प्रतिज्ञा साधनाङ्गमिति।

। इति तत्त्वचिन्तामणौ प्रतिज्ञालक्षणम् ।

साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां साधनताव्यञ्जकविभक्तिमल्लिङ्गवचनमेवोचितम्। अन्यथाऽनाकाङ्क्षिताभिधाने निग्रहापत्तेः। लोके तथैवाकाङ्क्षानिवृत्तिरिति व्युत्पत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यासः। हेतुत्वञ्चानुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वम्। हेतुत्वप्रतिपादकविभक्तिमन्न्यायावय-

---

-रूपवत्त्वं तत्त्वमित्यादिकं तु तादृशरूपान्तरापरिचये दुर्ग्रहत्वादनुपादेयम्।

। इति दीधितौ प्रतिज्ञालक्षणम् ।

*अनुमितीत्यादि* जनकान्तं न्यायावयवार्थकम्। निगमनवारणाय साध्याविषयकेत्यादि। साध्याविषयकत्वञ्च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयतावहिर्भावेण पूर्वोपदर्शितसाक्षात्परम्परासाधारणप्रकृतपक्षविशेषणत्वेन वा। तेन पूर्वोपदर्शितहोतौ नाव्याप्तिः। इदं न दण्डाज्जातं दण्डसंयोगाजन्यद्रव्यत्वात् अयं न धूमादालोकवान् आर्द्रेन्धनशून्यत्वादित्यादौ व्यतिरेक्युदाहरणस्य, हेतुत्वपक्षके साध्यान्वितस्वार्थबोधकेदं पदशालिनः उपनयस्य च वारणाय हेतुविभक्तिमदिति। तदर्थश्च प्रकृतसाध्यान्वितस्वार्थबोधनक्षमार्थोपस्थितिजनकविभक्तिमत्त्वम्। हेत्विति सम्पातायातम्। यदि च पर्वते पर्वतभिन्नत्वप्रकारकज्ञानस्य विशेष्यतया अभावस्य साध्यत्वं हेतुत्वं च सिषाधयिषया च न्यायप्रयोगः तत्र यथा तादृशज्ञानाभावदुत्पन्नं ज्ञानमिति दृष्टान्तशालिनि व्यतिरेक्युदाहरणेऽतिव्याप्तिरित्युच्यते। तदा अवयवान्तरोपस्थापितार्थान्वितस्वार्थबोधकविभक्तिमत्त्वं वक्तव्यम्। उदाहरणान्यत्वेन वा विशेषणीयम्। केचित्तु साध्यविषयकधीजनकत्वा नियतहेतुविभक्तिमत्वनियतावयवतावच्छेदकरूपवत्त्वं समुदितलक्षणार्थ इत्याहुः। तच्चिन्त्यम्। *हेतुत्वप्रतिपादकेति* विभक्त्यर्थहेतुत्वविशेष्यकान्वयबोधजनकन्यायावपवत्वमर्थः। हेतुत्वं प्रमेयमित्यादिप्रतिज्ञावारणाय विभक्त्यर्थेति। "तस्मादितरेभ्यो भिद्यत" इत्यादिनिगमनवारणाय हेतुत्वेति विशेष्येति च। 'घटो दण्डात्' 'वह्निर्धूमादि'त्यादिकाः न प्रतिज्ञाः। तदवृत्तेरतदात्मनश्च तद्धर्मव्यापकत्वायोगात्। सम्प्रदायविरोधाच्च। तेन तत्रत्यनिगमने नातिप्रसङ्ग इति भावः। *उदाहरणेति* क्वचिज्जिज्ञासानुत्पादेऽपि तद्योग्यता-

In Public domain. Digitization Muthulakshmi Research Academy

वत्वं वा। उदाहरणप्रयोजकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा। साध्याविषयकज्ञान-जनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा। प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्तकज्ञान-जनकहेतुविभक्तिमद्वाक्यत्वं वा। पञ्चम्यन्तलाक्षणिकपदवदनुमिति परवाक्यत्वं वा।

हेतुपदेन ज्ञाने लक्षणा। अन्यथा लिङ्गस्याहेतुत्वेन हेतुविभक्त्यर्थानन्वयात्। तथैवाका-ङ्क्षानिवृत्तेः। अनुमितिहेतुज्ञानकारणधूमवत्वादिशब्दजन्यज्ञानवृत्तिप्रतिज्ञादिजन्यज्ञानावृत्ति-जातियोगिज्ञानकवाक्यत्वं हेतुत्वमित्यन्ये। जातिं विना केन रूपेण ज्ञानस्यानुमिति-जनकत्वम्। वाक्यविशेषजन्यत्वस्यापि जन्यतावच्छेदकरूपापरिचये दुर्ग्रहादित्यपरे। अन्वय-व्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनकहेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वमन्व

---

सत्त्वान्नाव्याप्तिः। अनुक्तोदाहरणस्थलेऽपि तादृशस्वरूपयोग्यतासत्त्वात्तद्वारणाय **न्यायावयवेति**। उदाहरणत्वं चेदं न न्यायावयवत्वगर्भम्। वैय्यर्थ्यात्। ***साध्याविषयकेत्यादि*** अयं न दण्डात् दण्ड-संयोगाजन्यद्रव्यत्वादित्यादौ प्रतिज्ञानिगमनयोर्वारणाय **साध्याविषयेत्यादिव्याख्यातार्थकम्**। उपनय-विशेषवारणाय **हेतुपञ्चम्यन्तेति**। **हेत्विति** हेतुत्वबोधकार्थकम्। हेतुपञ्चम्योर्वैकल्पिकमुपादानम्। उपनयस्य चन्तेऽनुसन्धीयमाना प्रथमैवान्तः। एवं दण्डादित्यादेः स्वपरस्यापि दृष्टान्तस्य पञ्चम्यन्तत्वे अन्वयायोगात्। कस्यचिद्व्यतिरेकिणः उदाहरणस्य पञ्चम्यन्ततत्वसम्भवे तु तद्वारणं पूर्ववत्। अत्र चार्थवद्भागस्य हेतुपञ्चम्यन्तत्वं बोध्यम्। तेन निरर्थकतसिलन्ते 'वह्निप्रमात' इत्यादौ नाव्याप्तिः। पञ्चम्यादेः तसिलाद्यादेशत्ववादिनां नये तु नानुपपत्तिगन्धोऽपि। केचित्तु। हेतुपञ्चम्यन्तत्वं हेतुत्व-प्रतिपादकपदशालित्वं पूर्ववत्। साध्याविषयकबोधजनकत्वञ्च इतरनैरपेक्ष्येण प्रकृतहेतुत्वविशिष्टसाध्य-विषयकज्ञानाजनकत्वं, साध्यं चेह न विवक्षितम्। वैय्यर्थ्यादित्याहुः। ***पञ्चम्यन्तेति*** अनुमितिपर-वाक्यत्वमवयवत्वं, हेतुत्वादौ पञ्चमी लाक्षणिकी। वृक्षाद्विभजत इत्यादौ लाघवेनावधित्वे अवधिमत्त्वे वा शक्तत्वात्। द्रव्यनिष्ठावधित्वमिव विभागनिष्ठमवधिमत्वमपि सम्बन्धविशेषः। स चातिरिक्तोऽनति-रिक्तो वेत्यन्यदेतत्। तत्सम्बन्धाग्रहेऽपि व्यवहारः शक्तिभ्रमात्। वृक्षादपैति पततीत्यादौ लाघवाद्वि-भागे शक्तिः तज्जनकत्वञ्च क्रियायाः संसर्गमर्यादया भासत इत्यपि वदन्ति। अतः पञ्चम्यन्तेति लाक्षणिकविशेषणम्। तस्मादित्यत्र च तत्पदे न लक्षणा। शक्त्यैव तादृशज्ञानोपस्थितिसम्भवात्। पर्वतो वह्निमान् वह्निसामग्रीमान् वा तस्मादित्यादिकस्तु न प्रयोगः। सम्प्रदाय विरोधादिति वदन्ति। यत्तु। हेत्वन्वयानुरोधात् वह्निमानित्यादावपि ज्ञानलक्षणेति। तदसत्। पञ्चम्याः ज्ञापकत्वे ज्ञाप्यत्वे वा लक्षणयैवोपपत्तौ तत्र लक्षणायां मानाभावात्। अत एवोक्तमावृत्तौ सैव प्रतिज्ञेति। अत एव व्याचक्षते

In Public domain. Digitization: Muthulakshmi Research Academy

यिहेतुत्वम्। एतदेव व्यतिरेकव्याप्त्यभिधायकपदप्रक्षेपात् व्यतिरेकिहेतुत्वम्। अन्वयव्यतिरेको-दाहरणाकाङ्क्षाप्रयोजकतथाभूतावयवत्वमन्वयव्यतिरेकिहेतुत्वम्। यद्वा पक्षसपक्षसतो विपक्षासतो हेतुवचनमन्वयव्यतिरेकि। अत्यन्ताभावाप्रतियोगिसाध्यसमानाधिकरणपक्षसपक्षसद्धेतु-वचनं केवलान्वयि। यद्वा अनुमितिकारणीभूतपरामर्शप्रयोजकशाब्दज्ञानकारणसाध्याविषयक-शाब्दधीजनकप्रतीतान्वयसाध्यसाधनवाचकहेतुविभक्तिमच्छब्दत्वमन्वयिहेतुत्वम्। एतदेवाप्रतीतान्वयसाध्यसाधनेति विशेषणाद्व्यतिरेकिहेतुलक्षणम्। कथायां धूमादित्येव प्रयोक्तव्यम्। न तु धूमवत्वादिति। मतुपो व्यर्थत्वात्। सामान्यवत्वे सति बाह्यकरणप्रत्यक्षत्वात् इत्यपार्थकम्। विभक्त्युपस्थापितहेतुत्वेन सामान्यवत्वस्य विभक्त्यन्तरावरुद्धस्य अनन्वयादिति केचित्। तन्न। सतिसप्तमीबलात्सामान्यवत्वस्य बाह्यकरणप्रत्यक्षत्वस्य च सामानाधिकरण्योपस्थितौ विशिष्टे हेतुत्वान्वयात्। तथैव व्युत्पत्तेः। न ह्ययमर्थोऽस्मान्नावगम्यत इति।

## । इति तत्त्वचिन्तामणौ हेतुलक्षणम् ।

---

यतो द्रव्यं गुणाः कर्मेत्यत्र हेतुत्वं यथा सम्भवमुत्पादकत्वं ज्ञापकत्वञ्चेति। अत एव लोके किं वह्निमदिति पृष्टे तद्गृहं वह्निमदित्युत्तरिते कुत इति जिज्ञासा धूमवत्वादित्युत्तरञ्च। न हि तत्र ज्ञाने प्रश्नः। येन लक्षणया ज्ञाने नोत्तरयेत्। न वा परकीयभाविप्रश्नानुरोधादजिज्ञासिताभिधानम्। न वा कुत इति प्रश्ने ज्ञातमित्यध्याहारः। मानाभावात्। दाहो दहनात् न जलात् जलं स्पर्शवत् रूपात् न गन्धात् नापि शब्दादित्यादौ नञर्थान्वयानुरोधात् जन्यत्वरूपहेतुमत्त्वं जन्यज्ञानविषयत्वरूपज्ञाप्यत्वञ्च पञ्चम्यर्थः। एवञ्च हुतमत्त्वे शक्तावपि ज्ञाप्यत्वे लक्षणैव। न च धूमादालोकवान्पर्वतो वह्निमान् धूमात्, धूमाद्वह्निमत्सधर्मा पर्वतो वह्निमान्धूमादित्यादौ प्रतिज्ञायां, पर्वतो धूमाद्वह्निमानित्यादौ च तत्रत्य निगमने चातिव्याप्तिः। प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितप्रकृतसाध्यान्वितस्वार्थबोधक-पञ्चम्यन्तलाक्षणिकपदवदवयवत्वस्य विवक्षितत्वात्। यत्तु। अयमात्मा ज्ञानादित्यत्राव्याप्तिः शक्त्यैव ज्ञानोपस्थितिसम्भवे लक्षणाविरहादिति। तन्न। यद्विषयकज्ञानस्य हेतुत्वमवगतं तस्य व्याप्त्यादि-जिज्ञासायाम् उदाहरणदिप्रयोगः। न चेह ज्ञानविषयकत्वेनोपस्थितिर्विना लक्षणाम्। अन्यथा सुखादेरपि व्याप्त्याद्युपदर्शनप्रसङ्गात्। केचित्तु। पञ्चम्यन्तलाक्षणिकपदवत्त्वनियतावयवतावच्छेदक-रूपवत्त्वं तादृशपदवत्त्वव्यभिचार्यवयवतावच्छेदकशून्यावयवत्वं वा विवक्षितमित्याहुः। नव्यास्तु पञ्चम्याः ज्ञानज्ञाप्यत्वे लक्षणयैवोपपत्तौ न प्रातिपदिकेऽपि लक्षणा। आकाङ्क्षावैचित्र्याच्च पदार्थैक-

In Public domain. Digitization Muthulakshmi Research Academy

हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षायां व्याप्तिपक्षधर्मतयोरुपदर्शनप्राप्तौ व्याप्तेः प्राथम्यात्तत्प्रदर्शनायोदाहरणम्। तत्रानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानजनकव्याप्यत्वाभिमतवन्निष्ठनियतव्यापकत्वाभिमतसम्बन्धबोधजनकशब्दत्वमुदाहरणत्वम्। सामान्यलक्षणे साध्यसाधनसम्बन्धबोधजनकत्वम्। साध्यसाधनाभावसम्बन्धबोधजनकत्वञ्च विशेषलक्षणद्वयम्। न्यायावयवदृष्टान्तवचनमुदाहरणमिति तु न। दृष्टान्तप्रयोगस्य सामयिकत्वेनासार्वत्रिकत्वात्। यो यो धूमवान् सोऽग्निमानित्येव व्याप्तिप्रतीतेः। नापि प्रकृतानुमितिहेतुलिङ्ग-

---

देशेऽपि ज्ञाने प्रातिपदिकार्थौ विषयित्वेनान्वेति कर्तृकृतीव कृतौ धात्वर्थः। यद्धर्मविशिष्टश्च हेतुः प्रयुज्यते आकाङ्क्षादिवशात्तद्धर्मविशिष्टस्यैव व्याप्यत्वमुपदर्श्यते। अन्यथा यथार्थधूमज्ञानादित्यादिप्रयोगेऽपि धूमादेर्व्याप्यत्वोपदर्शनप्रसङ्ग इति प्राहुः।

## । इति दीधितौ हेतुलक्षणम्।

इतरान्वितस्वार्थबोधकत्वे सति, स्वीयं यदन्त्यभिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकत्वे सति, अन्त्यपदवत्त्वे सति, स्वीयानन्त्यपदार्थविशेष्यकान्वयबोधाजनकं यत्तदन्यत्वे च, सति वा न्यायावयवत्वं प्रतिज्ञात्वम्। प्रतिज्ञाहेत्वोरुपनयनिगमनयोः स्वार्थौ परस्परमन्वितौ। न तूदाहरणस्य केनापि। पदं विभक्त्यन्तम्। तेन निगमने नातिव्याप्तिः। प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितस्वार्थबोधकन्यायावयवत्वं हेतुत्वम्। निगमनवारणायोपस्थापितान्तम्। प्रमेयत्वमभिधेयं प्रमेयत्वादित्यादौ प्रकृत्यर्थपक्षान्वितस्वार्थबोधकपञ्चम्यन्तार्थान्वितः न प्रतिज्ञार्थः। अपि तु तदेकदेशार्थ इति। स्वार्थविशिष्टवैशिष्ट्यबोधजनकन्यायावयवत्वम्। विशिष्टवैशिष्ट्यबोधजनकस्वार्थबोधजनकन्यायवयवत्वम्। विशिष्टवैशिष्ट्यबोधजनकस्वार्थविशिष्टबोधजनकन्यायावयवत्वं वा तत्वम्। एकवाक्यतया हेत्वर्थविशिष्टसाध्यवैशिष्ट्यं भासते न पुनरवयवान्तरार्थविशिष्टस्य कस्यचिदिति। इतरान्वितस्वार्थाबोधकन्यायावयवत्वमुदाहरणत्वम्। अन्वयव्याप्तिबोधकतत्वं व्यतिरेकव्याप्तिबोधकतत्त्वं च विशेषलक्षणम्। इतरोपस्थापितार्थविशेषणकस्वार्थबोधजनकन्यायावयवत्वम्। स्वार्थविशेष्यकेतरार्थान्वयबोधजनकन्यायावयवत्वं चोपनयत्वम्। अवयवार्थविशेष्यकस्वार्थबोधजनकन्यायावयवत्वं निगमनत्वम्। हेत्वर्थश्च न प्रतिज्ञार्थे विशेषणत्वेनान्वेति। किन्तु तदेकदेशार्थे इत्युक्तप्रायम्।

**इति श्रीमन्महामहोपाध्याय-भट्टाचार्यतार्किकशिरोमणि-रघुनाथकवि-विरचितायां तत्त्वचिन्तामणिव्याख्यायामनुमानदीधित्यपराख्यायामवयवग्रन्थः सम्पूर्णः।**

In Public domain. Digitization Muthulakshmi Research Academy


परामर्शपरवाक्यजन्यज्ञानविषयव्याप्त्युपनायकं वचनं तत्। उपनयातिव्याप्तेः। अत एवोपनया-भिधानप्रयोजकजिज्ञासाजनकवाक्यमुदाहरणम्।

एतदेवान्वयव्यतिरेकव्याप्तिविषयकत्वविशेषितं विशेषलक्षणद्वयमित्यन्ये। अत्र च व्यभिचारवारणाय वीप्सामाहुः। यत्र च सामानाधिकरण्यादेव व्याप्तिस्तत्र न वीप्सा। केवलान्वयिन्यभेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थ्यमिति तु वयम्। वीप्सा च यत्वदे न तु तत्पदेऽपि। विरूपोपस्थितयोरपि तत्पदेन परामर्शात्। बुद्धिस्थवाचकत्वादिति न व्युत्पत्तिविरोधः। यथा "यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्म" इत्यत्र। इदञ्च साध्यसाधनोभयाश्रयाश्रयविकलानुपदर्शितान्वयविपरीतोपदर्शितान्वयानुपदर्शितव्यतिरेकविप-रीतोपदर्शितव्यतिरेकभेदाभासरूपमिति।

**। इति तत्त्वचिन्तामणावुदाहरणग्रन्थः।**

उदाहरणानन्तरं भवतु व्याप्तिस्तथापि व्याप्तं किं पक्षे वर्तते न वेत्याकाङ्क्षायां व्याप्तस्य पक्षधर्मत्वप्रदर्शनायोपनयः। तत्रानुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वमुपनयत्व-मिति सामान्यलक्षणम्। साध्याव्याप्यविशिष्टपक्षबोधकावयवत्वम्। साध्याभावव्यापकाभाव-प्रतियोगिमत्पक्षबोधकावयवत्वं च विशेषलक्षणद्वयम्। उदाहरणान्त एव प्रयोग इति न वाच्यम्। तृतीयालिङ्गपरामर्शस्य व्याप्तिपक्षधर्मतावगाहिनो अवयवान्तरादलाभात्। तदनभ्यु-पगमेऽपि पक्षधर्मतया अलाभात्। न तु हेतुवचनादेव तदवगमः। तस्य को हेतुरित्याकाङ्क्षायां प्रवृत्तत्वेन हेतुस्वरूपोपस्थापकस्यातत्परत्वात्। वादिवाक्यादेवाक्षेप इति चेन्न। तदर्थस्यासि-द्धत्वेन अनाक्षेपकत्वात्। अन्यथा प्रतिज्ञावाक्यादेव सर्वापेक्षेऽवयवान्तरविलयात्। प्रति-पाद्यानां स्वत एव तदवगम इति चेन्न। तेषां व्युत्पन्नाव्युत्पन्नतया सर्वत्र तदसम्भवात्। (तत्परत्वात्) प्रतिपादकेन स्वव्यापारस्य निर्वाहयितुमुचितत्वाच्च। अन्यथा अवयवान्तरेऽप्येवं प्रसङ्गादिति।

**। इति तत्त्वचिन्तामणावुपनयग्रन्थः ।**

In Public domain. Digitization Muthulakshmi Research Academy

उपनयानन्तरं निगमनम्। तच्चानुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारण-व्याप्तिपक्षधर्मताधीप्रयुक्तसाध्यधीजनकवाक्यम्। न च व्याप्तिपक्षधर्मतयोश्चतुर्भिरेवावयवैः पर्याप्तेः किं तेनेति वाच्यम्। अवाधितासत्प्रतिपक्षितत्वयोरलाभे चतुर्णामप्यपर्यवसानात्। अथाभिधानाभिधेययोः व्याप्तिपक्षधर्मतावल्लिङ्गप्रतिपादनादेव पर्यवसानेन अवयवान्तराणां निराकाङ्क्षत्वम्। विपरीतशङ्कानिवृत्तेरपि तत एव लाभात्। अन्यथा निगमनेनापि तदवारणात्। न हि तद्विशेषदर्शनमनादृत्यैव तन्निवर्तकम्। सिद्धनिर्देशतया वारयतीति चेन्न। स्वरूपमात्राभि-धानात्साध्यत्वानुपस्थितौ तस्मादिति हेतुविभक्त्यनन्वयप्रसङ्गाच्चेति चेन्न। व्याप्तिपक्षधर्मता-ज्ञानेऽपि वाधसत्प्रतिपक्षवुद्धेः साध्यज्ञानेनानुत्पत्तिदर्शनात्। तदभावावोधने समीहिताऽनि-र्वाहात्। अथ वाधादिविरहस्य प्रयोजकत्वं न तु तद्बोधस्य मानाभावादसिद्धेश्चेति किमर्थं वाधादिवरहो बोधनीय इति चेन्न। यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति व्याप्तेः। न चानन्वयः। तस्मादित्यन्वयबलादेव हेत्वनाकाङ्क्षितत्वलक्षणसिद्धत्वज्ञानात् न त्वन्वयात्प्राक्। इह केचित्। यथा तस्मादिति सर्वनाम्ना हेतोः परामर्शः पूर्वोक्ताशेषरूपलाभाय तथा साध्यांशस्यापि तथेति सर्वनाम्ना सिद्धस्थल इव विरोधादिवारणाय युक्त इत्याहुः। तन्न। तथेति स्वरूपे, प्रकारे, सादृश्ये वा। आद्ये तथा चायमिति प्रक्रमात्तथेति हेतुमानित्यर्थस्स्यात्। तथा चानन्वयः। न हि हेतुमत्वादेव हेतुमत्वमित्यन्वितम्। न द्वितीयः। सामान्येन पक्षस्याप्यन्वयव्याप्तौ प्रवेशात्। तत्प्रकारान्वयः तत्रैवेत्यनन्वयात्। अत एव न तृतीयोऽपि। अभेदानुमाने च अन्वयिनि तस्मात्तथेति सादृश्यान्वयाभावात्। बहूनाञ्च प्रक्रमे विशेष्यानन्वयात्। वादिवाक्ये च योग्यतान्वयेऽतिप्रसङ्गात्। तस्मादित्यत्र तु हेतुविभक्त्यर्थानन्वयादेव नियमः। तस्मादनित्य इत्यभिधाने च विशिष्य सिद्धान्तादवगम्यते। पूर्वं साध्यतयोक्तस्य समर्थहेतुसम्बन्धेन पुनरुत्कीर्तनात्। अन्यथा तद्वैयर्थ्यात्। संशयप्रयोजनादयस्त्ववयवलक्षणाभावादेव नावयवाः। किन्तु न्यायाङ्गतया न्यायान्तर्गतत्वे-नोपयुज्यन्त इति नाधिक्यम्। कण्टकोद्धारस्य च न सार्वत्रिकत्वं समयविशेषोपयोगित्वादिति।

**इति श्री मद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तमाणावनुमानपरिच्छेदे**

**अवयवग्रन्थस्सम्पूर्णः।**

In Public domain. Digitization Muthulakshmi Research Academy


## अथ गदाधरीये न्यायलक्षणं निरूप्यते

अनुमानं निरूप्य न्यायतदवयवनिरूपणं प्रतिजानीते। मूले **तच्चेति** **तत् ** निरुक्तमनुमानम्। **परार्थम्** विचारदशायां मध्यस्थस्य विवादविषयसाध्यनिश्चय-

---

## अथ कृष्णम्भट्टीये न्यायलक्षणं निरूप्यते

श्रीः। *अनुमानं निरूप्येति* लिङ्गपरामर्शरूपानुमानस्य तत्करणमनुमानमितिलक्षणं तच्च लिङ्गपरामर्श इति स्वरूपम्। अथानुमानं न प्रमाणमित्यादिना प्रामाण्यं तच्चानुमानं त्रिविधमिति विभागं चोक्त्वेत्यर्थः। अनुमानादिविशेष्यकलक्षणादिप्रकारकप्रतिपत्त्यनुकूलो यो व्यापारस्तदुत्तर-कालीनो यो लक्षणादिप्रकारकन्यायादिविशेष्यकप्रतिपत्त्यनुकूलो व्यापारोऽव्यवहितोत्तरकालकर्तव्यत्वेन तद्बोधनं यत्तदनुकूलकृतिमान् मणिकार इति बोधः। आद्यो व्यापारस्तत्करणमित्यादिशब्दात्मकः, द्वितीयोऽनुमितिचरमकारणेत्यादिशब्दात्मकः। बोधनञ्च तच्चेत्यादिशब्दः। अत्र स्वार्थानुमितौ अप्रामाण्यज्ञानानास्कन्दितपरामर्शत्वेन हेतुतापरार्थानुमितौ तु न्यायप्रयोज्यविजातीयपरामर्शत्वेन तस्याप्रामाण्यज्ञानास्कन्दितत्वात्। न चानुमितित्वपरामर्शत्वाभ्यां सामान्यत एव कार्यकारणभावः स्वार्थानुमितिं प्रति तु अप्रामाण्यग्रहाभावोऽधिक इति वाच्यम्। तथाप्यप्रामाण्यज्ञानास्कन्दितान्न्याय-प्रयोज्यपरामर्शात्परार्थानुमितिप्रसङ्गवारणायोक्तवैजात्यस्यावश्यकत्वात्। तथा च विभिन्नसामग्री-प्रयोज्यतावच्छेदकतया स्वार्थत्वपरार्थत्वेऽनुमितित्वव्याप्यजाती। करणे तु स्वार्थानुमितिकरणत्वं स्वार्थत्वं परार्थानुमितिकरणत्वं परार्थत्वमिति प्राञ्चः। तदसत्। परार्थस्थले अप्रामाण्यज्ञानास्कन्दिता-दनुमित्युपगमे न्यायजन्यज्ञानस्यैवोपनयार्थविषयकत्वेन मूले परामर्शान्तरस्वीकारवैयार्थ्यात्। अप्रामाण्यज्ञानास्कन्दितात्तस्मान्नानुमितिरिति मिश्रमते अग्रेऽभिधानात्। निरुक्तमनुमानमिति-व्याख्यानाच्च। अप्रामाण्यज्ञानास्कन्दितानुमानस्यानिरुक्तत्वात्। एकहेतुकन्यायाधीनपरामर्शादौ वा तत्साध्यव्याप्यहेत्वन्तरभानेऽनुमितौ जातिसङ्कराद्यापाताच्चेत्यतो व्याचष्टे। *परार्थेति* विपरीतोद्भावक -परविजिगीषया न्यायप्रयोगो विचारः। तद्दशायामित्यस्य निश्चये अन्वयः। तत्प्रयोज्यपरामर्शोत्तर-काले इति यावत्। परोऽर्थः प्रयोजनं यस्येति विग्रहः। संशयस्य दुःखहेतुतया न प्रयोजनत्वमिति तद्भिन्नार्थकं परपदमर्थात्साध्यावगाहिज्ञानत्वलाभः। संशयसामग्रीसूचनाय न्यायसाध्यत्वान्वयाय च। *विवादेति* एवं विवादकालीने आनुमानिकसाध्यनिश्चयेऽपि तत्प्रयोजकविरहशङ्कया तत्राप्रामाण्या-शङ्कया अनिवृत्तेस्तत्प्रयोजकन्यायसाध्यानुमितिविषयत्वज्ञानस्य आवश्यकत्वार्थं न्यायसाध्यत्व-मुक्तम्। (एतेन संशयाभावान्नोक्तप्रयोजनं युक्तमिति हि शङ्का निराकृता) परामर्शस्यानुव्यवसायादि-

In Public domain. Digitization Muthulakshmi Research Academy
रूपप्रयोजनसाधनम्। **न्यायसाध्यमिति** न्यायप्रयोज्यमित्यर्थः। वादिप्रयुक्तन्यायजन्यशाब्दबोधेन मध्यस्थस्य अनुमितिचरमकारणलिङ्गपरामर्शरूपानुमानजननादिति भावः। ज्ञायमानलिङ्गस्यानुमानत्वे तु तद्विशेषणस्य परामर्शस्य न्यायाधीनत्वेन तद्विशिष्टस्य तथात्वमित्यवधेयम्। अथवा। **अनुमानम्** अनुमितिः। **परार्थम्** मध्यस्थस्य साध्यसंशयनिवृत्तिरूपप्रयोजनसाधनम्। परस्य, प्रतिवादिनः, अर्थो निवृत्तिर्यस्मात्तादृशमिति वा। एतेन निरूपणप्रयोजनमुपदर्शितम्, न्यायप्रयोगद्वारा मध्यस्थानुमितेरेव न्यायज्ञानप्रयोजनत्वात्। कारणत्वं, स्मरणप्रयोजकसम्बन्धकथनेन प्रसङ्गो वा सङ्गतिरपि दर्शिता।

---

प्रयोजनकत्वे न्यायसाध्यत्वस्याप्रयोजकत्वात्तथा नोक्तम्। न्यायजन्यशाब्दबोधस्योपनयार्थेऽप्यप्रामाण्यग्रहास्कन्दिततत्वेन लिङ्गसंशयद्वारा साध्यसंशयहेतुत्वमिति किं तदित्याकाङ्क्षा स्यादतः अनुमानमित्युक्तम्। साध्यपदं न जन्यत्वार्थकमित्याह। *वादिति* *ज्ञायमानेति* एतन्मते न्यायोपयोगसमर्थनार्थं न च तन्मते विशेष्यस्य ज्ञानस्य लिङ्गतास्थले न्यायसाध्यतासम्भवः। एवं विनिगमनाविरहेण विशेषणस्यापि हेतुत्वात्तत्र तत्सम्भवेन तद्वशिष्टेत्यसङ्गतमिति वाच्यम्। परार्थानुमा-नत्वावच्छेदेन न्यायसाध्यत्वप्रदर्शनार्थं तथाभिधानात्। पूर्वं केवलान्वयिग्रन्थेऽनुमानस्येवानुमितेरपि त्रैविध्यस्य प्रदर्शितत्वात्। तच्चानुमानमिति मूलस्यानुमित्यर्थकत्वमाह। *अथवेति* एतत्कल्पे। *तत* उक्तलक्षणलक्षितमित्यर्थः। वस्तुतस्तु विवादनिवर्तकत्वस्य शब्दतो लाभायाह। *अथवेति* नन्वनुमानस्यैव न्यायज्ञानप्रयोजनत्वे तस्य साध्यसंशयनिवर्तकत्वरूपपरार्थत्वसम्भवादनुमितिरिति व्याख्यानं व्यर्थमिति चेन्न। अनुमितितृतीयक्षणपर्यन्तं संशयोच्छित्तेर्विविक्ततालाभाय तद्व्याख्यानात्। पूर्वोक्तार्थासम्भवादाह। *परार्थमिति* परत्वमुत्कृष्टत्वं तच्च दुःखसाधनाभावे संशयनिवृत्तापक्षतमिति तस्याः प्रागुक्तपरपदार्थत्वाभावेऽपि न क्षतिः। विजयप्रयोजकत्वमपि दर्शयति। *परस्येति* परा परकीया निवृत्तिर्यस्मादित्यादौ समस्यमानपरपदेऽपि लक्षणा स्यादतस्तन्नोक्तम्। प्रतिवादिनिवृत्तिश्च प्रतिवादिसिद्धार्थज्ञानेऽप्रामाण्यज्ञानसम्पादनम्। एतत् कल्पेऽनुमितिरिति व्याख्यानमावश्यकं परामर्शे ईदृशपरार्थत्वाभावात्। *एतेन* परार्थत्वाद्यभिधानेन। *निरूपणेति* न्यायतदवयवनिरूपणेत्यर्थः। *उपदर्शितमिति* तदप्रदर्शने ग्रन्थश्रवणे प्रवृत्त्यनुपपत्तेः। सद्धेतुप्रयोज्यतत्त्वनिर्णयान्तरालाभाश्च सल्लिङ्गपरामर्शमात्रस्य स्वार्थानुमितेश्च न्यायज्ञानप्रयोजनत्वव्यवच्छेदायैवकारः। ननु अनुमितिनिरूपणानन्तरं न्यायनिरूपणे का सङ्गतिरित्यत आह। *कारणत्वमति* प्रयोजकत्वमित्यर्थः। तस्य हेतुतानन्तर्भावेऽप्याह। *स्मरणेति* प्रथमकल्पे स्वप्रयोज्यानुमितिप्रयोजकत्वं सम्बन्धः तच्चेत्यादिना

In Public domain. Digitization Muthulakshmi Research Academy

**समस्तरूपेति** पक्षसत्त्वादिपञ्चरूपेत्यर्थः। उपनयेन पक्षसत्त्वस्योदाहरणेन व्याप्तिघटक-सपक्षसत्त्वविपक्षासत्त्वयोर्निगमनेन चाबाधितत्वासत्प्रतिपक्षितत्वयोः प्रतिपादनाल्लक्षण-समन्वयः। **अत्रैवेति** समस्तरूपोपपन्नलिङ्गमित्यत्रैवेत्यर्थः। **अतिव्याप्तेरिति** इदमुपलक्षणम्। उदाहरणादित्रिकस्यापि न्यायत्वापत्तिर्द्रष्टव्या। **अनुमितीति** अनुमिति-

---

कथ्यते। स्वमनुमानं स्वप्रयोजकत्वं तु युक्तम्। द्वितीयकल्पे च स्वप्रयोजकानुमितेः प्रयोजकत्वं सम्बन्धः। परार्थं न्यायसाध्यमित्याभ्यां कथ्यते स्वं संशयनिवृत्तिः। स्वप्रयोज्यसंशयनिवृत्तिप्रयोजकत्वं तु युक्तम्। एतादृशसम्बन्धज्ञानसहितादनुमानादिज्ञानात् न्यायरूपापरसम्बन्धिस्मरणमित्यर्थः। प्रसङ्गश्च न्यायत्वादिः। को न्याय इति जिज्ञासायामनन्तराभिधानात्। गुरुस्मृतिविषयत्वेन व्यापकतान्यायता बोध्या। इतीत्यादि मूलम्। इति पदं प्रक्रान्तसाधकतार्थकं पञ्चम्यन्तं तथा चानुमानादिविशेष्यकलक्षणादिप्रकारकप्रतिपत्त्यनुकूलो यो व्यापारस्तदुत्तरकालीनो यो वर्तमानो न्याय-निष्ठसाधकताज्ञानजन्यजिज्ञासाधीनो लक्षणादिप्रकारकप्रतिपत्त्यनुकूलो व्यापारस्तज्जन्यफलविशेष्यो न्यायादिरित्यर्थः। *तदवयवा इति* तत्पदं न्यायत्वघटितधर्मपुरस्कारेणैवावयवनिरूपणलाभाय गादाधर्याम्। *उदाहरणेनेति* ननु सपक्षसत्त्वविपक्षासत्त्वयोः कथं व्याप्तिघटकत्वमितिचेन्न। प्राचां मते साध्यवदन्यावृत्तित्वे सति साध्यसामानाधिकरण्यस्यैव व्याप्तित्वात्। तथाचोदाहरणस्य व्याप्ति-बोधकत्वे तदुभयबोधकत्वमक्षतमिति भावः। केचित्तूपनयेन पक्षसत्वादीनामुत्तरकालीनो मानसबोधः। एवमवयवान्तरेभ्योऽपि सपक्षसत्त्वादीनामित्यग्रे स्फुटमित्याहुः। *निगमनेनेति* तत्पदस्याबाधित-त्वादिविशिष्टलिङ्गे लक्षणा। परे तु प्रतिज्ञा हेतुभ्यां लिङ्गज्ञाप्यसाध्यबोधेन पुनस्तादृशसाध्यबोधे किं प्रयोजनमित्याकाङ्क्षया अबाधितत्वादिबोधनस्यैव प्रयोजनत्वं वाच्यं तच्च हेतुरबाधितत्वादिमान्। साध्य-निष्ठहेतुज्ञाप्यत्वबोधकवाक्योत्तरवाक्यबोधितसाध्यनिष्ठहेतुज्ञाप्यत्वघटकहेतुत्वादितिरीत्येत्याहुः। मौल-स्यात्र पदस्य लक्षणवाक्ये इति नार्थः। तस्य प्रतिपादकत्वप्रतिपादकत्वादतो व्याचष्टे। *समस्तेति* लिङ्गं सपक्षसत्त्वादिरूपनानाधर्मवदित्याकारके वाक्ये इत्यर्थः। न्यूनतां परिहरति। *इदमिति* तादृश-शाब्दबोधप्रयोजकवाक्यपञ्चकमात्रवृत्तिसमुदायत्वोक्तेर्नायं दोषः। मात्रपददानात् को वह्निमानित्यादि-प्रश्नवाक्यव्युदास इति चेन्न। लिङ्गं पक्षवृत्तिसपक्षवृत्तीत्यादिवाक्यपञ्चकेऽतिव्याप्तेः। प्रतिज्ञात्वादिना वाक्यनिवेशे च प्रयोजकान्तवैयर्थ्यात्सिद्धान्तलक्षणे पर्यवसानम्। स्वार्थविशिष्टज्ञानमित्येकत्वोक्तेर्लक्षणे एकज्ञानं निवेशयतामुपाध्यायानां मतमादर्शयति। *अनुमितीत्यादि* चरमत्वमनुमितिजनने स्वोत्तर-भाविज्ञानानपेक्षत्वम्। यत्तु स्वार्थानुमितिजनकमानसपरामर्शजनकबोधजनकस्य वह्निव्याप्यधूमवान-यमिति वाक्यस्य वारणाय चरमेति अनुमित्योर्या चरमा परार्थेत्यर्थ इति। तत्तुच्छम्। चरमगणितत्वस्य

In Public domain. Digitization Muthulakshmi Research Academy

चरमकारणं यो लिङ्गपरामर्शो व्याप्तिप्रकारेण पक्षे यल्लिङ्गज्ञानं तत्प्रयोजकं यच्छाब्दज्ञानं तज्जनकवाक्यमित्यर्थः।

अत्र च प्रयोजकान्तं प्रतिज्ञादिसकलावयवजन्यमहावाक्यार्थबोधस्य तावदर्थगोचर-समूहालम्बनबोधस्य वा परिचायकमात्रं न तु परामर्शप्रयोजकत्वेन शाब्दज्ञानस्य लक्षण-घटकता, किन्तु तावदर्थविषयकबोधत्वेनैव अतो धूमवान्पर्वत इत्यादिवाक्यमात्रजन्याया अपि बुद्धेरुपनायकज्ञानादिविधया मानसपरामर्शप्रयोजकतया तत्रातिव्याप्तिरिति निरस्तम्। तादृश-यत्किञ्चिच्छाब्दबोधं प्रति यादृशयादृशधर्मप्रकारकज्ञानत्वेन शब्दज्ञानस्य कारणता प्रत्येकं तत्तद्धर्मावच्छिन्नवाक्यसमुदायत्वस्य तादृशयत्किञ्चिच्छाब्दबोधनिरूपिता शब्दज्ञाननिष्ठा या

---

चरमपदार्थत्वापातात्। *महावाक्यार्थबोधस्येति* विशिष्टैकार्थतापन्नबोधस्येत्यर्थः। स च निगमनैकार्थ-तापन्नो य उपनयार्थस्तद्विधेयक उदाहरणार्थान्वितो यो हेत्वर्थान्वितप्रतिज्ञार्थस्तदुद्देश्यकबोधोऽननुषङ्ग-पक्षे उपनयार्थे निगमनार्थान्वयेन बोध्यः। उदाहरणवाक्ये च यो य इत्यस्य स इत्यस्य यथा महानस इत्यस्य च तात्पर्यग्राहकत्वमात्रम्। वह्निपदस्य धूमव्यापकवह्नौ लक्षणा धूमवत्पदर्थे तद्वतोऽभेदान्वया-द्धूमव्यापकवह्निमदभिन्नधूमवान् उदाहरणार्थः। उदाहरणार्थवृत्त्यवच्छेदकतानिरूपितहेत्वर्थघटित-प्रतिज्ञार्थोद्देश्यतानिरूपिताया निगमनार्थावच्छिन्नोपनयार्थविधेयता तच्छालिशाब्दबोधे प्रतिज्ञादि-पञ्चकत्वेन कारणतेत्याशयः। *परिचायकेति* तावदर्थबोधत्वादिना शाब्दबोधपदलक्ष्यं प्रदर्श्य स्वयं निवर्तत इति यावत्। यथाश्रुतत्यागे बीजमाह। *अत इति* ननु प्रयोजकत्वान्तपरित्यागे न्यायैक-देशेऽतिव्याप्तिस्तावदर्थबोधजनकताव्यापकवाक्यत्वोक्तौ त्वसम्भवादत आह। *तादृशेति* न्यायज्ञाने एकाकारणतानास्त्यैव एकैककारणतामादाय तु प्रतिज्ञादौ न्यायैकदेशेऽतिव्याप्तिरित्यत आह। *यादृश-यादृशेति* अग्रे या येति च वीप्सा या या विषयितेति तु नोक्तं, सकलान्तर्गतानुपूर्वीविषयिता-निरूपकवर्णाप्रसिद्धेः। ननु तत्तद्धर्मावच्छिन्नत्वमन्त्यवर्ण एव न सर्ववर्णे इत्यत आह। *तादृशेति* तादृशधर्मश्चेत् पर्वतो वह्निमानिति वाक्यनिष्ठानुपूर्वी तदा तद्विशिष्टवाक्यसमुदायत्वं तदाकारवाक्य-सहस्रघटितसमुदायस्य नत्वेकवाक्यघटितस्य न्यायस्येत्यसम्भव इत्यतस्तादृशेत्यपि कश्चित्, यत्तु तावदर्थबोधकारणतावच्छेदकविषयतावच्छेदकसमुदायत्वं न्यायत्वं न्यायघटकतावद्वर्णवृत्तिसमुदाय-त्वावच्छिन्नविषयतात्वेन कारणतावच्छेदकत्वात्। न च तावद्वर्णवृत्तिसमुदायत्वज्ञानत्वेन हेतुत्वमानु-पूर्वीविषयकत्वशून्यतद्घटकसकलवर्णसमुदायत्वज्ञानसाधारण्यात्। नाप्यानुपूर्वीविशिष्टसमुदायत्व-ज्ञानत्वेन तादृशानुपूर्वीविशिष्टनिगमनमात्रवृत्तिसमुदायत्वज्ञानसाधारण्यादिति वाच्यम्। तथाविध-

In Public domain. Digitization Muthulakshmi Research Academy

या कारणता तत्तदवच्छेदककोटिप्रविष्टयत्किञ्चिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्व-पर्यवसितस्य विपक्षितत्वात् नास्माकं न्यायैकदेशेऽतिव्याप्तिः। तादृशधर्माश्च प्रतिज्ञादीनामानुपूर्वीविशेषा एव। पर्वतो वह्निमानित्याकारकबोधे पर्वतो वह्निमान् पर्वतो दहनवानित्याकारकविविधानुपूर्वीप्रकारकज्ञानानामेव हेतुतया तथाविधैकैकानुपूर्व्यवच्छिन्नवाक्यपञ्चकस्य न्याय-

---

समुदायत्वविशेषावच्छिन्नज्ञानत्वेन हेतुत्वोपगमात्। तादृशसमुदायत्वविशिष्टविषयितात्वेन तथात्वे तु स्वनिरूपकनिष्ठतादृशविषयितानिरूपकतावच्छेदकसमुदायत्वं तत्र च न व्यापकत्वादिप्रवेश इति मतं तन्निराकर्तुमाह। *तादृशधर्माश्चेति* समुदायत्वमाकाङ्क्षादिमत्पदसमूहत्वम्। तत्र समूहत्वज्ञानस्यानुपयुक्ततया आकाङ्क्षाज्ञानत्वेन हेतुत्वं फलितम्। आकाङ्क्षा चानुपूर्वीविशेषः। महावाक्यार्थघटितलक्षणेऽपि तादृशोपनयोत्तरत्वविशिष्टनिगमनत्वरूपानुपूर्वीज्ञानत्वेनैव हेतुत्वमिति उक्त कार्यकारणभावस्याप्रामाणिकतया न्यायत्वरूपसमुदायत्वे तादृशविषयतावच्छेदकत्वासम्भवात्। पर्वतो वह्निमानिति शाब्दबोधे आनुपूर्व्यन्तरसाधारणतत्सामान्यं न कारणतावच्छेदकघटकमिति विशेषपदम्। मनोयोगादिकारणतया योग्यताज्ञानादिविधया कारणताया यद्यदर्थान्तर्गतत्वे तदवच्छेदकविषयितानिरूपकवर्णाप्रसिद्धेराह। *शब्दज्ञाननिष्ठेति* तत्त्वश्चेच्छावच्छिन्नविषयिताघटितधर्मानवच्छिन्ननिर्णयत्वावच्छिन्नत्वं तात्पर्यशब्दोभयसमूहालम्बने तात्पर्यज्ञानत्वावच्छिन्नकारणतायाः तादृशविषयितानवच्छिन्नत्वात्। योग्यताशब्दोभयसमूहालम्बने च येग्यताज्ञानत्वावच्छिन्नकारणताया निर्णयत्वानवच्छिन्नत्वाद्व्युदासः। *हेतुतयेति* यद्यपि समानानुमानानुपूर्वीकनानावाक्यविषयिताशालिज्ञानत्वेन पर्वतो वह्निमानित्याकारकबोधहेतुत्वे यत्किञ्चिच्छाब्दबोधानुधावनमफलम्। तथापि कारणानन्तरत्वविशिष्टशाब्दबोधं प्रति असमानानुपूर्वीकवाक्यानुत्तरतादृशशाब्दबोधं प्रति पृथक्कारणताकल्पे तदावश्यकं पर्वतो वह्निमान् पर्वतो दहनवानिति वाक्ययुगलोत्तरशाब्दबोधस्य च समानानुपूर्वीकवाक्यज्ञानविरहविशिष्टासमानानुपूर्वीकवाक्यज्ञानानुत्तरत्वं निवेश्य कार्यत्वनिर्वाहः। अनुगतरूपं पूर्वपूर्ववर्णविषयतानिरूपितचरमवर्णविषयतात्वादि। प्रतिज्ञादिघटकतावच्छेदरूपेणाघटकवर्णघटितसमुदायवारणाय भ्रमान्यज्ञानं वाच्यम्। समानानुपूर्वीकवाक्यनिश्चयत्वेन हेतुत्वादानुपूर्वीसाधारणविषत्वव्यापकत्वासम्भवाद्वर्णत्वनिवेशः। वर्णत्वं च कत्वादिव्यापकजातिविशेषः। प्रतिज्ञादिपञ्चकघटकैकदेशसमुदायेऽतिप्रसङ्ग इति व्यापकत्वनिवेशः। नन्वत्र व्यापकत्वनिवेशो व्यर्थः। न च प्रतिज्ञादिघटकैकदेशवृत्तिसमुदायेऽतिव्याप्तिरिति वाच्यं विनिगमनाविरहेण प्रतिज्ञाघटकवर्णसमानकारणतानां लक्षणघटकत्वात्तावदवच्छेदक-विषयताश्रयवर्णवृत्तित्वस्य तत्समुदायत्वेऽसत्त्वात् साक्षादवच्छेदकता तु निवेश्या अन्यथा परम्परया-

In Public domain. Digitization Muthulakshmi Research Academy

वच्छेदकविषयताश्रयतथाविधैकदेशवृत्तित्वेनातिप्रसङ्गानुद्धारप्रसङ्गात्। न च विषयतायां साक्षादवच्छे-दकत्वं विवक्षितुमशक्यमेव तद्विशिष्टज्ञानत्वस्यैव तथात्वादिति वाच्यम्। ज्ञानत्वत्वप्रवेशे गौरवेण ज्ञानीयत्वेन विषयताया एव साक्षादवच्छेदकत्वात्। मैवम्। यत्किञ्चिद्वर्णवृत्तिविषयतानामेव कारणता-व्यवच्छेदकत्वमितरविषयतानाञ्च तदवच्छेदकत्वमितिरीत्या प्रतिज्ञाप्रतिपाद्यार्थबोधीया एकाकारणता-हेत्वाद्यर्थबोधीया एकैककारणतेति पञ्चैव कारणताः प्रवेश्याः न तु यावत्यो महागौरवादिति व्यापकत्वो -पादानात्। यत्तु वाक्यार्थबोधे तद्घटकसकलवर्णविषयकज्ञानानामेव हेतुतया प्रत्येकं सकलवर्णविषय-तानामेव कारणतावच्छेदकतया तादृशी या या कारणता तदवच्छेदकविषयताश्रयवर्णवृत्तिसमुदायत्व-स्यैव लक्षणत्वस्य सुवचतया जातिविषयतावारणवर्णत्वत्वस्यावश्यकत्वेऽपि व्यापकत्वं व्यर्थमिति। तत्तुच्छम्। विश्रुङ्खलतावद्वर्णज्ञानादिना वाक्यार्थबोधवारणाय तत्तद्वाक्यार्थबोधे तत्तद्वाक्यानुपूर्वीज्ञान-स्यैव हेतुतायाः अवश्यवक्तव्यतया उक्तहेतुताया निर्बीजत्वात्। यद्यपि वाक्यघटकवर्णज्ञानानां प्रत्येकं न हेतुता गौरवात्। किन्तु तावद्वर्णविषयताशालिज्ञानत्वेनैकहेतुतैव। एवञ्चावच्छेदकीभूतयावद्विषयता-निवेशेनोपपत्तेर्व्यापकत्वं व्यर्थमेव। परन्तु व्युत्क्रमोच्चरितप्रतिज्ञादिघटकवर्णसमुदायत्ववारणाय स्वा-श्रयीभूतप्रतिज्ञादिघटकाद्यादिवर्णाव्यवहितोत्तरत्वशून्यतद्घटकद्वितीयादिवर्णवृत्तियत्समुदायत्वं तदन्य-त्वं निवेश्यमिति। तदपि तुच्छतरम्। तथा सति तद्वाक्यघटकव्युत्क्रमोच्चरितसकलवर्णज्ञानाच्छाब्द-बोधवारणाय तत्प्रतिबन्धकत्वोपगमप्रसङ्गात्। केचित्तु अस्तु वर्णज्ञानानामपि हेतुता परन्तु या याः कारणता इत्यत्र किं कतिपयकारणता उपादीयन्ते उत सकलाः। आद्ये कतिपयकारणतावच्छेदकी-भूतविषयताश्रयवर्णसमुदायत्वसत्वादेकदेशेऽतिव्याप्तिः। अन्त्ये सकलकारणतावच्छेदकैकविषयित्वा-प्रसिद्धेस्तादृशैकविषयितानिरूपकवर्णवृत्तित्वविशिष्टतादृशापरविषयितानिरूपकवर्णवृत्तित्वविशिष्टेत्या-दिरीत्या निवेशे विशेष्यविशेषणभावे विनिगमनाविरहेण पर्वतो वह्निमान्पर्वतो दहनवानित्यादिन्यूना-धिकवर्णघटितप्रतिज्ञाभेदेन च लक्षणानन्त्यमत आनुपूर्वीज्ञानहेतुतामालम्ब्य लक्षणमुपवर्णितमि-त्याहुः। यत्तु वर्णत्वं कत्वादेर्नान्यत् एवञ्च तादृशयत्किञ्चिद्वर्णत्ववत्ताव्यापकत्वमेव विवक्षितम्। एतेन तादृशयत्किञ्चिद्वर्णत्वव्यापकत्वमेकदेशे गतम्। तत्तद्वर्णत्वव्यापकत्वन्तु सकलतत्तद्वर्णत्वाधिकरणैका-प्रसिद्धिग्रस्तं तादृशैकवर्णत्वव्याप्यत्वे सति तादृशापरवर्णव्यापकत्वेत्यादिनोक्तदोषग्रस्तमित्यपास्तम्। यत्किञ्चिद्वर्णत्ववत्ता च स्वविषयितासमानाधिकरणतादृशावच्छेदकीभूतविषयितानिरूपकत्वविशिष्ट-तादृशविषयितानिरूपकतावच्छेदकत्वसम्बन्धेन। स्वं प्रतिज्ञादिपदघटकतावच्छेदकपत्वादीति। तेन रूपेण तदघटकवर्णभ्रमस्यापि प्रतिज्ञादिप्रतिपाद्यार्थबोधकत्वात्तत्साधारणसमुदायवारणाय निरूपकता -वच्छेदकप्रवेशः। भ्रमान्यत्वन्तु न निवेश्यं गौरवात्। स्वावच्छिन्ननिरूपकताकत्वस्वान्यधर्मावच्छिन्न-

In Public domain. Digitization by Muthulakshmi Research Academy


त्वानुपपत्तिरतो यत्किञ्चिच्छाब्दवोधनिवेशः। समानानुपूर्वीकनानावाक्यविषयतानामेवानुगत-रूपेणैकैककारणतायामवच्छेदकत्वात् पर्वतो वह्निमानित्याद्यैकैकवाक्यव्यक्तिघटितवाक्यपञ्चक-वृत्तिसमुदायत्वस्य न तादृशकारणतावच्छेदकविषयताश्रयवर्णत्वव्यापकत्वमिति यत्किञ्चि-ज्ज्ञानीयविषयतानिवेशः। न च वाक्यान्तरसाधारणसमुदायत्वमादाय वाक्यान्तरघटित-समुदायेऽतिव्याप्तिरिति वाच्यम्। तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वेन निरुक्त-

---

निरूपकताकत्वोभयाभाववत्तादृशविषयितानिरूपकत्वे सति स्वावच्छिन्नत्वस्यान्यधर्मावच्छिन्नत्वो-भयाभाववत्तादृशविषयितानुरूपकत्वे सति वा तादृशनिरूपकतावच्छेदकवत्त्वं हि सम्वन्धः। एवञ्चेदृश-सम्वन्धेन वर्णत्ववत्ताश्रयैकदेशवारणाय व्यापकत्वप्रवेशः। या या कारणतेति ग्रन्थतात्पर्यमप्यत्रैवेति। तत्तुच्छम्। भवन्मते विशिष्यवत्वादिना निवेशापातात्। तथासत्यव्याप्तेः। अस्मन्मते को वर्णः खोवर्ण इत्यनुगतमतिसिद्धवर्णत्वस्य जागरूकत्वात्। *तादृशेति* प्रतिज्ञात्वादिकमादाय सम्भववारणाय व्यापकत्वान्तं तत्र सकलपदोपादानञ्च तथा च निरुक्तयत्किञ्चिच्छाब्दवोधनिरूपितसकलजनकता-वच्छेदकविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकं यद्यत्समुदायत्वं तद्भिन्नं यत्तादृशवर्णत्वव्यापकसमुदायत्वं तद्वत्त्वमिति दलद्वयार्थः। नन्वत्र न्यूनवृत्तित्वं स्वसमानाधिकरणभेद-प्रतियोगितावच्छेदकत्वे सति स्वसामानाधिकरण्यम्। न चैवं स्वाधिकरणं यत्प्रत्येकं प्रतिज्ञादिः तत्र न्यायत्वावच्छिन्नभेदसत्त्वेनासम्भव इति वाच्यम्। स्वावच्छिन्नानुयोगिताकभेदप्रतियोगितानिवेशात्। प्रतियोगितायाञ्चानुयोगितासमानाधिकरणभेदप्रतियोगितावच्छेदकत्वं देयम्। तेन वाक्यान्तरसाधारण-समुदायत्वस्य न्यायत्वन्यूनवृत्तित्वेऽपि नासम्भवः। स्वसमानाधिकरणभेदप्रतियोगितायाः पर्याप्त्य-घटितस्वरूपसम्वन्धेनावच्छेदकत्वं वाच्यम्। उच्चारणभेदेन न्यायभेदादेकन्यायत्वस्यापरन्यायत्वनिष्ठ-न्यूनवृत्तितानिरूपकतयाऽसम्भव इति स्वसामानाधिकरण्यनिवेशः। तादृश वर्णत्वनिष्ठन्यूनवृत्तित्वानि-रूपकत्वोक्तावसम्भव इति समुदायत्वव्यापकत्वयोर्निवेशः। एवञ्च घटमानयेत्यादिवाक्यवारणाय दलान्तरे व्यापकान्तम्। तत्र प्रतिज्ञाहेतुसमुदायादिवारणाय यावत्कारणतानिवेशः। यद्वा (प्रतिज्ञाहेतु-समुदाये एकदेशभेदानुपगमे तु) स्वावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्ये तादृशानुयेगिताव-च्छेदकत्वे वा सति स्वसमानाधिकरणत्वं तत्। प्रत्येकप्रतिज्ञात्वादेरपि वारणाय दलान्तरे व्यापकान्तम्। एवञ्च तत्तन्न्यायत्वरूपतादृशसमुदायत्वनिष्टन्यूनवृत्तितानिरूपकत्वसत्त्वात्कथमेकैक-न्यायघटकवाक्यपञ्चकवृत्तिसमुदायत्वमादायातिव्याप्तिप्रसक्तिः। यदि च दलान्तरे तावदर्थविषयक-यच्छाब्दबोधो निवेश्यते एतद्दलेऽपि तच्छाब्दबोधव्यक्तेरेव निवेशान्नदोष इत्युच्यते। तदा फलोपधायक

In Public domain. Digitization Muthulakshmi Research Academy

समुदायत्वस्य विवक्षणीयत्वात्। न चैवमपि व्युत्क्रमप्रयुक्तप्रतिज्ञादिपञ्चकसमुदायेऽतिव्याप्तिस्तदवस्थैवेति वाच्यम्। [1]प्रतिज्ञादिपञ्चकव्युत्क्रमप्रयुक्तप्रतिज्ञादिवृत्ति यद्यत्समुदायत्वं तावद्भेद-कूटेन निरुक्तसमुदायत्वस्य विशेषणीयत्वात्। न चैवमपि एकैकन्यायघटकं यत्प्रतिज्ञादिवाक्यं तत्समुदायेऽतिव्याप्तिरिति वाच्यम्। स्वाश्रयीभूतयत्किञ्चित्प्रतिज्ञाद्यव्यवहितोत्तरत्वशून्य-हेत्वादिवृत्ति यद्यत्समुदायत्वं तदन्यत्वस्य समुदायत्वे विशेषणीयत्वादिति दिक्। न्यायजन्य-बोधस्य परामर्शप्रयोजकतां सङ्गमयति। ****प्रतिज्ञादीति**** ****एकवाक्यतयेति**** विशेषणे तृतीया। तथा चैकवाक्यतापन्नैरित्यर्थः। एकवाक्यत्वञ्च विशिष्टैकार्थप्रतिपादकत्वं तदुत्थाप्या-

-तानिवेशपर्यवसानापत्तेः। नियमतो वाक्यान्तरार्थविषयकन्यायार्थबोधस्थले वाक्यान्तरघटितसमुदाये तद्विशेषणोपादानेऽप्यतिव्याप्तिरशक्यसमाधाना च स्यात्। एवं न्यायत्वेऽप्येकैकन्यायघटकवाक्य-पञ्चकवृत्तिसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वसत्वादसम्भवाच्चेति चेन्न। यत्किञ्चित्तादृशसमुदायत्व-समानाधिकरणभेदप्रतियेगितानवच्छेदकत्वे सति तदन्यत्वं हि तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्व-निरूपकत्वमवच्छेदकत्वञ्च पर्याप्त्यघटितसम्बन्धेन। सामान्यतस्तादृशसमुदयत्वनिवेशे पर्वतो वह्निमान्पर्वतो दहनवानित्यादिन्यायत्वमिति। एकतरन्याये चालनीन्यायेन वाक्यान्तरसाधारणसमुदायभेद-सत्त्वेनातिव्याप्तिरतो यत्किञ्चित्त्वनिवेशः। असम्भववारणाय तदन्यत्वनिवेशनम्। स्वसमानाधिकरण-यत्किञ्चित्तादृशसमुदायत्वावच्छिन्नभेदसामानाधिकरण्यन्तु समुदाये एकदेशभेदोपगमापत्तिग्रस्तम्। ***व्युत्क्रमेति*** कथायामाकाङ्क्षाक्रमेणैवाभिधानमिति मूले अलक्ष्यत्वं स्फुटम्। व्युत्क्रमप्रयुक्तत्वं सामान्यतः प्रतिज्ञोत्तरत्वशून्यहेत्वादिवृत्तियद्यत्समुदायत्वं तद्भिन्नत्वमग्रे चात्रैव प्रतिज्ञायां स्वाश्रयत्व-निवेशोऽधिक इति भेदः। प्रतिज्ञादिपदञ्च तत्समानानुपूर्वीकवाक्यपरम्। अव्यावर्तकपदार्थभेदानिवेश-लाभाय समुदायत्वमिति। ***एकैकेति*** अत्रैकन्यायघटकप्रतिज्ञान्यायान्तरघटकं हेत्वादिचतुष्टयमेक-न्यायघटकवाक्यद्वयमपरतद्धटकवाक्यत्रयं क्रमिकमित्यादिरीत्या तत्तत्समुदायत्वमादाय तत्तत्पञ्चके अप्यतिव्याप्तिर्बोध्या। ***स्वाश्रयीभूतेति*** इदमसम्भववारणाय। ननु एतादृशपरिचायकरूपेणैव व्युत्क्रम-प्रयुक्तप्रतिज्ञादिसमुदायातिव्याप्तेर्वारयितुं शक्यत्वाद्व्युत्क्रमप्रयुक्तेत्यादिव्यर्थम्। न च व्युत्क्रमप्रयुक्तेषु प्रतिज्ञात्वादिकं नास्त्यैव किन्तूदासीनवाक्यत्वमेवेति वाच्यम्। प्रतिज्ञात्वादिकमित्यनेन विरोधात्। नापि स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्ययत्किञ्चित्प्रतिज्ञाद्युत्तरहेत्वादिवृत्तियद्यदिति विवक्षणान्न

1. व्युत्क्रमप्रयुक्तप्रतिज्ञादिवृत्ति यद्यत्समुदायत्वं तावद्भेदकूटेन निरुक्तसमुदायत्वस्य विशेषणीयत्वात् इति पाठान्तरम्।

In Public domain. Digitization Muthulakshmi Research Academy

-दोष इति युक्तम्। यत्किञ्चित्प्रतिज्ञाद्युत्तरत्वनिवेशवैयर्थ्यादिति चेन्न। तदा स्यादेव वैयर्थ्यम्। यदि
स्वाश्रयीभूतेत्यादिना सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वनिवेशस्स्यात्। तदेव न किन्तु तत्तद्व्यक्तित्वे
-नैवेति व्युत्क्रमप्रयुक्तप्रतिज्ञादिवृत्तिसमुदायत्वस्यापि भेदकूटस्यावश्यकत्वात्। अथवा व्युत्क्रमप्रयुक्त-
प्रतिज्ञादिवृत्तियद्यत्समुदायत्वं तत्तद्भिन्नत्वमित्यस्य वैयर्थ्यमेवेति। अत एव दीधितिकृता एतन्न-
निवेशितम्। एतत्पाठासत्त्वेऽयं ग्रन्थोऽन्यथा पूर्वविशेषणत्याग एव स इति बोध्यम्। अत्र च तादृश-
प्रतिज्ञाव्यवहितोत्तरत्वशून्यहेतुवृत्तित्वतादृशहेत्वव्यवहितोत्तरत्वशून्योदाहरणवृत्तित्वाद्यन्यतमविशिष्टा
-न्यत्वस्य स्ववृत्तित्वस्वाव्यवहितोत्तरत्वशून्यहेतुवृत्तित्वोभयसम्बन्धेन प्रतिज्ञाविशिष्टत्वस्ववृत्तित्वस्वा-
व्यवहितोत्तरत्वशून्योदाहरणवृत्तित्वोभयसम्बन्धेन हेतुविशिष्टत्वादन्यतमविशिष्टान्यत्वस्य वाऽनुगतस्य
निवेशः। अत्रानुपूर्व्याश्चरमवर्णपर्यवसितत्वेन चरमवर्णविषयताया एव साक्षादवच्छेदकत्वमतः साक्षा-
त्परम्परासाधारणावच्छेदकतालाभाय कोटिप्रविष्टेत्युक्तम्। केचित्तु। अवच्छेदकतावच्छेदकसाधारणा-
वच्छेदकतायां मानाभावेऽपि विनिगमनाविरहेण पूर्वपूर्ववर्णविशिष्टचरमवर्णत्वस्यैव चरमवर्णविशिष्टपूर्व
-पूर्ववर्णत्वस्यापि एवं पूर्वचरमवर्णविशिष्टमध्यमवर्णत्वादेरप्यानुपूर्वीत्वात्तावद्वर्णविषयतानां साक्षादेवा-
वच्छेदकत्वं सम्भवति परन्तु तादृशी या या कारणता तत्तदवच्छेदकप्रविष्टविषयितानिरूपकवर्णवृत्ति-
समुदायत्वनिवेशेनैवैकदेशवृत्तिसमुदायत्ववारणे व्यापकत्वनिवेशवैयर्थ्यम्। भ्रमान्यत्वन्तु कल्पद्वय
एवेति नोदासीनसाधारणसमुदायत्वमादायातिव्याप्तिरित्युपाध्यायमतनिष्कर्षमाहुः। अत्रेदं बोध्यम्।
तावदर्थविषयकयत्किञ्चिच्छाब्दबोधजनकयत्किञ्चिज्ज्ञानीय विषयितानिरूपकवर्णत्वव्यापकसमुदायत्व-
निवेशादेवोपपत्तौ किमवच्छेदकता कूटोपादानेन। न चैवं प्रतिज्ञाद्यर्थविषयकघटमानयेत्यादिवाक्यार्थ-
विषयकसमूहालम्बनयत्किञ्चिद्बोधकव्यक्तिमादाय घटमानयेत्यादिवाक्यघटितसमुदायेऽतिप्रसङ्ग इति
वाच्यम्। तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वविशेषणेन वारणात्। अन्यथा त्वन्मतेऽप्यधिक
-वृत्तिसमुदायत्वे तादृशवर्णत्वव्यापकत्वसत्त्वेनातिप्रसङ्गस्य दुर्वारतापत्तेः। न च तादृशनिरूपकत्वान्तम
-पहाय तादृशवर्णत्वसमनैयत्यमेव निवेश्यं लाघवात् तथाचोदासीनविषयकन्यायविषयक-
यत्किञ्चिज्ज्ञानमादाय न्यायोदासीनसमुदायेऽतिव्याप्तिवरणाय वाप्यकोटाववच्छेदकत्वोपादानं व्यापक-
कोटौ तद्वैयर्थ्यन्त्विष्टमिति वाच्यम्। एवमपि न्यायद्वयार्थविषयकयत्किञ्चित्समूहालम्बनबोधव्यक्ति-
मादाय न्यायद्वयसमुदायेऽतिव्याप्तेस्तद्विशेषणस्यावश्यकतया तत एव घटमानयेत्यादिवाक्यघटित-
समुदायेऽप्यतिप्रसङ्गानवकाशेनावच्छेदककोटिप्रविष्टत्वविशेषणवैयर्थ्यस्य दुर्वारत्वात्। यत्तु वर्णत्वस्य
कत्वादिरूपतया समुदायत्वे तादृशवर्णत्वव्यापकतायाः सम्भवेऽपि न तद्व्याप्यता सम्भव इति। तावद्वर्ण
-विषयताः एकन्यायवृत्तिविषयितामात्रवृत्तिरूपेणानुगमय्य तन्निरूपकवर्णत्वव्याप्यत्वनिवेशान्न्याय-

In Public domain. Digitization Muthulakshmi Research Academy

द्वयसाधारणमिति। तत्तुच्छम्। वर्णत्वस्य कत्वादिरूपतानिराकरणात्। उक्तरीत्यैवोपपत्तौ अनुगम-वैयर्थ्याद्गौरवाच्च। अत्रेदं समाधानमवगन्तव्यम्। तत्तज्जनकतावैशिष्ट्यं स्वरूपसम्बन्धेनैव वक्तव्यम्। अन्यथा घटमानयेत्यादिवाक्येऽपि कालिकसम्बन्धेन जनकत्वविशिष्टज्ञानमादायातिप्रसङ्गात्। अथ कालिकसम्बन्धेन तादृशतत्तज्ज्ञानजनकतावद्यत्किञ्चिज्ज्ञानविषयवर्णत्वव्यापकत्वस्य घटपदत्वरूप-समुदायत्वे सत्त्वात्तन्निष्ठन्यूनवृत्तितानिरूपकत्वसत्त्वेन नातिव्याप्तेरिति चेत्। तर्हि तादृशं प्रतिज्ञात्वादि-कमादायासम्भवः। अवच्छेदकत्वगर्भापरदलस्य स्वरूपसम्बन्धेन यत्किञ्चिदेकतद्वैशिष्ट्यनिवेशान्न-कोऽपि दोष इति चेत्। एवमप्यवयवेऽतिव्याप्तिः प्रतिज्ञात्वादेस्तादृशन्यायत्वनिष्ठन्यूनवृत्तित्वानिरूपक-त्वात्। न्यूनवृत्तितदेकदेशत्वादेस्सकलकारणतावच्छेदकविषयितानिरूपकावृत्तित्वादित्यवच्छेदकत्व-निवेशात्। न चोक्तवाक्यविषयितानामपि कालिकसम्बन्धेनावच्छेदकतावत्त्वात्स्वरूपसम्बन्धेनैव तद्वत्त्वं निवेश्यम्। एवञ्चावच्छेदकत्वनिवेशनमधिकमिति वाच्यम्। अवच्छेदकत्वं सप्रकारकविधया प्रवेश्यते किन्त्ववच्छेदकतासम्बन्धेन जनकतावत्त्वमेवेत्यगौरवात्। एवं प्रतिज्ञादिज्ञाने कालिकसम्बन्धेन तत्तज्जनकतासत्त्वेनासम्भव इत्यपरदलेऽपि संसर्गतयाऽवच्छेदकत्वप्रवेश इति। वस्तुतस्तु स्वरूपयोग्यताज्ञानकन्यायसङ्ग्रहाय वाक्यान्तरघटिततादृशन्यायवारणाय च स्वरूपयोग्यतारूपजनकतानिवेश्येति उक्तार्थे पर्यवसानमेवञ्चावच्छेदकतायाः प्रकारतयैव निवेशे गौरवाभावात्। एवं विषयतानां विनिगमनाविरहेण न साक्षादवच्छेदकत्वं सम्भवति। प्रागभावानुपगमे स्वोत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगिकालावृत्तित्वरूपाव्यवहितपूर्वत्वस्योत्पत्तिद्वयघटितत्वेन गुरुशरीर -तया तद्घटितानुपूर्वीविषयताया एव कारणतावच्छेदकत्वात्। पत्वाद्यवच्छिन्नप्रकारताशालि-निर्णयत्वेनैव विनिगमनाविरहेण तादृशप्रकारतानिरूपितपत्वादिनिष्ठावच्छेदकताशीलिनिर्णयत्वेनापि जनकतायाः वक्तुं शक्यतया यावदन्तर्गततज्जनकतावच्छेदकविषयताकवर्णाप्रसिद्धेरसम्भवाच्च। न चेदृशासम्भववारणाय जनकतासुवर्णविषयित्वावच्छिन्नत्वमेव निवेश्यं पत्वाद्यवच्छेदकत्वावच्छिन्न-जनकतानां वर्णविषित्वानवच्छिन्नत्वेन वारणादिति वाच्यम्। तथा सति तथाविधजनकतावच्छेदक-विषयिताश्रयवर्णवृत्तित्वनिवेशेनैव सामञ्जस्ये वर्णत्वव्यापकत्वोपादानवैयर्थ्यात्। एवञ्चावच्छेदकता-वच्छेदकसाधारणावच्छेदकतानिवेशलाभायैव कोटिप्रविष्टत्वमुक्तम्। एतन्मते तद्घटकसकलवर्ण-विषयितानामेवावच्छेदकत्वान्न दोषः। प्रविष्टत्वञ्च पर्याप्त्यनिवेशस्फोरकम्। अथ पत्वाद्यवच्छिन्न-विषयितायाः साक्षाज्जनकतावच्छेदकतामते जनकतासुवर्णव्याप्यजातिनिरूपितावच्छेदकत्वाख्य-विषयितावृत्त्यवच्छेदकत्वानिरूपितत्वमेव निवेश्यम्। तावतैव वर्णविषयितानिरूपिताजातिप्रकारित्वा-वच्छेद्यसकलजनकताव्युदासात्। एवञ्च तथाविधा या या जनकता तत्तदवच्छेदकयत्किञ्चिज्ज्ञानीय-

In Public Domain. Digitization: Muthulakshmi Research Academy



विषयताश्रयवर्णवृत्तिसमुदायत्वनिवेशेन एवोपपत्तेस्तादृशविषयताश्रयवर्णत्वव्यापकत्वमपि न निवेश्यमिति महालाघवमिति चेन्न। एवमपि पत्वाद्यवच्छिन्नप्रकारितानिरूपितत्वे सत्यत्वाद्यवच्छिन्नविशेष्यता-निरूपिताव्यवहितोत्तरत्वावच्छिन्नसांसर्गिकविषयताशालिनिर्णयत्वावच्छिन्नजनकताया विनिगमना-विरहलब्धायास्तादृशयावदन्तर्गततया तज्जनकतावच्छेदकविषयताश्रयवर्णाप्रसिद्ध्याऽसम्भवापत्तेः। यदि च जातिनिष्ठावच्छेदकत्वनिष्ठसाक्षादवच्छेदकत्वानिरूपकत्वे सति सांसर्गिकविषयतानिष्ठसाक्षादवच्छेदकत्वानिरूपितासाक्षाद्वर्णविषयित्वावच्छिन्ना वा या या जनकता तत्तदवच्छेदकयत्किञ्चिज्ज्ञानीय-विषयताश्रयवर्णवृत्तिसमुदायत्वनिवेशेनैवोपपत्तौ तादृशवर्णत्वव्यापकत्वनिवेशवैयर्थ्यमुच्यते तदा तस्य लक्षणान्तरत्वान्न दोष इति। अत्र सकलवर्णविषयतानां साक्षादवच्छेदकत्वं नत्वेकमवच्छेदकमन्यत्तदवच्छेदकमितिमते तत्पर्याप्त्यधिकरणविषयतावत्त्वाप्रसिद्धिरतः प्रविष्टेत्यप्याहुः। यत्तु अवच्छेदकत्वानुपादाने फलोपधानरूपजनकतोपादाने समानानुपूर्वीकेत्यादिदोषाप्रसरेऽपि न्यायान्तरा-विषयकत्वरूपं यत्किञ्चित्त्वं ज्ञाने निवेश्यम्। एवञ्च न्यायद्वयविषयकज्ञानवारणात्तादृशवर्णत्वसमनैयत्यभङ्गपक्षोऽपि समञ्जस इति। न च न्यायलक्षणे न्यायत्वप्रवेशादात्माश्रय इति वाच्यम्। तावदर्थविषयकशाब्दबोधीयसकलकारणतावच्छेदकयत्किञ्ज्ञानीयविषयताश्रयवर्णत्वव्यापकान्तरा-विषयकत्वस्य तदर्थत्वादिति। तत्तुच्छम्। प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वादिरूपानु-पूर्व्या अव्यापकत्वात्। समुदायत्वविशेषस्य तथात्वेऽपि न्यायद्वयज्ञाने तदभानात्। स्वाश्रयीभूत-प्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्तिसमुदायत्वभिन्नविशेषणेन न्यायद्वयत्वादिवारणाच्च किञ्चोदासीनप्रतिज्ञैकदेशन्यायोभयसमुदायत्वमुदासीनप्रतिज्ञान्यायोभयसमुदायत्वं चादायातिव्याप्तिः। न्यायमात्रविषयकयत्किञ्चिज्ज्ञानसत्त्वेऽपि यत्किञ्चित्तमोभयज्ञानघटिततादृशवर्णत्वस्य तादृशसमुदायत्वव्यापकत्वसम्भवात्।

अथ तथाविधसकलकारणतावच्छेदकविषयितानिरूपकवर्णत्वव्याप्यत्वं स्वव्यापकतादृशवर्णत्वकत्वं वा विवक्ष्यतां न्यायत्वाश्रयस्य सकलकारणतावच्छेदकविषयत्वाभावान्न दोष इति चेत्तदा असम्भवं कलयति। यद्यपि स्वसमानाधिकरणावच्छेदकविषयताश्रयवर्णस्य भेदप्रतियोगितावच्छेदकत्व-मात्रं न्यूनवृत्तित्वम्। सामानाधिकरण्यनिवेशे प्रयोजनाभावात्। न चैवमसम्भवः यज्ज्ञानीयतादृशतत्तत्कारणतावच्छेदकविषयताश्रयवर्णत्वव्यापकत्वसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वं समुदायत्वे तादृशतत्तत्कारणताश्रयतज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकत्वस्य विवक्षितत्वात्। पूर्वदलेऽवच्छेदकत्वनिवेशान्नवोदासीनसमुदायेऽतिप्रसङ्गः। यदि च दलद्वयेऽपि यद्यज्ज्ञानतत्तज्ज्ञानेति वीप्सां कृत्वाऽवच्छेदकत्ववैयर्थ्यमुच्यते तदा यद्यदर्थान्तर्गतन्यायमात्रज्ञानमादायातिप्रसङ्गवारणेऽपि महागौरवम्।

In Public domain. Digitization Muthulakshmi Research Academy

यत्तु सामानाधिकरण्यघटितन्यूनवृत्तित्वप्रवेशेऽपि तस्य प्रतिज्ञात्वादिसाधारणतयाऽसम्भववारणाय तादृशसमुदायत्वे तन्निवेश्यं तादृशसमुदायत्वशून्यवृत्तित्त्वं वाऽनिरूपकान्तार्थः। तत्र चानेकत्र समुदायत्वनिवेशो गौरवात्समनैयत्यमेव सम्यगिति। तत्र असम्भवभयेन तादृशविषयतान्यतमविषयता-श्रयनिवेशो न्यायोदासीनप्रतिज्ञा समुदायेऽतिव्याप्तेरिति। तत्तुच्छम्। यादृशन्यायव्यक्तिज्ञानोत्तरं न कस्यापि शाब्दबोधः तत्सङ्ग्रहाय स्वरूपयोग्यताया एव निवेश्यतया ज्ञानभेदविवक्षावैयर्थ्यात्। न्यायोदासीनप्रतिज्ञासमुदायेऽतिव्याप्तेरनुद्धाराच्च। यज्ज्ञानशब्देन तथाविधसमुदायज्ञानस्यैव धर्तुं शक्यत्वात्। यत्तु शाब्दबोधे यत्किञ्चत्त्वविशेषणेन न्यायद्वयादिवारणम्। स्वाव्यवहितोत्तरोत्पन्नं ज्ञानं तेन ग्राह्यं तच्चैकैकन्यायार्थज्ञानमेवेति न्यायद्वयाद्यर्थबोधव्युदासः। भट्टाचार्याणामयमेवाशय इति। तत्तुच्छम्। एवमपि न्यायोदासीनप्रतिज्ञोभयसमुदायेऽतिव्याप्तेरुक्तरीतेरावश्यकत्वेन न्यायद्वयादौ दोषस्यैवाप्रसरात्। यज्ज्ञानमादाय व्यापकत्वं तदन्ययत्किञ्चिद्ज्ञानमादायापरदलनिवेशादवच्छेदकत्व-वैयर्थ्यमिति तत्तुच्छतरम्। न्यायमात्रज्ञानमादायव्यापके न्यायोदासीनसमुदायत्वे स्वज्ञानमादायापर-दलसत्त्वात्। यत्त्ववच्छेदकत्वोपादानेऽपि उदासीनधर्मिकन्यायत्वभ्रमादेव शाब्दबोधस्तन्न्याये न्याय-त्वेन तद्वर्णविषयिताया अव्यवच्छेदकत्वादव्याप्तिर्भ्रमान्यत्वनिवेशोऽपि दुर्वार, एवं यत्र घटधर्मिक-न्यायत्वभ्रमादेव शाब्दबोधस्तत्र न्यायत्वेऽनिरूपकत्वान्तासत्त्वेनाव्याप्तिरिति। तन्न। तथाविधन्याये मानाभावादिति कृतं पल्लवितेन। इदन्तु बोध्यम्। स्वाश्रयीभूतप्रतिज्ञाव्यवहितोत्तरत्वशून्येत्यादौ प्रकृत-पक्षे प्रकृतसाध्यवैशिष्ट्यबोधजनकतावच्छेदकप्रकारताश्रयानुपूर्वीशालित्वं प्रतिज्ञात्वं, तेन वह्निमान्पर्वत इति वाक्यधर्मिकपर्वतो वह्निमानित्यानुपूर्वीज्ञानमादाय व्युत्क्रमोक्तवर्णसमुदायरूपप्रतिज्ञोत्तरत्वादेर्हेत्वा-दौ सत्त्वेऽपि नातिव्याप्तिः। स्वाश्रयीभूतपादिवर्णोत्तरत्वशून्यवर्णान्तरवृत्तिसमुदायत्वभिन्नत्वस्य निवेश-नीयत्वापाताच्चैव गौरवात्। आनुपूर्वीपदमवच्छेदकतापर्याप्तिनिवेशार्थम्, एवं साध्यविशिष्टपक्षबोधम-पोह्य हेतुविशिष्टहेतुत्वबोधं निवेश्य हेतुत्वम्। तत्र प्रतिज्ञाघटकहेतुत्वार्थबोधकभागवारणाय प्रकृत-पक्षविशेषणतापन्नसाध्यान्वितततादृशहेतुत्वविषयताश्रयबोधजनकतावच्छेदकप्रकारताश्रयत्वे सति तादृशहेतुत्वेतरविषयताशून्यबोधजनकतावच्छेदकप्रकारताश्रयीभूता यावद्वर्णास्तत्समुदायत्वमिति फलितम्। साध्यान्वितततादृशहेतुत्वविषयिताश्रयतादृशहेतुत्वेतरविषयिताशून्यबोधो निवेश्यः। तेन निगमनव्युदासः। एवं प्रकृतसाध्यव्याप्तिविशिष्टप्रकृतहेतुमत्पक्षबोधं साध्यादिव्याप्त्यादिमत्प्रकृतहेतु-विशिष्टहेतुत्वविशिष्टप्रकृतसाध्यविशिष्टपक्षबोधं निवेश्य क्रमेणोपनयनिगमने बोध्ये। नन्वत्रोदाहरण-कारणतयोर्निवेशो व्युत्क्रमोक्तभागघटितोदाहरणघटितसमुदायेऽतिव्याप्तिरिति चेन्न। धूमवान्धूम-व्यापकवह्निमानित्याकारकबोधे यो यो धूमवान् स वह्निमानित्याद्यानुपूर्वीप्रकारकज्ञानत्वेनैव हेतुत्वात्।

In Public domain. Digitization Muthulakshmi Research Academy


काङ्क्षानिवर्तकत्वतन्निवर्तनीयाकाङ्क्षोत्थापकत्वान्यतरवत्वं वा, तेन पञ्चवाक्यजन्यमहावाक्यार्थबोधासम्भवेऽपि न क्षतिः। **स्वार्थविशिष्टज्ञानम्।** तत्तद्वाक्यार्थविषयकज्ञानम्। तच्च समूहालम्बनमन्यथा वेत्यन्यदेतत्। **विशिष्टवैशिष्ट्यावगाहि मानान्तरम्** विशिष्टवैशिष्ट्य-

---

यद्वा हेतुविशिष्टधर्मिबोधजनकतावच्छेदकप्रकारताश्रयानुपूर्व्यवच्छिन्नाव्यवहितोत्तरसाध्यविशिष्टधर्मिबोधजनकतावच्छेदकप्रकारताश्रयानुपूर्वीमत्त्वं तदेवं व्यतिरेक्युदाहरणस्थले ऊह्यम्। ननु तादृशकारणतैव निवेश्या लाघवात्। वैशिष्ट्यञ्च सामानाधिकरण्यस्वावच्छेदकविषयताश्रयवर्णाव्यवहितोत्तरवर्णविषयतावच्छिन्नत्वोभयसम्बन्धेनेति चेत्तर्हि यो यो धूमवानित्यादिपूर्वभागवृत्त्यानुपूर्व्यास्तदवच्छेदकप्रकारतानाश्रयतया कथङ्कारं तदघटितसमुदायवारणमिति। यदि पर्वतो वह्निमानित्यादिप्रतिज्ञायां यो यो धूमवान् स दहनवानित्यादिकं नोदाहरणम्। तदा प्रतिज्ञाघटकसाध्योपस्थापकतावच्छेदकानुपूर्वीभिन्नसाध्योपस्थापकतावच्छेदकानुपूर्वीमदवृत्तित्वं न्यायत्वे निवेश्यम्। एतच्च विभिन्नानुपूर्वीकैकार्थोपस्थापकायं पदद्वयघटितन्यायस्यालक्ष्यत्वमभिप्रेत्य तस्यापि लक्ष्यत्वे तु धूमाद्दहनवत्सधर्मा पर्वतो वह्निमानित्यादौ उक्तोदाहरणादिसाधारणसमुदायत्ववारणाय भेदप्रतियोग्यानुपूर्व्यां प्रकृतपक्षोपस्थापकतावच्छेदकाप्रविष्टत्वं देयं तत्त्रैव वह्निपदघटितोदाहरणादिघटितन्यायेऽव्याप्तिः। प्रतिज्ञायास्तादृशानुपूर्वीभिन्नसाध्योपस्थापकतावच्छेदकानुपूर्वीमत्त्वादतोभेदानुयोग्यानुपूर्व्याः प्रतिज्ञोत्तरप्रविष्टत्वं विशेषणम्। एवं हेतुघटकहेतूपस्थापकतावच्छेदकानुपूर्वीभिन्ना विशेषितहेतूपस्थापकतावच्छेदकानुपूर्वीमदवृत्तित्वं निवेश्यम्। हेतावविशेषित्वोपादानात्तस्माद्वह्निमानिति निगमननिर्वाहः। तत्पदस्य व्याप्त्यादिनिष्ठहेतूपस्थापकत्वात्। धूमाद्वह्निमतः सधर्मापर्वतो वह्निमान् धूमादित्यादिन्यायस्य लक्ष्यत्वे तु भेदानुयोग्यानुपूर्व्यां प्रतिज्ञोत्तरप्रविष्टत्वं विशेषणं पर्वतो धूमाद्वह्निमान् धूमादित्यादौ यो यो धूमवान् स धूमाद्वह्निमानित्युदाहरणादिघटितस्य सङ्ग्रहाय तत्त्रैव यो यो धूमवान् स धूमाद्वह्निमानित्युदाहरणादिघटितस्य च वारणाय च प्रतिज्ञाघटकसाध्योपस्थापकतावच्छेदकानुपूर्व्यप्रविष्टत्वं तत्रैव निवेश्यम्। तच्च तादृशसाध्यतावच्छेदकप्रकारताशाल्युपस्थितिजनकतावच्छेदकतापर्याप्त्यधिकरणप्रकारतानाश्रयत्वं, अत एव तत्र यो यो धूमवान् स धूमाद्वह्निमानित्युदाहरणादिघटितस्यापि व्युदास इति। धूमाद्वह्निमानिति च न निगमनं धूमपदे व्याप्त्यादिविशिष्टे लक्षणाप्रसङ्गात्। एवं यो यस्तद्वानिति नोदाहरणम्। विशेषणपरामर्शत्वापत्तेः। सम्प्रदायविरोधाच्चेति। *तदुत्थाप्येति* निगमनप्रतिज्ञयोस्सङ्ग्रहाय प्रतीकद्वयम्। *तेन* द्वितीयकल्पानुसरणेन। *समूहालम्बनमिति* दीधितिकारोक्तदोषोद्धारार्थम्। अन्यथावेति। महावाक्यार्थबोधो यथाश्रुतमूलार्थ इत्यग्रे स्पष्टम्। अनास्थायां वाकारः। न्यायार्थबोधपरामर्श-

In Public domain. Digitization Muthulakshmi Research Academy

बोधात्मकपरामर्शजनकं मनः। **उत्थाप्यते** स्वात्मकसहकारिसम्पन्नीक्रियते। **तेन** तथाविधेन मनसा परामर्शो उत्पाद्यत इत्युपाध्यायः। अत्र च तदेव ज्ञानं परामर्शरूपमुपनयार्थविषयकत्वादित्याक्षिप्य उपनयस्य व्याप्त्यंशे न तात्पर्यं तथा सति न्यायजन्यबुद्धावुदाहरणार्थतया उपनयार्थतया च व्याप्तिभाने पौनरुक्त्यं स्यात्। किन्तु पक्षधर्मत्वमेवोपनयेन विवक्षितं तथाचोदाहरणार्थतया व्याप्तेरुपनयार्थपक्षधर्मतायाश्च विश्रृङ्खलमेव भानमिति न्यायजन्यबोधस्य न व्याप्तिविशिष्टवैशिष्ट्यावगाहिता। व्याप्यः पक्षे वर्तते न वेत्याकाङ्क्षानिवर्तकत्वानुरोधेनैव वह्निव्याप्यादिपदघटितमुपनयवाक्यं प्रयुज्यत इति स एव समाहितवान्। अत्रेदं चिन्त्यते। यदि व्याप्तिविशिष्टे पक्षधर्मत्वमेवाकाङ्क्षितं तदा व्याप्तिविशिष्टविषयक एव बोधस्तादृशाकाङ्क्षां निवर्तयिष्यतीति तथाविधबोध एव उपनयतात्पर्यमावश्यकम्। न चैवमप्याकाङ्क्षानिवृत्तये अवान्तरवाक्यार्थबोधस्य व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वोऽपगमेऽपि न्यायजन्यमहावाक्यार्थबोधे उपनयाद्व्याप्तिभानं नोपेयते, उदाहरणादेव तद्भानात्। अवान्तरवाक्यार्थधियः परामर्शरूपत्वेऽपि निगमनजन्याबाधितत्वादिप्रतिपत्तेरनुमितावपेक्षितत्वात्तावत्पर्यन्तं तदसत्वेन परामर्शान्तरस्यापेक्षेति वाच्यम्। अवान्तरवाक्यार्थबोधे व्याप्तिभानानुरोधेन तदंशेऽप्युपनयतात्पर्यकल्पनाया आवश्यकत्वे महावाक्यार्थबोधे तद्भानेऽपि बाध-

---

योरन्तराज्ञानाभावाद्विशिष्टेत्याद्यसङ्गतिरतो व्याचष्टे। *विशिष्टेति* (तादृशीमा अनेनेति व्युत्पत्तिमभिप्रेत्य। अन्तरपदं स्वरूपपरम्) उत्थाप्य इत्यस्योत्पाद्यत इति नार्थो मनसो नित्यत्वादित्यत आह। *स्वात्मकेति* स्वं तत्तद्वाक्यार्थविषयकज्ञानम्। *तेनेति* केवलमनःपरामर्शकत्वेऽसङ्गतिस्तस्य परामर्शानुत्पादकत्वादतो व्याचष्टे। *तेनेति* *तदेव* तत्तद्वाक्यार्थविषयकज्ञानमेव। तर्हि तथोपनयः किमिति प्रयुज्यते इत्यत आह। *व्याप्य इति* *आकाङ्क्षितम्* जिज्ञासितम्। *तदसत्त्वे नेति* उपनयवाक्यजन्यव्याप्तिविशिष्टवैशिष्ट्यावगाहिपरामर्शसत्त्वेनेत्यर्थः। न चोपनयार्थबोधोत्तरं निगमनार्थावगाहिन्यायार्थबोध एव सम्भवतीति कथमेतदिति वाच्यम्। निगमनार्थविशिष्टोपनयार्थस्य विधेयत्वे विधेयतावच्छेदकज्ञानविधया निगमनार्थज्ञानस्यापेक्षणात्। उपनयार्थशाब्दबोधोत्तरं निगमनश्रवणे तद्घटकपदार्थोपस्थित्यैवोपनयार्थबोधनाच्च न च तावत्पर्यन्तं तदसत्त्वेऽपि महावाक्यार्थबोधेऽवान्तरवाक्यार्थबोधस्य कारणत्वे तदनुरोधेनोपनयार्थस्मरणस्यैव कल्पनीयतया तत एवानुमितिनिर्वाहे परामर्शान्तरस्वीकारोऽनुचित इति वाच्यम्। तदा व्याप्त्यंशे उद्बोधकं न कल्प्यते इत्याशयः। समाधानन्तु तदंशे प्रमोषस्याप्रामाणिकत्वमनुरुध्य। *बाधकाभावादिति* अवान्तरवाक्यार्थबोध एव सामग्र्य-

In Public domain. Digitization Muthulakshmi Research Academy



काभावादिति। न्यायजन्यज्ञानस्य वादिवाक्यजन्यत्वेनाप्रामाण्यशङ्काकलङ्किततया अनुमिति-जननायोग्यतया परामर्शान्तरस्वीकार इति मिश्राः। नव्यास्तु पक्षांशे व्याप्तिविशिष्टहेतु-वैशिष्ट्यावगाहिज्ञानमेव अनुमितिहेतुः, न तु व्याप्याभिन्नहेतुमदभेदज्ञानम्। तादृशवैशिष्ट्यावगा-हिता च न न्यायजन्यशाब्दबुद्धेः। नामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात्। अतो व्याप्य-त्वावच्छिन्नहेतुनिष्ठप्रकारताकबोधहेतुहेतुविशेष्यकव्याप्तिरूपविशेषणतावच्छेदकप्रकारकमान-सज्ञानान्मानस एव तादृशपरामर्शोऽवश्यमङ्गीकर्तव्य इत्यभिप्रायेण तेन चेत्याद्यभिहितम्। **विशिष्टवैशिष्ट्यावगाहिमानान्तरम्।** विशिष्टवैशिष्ट्यबोधजनकं विशेषणतावच्छेदकीभूत-व्याप्तिप्रकारकधूमत्वावच्छिन्नविशेष्यकं ज्ञानम्। **उत्थाप्यते** जन्यते। **तेन** तादृशविशेषणतावच्छेदकप्रकारकज्ञानेन, परामर्शो जन्यत इत्यर्थः। न चैवं तेन परामर्शस्य जननादिति ग्रन्थासङ्गतिः। तत्र परामर्शपदस्य व्याप्याभिन्नहेतुमदभेदबोधपरत्वादित्याहुः। शुद्धहेतुतावच्छेदकावच्छिन्ने पक्षधर्मत्वाकाङ्क्षया तत्र पक्षधर्मत्वबोधमात्रतात्पर्यकं व्याप्त्यर्थक-पदाघटितमेवोपनयवाक्यं प्रयुज्यत इति प्राचीनमताभिप्रायकमिदम्, अत एव दीधितिकृता तन्मताभिप्रायेणैव "उदाहरणोपनययोरेव तत्पर्यवस्यती"त्यत्रोदाहरणान्तर्भावेणैव परामर्श-प्रयोजकत्वपर्यवसानमुक्तं न तूपनयमात्रस्येतीत्यपि वदन्ति। अत्र परामर्शप्रयोजकत्वेन शाब्द-ज्ञानस्य लक्षणघटकत्वे स्वयमनुपपत्तेर्वक्ष्यमाणतया शाब्दज्ञानपदं प्रतिज्ञादिप्रतिपाद्यतत्तद्विशि-ष्टार्थज्ञानपञ्चकपरं, जनकवाक्यपदञ्च प्रत्येकं तत्तद्बोधजनकवाक्यपञ्चकपरम्, अतः प्रतिज्ञादि-

---

पेक्षिता महावाक्यार्थबोधश्च सम्भृतसामग्रीकावान्तरनानावाक्यार्थबोधाधीन एवेति पुनर्भाने वादितात्पर्या-पेक्षाशङ्कानवकाशः। मिश्रसमाधानमाह। *न्यायजन्येति* वादीति साधारणधर्मोक्तिः। एवमप्रामाण्य-शङ्कासमनैयत्ये मानाभावात् क्वचित्परामर्शवैयर्थ्यं दुर्वारमेवेत्यस्वरसः। स्वसम्मतं समाधानमाह। *नव्यास्त्विति* न्यायार्थज्ञानस्य हेतौ व्याप्त्यप्रकारकत्वाद्धेत्वित्यादिना मानसानुधावनम्। तेन, वह्नि-व्याप्यधूमवानयमिति वाक्येन। तत्र, परामर्शजनकवाक्यत्वमिति लक्षणे। धूमः पक्षे वर्तते न वेत्येवा-काङ्क्षा तथा चायमित्येवोपनय इति। व्याप्तिपक्षधर्मतयोर्विश्रृङ्खलमेव भानमिति वदतां मतमाह। *शुद्धेति* अत्र स्वयं न्यायलक्षणमाहेति जगदीशीयावतरणमसङ्गतम्। मूलार्थताया एव सम्भवात्। उपाध्यायप्रभृतिभिस्तस्या एवानुरोधाच्च। लघुलक्षणान्तरासत्त्वेन मौलन्यायलक्षणस्य दुस्त्यजत्वात्। अस्य स्वीयप्रतिज्ञादिलक्षणघटितत्वेन लघुत्वात्। तत्र न्यायलक्षणमित्यस्य पर्यवसितन्यायलक्षणमि-

In Public domain. Digitization Muthulakshmi Research Academy

वाक्यपञ्चकलाभः। प्रयोजकान्तञ्च बोधविशेषाणां परिचायकमात्रम्। यद्यप्येवं प्रतिज्ञादिपञ्च-वाक्यैरेकज्ञानाजननेऽप्येतादृशलक्षणानिर्वाहविरहः। तथापि प्रतिज्ञादिजन्यबोधानां परामर्श-प्रयोजकतालाभायैव सम्भवाभिप्रायेण तावदर्थविषयकमेकमेव ज्ञानं परामर्शप्रयोजकत्वेनाभि-हितमित्यभिप्रेत्य दीधितिकृत्पर्यवसितन्यायलक्षणमाह। **※उचितेति※** उचितानुपूर्वीकाणि प्रतिज्ञादीनि पञ्च यत्र समुदाये तत्त्वम्। तादृशपञ्चपर्याप्तसमुदायत्वमिति यावत्। पञ्चपदं निगमनान्तानां विशिष्यनिवेशलाभाय न तु पञ्चत्वेनापि तेषां निवेशः प्रयोजनाभावात्। व्युत्क्रमप्रयुक्तप्रतिज्ञादिपञ्चकेऽतिव्याप्तिवारणाय उचितानुपूर्वीकेति, उचितानुपूर्वी, प्रतिज्ञोत्तर-हेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वरूपा।

---

त्यर्थ इत्याशयेनाह। **※अत्रेति※** **※पञ्चकेति※** शाब्दज्ञानानां जनकानीतिव्युत्पत्तेः। नन्वेतावता बोध-जनकपञ्चवाक्यसमुदायत्वं मूलार्थः। न तु प्रतिज्ञादिपञ्चकसमुदायत्वमित्याशङ्कायां प्रतिज्ञादिपञ्चक-समुदायत्वमित्यत्र प्रतिज्ञादिपञ्चानां प्रतिज्ञात्वादिनैव निवेशनीयत्वात्। तत्र प्रतिज्ञात्वं तत्तत्पदार्थबोध-जनकवाक्यत्वरूपमेवेति मूलार्थ एवोक्त इत्याह। **※अत इति※** उचितानुपूर्वीकत्वन्तु पूरितं दीधिति-कारेण सामान्यतो बोधनिवेशो घटमानयेति वाक्येऽतिव्याप्तिस्स्यादत आह। **※प्रयोजकान्तञ्चेति※** ननु परामर्शप्रयोजकशाब्देत्यत्र शाब्दपदस्य पञ्चबोधपरत्वे प्रतिज्ञादिपञ्चवाक्यैरित्यादिमूला सङ्गतिः। एक-बोधजननेऽपि उक्तरीत्या पञ्चबोधानादाय लक्षणगमनसम्भवादित्याशयेन शङ्कते। **※यद्यपीति※** उपाध्यायोक्तलक्षणे क्वचिदेकज्ञानाजनने निर्वाहो व्यञ्जितः। दीधितिकृन्मते स्वार्थविशिष्टज्ञानमित्येक-त्वानुपपत्तिं परिहरति। **※सम्भवेति※** पञ्चार्थैकैकबोधे परामर्शप्रयोजकतोपपादनेऽर्थात् पञ्चानां बोधानां तदुपपादितं भवतीत्यभिप्रायेणेत्यर्थः। **※इत्यभिप्रेत्य※** न तु तस्य लक्षणे प्रवेशः सफलप्रवेश इति लाघ-वमभिप्रेत्य। उचितानुपूर्वीकः प्रतिज्ञादिपञ्चसमुदायो यत्रेति विग्रहे तस्य द्व्यादिसमुदायानतिरिक्ततया तत्रातिव्याप्तेराह। **※उचितेति※** समुदायत्वस्य धर्मत्वेनैव निवेश उचितः। अन्यथोच्चारणव्यक्तिभेदेन न्यायभेदादननुगतलक्षणानुपपत्तेः। अनुगतसमुदायत्वे मानाभावाच्चेत्यभिप्रेत्य यत्र समुदाये इत्युक्तम्। नन्वेवमन्यतमत्वादेः कथं वारणमित्यतः पर्याप्तिं प्रवेशयति। **※तादृशेति※** स च धर्मोऽर्थात्स-मुदायत्वमेवेति स्फुटयति। **※समुदायत्वमिति※** एवं सति पञ्चपदोपादानं सङ्गमयति। **※पञ्चपदमिति※** विशिष्यप्रतिज्ञात्वादिना रूपान्तरेण निवेशोऽतिव्याप्तेः। एतेन बौद्धानां मते द्व्यवयवकस्य मीमांसकानां त्र्यवयवकस्य प्राचीननैयायिकानां दशावयवकस्य वारणाय पञ्चपदमित्यपास्तम्। **※उत्तरेति※** अव्यव-हितोत्तरेत्यर्थः। प्रतिज्ञोत्तरवाक्योत्तरहेत्वादेर्हेत्वादिनिगमनान्तोत्तरप्रतिज्ञादेश्च वारणाय तयोर्निवेशः।

In Public domain. Digitization Muthulakshmi Research Academy

न च स्वाधिकरणकालध्वंसाधिकरणत्वसामान्याभावरूपमव्यवधानं न हेत्ववयवक्षणस्य तस्य प्रतिज्ञाधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणत्वादिति वाच्यम्। स्वाधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणतासम्वन्धेन प्रतिज्ञासामान्याभावस्य निवेश्यत्वात्। स्वत्त्वानिवेशेऽपि अन्याधिकरणताया अन्यसम्वन्धत्वाभावेन सामान्याभावनिर्वाहात्। सम्वन्धे सामान्यरूपसद्भावेऽपि तदनवच्छिन्नप्रतियोगितावच्छेदकता सौलभ्यात्। स्वाधिकरणक्षणध्वंसाधिकरणत्वमुत्तरत्वं, स्वमव्यवधानघटकस्वमेव तेन हेतूत्तरप्रतिज्ञायामुत्तरप्रतिज्ञाव्यवधानपूर्वप्रतिज्ञोत्तरत्वयोस्सत्त्वेऽपि न दोषः। वस्तुतस्तु पूर्वपूर्ववर्णानन्तर्यविशिष्टचरमवर्णत्वरूपानुपूर्वीरूपं प्रतिज्ञात्वं तस्य पर्वतो दहनवान् पर्वतो वह्निमानित्यादिवाक्यभेदेन भिन्नत्वेऽपि पक्षे साध्यवैशिष्ट्यावगाहिबोधजनकतावच्छेदकप्रकारताश्रयत्वमनुगमकम्, आनन्तर्यञ्च स्वाधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणकालोत्पत्तिकध्वंसप्रतियोगिकाल-वृत्तित्वं ध्वंसाधिकरणद्वयं ध्वंसोत्पत्त्यधिकरणरूपं तेन नोक्तदोषः। स्वध्वंसोत्पत्त्यधिकरणक्षणोत्पन्नध्वंसप्रतियोगिक्षणवृत्तित्वं वा। स्वं तादृशप्रकारताश्रयधर्मवत्। एवं तादृशप्रकारताश्रयधर्मत्वेन हेतुत्वादिनिरुच्य तत्र निरुक्तानन्तर्याश्रयवर्णघटितत्वं निवेश्यम्। तादृशानन्तर्यवति तादृशधर्मवत्त्वादिरूपहेतुत्वं वा। आनन्तर्यवत्त्वञ्च स्वाश्रयवर्णघटितप्रकृतधर्मवत्त्वसम्वन्धेन वस्त्वानन्तर्यध्वंस एव चरम-वर्णध्वंसत्वहेत्वादेराद्यवर्णस्यैव हेत्वादेर्विशिष्योपादानात्। एवमानुपूर्व्यन्तरस्य न प्रवेशः हेत्वादेस्तादृशप्रतिज्ञानुत्तरत्वात्। अत एव तत्र तत्राग्रे तथाविधानुपूर्वीविशेषेति तथाविधविशेषपदयोरुपादान-मिति बोध्यम्। निगमन एव विश्रान्तेरित्यग्रिमग्रन्थे च निगमनपदं निगमनघटकान्त्यवर्णपरम्। यत्तु प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिबोधजनकतावच्छेदकयत्किञ्चिद्विषयताश्रयवर्णसमुदायत्वं प्रतिज्ञात्वम्। एवं हेतुत्वादिकं निर्वाच्यम्। अत्र च निगमन एव विश्रान्तेरिति यथाश्रुतमेव रमणीयम्। अत्र प्रतिज्ञादिघटकचरमवर्णानन्तर्यं निवेश्यं तच्च चरमवर्णाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति तदधिकरणकालध्वंसाधिकरणत्वं परन्तु तत्र स्वघटकवर्णप्रागभावासमानकालीनत्वं स्ववृत्तियावद्ध्वंसविशिष्टत्वं वा चरमत्वं न निवेश्यं विशिष्य तदधिकरणकालनिवेशेनैवोपपत्तेः। हेत्वादिक्षणानां पूर्ववृत्तिप्रतिज्ञादिविषयकज्ञानध्वंसाधिकरणकालध्वंसाधिकरणतया तादृशप्रतिज्ञाधिकरणकाल-ध्वंसविषयकज्ञानाधिकरणतया चाव्याप्तिरतः कालद्वयनिवेश इति। अत्रैकसमुदायत्वाश्रयाव्यवधानमपरसमुदायत्वाश्रयोत्तरत्वं चादायोक्तदोषवारणाय यदाश्रयाव्यवधानं तदाश्रयोत्तरत्वं वाच्यमिति। तथा सति व्युत्क्रमोक्तवृत्तिसमुदायत्वान्यत्वप्रतिज्ञात्वादौ निवेशापत्तेः क्रमव्युत्क्रमोक्तवर्णसमुदायत्वोक्तौ विशिष्य निवेशेऽननुगमाच्चरमत्वनिवेशे गौरवात्समुदायत्वनिवेशवैयर्थ्याच्च। प्रतिज्ञाघटकचरमवर्णध्वंसोत्पत्तिकालोत्पत्तिकहेत्वादिघटितन्यायसम्भवे तु स्वाश्रयप्रतियोगिकस्वाश्रयासमान-

In Public domain. Digitization Muthulakshmi Research Academy

ननु किमिदमुचितानुपूर्वीकत्वं? न तावत्तादृशानुपूर्व्याश्रयत्वं, दर्शितानुपूर्व्या निगमन एव विश्रान्तेः, नापि तादृशानुपूर्वीघटकत्वं, घटकतायाः दुर्निर्वचत्वात्, तद्धि न स्वाविषयकप्रतीत्यविषयतादृशानुपूर्वीकत्वं, प्रतिज्ञाद्यविषयकप्रतीत्या शुद्धनिगमनत्वस्य विषयीकरणाद्विशिष्टनिगमनत्वे तादृशप्रतीत्यविषयत्वानुपपत्तेः, विशेष्यवृत्तेर्विशिष्टानुयोगिकाभावानभ्युपगमात्। नापि तादृशानुपूर्वीविषयताव्यापकविषयिताकत्वं, शब्दव्यक्तिभेदेन प्रतिज्ञादेर्भिन्नतया कस्याश्चिदपि प्रतिज्ञाव्यक्तेर्विषयितायास्तादृशानुपूर्वीविषयितासामान्यव्यापकत्वासम्भवात्। प्रतिज्ञादिव्यक्त्यन्तरघटितन्यायविषयकज्ञानेऽपि तादृशानुपूर्वीविषयितासत्वात्, यत्किञ्चिदानुपूर्वीविषयिताव्यापकत्वस्य व्युत्क्रमप्रयुक्तप्रतिज्ञादिविषयतासाधारणत्वात्, तादृशप्रतिज्ञादिविषयकन्यायविषयकज्ञानीय तथाविधानुपूर्वीविषयिताया एव तादृशप्रतिज्ञादिविषयताव्याप्यत्वात्। न च ज्ञानभेदेन विषयिताभेदानभ्युगमान्नैवमिति वाच्यम्। तादृशप्रतिज्ञादिव्यक्ति-समानाधिकरणत्वादिना आनुपूर्वीविशेषावच्छिन्नन्यायविषयकज्ञानीयानुपूर्वीविशेषविषयिता-

---

कालीनध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपमव्यवधानं निवेश्यं स्वं प्रतिज्ञात्वादिरूपसमुदायत्वं तच्च यथाश्रुतमानुपूर्वी तेन प्रतिज्ञाघटकाद्यादिवर्णध्वंसाधिकरणकालस्य स्वाश्रयध्वंसाधिकरणत्वेऽपि न दोष इत्यप्याहुः। समुदायत्वरूपप्रतिज्ञात्वादेर्न प्रवेशः प्रतिज्ञाद्यानुपूर्व्या अप्रवेशादिति तु बोध्यम्। प्रतिज्ञादेरैक्ये ज्ञानभेदेन विषयिता बोधेऽपि प्रतिज्ञाविषयितात्वेनानुपूर्वीविषयिताव्यापकत्वं स्यादतः शब्दव्यक्तिभेदेन भिन्नत्वोत्कीर्तनम्। यादृशयादृशानुपूर्व्यवच्छिन्नवाक्यविषयितात्वं यादृशयादृशविषयि-तात्वं वा नानुगतमिति भावः। व्याप्यदले यादृशानुपूर्वीकप्रतिज्ञोत्तरयादृशानुपूर्वीकहेतूत्तरेत्यादिक्रमेणोचितानुपूर्वीनिवेशो वह्निदहनादिशब्दघटितानुपूर्वीभेदेन शब्दव्यक्तिभेदेनैव वा न्यायभेदप्रसङ्गः। अग्रिमरीत्यातिव्याप्तिश्च। वस्तुत उदासीनप्रतिज्ञादिपञ्चकेतिव्याप्तिवारणाय तत्समानाधिकरणभेदप्रतियोगितानवच्छेदकत्वमेव व्यापकत्वं निवेश्यम्। एतेनानुपूर्वीविषयितासामान्यनिवेशपक्षे प्रतिज्ञादिविषयितासामान्यस्यावश्यकतया शब्दव्यक्तिभेदेनेत्यसङ्गतमेवेति न शङ्क्यम्। तथाप्युत्तरकल्पे ज्ञानभेदेन विषयिताभेदादेतत्कल्पे विषयभेदेन तद्भेदात्पङ्क्तिसङ्गतेरिति बोध्यम्। यत्किञ्चिदिति विषयिताविशेषणम्। *तादृशेति* व्युत्क्रमोक्तेत्यर्थः। क्रमप्रयुक्तव्युत्क्रमप्रयुक्तप्रतिज्ञादिपञ्चकोभयसमूहालम्बने आनुपूर्वीविषयकत्वव्युत्क्रमप्रयुक्तप्रतिज्ञादिविषयकत्वव्यक्त्योः व्याप्यव्यापकभावः ज्ञानभेदेन विषयिताभेदात्केवलन्यायज्ञाने समूहालम्बनज्ञानीयन्यायानुपूर्वीविषयिताविरहादित्यर्थः। *नैवमिति* तस्या एकक्रमोक्तमात्रज्ञानेऽपि सत्त्वात्तत्र व्युत्क्रमोक्तप्रतिज्ञादिविषयिताविरहान्नातिव्याप्तिः। *तादृशे-

In Public domain. Digitization Muthulakshmi Research Academy

यास्तादृशप्रतिज्ञादिव्यक्तिविषयिताशून्यावृत्तित्वात् तस्यास्तद्व्याप्यत्वानपायात्। अथ निगमन-पूर्वोपनयपूर्वोदाहरणपूर्वहेतुपूर्वत्वरूपानुपूर्व्याश्रयत्वेन प्रतिज्ञायाः तादृशोदाहरणपूर्वत्वे सति प्रतिज्ञोत्तरत्वादिरूपानुपूर्व्याश्रयत्वेन च हेत्ववयवादीनां निवेशान्नानुपपत्तिः। अथवा तादृशैक-विधानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगितावच्छेदकत्वमेव तादृशानुपूर्वीघटकत्वमिति चेत्, एवमप्येकैकन्यायघटकं यत्प्रतिज्ञाद्येकैकवाक्यं तत्समुदायेऽतिप्रसङ्गो दुर्वार एवेति चेत्। मैवम्। स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्ति यद्यत्समुदायत्वं तत्तदन्यत्वस्य

---

ति* व्युत्क्रमप्रयुक्तप्रतिज्ञादिपञ्चकसमानाधिकरणन्यायघटकानुपूर्वीविशिष्टप्रतिज्ञादिसमुदायवद्गमन-मिति व्युत्क्रमोक्तप्रतिज्ञादिपञ्चकसमानाधिकरणन्यायविशेष इति वा ज्ञानीयेत्यर्थः। आदिना समान-कालीनत्वादिपरिग्रहः। समानाकारकज्ञाने विषयितयोरैक्येऽपि सामानाधिकरण्यविशेष्यकत्वावच्छि-न्नानुपूर्वीप्रकारितारूपा उक्तज्ञानीयविषयिता तथाविधज्ञानीयन्यायघटकप्रतिज्ञादिपञ्चकविषयतातो भिन्नैव, वह्निमान्पर्वत इति ज्ञानविषयित्वाद्घटसमानाधिकरणवह्निमान्पर्वत इत्यादिज्ञानविषयितावत्। तस्याश्चोक्तसमूहालम्बनव्यावृत्तायाः केवलन्यायज्ञानेऽभावात् व्युत्क्रमोक्तप्रतिज्ञादिसमुदायेऽतिव्याप्ति-रिति भावः। एतेन यादृशविषयितात्वं यत्किञ्चिदानुपूर्वीविषयकत्वसमानाधिकरणाभावप्रतियोगिताव-च्छेदकं तादृशविषयिताशून्यज्ञानीयत्वं व्यापकीभूतविषयितायां देयमित्यपास्तम्। ननु अनुपूर्वीकत्व-मानुपूर्व्याश्रयत्वं तच्च विशिष्टनिगमनत्वरूपा या आनुपूर्वी तदाश्रयत्वरूपं निगमन एव विश्रान्तेरित्य-नेन दूषितम्। इदानीन्तु यथाविशिष्टनिगमनत्वं तथैव विशिष्टप्रतिज्ञात्वादीतिरीत्या पञ्चविधा यानुपूर्वी तदाश्रयत्वरूपं तादृशानुपूर्वीकत्वं प्रत्येकं वक्तुं शक्यमित्याशयेनाशङ्कते। *अथेति* *पूर्वेति* अव्यव-हितपूर्वत्यर्थः। तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगिक्षणवृत्तित्वमुपनयघटकचरमवर्णेऽक्षतं निगमनत्वं चोत्तरवर्णपूर्वत्वविशिष्टाद्यवर्णत्वं तस्य प्रकारताविशेषाश्रय धर्मत्वेनोक्तरीत्यानिवेशः। उदासीनप्रतिज्ञा -न्यायान्तर्गतक्रमिकहेत्वादिसमुदाय वारणायोचितानुपूर्वीकप्रतिज्ञानिवेशः। एवमुचितानुपूर्वीके हेत्वा-दिनिवेशफलमूह्यम्। वक्ष्यमाणदोषेणैव निरसनीयं कल्पान्तरमाह। *अथवेति* पूर्वं पञ्चानुपूर्व्य उक्तास्तत्रेदानीं पदत्रये एकैकनिवेश्येति दर्शयति। *एकविधेति* *एवमपीति* न चैतत्प्रतिज्ञोत्तरैत-द्धेत्वादिघटितभेदप्रतियोगितावच्छेदकत्वमस्तु। तत्पक्षसाध्यहेतुकन्यायाननुगमप्रसङ्गात्। यत्तु एव-मपि तन्न्यायघटकप्रतिज्ञायाः यथातादृशभेदप्रतियोगितावच्छेदकत्वं तथैवापरन्यायघटकहेतोरपर-न्यायघटकोदहरणादेरिति नोक्तातिव्याप्त्युद्धारसम्भवः। तादृशभेदप्रतियोगितावच्छेदकत्वव्याप्यधर्मत्व-मित्यपि हेयम्। तत्समुदायन्यायोभयभेदावारणात्। न च व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगिता-

In Public domain. Digitization Muthulakshmi Research Academy

समुदायत्वविशेषणत्वे तात्पर्यात्। व्युत्क्रमप्रयुक्तप्रतिज्ञादिनिष्ठस्य नानान्यायान्तर्गतप्रतिज्ञादि-पञ्चकनिष्ठस्य च समुदायत्वस्य तत्तदन्यत्वविरहान्नातिप्रसङ्गः। एवञ्च घटमानयेत्यादिवाक्य-वृत्तिसमुदायत्ववारणाय प्रतिज्ञादिवृत्तित्वविशेषणमपि सार्थकमित्यवधेयम्। प्रतिज्ञादिवृत्तित्वं

---

विशेषणम्। न्यायत्वं चानुपूर्वीरूपमिति न तद्भेदासङ्ग्रह इति वाच्यम्। नानान्यायान्तर्गतप्रतिज्ञादि-सामानाधिकरण्यविशिष्टन्यायभेदावारणात्। न च तादृशानुपूर्वीतरानवच्छिन्नप्रतियोगिताकभेदनिवेश-सम्भवः। न्यायभेदस्य तादृशेतरप्रतिज्ञात्वाद्यवच्छिन्नप्रतियोगिताकत्वादिति। तन्न। तत्र अवच्छेदकता-पर्याप्त्युपादाने भवदुक्तदोषवारणात्। *स्वाश्रयीभूतेति* प्रतिज्ञायां यत्किञ्चित्त्वन्तु वैयर्थ्यान्नोक्तम्। यत्तु उपाध्यायनिष्कर्षिततावदर्थविषयकबोधस्य निविष्टतया दलद्वयेऽपि यत्किञ्चिच्छाब्दबोधपदेन न्यायद्वयार्थशाब्दबोधमुपादाय न्यायद्वयेऽतिव्याप्तिरतस्तद्घटकैतद्विशेषणे यत्किञ्चित्त्वं प्रतिज्ञादावाव-श्यकमिति। तन्न। यत्किञ्चिच्छाब्दबोधपदेनैकन्यायार्थ उपादीयते न वा। आद्ये निरूपकत्वान्तेन वारणात्। अन्त्येऽसम्भवः। न्यायत्वे तद्व्यापकत्वस्य दुरुपपादकत्वात्। तथा च तत्रापि यत्किञ्चित्त्वं व्यर्थमिति विदाङ्कुर्वन्तु। *तात्पर्यादिति* उचितानुपूर्वीकेत्यादिरित्यादिः। *एवञ्चेति* नन्वत्र सन्दर्भविरोधो दुर्वारः। तादृशभेदप्रतियोगितावच्छेदकत्वनिवेशकल्पेऽपि प्रतिज्ञादिपञ्चकैकदेशप्रवृत्ति-समुदायत्ववारणाय प्रतिज्ञात्वादिपर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मपञ्चकव्यापकत्वरूपविशेष्यदलसार्थक्य-स्यावश्यकत्वात्। असम्भवभयेन तादृशभेदप्रतियोगितावच्छेदकवर्णत्वव्यापकत्वनिवेशासम्भवादिति चेत्। अत्र केचित्। तादृशभेदप्रतियोगितावच्छेदकत्वस्यावच्छेदकतावच्छेदकसाधारणस्याप्रामाणि-कत्वेन तादृशानुपूर्वीप्रकारकनिश्चयत्वसमनियतकारणतावच्छेदकयत्किञ्चिज्ज्ञानीय विषयितानिरूपक-वर्णत्वव्यापकसमुदायत्वनिवेशेनैकैकदेशवृत्तिसमुदायत्ववारणे प्रतिज्ञादिपञ्चवृत्तित्ववैयर्थ्यं सम्भाव्यत इत्यभिप्रायात्। न एवञ्चेत्यादिकथनासङ्गतिः। यत्तु वर्णत्वस्य कत्वादिरूपतया तादृशनिश्चयत्व-समनियतकारणतावच्छेदकविषयितानिरूपकवर्णान्यतमत्वसमनियतसमुदायत्वं विवक्षितम्। एवञ्च विशेष्यदलवैयर्थ्यान्नसन्दर्भविरोधः। अनिरूपकत्वान्तन्तु न निवेश्यम्। एवमपीत्यतिप्रसङ्गासङ्गतेः। यत्तु आनुपूर्व्यामव्यवधानांशनिवेशे प्रयोजनाभावाद्गौरवाच्च तदघटिततादृशानुपूर्वीप्रकारकनिश्चयत्व-समनियतकारणतावच्छेदकविषयताश्रये को वह्निमान् पर्वतो वह्निमान् कुतो धूमादित्यादिवाक्य-समुदायेऽतिव्याप्तिरतो जिज्ञासानिष्ठविषयत्वाप्रयोजकत्वेन वर्णो विशेष्य इति। तन्न। एवमपि घटमानयेत्यादिवाक्यान्तरितप्रतिज्ञाहेत्वादिघटितसमुदायेऽतिव्याप्तेरिति। तदसत्। वर्णत्वादेः कत्वादि-रूपतामतेऽप्युत्तरत्वादिसंसर्गकनिश्चयं निवेश्य वर्णपदस्य संसर्गतान्यजात्यवृत्तिविषयतामात्रनिवेशौ-

In Public domain. Digitization Muthulakshmi Research Academy


च (प्रतिज्ञात्वाद्यवच्छिन्नवृत्तित्वम्)। प्रतिज्ञात्वादिपर्याप्त्यवच्छेदक(यत्किञ्चि)द्धर्मपञ्चक-व्यापकत्वम्। अतः प्रतिज्ञादिपञ्चकैकदेशसमुदाये नातिप्रसङ्गः। प्रतिज्ञात्वादेर्व्यासज्यवृत्तित्वात्तदाश्रयैकदेशमात्रवृत्तेस्तत्पर्याप्त्यनवच्छेदकत्वात्। समुदायत्वञ्चानेकपर्याप्तो धर्मः तस्य पर्याप्तिसम्बन्धेन न्यायपदप्रवृत्तिनिमित्तत्वान्नैकदेशे न्यायत्वव्यवहारप्रसङ्ग इति तु

---

पयिकतया तद्व्यापकत्वनिवेशेनैवोपपत्तावन्यतमत्वव्याप्यत्वांशयोर्निवेशवैयर्थ्यात्। उक्तरीत्याऽसम्भव-वारणाय यत्किञ्चित्स्वव्यापकत्वे सति तदन्यत्वरूपस्यैवानिरूपकत्वान्तार्थस्य निवेशनीयतयैवमपी-त्यादिग्रन्थसङ्गतेः। वस्तुतस्तु तथाविधयत्किञ्चिदानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगितावच्छेदकत्व-विशिष्टवर्णत्वव्यापकसमुदायत्वनिवेशाद्विशेष्यदलवैयर्थ्यमिति। पूर्वं दीधितिकारोक्तविशेषणं व्यर्थम्। घटमानयेत्यादिवाक्येऽतिप्रसङ्गस्यैवाभावादिति तेषां तदभिधानासङ्गतिः। पञ्चकैकदेशसमुदायवारकञ्च विशेषणं नास्तीति न्यूनतेति पूर्वपक्षाभावः। इदानीं तेषां तदभिधानसङ्गतिः। तादृशसमुदायवारक-विशेषणस्यैव चैतल्लभ्यते इति दीधितिकाराभिप्रायलेखनमात्रम्। अन्यथा एवञ्चेति पङ्क्तेरेव नैरर्थक्यं स्यादिति तु युक्तम्। अत्र एकैकन्यायघटकहेत्वादावपरापरन्यायघटकप्रतिज्ञाद्यानन्तर्यावगाहि-भ्रमात्मकनिश्चयत्वसमनियतकारणतावच्छेदकीभूतयत्किञ्चिज्ज्ञानीयविषयतामादायैवमपीत्यादिदोषो अतस्स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिविशेष्यकता तादृशाव्यवहितोत्तरत्वप्रकारक-ज्ञानान्यत्वरूपं भ्रमान्यत्वं निवेश्यमिति गौरवम्। तदपेक्ष्य तादृशहेत्वादिवृत्तिभिन्नत्वस्यैव निवेश इति बोध्यम्। *प्रतिज्ञात्वादीति* तादृशयत्किञ्चिद्धर्मव्यापकत्वमर्थः। अन्यथा कुत्रापि समुदायत्वे तादृश-नानासमुदायत्वव्यापकत्वासम्भवात्। प्रतिज्ञात्वादिव्यापकत्वनिवेशेऽसम्भवः अनुगतप्रतिज्ञात्वस्यैव निवेश्यतया यावत्प्रतिज्ञावृत्तितया प्रत्येकन्यायवृत्तिसमुदायत्वस्य तदव्यापकत्वादित्यवच्छेदकधर्मोपा-दानम्। धर्मश्च पर्वतो वह्निमानिति वाक्यत्वादिः। यद्यप्येवं सति पर्याप्त्यवच्छेदकं नानैवेति तद्वति न्याय-त्वावच्छिन्नभेदोऽक्षतस्तथापि पर्याप्त्यतिरिक्तसम्बन्धेन व्यापकत्वविवक्षणाददोषः। तादृशयत्किञ्चिद्धर्म-व्यापकत्वे सति तदितरचतुष्टयसामानाधिकरण्योक्तौ प्रतिज्ञा तदितरैकदेशसमुदायत्वादिकमादायाति-व्याप्तिरतः पञ्चकेति। *प्रतिज्ञादीति* प्रतिज्ञाघटकभागहेतुघटकभागादिपञ्चकघटितसमुदाये इत्यर्थः। अत्रापि च घटमानयेत्यादिवाक्यघटितसमुदायेऽतिव्याप्तिरतः स्वनिष्ठन्यूनवृत्तितानिरूपकं यद्यत्तत्द्भि-न्नत्वं निवेश्यम्। केचित्तु एवञ्चोदासीनघटिततादृशपञ्चकसमुदायत्वस्यापि निरासो बोध्यस्तादृश-व्यापकत्वादित्याहुः। तेषाञ्चायमाशयः। तादृशधर्मपञ्चकावच्छेदेन न्यायत्वसम्भवात्तादृशयत्किञ्चिद्धर्म-पञ्चकावच्छिन्नानुयोगिताकभेदप्रतियोगितायां पर्याप्तिसम्बन्धेनावच्छेकत्वरूपव्यापकत्वमेव निवेश्यम्। तत एव तादृशसमुदायत्वनिरासेनानिरूपकत्वान्तविशेषणं नोपादेयमिति। *प्रतिज्ञात्वादेरिति* न्यून-

In Public domain. Digitization Muthulakshmi Research Academy

विभावनीयम्। ननु प्रतिज्ञादिलक्षणे न्यायान्तर्गतत्वविशेषणस्य प्रवेशनीयतया अन्योऽन्याश्रयप्रसङ्ग इत्यत आह। **प्रतिज्ञात्वादिकमिति** **उदासीनवाक्यवारकेति।** न्यायान्तर्गतवाक्यवारणमात्रप्रयोजनकेत्यर्थः। एतेन न्यायानन्तर्गतप्रतिज्ञादिपञ्चकसमुदायस्य उचितानुपूर्वीकत्वविरहादेव न्यायत्वाप्रसक्तेर्न्यायघटकप्रतिज्ञादिशरीरे तादृशविशेषणानुपादानेऽपि न क्षतिरिति सूचितम्। (अत्र केचित्। असाधकतास्थलीयन्यायेऽव्याप्तिः, तत्र व्याप्तेरुभयवादिसिद्धत्वेनोदाहरणाभावेन पञ्चावयवाभावादिति। तन्न। साध्यसाधनभेदेन न्यायभेदाच्चतुरवयवस्यैव ग्राह्यत्वादिति। यदि च सर्वत्रैव समयसम्बन्धस्थले पञ्चावयवप्रयोग इति मन्यते, तदाभिमतनिर्वाहाय समयसम्बन्धं विनापि सर्वत्रैव पञ्चावयवप्रयोग इति मतं स्वीकरणीयमिति।) क्रमप्रयुक्तविभिन्नपक्षसाध्यहेतुकप्रतिज्ञादिपञ्चकेऽतिव्याप्तिशङ्कां निरस्यति **साध्यादीति**। तत्साध्यपक्षहेतुकन्यायलक्षणे तत्साध्यपक्षकप्रतिज्ञातत्साधनकहेतुतत्सा-ध्यसाधनकोदाहरणतत्साध्यपक्षसाधनकोपनयतत्साध्यसाधनकनिगमनानि निवेशनीयानीत्यर्थः। नन्वेवं न्यायपदार्थस्याननुगततया न्यायपदस्य नानार्थकतापत्तिरित्यत्रेष्टापत्तिमाह

---

पर्याप्तस्याधिकपर्याप्त्यनवच्छेदकत्वादिति भावः। अन्यतमत्वमादायातिव्याप्तिमनेकपर्याप्तत्वप्रवेशेन समुदायत्वस्य पर्याप्त्यघटितस्वरूपसम्बन्धेन न्यायपदप्रवृत्तिनिमित्तत्वञ्च वारयति। *अनेकेति* यत्तु जगदीशेन क्रमेण पञ्चभिःपुरुषैः प्रतिज्ञादिपञ्चाभिधाने न्यायत्वापत्तिरत औचित्ये एकपुरुषप्रयुक्तत्वं देयम्। न चैकत्वस्य सर्वसाधारण्यात्कथं दोषवारणम्। स्वाश्रयप्रयुक्तत्वस्वानाश्रयप्रयुक्तत्वोभयसम्बन्धेनैकत्ववदस्यत्वस्य वाच्यत्वात्। स्वं प्रयोक्तृगतमेकत्वमिति। तन्न। स्वाश्रयीभूतप्रतिज्ञाव्यवहितोत्तरत्वशून्येत्यत्राव्यवहितोत्तरत्वस्वानुकूलकृतिसमानाधिकरणकृतिजन्यत्वोभयसम्बन्धेन प्रतिज्ञाविरहस्यैव निवेश्यत्वात्। इदन्तु बोध्यम्। अन्वय्युदाहरणार्थघटितमेकं न्यायत्वं व्यतिरेक्युदाहरणार्थघटितं चापरम्। एवञ्चोदाहरणोपदर्शितव्याप्तिविशिष्टे एव पक्षधर्मत्वाकाङ्क्षयोपनयप्रयोगान्नान्यविधव्याप्तिबोधकोदाहरणोत्तरान्यविधोपनयप्रसङ्ग इति। यत्तु साध्यसाधनभेदेन न्यायभेदाद्धेत्वाभासलिङ्गतासाधकतास्थलीय न्यायश्चतुरवयव एव तत्र व्याप्तेरुभयसम्मतत्वेनोदाहरणाभावादिति। तन्न। यदि पञ्चभिरवयवैरसाधकतां साधयामीति समयबन्धपूर्वके तत्रानाकाङ्क्षिता अपि पञ्चावयवाः प्रयोक्तव्याः। अन्यथा स्वकर्तव्यसाध्यतद्व्याप्त्युपदर्शननिर्वाहो न स्यादन्यथा सर्वत्रैवोपनयमात्रं स्यात्तावतैवानुमित्युपयुक्तव्याप्तिपक्षधर्मतयोर्लाभात्तदा तादृशेऽपि तत्र ते आवश्यकाः। अन्यथा एक साध्यपक्षहेतुकन्यायभेदप्रसङ्गादिति सिद्धान्तमवष्टभ्यैतल्लक्षणकरणात्। यत्र पक्षधर्मताया अप्युभयसिद्धत्वा-

In Public domain. Digitization Muthulakshmi Research Academy


**व्याप्त्यादेरेवेति**। व्याप्त्यादिपदार्थस्येवेत्यर्थः। **साध्याद्यननुगमात्** स्वघटक-साध्यादीनां भिन्नभिन्नरूपेण निवेशनीयत्वात्। **अननुगमः** अनुगतप्रवृत्तिनिमित्त-विरहः। **न्यायादेः** न्यायादिपदार्थस्य। आदिपदादवयवादिपरिग्रहः। **इष्यत एवेति** गत्यन्तराभावादिति भावः। यथाश्रुतमूलस्वरससिद्धवाक्यपञ्चकजन्यमहावाक्यार्थ-बोधमादाय लक्षणसमन्वयं निराचिकीर्षुः वाक्यपञ्चकस्यैकविशिष्टार्थबोधकतां खण्डयति। **प्रतिज्ञानिगमनयोरिति** न सम्भूयैकार्थप्रतिपादकत्वमित्यग्रेतनेनान्वयः। प्रतिज्ञार्थे वह्निमति पर्वते निगमनार्थस्य विशिष्टहेतुज्ञानज्ञाप्यसाध्यवत्त्वस्यान्वयबोधोपगमे साध्य-वत्त्वांशमादाय पौनरुक्त्यप्रसङ्गात्। दण्डवान् रक्तदण्डवानित्यादाविव विधेयांशे अधिकावगाहि-नस्तादृशान्वयबोधस्य सम्भवेऽपि शुद्धपक्षतावच्छेदकविशिष्टेऽबाधितत्वादिविशिष्टसाध्य-वत्तावगाहिन्याः प्रतीतेरेवोपयोगित्वेन साध्यविशिष्टपक्षे तादृशसाध्यवत्तान्वयबोधस्यानाका-ङ्क्षिततया वादितात्पर्याविषयत्वाच्च। यत्तु वह्निविशिष्टपर्वतोद्देश्यकबोधे वह्निमत्पदोत्तरपर्वत-पदोपस्थितिरपेक्षिता। नीलो घटस्सुन्दर इत्यादाविव घटो नीलस्सुन्दर इत्यादौ नीलान्वित-

---

त्तत्र अवयवन्यायौचित्यापाताच्चेति न किञ्चिदेतत्। *न्यायानन्तर्गतेति* विचारातिरिक्तस्थलीयेति नार्थः। तादृशक्रमिकप्रतिज्ञादिपञ्चकस्य न्यायत्वात्। किन्तूचितानुपूर्वीरहितेति। *विभिन्नेति* पर्वतो वह्निमान्पृथिवीत्वात् यो यो रसवान् स रूपवान् यथा घटः सत्ताव्याप्यद्रव्यत्ववानयं तस्माद्गुणवानित्या-दावित्यर्थः। *तत्साध्येति* शुद्धन्यायत्वं नास्त्येवेत्यभिप्रायः। *यथाश्रुतमूलेति* एकवचनान्तस्वार्थ-विशिष्टज्ञानमित्यन्तमूलेत्यर्थः। अवयवलक्षणानुरोधेन समूहालम्बनानात्मकतल्लाभसूचनाय स्वरसे-ति। तात्पर्येत्यर्थः। *न सम्भूयेति* वादितात्पर्याविषयीभूतोद्देश्यविधेयभावापन्नार्थबोधकत्वमर्थः। *शुद्धेति* सम्भूयप्रतिज्ञाहेत्वर्थबोधेऽपि प्रथमतो न साध्येऽबाधितत्वबोधसम्भवः। बाधसम्भावनाया-जागरूकत्वादित्युपनयापेक्षा। यद्यपि परोक्षे बाधशङ्काऽकिञ्चित्करी तथापि तदाहिताप्रामाण्यशङ्का स्यात्। एवं धूमवत्तांशे भ्रमत्वशङ्कानोपनयार्थबोधे, हेतोरुभयसिद्धत्वात्। स च विषयपरिशोधकतर्के उपयुज्यते। धूमात्मकापाद्याभावनिश्चयरूपत्वात्। *उपयोगित्वेनेति* अन्यथा बाधानुवृत्त्या मध्यस्थ-स्यानुमित्यनापत्तेः। उपनयार्थग्रहस्य बाधनिवर्तकतयाऽबाधितत्वतयाप्यसत्प्रतिपक्षतत्त्वोभयभानं तस्य शब्दाधीनत्वाय लक्षणादरः। सम्भूयैकार्थप्रतिपादकत्वे आकाङ्क्षादिविरहो बीजं वदतां मतमुत्था-पयति। *यत्त्विति* *नील इति* न च नीलत्वघटत्वोभयावच्छिन्नविशेष्यताकत्वं सममेवेति वाच्यम्।

घटाद्यंशे विधेयाभानादुद्देश्यतावच्छेदकवाचकपदस्य उद्देश्यवाचकपदपूर्ववर्तिताया अपेक्षणीय-त्वात्, अतो नैतादृशान्वयबोधसम्भवः। न च शुद्धपर्वतत्वावच्छिन्न एव शुद्धवह्निमत्त्व-निगमनोपस्थाप्यविशिष्टवह्निमत्त्वयोर्युगपद्विधेयतया अन्वयोपगमेनैकवाक्यत्वं निर्वहतीति वाच्यम्। गुणानाञ्च परार्थत्वादसम्बन्धः समत्त्वात्स्यादिति न्यायेन विधेयतया भासमानयो-श्शुद्धवह्निमत्त्वविशिष्टवह्निमत्त्वयोरवच्छेद्यावच्छेदकभावापन्नविषयिताकत्वरूपसम्बन्धाभावेनै-कवाक्यत्वानिर्वाहात्। अत एव विधेयभेदे सर्वत्र वाक्यभेदः। केवलोपनयजन्यबोधे पक्षे साध्यव्याप्यहेतुमत्त्वस्य विधेयत्वेऽपि उपनयनिगमनाधीनबोधे उद्देश्यपदपूर्वनिर्दिष्टस्य व्याप्य-

---

नीलत्वावच्छिन्नप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यतात्पर्यकोद्देश्यतास्थले नीलत्वावच्छिन्नावच्छे-दकताप्रयोजकपदस्य घटत्वावच्छिन्नोद्देश्यताप्रयोजकपदपूर्वत्वविवक्षणात्। गुणानाञ्चेति[2] जैमिनि-सूत्रम्। गुणानां विधेयानां परार्थत्वात्। उद्देश्यमात्रसाकाङ्क्षात्वात्। उद्देश्यमात्रनिष्ठविषयतानिरूपितवि-षयताश्रयत्वादिति यावत्। असम्बन्धः। अवच्छेद्यावच्छेदकभावापन्नविषयितानिरूपकत्वशून्यत्वम्। समत्त्वात्तुल्यत्वेन भानादिति तदर्थः। यद्यप्यत्र विधेयानां तादृशविषयितानिरूपकत्वं नास्ति, कुत इत्युक्तौ परार्थत्वात्समत्त्वादिति हेतुद्वयं तत्र परार्थत्वस्यैव सम्यक्त्वे समत्त्वादित्यस्य वैयर्थ्यं तथापि पर्वतो वह्निमानित्यादौ वह्निविषयित्ववह्नित्वविषयित्वयोरवच्छेद्यावच्छेदकभावो न स्यात्। वह्नित्वस्य धर्मिपारतन्त्र्येण पर्वतादौ साकाङ्क्षतया वह्निवह्नित्वयोः परार्थत्वात् अतस्समत्वादित्युक्तम्। तथा च यथा -वह्नेः पर्वतमात्रे विधेयत्वं, तथा न वह्नित्वस्य तस्य वह्न्यंशेऽपि विधेयतया पर्वतमात्रे विधेयत्वाभावा-दिति न समत्त्वम्। वस्तुतस्तु विधेयानामवच्छेद्यावच्छेदकभावः। परस्परसाकाङ्क्षात्वं कुतो नेत्या-शङ्कायां समत्वादित्युक्तम्। यत एव समत्वादित्यर्थः। परस्परधर्मितावच्छेदकप्रकारकभावापन्नविषयि-तयोरेवावच्छेद्यावच्छेदकभावो न तदनापन्नविषयितयोरिति। यद्वा विधेयबोधे क इति धर्मिसापेक्षा जायते। न विधेयान्तरस्य अतो धर्मिविधेययोरेव सम्बन्धो भासते, न तु विधेययोः विधेयबोधे च न विधेयान्तरस्याकाङ्क्षेत्यतस्समत्वादिति धर्मधर्मिभावधर्मितावच्छेदकप्रकारभावान्यतरशून्यत्वादित्य-र्थः। तेषां तुल्यत्वेन परस्परार्थत्वरूपपरार्थत्वमितिभावः। *शुद्धेति* अवच्छिन्नविषयिताप्रयोजकस्य विशेष्यतावच्छेदकप्रकारकनिर्णयादेरभावात्। एकवाक्यत्वमेकपदप्रयोज्यविषयितायाः साक्षात्परम्परया वाऽवच्छेद्याया विषयिता तत्प्रयोजकत्वं विधेयभेदे विधेयविषयिताभेदे वाक्यभेदो विभिन्नवाक्यत्व-मवच्छेद्यावच्छेदकभावानापन्नतद्विषयिताद्वयप्रयोजकत्वम्। तत्र ज्ञानस्य प्रत्येकस्थलीयतद्विषयिता-

---

2. गुणानाञ्च परार्थत्वादुपवेषवद्यदेति स्यात् । १०,८.६८ । जैमिनिप्रणीतमीमांसासूत्राणि

In Public domain Digitization Muthulakshmi Research Academy



वत्पक्षपदार्थस्य उद्देश्यतावच्छेदकतयैव भानेन तद्विषयकत्वनिगमनार्थविषयकत्वयोरवच्छेद्यावच्छेदकभावात्तदुभयैकवाक्यतेति। तन्न। तात्पर्यसत्त्वे योजनयापि तादृशबोधसम्भवात्, उद्देश्यवाचकपदस्य विधेयवाचकपदपूर्वत्वेन प्रतिसन्धानस्यापेक्षणीयतया योजनयैवोपनयेन पक्षे अयं पदार्थे साध्यव्याप्यवत्त्वबोधनात् तात्पर्यसत्वे वादिवाक्ये योजनायाः दूषणानर्हत्वात्। तात्पर्यविरहस्यैव तत्र वीजत्वात्। इदमुपलक्षणम्। उपनयेनापि समं प्रतिज्ञायाः न विशिष्टैकार्थप्रतिपादकत्वं वह्निमति पर्वते उपनयार्थस्य साध्यव्याप्यहेतुमत्पक्षस्याप्राप्ततादृशहेतुमत्वांशघटिततया विधेयत्वसम्भवेऽपि अनुमित्युपयोगिनः पक्षतावच्छेदकविशिष्टे हेतुमत्त्व-स्याकाङ्क्षयैवोपनयप्रतिपादनादनाकाङ्क्षितस्य पर्वते पर्वताभेदवोधस्य तात्पर्याविषयत्वात्। ****उदाहरणावयवान्तरयोरिति**** उदाहरणघटकयोर्यत्तत्पदघटितभागयोरपि नैकविशिष्टार्थ-बोधकत्वं तत्र द्विरुक्तयत्पदेन महानसत्वमहानसान्यत्वादिनोद्देश्योपस्थापनात् तत्पदेनापि तत्तद्रूपावच्छिन्नपरामर्शान्महानसं धूमवद्वह्निमच्च महानसान्यद्धूमवद्वह्निमच्चेति वाक्यार्थ-चतुष्टयविषयकसमूहालम्बनबोधस्यैवोदयात्। न च वीप्सया व्यापकत्वबोधनाद्धूमवान्धूम-व्यापकवह्निमानित्याकारक एकविशिष्टार्थवोध एव तत्रोत्पद्यत इति वाच्यम्। यो य इत्यादेरनन्वितार्थकत्वप्रसङ्गात्। न च द्विरुक्तयत्पदस्यैव व्यापकत्वमर्थः स च साध्यांशे अन्वेतीति वाच्यम्। नामार्थयोर्भेदान्वयबोधस्याव्युत्पन्नत्वात्। व्यापकत्वावच्छिन्नस्य तदर्थस्याभेदे

---

द्वयशालिसमूहालम्वनरूपत्वादिति भावः। नन्वेवं कथञ्चिदित्यादिपङ्क्त्यसङ्गतिः निगमने साध्यस्योपनये हेतुमत्त्वस्य च विधेयत्वादित्यत आह। ***केवलेति*** ***योजनयापि*** उद्देश्यतावच्छेदकवाचकपदस्योद्देश्यवाचकपदपूर्वत्वानुसन्धानेनापि। एवञ्चैकस्यामेव प्रतिज्ञायां फलभेद उपगम्यते तेन पर्वते वह्निबोधार्थमेका वह्निमत्पर्वते निगमनार्थबोधार्थमपरेति न शङ्का। अत्र दृष्टान्तमाह। ***उद्देश्येति*** अन्यथा शाब्दवोधे प्राङ्निर्दिष्टमुद्देश्यमिति निगमनानुरोधेनायं वह्निव्याप्यधूमवानित्युपनयकल्पनापत्तेः। एवमेकस्मादेव फलभेदोपीति भावः। प्रतिज्ञानिगमनयोरपि योजनोपगमान्नासत्तिभङ्गः। ***दूषणेति*** अन्यथा तादृशतात्पर्यनिर्वाहायोपनये उचितवाक्यान्तरकल्पनागौरवं स्यात्। ***बीजत्वात्*** योजनाविरहप्रयोजकत्वात्। तथा च तादृशशाब्दबोधविरहे तात्पर्यविरह एव वीजमुच्यतां, किं मध्ये योजनाविरहकल्पनमिति भावः। ***अप्राप्तेति*** प्रतिज्ञावाक्याजातेत्यर्थः। ***विधेयत्वसम्भवेऽपीति*** विधेयकोटावाधिक्यात् द्वयोरविधेयत्वादपरार्थत्वाच्चेति भावः। ***तदर्थस्य*** द्विरुक्ततत्पदार्थस्य प्रकृतिः दण्डवह्न्यादि-

नान्वय इत्यपि न सम्भवति। सुन्दरो दण्डीत्यादौ दण्डाद्यंशे सुन्दराद्यभेदानन्वयवत्समानविभक्तिकत्वाभावेन मत्वर्थीयप्रकृत्युपस्थाप्ये अर्थे असमस्तनामार्थाभेदान्वयस्यासम्भवात्। अभेदान्वयप्रतियोगिसापेक्षतया असामर्थ्येन साध्यवाचकपदोत्तरं तद्धितासम्भवाच्च, तत्पदस्य तावतापि सार्थक्यासम्भवाच्च। तस्माद्यत्पदार्थे हेतोः तत्पदार्थे च तस्मिन् साध्यस्य विधेयतया भानमेव समूहालम्बनरूपं तत्र जायते। तदुत्तरं व्यापकताबोधो मानसः। स एव वा शाब्दबोधः, साध्यवाचकपदस्य प्रकृतसाधनव्यापकताविशिष्टसाध्ये लाक्षणिकतया तत्पदार्थे व्यापकताविशिष्टसाध्यवत्तामवगाहत इत्युपेयम्। वीप्सासमभिव्याहारस्थले व्यापकत्वतात्पर्यस्यानादितया तादृशलक्षणाया निरूढलक्षणात्वेन वादिवाक्ये तत्स्वीकारे क्षतिविरहात्। न च व्यापकताबोधस्यावश्यकत्वे नानाहेत्वधिकरणे वह्न्यादिमत्त्वबोधनस्याप्रयोजकतया धूमादिकमुद्देश्यतावच्छेदकीकृत्य समूहालम्बनानात्मक एव व्यापकताविशिष्टसाध्यबोध उपेयतां यत्तत्पदन्तु तादृशलक्ष्यार्थतात्पर्यग्राहकमेवास्त्विति वाच्यम्। अर्थबोधकत्वसम्भवे तत्परित्यागायोगात् यो यो न वह्निमान् स न धूमवानित्यादौ व्यतिरेक्युदाहरणे वह्निमद्भेदादिहेतुके

---

पदम्। सुन्दरदण्डीत्यादावभेदबोधोदयादसमस्तेति। *प्रतियोगीति* प्रतियोगिवाचकपदेत्यर्थः। तृतीयार्थोऽभेदः। सापेक्षेण, कृत्तद्धितसमासा[3] इति हि सूत्रम्। सापेक्षत्वमसमर्थत्वम्। तच्च शाब्दबोधप्रयोजकीभूतसमानविभक्तिकत्वादिराहित्यम्। यथा बुद्धराजमातङ्गशाब्दबोधे षष्ठ्यन्तराजपदस्याप्रयोजकतयाऽसामर्थ्यान्न बुद्धस्य राजमातङ्ग इत्यादिसमासः। विशेषणपदोत्तरविभक्तिप्रयोज्याभेदशाब्दबोधप्रयोजकत्वेन विशेष्यपदोत्तरसमानविभक्तिरपेक्षिता न तु विशेष्यपदोत्तरविभक्तिप्रयोज्यशाब्दबोधे विशेषणपदोत्तरसमानविभक्तिः। एवं भेदान्वयबोधेऽपीति शब्दमणौ विस्तरः। सर्वमिदं वीप्साविरहस्थल एवेत्युक्तौ त्वाह। *तावतापीति* एवञ्च क्वचिदपि व्याप्याधिकरणे व्याप्यकाभावशङ्काया असम्भवाद्व्यभिचारज्ञानाभावसहितसहचारदर्शनरूपसामग्र्याः फलमाह। *तदुत्तरमिति* ननु समानविषयकत्वमात्रेण विरोधित्वे मानाभावात् महानसत्वादिना सकलव्यक्तिषु वह्न्यादिमत्त्वबोधेऽपि धूमवत्त्वादिना वह्न्याद्यभावशङ्काढुर्वारेति नोत्तरक्षणे व्यापकता मानसबोधसम्भव इत्यत आह। *स एवेति* महानसं धूमवद्धूमव्यापकवह्निमच्च महानसान्यद्धूमवद्धूमव्यापकवह्निमच्चेति समूहालम्वन एवेत्यर्थः तत्पदार्थे महानसतदन्यरूपे स्वप्रयोज्यशाब्दबोधध्वंसकालीनस्वप्रयोज्यशाब्दबोधसामान्यकत्वमनादित्वम्। *वादिवाक्य इति* अन्यथा नीलपर्वतो वह्निमानित्यादेः प्रतिज्ञात्वानुपपत्तेः। *धूम-

---

3. कृत्तद्धितसमासाश्च ।अष्टाध्यायी- १.२.४६ ।

In Public domain. Digitization: Muthulakshmi Research Academy


धूमवद्धदादिसाध्यके तादृशान्वय्युदाहरणे वा यत्तत्पदार्थाविवक्षायां प्रतियोगिवाचकपद-समानविभक्तिकपदोपस्थाप्यस्यानुयोगिनोऽप्रवेशेन नञा तत्रान्योन्याभावबोधनासम्भवाच्च। एवं चैत्रो जानाति कर्तृत्वादित्यादौ न्यायान्तर्गते यो यः करोति स स जानातीत्युदाहरणे यत्तत्पदादार्थाविविक्षायां धर्मिणोऽलाभेन साध्याद्याश्रयविकलतयोदाहरणाभासताप्रसङ्गाच्चेति। एवञ्चोदाहरणसमुदायस्यावयवान्तरेण समं विशिष्टार्थप्रतिपादकत्वं सुतरामेव न सम्भवतीति भावः। एतेन हेतूदाहरणयोर्धूमवान् धूमाद्धूमव्यापकवह्निमानित्येतादृशविशिष्टार्थबोधजनकत्व-सम्भवादुदाहरणावयवान्तरयोरित्यनुपपन्नमित्यपि निरस्तम्।

****द्रागेव**** सुतरामेव। न सम्भूयैकार्थप्रतिपादकत्वमित्यनुषज्यते। प्रतिज्ञाहेत्वोरि-त्यत्रापि नकारं विहाय ताभ्यां पर्वतो धूमज्ञानज्ञाप्यवह्निमानित्येतादृशविशिष्टज्ञानजननादिति भावः। अथ प्रतिज्ञाजन्यबोधानन्तरं कुत इति साध्यज्ञापकाकाङ्क्षायां तन्निवर्तकं हेतुवाक्यं प्रयुज्यते। तन्निवर्तकता च पक्षविशेषणतानापन्नसाध्यंशे हेतुज्ञानज्ञाप्यत्वबोधनेनापि निर्वहती-

---

**वह्नेदादिसाध्यक इति*** ह्रदो धूमवद्भिन्नो वह्निमद्भेदात्। यो यो न वह्निमान् स न धूमवानित्याद्यन्वय्यु-दाहरणे इत्यर्थः। विकलता, अबोधकत्वम्। अनुयोग्यविषयको नञर्थबोधोऽप्रसिद्धः। जानातीत्यादौ त्वन्यत्राश्रय विकलबोधेऽपि उदाहरणे तदसम्भव इति भेदेनोपन्यासः। मतुप्सार्थक्यमते यो यो धूमवानित्यादौ न तद्वैकल्यमिति तत्त्यागः। ***एतेन*** अर्थबोधकत्वसम्भव इत्याद्युक्तदूषणेन। महानसं धूमवद्धूमाद्वह्निमच्चेति बोधं चेद्वादितात्पर्यविषयं ब्रूयात्तदाह। ***उदाहरणसमुदायस्येति*** ***विहायेति*** सम्भूयैकार्थप्रतिपादकत्वमित्यनुवर्तत इत्यनेनान्वयः। ***ताभ्याम्*** प्रतिज्ञाहेतुभ्याम्। स्वार्थोपस्थिति-द्वारेति शेषः। यद्यपि पर्वतो धूमज्ञानज्ञाप्यवह्निमानिति बोधे पर्वतो धूमाद्वह्निमानित्याद्यानुपूर्व्या एवापे-क्षणात्कथं ताभ्यामेकार्थबोधः। तथापि तादृशविधेयतावच्छेदकविशिष्टभावे तादृशविधेयोपस्थितये तादृशानुपूर्व्या अपेक्षणेऽपि प्रकृते विधेयतावच्छेदकत्वेन वह्नित्वमात्रभानं कुत इत्याकाङ्क्षया तु विधेय-वह्नित्वावच्छिन्ने, धूमादित्यस्यान्वय इत्यपगमात्। ननु वह्निः, किं ज्ञानज्ञाप्य इत्येवाकाङ्क्षा तथा च पक्ष-विशेषणतानापन्नसाध्ये हेतुज्ञानज्ञाप्यत्वस्यान्वयादेव तन्निवृत्तिसम्भवात्तदापन्नसाध्ये तद्बोधनमनुपयो-गीत्याशङ्कते। ***अथेति*** वह्निमत्त्वं कुत इति च नाकाङ्क्षापक्षविशेष्यकज्ञानविषयकत्वात्। विवादा-विषयधर्मिणि सामान्यतो वह्निज्ञापकज्ञानस्य सिद्धेश्च किन्तु पर्वते वह्निमत्त्वं कुत इत्याकारिकैव सा च पर्वतपदवशात्किञ्चिज्ज्ञानजन्यपर्वतविशेष्यकज्ञानविषयो वह्निरित्याकारिका, एतादृशाकाङ्क्षानिवृत्तिश्च पर्वतविशेषणतापन्नसाध्य हेतुज्ञानजन्यपक्षविशेष्यकज्ञानविषयत्वबोधने नैव सम्भवतीति तयोरेक-

In Public domain. Digitization Muthulakshmi Research Academy


ति पक्षांशे हेतुज्ञानज्ञाप्यत्वविशिष्टसाध्यवैशिष्ट्यावगाहिबोधस्यानुपयोगितया नतात्पर्यविषयत्व -मिति चेन्न। पर्वते वह्निबोधानन्तरं पर्वते यद्वह्निज्ञापकं तत्रैवाकाङ्क्षाजायते तन्निवृत्तिश्च साध्ये धूमादिज्ञानजन्यपर्वतविशेष्यकज्ञानविषयत्वप्रतिपादनेनैव, धूमाद्वह्निमन्महानसमित्यादि-वाक्यस्य पर्वते वह्निमत्वं कुत इत्याकाङ्क्षानिवर्तकत्वाभावात्। पञ्चमीतस्तादृशपर्वतविशेष्यक-ज्ञानविषयत्वभानञ्च तद्विशेषणतापन्नसाध्यांश एवोक्तावाक्यान्महानसादिविशेषणतयोपस्थिते तदप्रतीतेः। एकधर्मिविशेषणतापन्ने अन्यविशेष्यकहेतुज्ञानादीनज्ञानविषयत्वबोधकतायाः

---

वाक्यत्वमिति समाधत्ते। ※**पर्वत इति**※ ※**तत्रैवेति**※ कुत इत्याभासोक्ताकाङ्क्षाव्यवच्छेदार्थ एवकारः। तस्याः किं ज्ञानजन्यज्ञानविषयतामात्रावगाहितया धूमादीन्युत्तरे साध्यमुख्यविशेष्यकधूमज्ञानजन्य-ज्ञानविषयताबोधेऽपि पर्वते वह्न्यभावव्यावर्तकवह्निमत्त्वसाधकालाभाद्विप्रतिपत्त्यादितः पक्षपरिग्रहेण प्रतिज्ञाभिधानवैयर्थ्यात्। एतदभिप्रेत्यैव पर्वते वह्निबोधानन्तरमिति पुनरुपात्तम्। यद्यपि वह्निमत्त्वं कुत इत्यतः पर्वते वह्निज्ञानजनकज्ञानविषयत्वव्याप्यधर्मज्ञानं भूयादित्याकाङ्क्षैवोच्यते तथा च वह्निज्ञापकं किमित्येव युज्यते समभिव्याहृतपदार्थतावच्छेदकावान्तरधर्मप्रकारकज्ञानेच्छायां किं पदशक्तेः। तथापि प्रश्नोत्तरभावानुरोधेन तत्र पञ्चम्युपादानम्। यदि यादृशविशेषणविशेष्यभावापन्नपदार्थविषय-कत्वेन ज्ञानमिच्छावगाहते तादृशविशेषणविशेष्यभावापन्नतत्तद्विषयकत्वेन ज्ञानजनकस्यैवोत्तरत्व-मिति नियमः। तथोत्तरानुरोधेनेच्छायामेव तुल्यमिति वेद्यत्वम्। उत्तरार्थशाब्दबोधोत्तरमानसबोधस्य वा तन्निवर्तकत्वमुपेयम्। तादृशाकाङ्क्षायाः धूमादिजन्यज्ञानविषयत्वमात्रप्रतिपादनान्ननिवृत्तिरित्यत आह। ※**निवृत्तिश्चेति**※ निवृत्तिरनुत्पादः। धूमपदस्य धूमज्ञानमर्थः। समभिव्याहृतप्रतिज्ञादिघटकपक्ष-पदार्थतावच्छेदकावच्छिन्नविशेष्यकजन्यज्ञानविषयत्वं पञ्चम्यर्थः। एवकारश्च पर्वतविशेष्यकत्वाघटि-तस्य किञ्चिद्विशेष्यकत्वघटितस्य चोक्तार्थस्य प्रतिपादने तन्निवर्तकताव्यवच्छेदार्थः। ※**धूमादिति**※ धूम -ज्ञानजन्यमहानसविशेष्यकजन्यज्ञानविषयकत्वं तदर्थः। आद्ये महानसविशेष्यकत्वस्याधिक्येऽप्यु-क्तार्थभानमस्त्येवेति बोध्यम्।

अथ धूमज्ञानजन्यपर्वतविशेष्यकज्ञानविषयत्वं पक्षविशेषणतानापन्नसाध्ये कुतो न भासत इत्याशङ्कां तद्धर्मिविशेषणतापन्न एव साध्ये तद्विशेष्यकज्ञानविषयत्वभानमिति नियममङ्गीकृत्य निराकुरुते। ※**पञ्चमीत इति**※ उक्तनियमस्य फलान्तरमप्याह। ※**उक्तवाक्यादिति**※ पञ्चम्या नानार्थ-त्वेऽपि ततो धूमज्ञानजन्यपर्वतविशेष्यकज्ञानविषयवह्निमन्महानसमित्यप्रत्ययार्थः। एतत्प्रदर्शनञ्च किञ्चिद्विशेषणतापन्न एव साध्ये किञ्चिद्विषयकज्ञानविषयत्वभाननियमेनैवोपपत्तेस्तस्यैकधर्मिघटितत्वं

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चम्या अव्युत्पन्नत्वादिति धूमाद्वह्निमान्पर्वत इति विशिष्टवैशिष्ट्यबोधस्यावश्यकत्वात्। **कथञ्चिदिति** निगमनेऽयं पदाननुषङ्गपक्षे वह्निव्याप्यधूमवत्पर्वतादिरूपोपनयार्थे निगमनार्थधूमज्ञानज्ञाप्यवह्निमत्त्वाद्यन्वयसम्भवादिति भावः। अनुषङ्गपक्षे तु तादृशवह्न्यादिमत्पक्षरूपनिगमनार्थमात्रबोधेनैवाकाङ्क्षानिवृत्तेरुपनयार्थे विशिष्टपक्षे निगमनार्थीभूतविशिष्टपक्षबोधस्यानुपयुक्तस्य न तात्पर्यविषयतेति कथञ्चिदित्युक्तम्। इदं त्ववधेयम्। अननुषङ्गपक्षेऽपि उपनयैकदेशेऽयं पदार्थपक्षमात्रे निगमनार्थान्वयमात्रेणैव कृतकृत्यतया तत्समुदायार्थ -विशिष्टपक्षे निगमनार्थविषयकबोधेऽपि तात्पर्यमप्रामाणिकमिति।

नन्वेवं प्रतिज्ञादीनां पञ्चानां कथमेकवाक्यताव्यवहार इत्यत आह। **एकेति** **विशिष्टेति** विशिष्टैकार्थप्रतीतीच्छाप्रयोज्यत्वमात्रेणेत्यर्थः। मात्रपदेन तादृशप्रतीतिजनकत्वव्यवच्छेदः। तादृशी च प्रतिपत्तिर्निगमनरूपचरमवाक्यार्थबुद्धिरुदीच्यो वा मानसः परामर्शः। तत्परता च तामजनयतोप्युत्तरोत्तरवाक्यप्रयोजिकामाकाङ्क्षामुत्थापयतः प्रतिज्ञादेरिह धूम इत्यादि वचसामानुमानिकवह्न्यादिधीपरतावन्निर्वहत्येव तत्प्रयोजकतयैव। ननु तावद्भिरवयवैः सम्भूयैकमहावाक्यार्थबोधाजननेऽपि परामर्शप्रयोजकीभूतस्वीयस्वीयतत्तद्विशिष्टार्थधीजनकतायाः सर्वावयवेष्वेव सत्त्वेन निरुक्तलक्षणसमन्वयो नानुपपन्न इत्यत आह। **परामर्शप्रयोजकत्वं चेति** परामर्शप्रयोजकज्ञानजनकत्वं चेत्यर्थः। **तद्विषयेति** परामर्शविषयेत्यर्थः। (**तत्तत्पदार्थोपस्थापकतयेति**) **तत्तत्पदार्थसार्थोपस्थापकतयेति** अभेदे तृतीया। तथा च तदुपस्थापकत्वरूपमित्यर्थः। विवक्षितमिति शेषः। तथा च यादृशयादृशवाक्यैः परामर्शविषयसकलपदार्थाः उपस्थाप्यन्ते तावत्स-

---

व्यर्थमित्याशङ्कावारणाय कस्तादृशवह्निमानित्येवाकाङ्क्षा न तु कीदृश इत्यभिप्रेत्य दीधीतिं दूषयति। *इदन्त्विति* निगमने तादृशप्रतीतिजनकतावत्त्वान्न तद्व्यवच्छेद इत्यत आह। *उदीच्यो वेति* *तत्परता* तादृशेच्छाप्रयोज्यता। *इहेति* व्याप्तिस्मृत्यादिसम्भवाद्धीपरता। *अनुमितीच्छाप्रयोज्यत्वम्* *तत्प्रयोजकतयैव* प्रतिपत्तिप्रयोजकतयैव। *स्वीयस्वीयेति* स्वघटकपदैकवाक्यतापन्नैः प्रतिज्ञादिपञ्चभिः स्वस्वार्थज्ञानं जन्यत इति न तद्विरोधः। *यादृशवाक्यैरिति* यादृशसमुदायत्वाश्रये परामर्शविषयीभूता यावन्तः पदार्थाः प्रत्येकं तदुपस्थापकत्वं तादृशसमुदायत्वमर्थः।

In Public domain. Digitization Muthulakshmi Research Academy

मुदायत्वं विवक्षितमिति पर्यवसितोऽर्थः। **उदाहरणोपनययोरेवेति** उपनयस्य व्याप्त्य-बोधकत्वमताभिप्रायेणोदाहरणान्तर्भावः। **तत** न्यायत्वम्। **पर्यवस्यतीति** ताभ्यामेव परामर्शविषयसकलपदार्थोपस्थापनादिति भावः।

अथ यथाकथञ्चित्परामर्शानुकूलत्वं यादृशयादृशवाक्यानां तादृशतादृशवाक्य-समुदायत्वं विवक्षितमतो नोदाहरणोपनयमात्रेऽतिव्याप्तिरित्याशङ्कते। **अथेति** **तदानुकूल्यमात्रेणेति** पूर्ववदभेदे तृतीया। परामर्शप्रयोजकत्वमित्यनुषज्यते। **इत्यादेः** इत्यादिसमुदायस्य। **तथात्वम्** न्यायत्वम्। स्यादिति शेषः। को वह्निमानित्यादिवाक्यानामपि जिज्ञासाज्ञापनद्वारा अवयवप्रयोजकत्वेन यथाकथञ्चित्परामर्शा-नुकूलत्वसम्भवादिति भावः। इत्यादीत्यादिपदात् व्युत्क्रमप्रयुक्तप्रतिज्ञादावतिव्याप्त्यादेः परिग्रहः।

**इति गदाधरीये न्यायलक्षणम्**

---

*व्युत्क्रमेति* आदिना नानान्यायान्तर्गतप्रतिज्ञादिपरिग्रहः। अतिव्याप्त्यादिना कल्पद्वयेऽप्यसम्भव-परिग्रहः। *अत्र केचित्* वाक्यैकवाक्यतायां समभिव्याहाररूपाकाङ्क्षादेरनपेक्षणीयत्वात्। महावाक्यार्थ-बोधखण्डनमसङ्गतमेवेति। अपरे तु, अस्तु महावाक्यार्थबोधः। परन्तु तस्य तात्पर्यविषयत्वं न सम्भवतीत्येव भट्टाचार्याणामाशय इति। वस्तुतस्तु उदाहरणस्यैकार्थबोधकताखण्डनान्महावाक्यार्थ-बोधखण्डनं जातमेवेति।

**इति कृष्णम्भट्टीये न्यायलक्षणम्**

In Public domain. Digitization Muthulakshmi Research Academy

## अथ गदाधरीये अवयवलक्षणं निरूप्यते

मूलोक्तावयवलक्षणे शाब्दज्ञानस्यानुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकत्वाभिधानं पञ्चवाक्यानामेकमहावाक्यार्थधीजनकत्वाभिमानेन प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थगोचरशाब्दधीविशेषाणां परिचयायैव, तेषां निवेशस्तु विशिष्य तत्तदर्थविषयकशाब्दबुद्धित्वेन, न तु तादृशशाब्दधीजनकत्वेन, तथा सत्यैकैकावयवजन्यशाब्दबुद्धेरपि परामर्शप्रयोजकतया तज्जनकावान्तरवाक्यार्थज्ञानजनकावयवावयवेति प्रसङ्गस्य दुर्वारत्वात्। न च साध्यविशिष्टपक्षादिविषयकशाब्दबुद्धित्वेन बोधपञ्चकनिवेशेऽननुगमः। जनकान्तस्य तत्तद्बोधजनकान्यतमत्वादिरूपानुगतधर्मावच्छिन्नपरत्वात्। न चैवं सति न्यायान्तर्गते पर्वतो वह्निमानित्यादिवाक्येऽतिव्याप्तिः। वाक्यपदस्य न्यायान्तर्गतत्वार्थकत्वादित्यभिप्रेत्य पर्यवसितं लक्षणार्थमाह। **न्यायेति** (यद्यप्युदासीने न्यायान्तर्गतत्वघटितप्रतिज्ञाद्यन्यतमत्वमेव नास्ति, तथापि तदघटितप्रतिज्ञाद्युपादानाभिप्रायेणेदम्) अथ किमिदं न्यायान्तर्गतत्वं, न तावत्स्वाविषयकप्रतीत्यविषयन्यायकत्वम्। प्रतिज्ञाद्यविषयकप्रतीत्यापि हेत्वादिरूपन्यायैकदेशस्य विषयीकरणात्तद्घटितसमुदायात्मकन्याये प्रतिज्ञाद्यविषकप्रतीत्यविषयत्वस्य दुर्घटत्वात्। एकदेशवृत्तेर्व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावानङ्गीकारात्। नापि न्यायविषयताव्यापकविषयिताकत्वं, उच्चारणभेदेनैकानुपूर्व्यवच्छिन्नवाक्यानामपि भेदात् कस्याश्चिदपि प्रतिज्ञाव्यक्तेर्विषयिताया एकविधमपि न्यायमवगाहमानेषु सर्वेषु ज्ञानेषु वृत्त्यसम्भवात्। मैवम्। स्वाविषयकप्रतीत्यविषयन्यायकत्वमेव तत्। न्यायत्वसामानाधिकरण्यमात्रेण तादृश-

---

### अथ कृष्णम्भट्टीये अवयवलक्षणम्

*महेति* प्रथमशाब्दज्ञानपदन्तु न तावदर्थबोधपरं प्रत्येकावयवार्थशाब्दबोधस्य तदजनकत्वात्। *अननुगमः* अनुगतावयवप्रवृत्तिनिमित्ताभावः। *एकदेशवृत्तेरिति* *स्वाविषयकप्रतीतीति* विषयत्वमव्यासज्यवृत्तिधर्मः। समुदायत्वरूपन्यायत्वम्। एकैकप्रतिज्ञादिव्यक्त्यविषयकप्रतीत्या तादृशप्रतिज्ञाव्यक्त्यन्तरघटितन्यायस्य विषयीकरणाच्चेत्यपि बोध्यम्। *नापि न्यायेति* यत्कि-ञ्चिन्न्यायविषयिताव्यापकविषयिताकत्वोक्तावुदासीनप्रतिज्ञादिव्यक्तिसमानाधिकरणत्वादिना न्यायविषयितायास्तद्व्याप्यत्वादुदासीनेऽतिव्याप्तेः। *स्वेति* पर्याप्त्यघटितस्वरूपसम्बन्धेन प्रतिज्ञात्वाश्रयस्तत्तद्वर्णो वा स्वं, तेन न्यायत्वाश्रयप्रतिज्ञादिभागादावपि प्रतिज्ञात्वादिपर्याप्त्यधिकरणाविषयकप्रतीति-

In Public domain. Digitization Muthulakshmi Research Academy

प्रतीत्यविषयत्वं विवक्षणीयम्। एकैकप्रतिज्ञादिव्यक्त्यविषयकप्रतीत्या व्यक्त्यन्तरघटित-न्यायस्य तन्न्यायैकदेशहेत्वादेश्चावगाहनेऽपि न्यायत्वाधिकरणे तत्प्रतिज्ञाव्यक्तौ तत्प्रतिज्ञादि-व्यक्त्यविषयकप्रतीत्यविषयत्वसत्त्वेन तासां तथात्वमव्याहतमेव। अथवा न्यायत्वाश्रयत्वमेव तथा, पर्याप्त्यविवक्षया एकदेशस्यापि तथात्वोपपत्तेः। वस्तुतो न्यायत्वघटकस्य समुदाय-त्वांशस्यात्र निष्प्रयोजकत्वेनानिवेशादुचितानुपूर्वीकत्वमात्रं विवक्षितम्। तदेव च न्यायान्तर्ग-तत्वमेकदेशसाधारणम्। उचितानुपूर्वीकत्वञ्च प्रतिज्ञोत्तरहेत्वादिघटितवाक्यपञ्चकानुपूर्वी-विशेषावच्छिन्नभेदप्रतियोगितावच्छेदकत्वं विशिष्टधर्मावच्छिन्नप्रतियोगितावच्छेदकतायाः तद्घटकसमुदायपर्याप्ततया एकदेशस्यापि तदाश्रयत्वात् प्रतिज्ञादेस्तथात्वमक्षतम्। उपनय-विशेषोत्तरत्वविशिष्टनिगमनत्वशरीरे च वैशिष्ट्यघटकतया निगमनस्याप्यन्तर्भावात्तत्साधार-ण्यमक्षतमेवोक्तधर्मस्य। विशिष्टस्यावच्छेदकतास्थले एकमवच्छेदकमपरञ्च तद्विशेषणं तन्निष्ठ-स्यावच्छेदकत्वस्यावच्छेदकं, न तु समुदायेऽवच्छेदकत्वं पर्याप्तमित्युपगमे च तादृशानुपूर्वी-विशेषप्रकारकनिश्चयत्वसमनियतकारणतावच्छेदकविषयताकत्वं विवक्षणीयम्। तादृशी च तादृशविशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्नकार्यतानिरूपितकारणता, तदवच्छेदकत्त्वञ्च हेत्वादि-निष्ठानन्तर्यप्रकारतापन्नप्रतिज्ञादिविषयतानामप्यव्याहतम्। विनिगमनाविरहादितरविषयता-

---

विषयत्वाभावासत्त्वेऽपि न दोषः। उक्तनिरुक्तौ पर्याप्त्यघटितस्वरूपसम्बन्धेन न्यायत्वस्य निवेश्यतया लाघवादाह। ***अथवेति*** ***समुदायत्वांशस्येति*** स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादि-वृत्तिभिन्नत्वविशिष्टप्रतिज्ञात्वादिपर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मपञ्चकव्यापकत्वविशिष्टसमुदायत्वांशस्येत्य-र्थः। स्वाश्रयीभूतेत्याद्युचितानुपूर्वीकत्वोक्तावुदासीनेऽतिप्याप्तेराह। ***उचितेति*** ***प्रतिज्ञेति*** पर्वतो दहनवान्पर्वतो वह्निमानित्यानुपूर्वीभेदे न लक्षणभेदे प्रत्येकं पर्वतपक्षकवह्निसाध्यकधूमहेतुकावयवेऽव्या-प्तिरतः पक्षसाध्यवैशिष्ट्यावगाहि यत्किञ्चिज्ज्ञानजनकतावच्छेदकतापर्याप्त्यधिकरणप्रकारताद्याश्रयत्वेन प्रतिज्ञादीन् प्रवेश्य एकविधानुपूर्वीविशेषावच्छिन्नभेदमादाय सर्वत्र लक्षणसमन्वयः। प्रागुक्तैकपदं चैतादृशप्रकारतानिवेशसूचकम्। वैशिष्ट्यं सामानाधिकरण्यम्। ***उक्तधर्मस्येति*** संसर्गसाधारण-प्रतियोगितावच्छेदकत्वं निविष्टमिति भावः। ननु एतन्मते निगनमविषयिताया एव कारणतावच्छेदक-त्वमुपनयादिविषयितानां तदवच्छेदकत्वमिति कथं प्रतिज्ञादिनिष्ठत्वमुचितानुपूर्वीकत्वस्येत्यत आह। ***विनिगमनेति*** (अथ हेतुप्रकारतायां प्रतिज्ञाप्रकारतानिरूपितत्वोदाहरणप्रकारतानिरूपितत्वयोर्वि-शेषणत्वेऽवच्छेदकताया व्यासज्यवृत्तित्वापत्तिरतस्सामानाधिकरण्यसम्बन्धेन प्रतिज्ञाप्रकारताविशिष्टे-

In Public domain. Digitization: Muthulakshmi Research Academy


निरूपितत्वेन निश्चयत्वविशिष्टत्वेन च कारणीभूतज्ञान[4]निरूपितसकलविषयितानां कारणतावच्छेदकत्वात्। प्रतिज्ञोत्तरहेतुत्वादिविशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्नकार्यतानुरूपितां प्रतिज्ञोत्तर -हेतुरित्यादिज्ञानसाधारणीं ताद‍ृशानुपूर्व्यवच्छिन्न[5]वाक्यत्वविशिष्टवैशिष्ट्यावच्छिन्नकार्यतानिरूपिततादृशवाक्यत्वादिप्रकारकज्ञानकारणताञ्चादायोदासीनातिप्रसङ्गवारणाय कारणतायां तादृशधर्मव्याप्यत्वव्यापकत्वयोर्निवेशनम्। न च तादृशानुपूर्वी विशेषावच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नकार्यतानिरूपितकारणताया अपि न तादृशानुपूर्वीविशेषप्रकारकनिश्चयत्वसमनैयत्यसम्भवः। प्रतिज्ञात्वादिना पदार्थान्तरावगाहितादृशानुपूर्वीप्रकारकज्ञानसमानाकारकज्ञानसाधारणत्वात्, तादृशज्ञानस्य वास्तवप्रतिज्ञाद्यविषयकत्वेन तद्घटितानुपूर्व्यप्रकारत्वादिति वाच्यम्। प्रतिज्ञात्वावच्छिन्नप्रकारतानिरूपितहेतुत्वावच्छिन्नप्रकारतानिरुपितेतिक्रमेण[6] निगमनत्वावच्छिन्नविषयतापर्यन्तं निवेश्य तच्छालिनिश्चयत्वसमनियतत्वस्यैव विवक्षितत्वात्तादृशनिश्चयत्वस्योक्तभ्रमसाधारण्येन क्षतिविरहात्। न चैवमुदासीनप्रतिज्ञाद्यानन्तर्यं हेत्वाद्यंशेऽवगाहते यो भ्रमस्तन्निष्ठतादृशप्रतिज्ञादिविषयिताया अपि निरुक्तकारणतावच्छेदकतयाऽतिप्रसङ्गो दुर्वार इति वाच्यम्। भ्रमावृत्तिविषयिताया एव निवेशनीयत्वादिति कृतं विस्तरेण।

अवयवैकदेशस्यावयवद्वयात्मकसमुदायस्य च वारणाय **प्रतिज्ञाद्यन्यतमत्वमिति**। अथ धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादिन्यायान्तर्गतप्रतिज्ञैकदेशे धूमादित्यादिभागेऽतिव्याप्तिः। तस्यापि हेतुप्रतिपाद्यो यादृशविशिष्टार्थस्तन्मात्रबोधकत्वेन हेतुलक्षणा-

---

दाहरणप्रकारताविशिष्टहेतुप्रकारतेत्यादिक्रमेणाधिकस्य सामानाधिकरण्यांशस्यानिवेश एव नियामक इति चेत्।) संशयसाधारणविषयिताया ऐक्येनानतिप्रसक्तेर्नावच्छेदकत्वसम्भव इत्यतः। ***निश्चयत्वेति*** न च कारणताभेदापत्तिः। अवच्छेदकानामसमनैयत्यस्यैव तद्भेदकत्वात्। ***प्रतिज्ञोत्तरेति*** प्रतिज्ञोत्तरहेतुमद्गगनमिति विशिष्टवैशिष्ट्यबुद्धीत्यर्थः। आनुपूर्व्यवच्छिन्नेन निगमनेन भिन्नं सम्भिन्नं वाक्यमुदासीनप्रतिज्ञावाक्यम्। प्रतिज्ञाहेतूदाहरणोपनयनिगमनपर्वतो वह्निमानिति वाक्यवद्गगनमिति विशिष्टवैशिष्ट्यबुद्धीत्यर्थः। तादृशनिश्चयत्वावच्छिन्नकारणतानिवेशेऽयमेव दोषः। न च पर्याप्तिर्निवेश्या। एतन्मते तादृशपर्याप्तेरसत्त्वात्। ***भ्रमावृत्तीति*** निरुक्तानुपूर्वीप्रकारकज्ञानस्य अन्यांशे भ्रमरूपत्वे कथमितिचेत्। भ्रमभिन्नवृत्तित्वस्योक्तत्वात्। वास्तवप्रतिज्ञाद्यानन्तर्यविषयिताया भ्रमसाधारण-

---

4. विषयसकलनिरूपितविषयतानामिति पाठभेदः 5. भिन्नवाक्यत्वेति पाठभेदः

6. प्रतिज्ञात्वावच्छिन्नप्रकारतानिरूपितेति क्रमेणेति पाठभेदः

In Public domain. Digitization Muthulakshmi Research Academy

क्रान्ततया प्रतिज्ञाद्यन्यतमत्वाक्रान्तत्वात्। न च तद्धटकपञ्चम्याः प्रकृतसाध्यान्वितस्वार्थ-वोधकत्वाभावान्नवक्ष्यमाणहेतुलक्षणाक्रान्तत्वं तस्येति वाच्यम्। एवमपि धूमाद्वह्निमतः स-धर्मा पर्वतो वह्निमानित्यादिप्रतिज्ञाघटकतादृशभागेऽतिप्रसङ्गस्य दुर्वारत्वादिति चेन्न। प्रकृत-पक्षतावच्छेदकावच्छिन्नविशेषणतापन्नप्रकृतसाध्यतावच्छेदकावच्छिन्नान्वितस्वार्थवोधकत्वे सति प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयतावहिर्भूतविषयिताशून्यवोधजनक-वाक्यत्वरूपहेतुत्वस्यैव निवेशनीयतया नातिप्रसङ्गात्। निगमनघटकस्य तस्मादिति भागस्य वारणाय विशेष्यदलम्, तज्जन्यवोधे तादृशविशिष्टविषयितावहिर्भूतव्याप्त्यादिविषयतासत्त्वेन तद्वारणात्।

---

विषयितात्वे नावच्छेदकत्वाल्लक्षणसङ्गतेः। *प्रकृतेति* सत्यन्तोपादानाद्धेत्वर्थवोधकभागव्युदासः। नन्विह बोधकत्वं वोधजनकतावच्छेदकयत्किञ्चिज्ज्ञानविषयितानिरूपकवर्णसमुदायत्वमित्यतिप्रसङ्गः। न च विषयितायां तादृशवोधजनकतानवच्छेदकविषयितानवच्छिन्नत्वं विशेषणं सत्यन्तं न देयमिति वाच्यम्। तथापि हेत्वर्थवोधकभागमात्रवृत्तिविषयितामादाय तद्दोषस्य दुर्वारत्वादिति चेन्न। पक्ष-विशेषणतापन्नप्रकृतसाध्यान्वितस्वार्थविषयितायां कार्यतावच्छेदकीकृत्य हेत्वर्थबोधकभागावृत्त्यानु-पूर्वीविशेषविषयिताया एव जनकतावच्छेदकत्वात्। हेतुतावच्छेदकावच्छिन्नविशिष्टहेतुत्वत्वावच्छिन्न-विशेष्यकनिश्चयत्वव्यापकप्रतिबन्धकतानवच्छेदकत्वं बहिर्भूतत्वान्तार्थः। एतेन साक्षात्परम्परासाधारण -तदनिरूपितत्वनिवेशे निगमनघटके तस्मादिति भागेऽतिव्याप्तिः साक्षात्तन्निवेशे वह्निसामग्रीमत्त्वादि-त्यादावव्याप्तिरिति निरस्तम्। अत्र प्रकृतपक्षविशेषणतापन्नप्रकृतसाध्यान्वितहेतुविशिष्टहेतुत्वविषयता-बहिर्भूतविषयिताशून्यशाब्दज्ञानजनकवाक्यत्वं हेतुत्वं कुतो नोक्तमिति न पृच्छा, प्रतिज्ञाहेतुसमुदाये अतिव्याप्तेः। तादृशविषयिताशून्यो यस्तादृशस्वार्थबोधस्तज्जनकत्वं तु सम्यक्। पक्षविशेषणताबहि-र्भूतत्ववारणाय धूमादालोकवानित्यादौ भागवारणाय च पक्षविशेषणतानिवेशः।

---

ननु प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञादिभिन्नभिन्नत्वरूपं प्रतिज्ञाद्येकदेशसाधारणमपि भेदस्याव्या-सज्यवृत्तितया समुदायवृत्तित्वे एकदेशवृत्तिताया अपि दुर्वारत्वात्। अथ प्रतिज्ञादिभिन्नभेदानुयोगिता-वच्छेदकरूपवत्त्वं तत्, तादृशं च रूपं प्रतिज्ञात्वादिकमेव तच्च व्यासज्यवृत्तीति न तदेकदेशसाधारणं प्रतिज्ञाद्येकदेशपर्याप्तं पर्वतपदत्वादिकञ्च न प्रतिज्ञात्वाद्यवच्छिन्नभिन्नभेदानुयोगितावच्छेदकं प्रतिज्ञा-त्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकतया विरोधेन अतधात्वादिति चेन्न। प्रतिज्ञाद्येकदेशे प्रतिज्ञात्वा-द्यवच्छिन्नभेदसत्त्वे तादृशभेदावच्छिन्नभेदस्य प्रतिज्ञात्वाद्यवच्छिन्नेऽपि सत्त्वासम्भवात्। प्रतिज्ञात्व-

In Public domain. Digitization Muthulakshmi Research Academy

पर्याप्त्यधिकरणसमुदायस्यैकदेशानतिरिक्तत्वात्। न च प्रतिज्ञात्वाद्यवच्छिन्नभेदस्य प्रतिज्ञाद्येकदेशे सर्वत्र तत्तदेकदेशपर्याप्तधर्मावच्छिन्ने सत्वेऽपि विरोधेन प्रतिज्ञात्वादेस्तदनुयोगितानवच्छेदकतया प्रतिज्ञाद्यवच्छिन्ने तदवच्छिन्नभेदावच्छिन्नभेदसत्त्वमविरुद्धमिति वाच्यम्। व्यासज्यवृत्तिधर्मावच्छिन्ना–नुयोगिताक एकदेशभेदस्याप्रामाणिकतयानुपगमात्। घटपटौ न घट इत्यादि प्रतीतेरसिद्धेः प्रतिज्ञादि–भेदपञ्चकानुयोगितावच्छेदकं यद्यद्रूपं तदवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकधर्मवत्त्व–विवक्षणे च प्रतिज्ञाहेत्वादिसमुदायेऽतिव्याप्तिः तादृशसमुदायत्वाद्यवच्छिन्ने प्रतिज्ञात्वाद्यवच्छिन्न–भेदासत्त्वात्तादृशसमुदायत्वस्य निरुक्तरूपानन्तर्गतत्वेन तादृशसकलधर्मावच्छिन्नानुयोगिताकभेद–प्रतियोगितावच्छेदकत्वात्। प्रतिज्ञात्वाद्यनवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकं यद्यत्तद–वच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वेनापि तादृशधर्मविशेषणे चातिगौरवमतो लघुलक्षणा–न्तरमाह। ***प्रतिज्ञाद्यघटकत्व इति*** अत्रापि न्यायान्तर्गतत्वे सतीत्यनुषज्यते। अतो न्यायबहिर्भूत–वाक्यव्युदासः। प्रतिज्ञाद्येकदेशवारणाय प्रतिज्ञाद्यघटकत्वनिवेशनम्। अथ तावद्वर्णसमुदायत्वरूप–प्रतिज्ञादिघटकतावद्वर्णानां भेदः प्रतिज्ञादौ दुर्घटः एकदेशभेदस्य समुदायेऽनभ्युपगमेनैवैतल्लक्षणानु–सरणात्। न च प्रतिज्ञादिघटकतानवच्छेदकधर्मवत्त्वनिवेशान्नदोषः प्रतिज्ञात्वादेः प्रतिज्ञादिघटकता–नवच्छेदकत्वेन तदुपादाय लक्षणसमन्वयादिति वाच्यम्। प्रतिज्ञादिशरीरे प्रमेयत्वादिना निवेशात्। तस्य तद्घटकतानवच्छेदकतया तदुपादायैवैकदेशातिव्याप्तेः। न च न्यायान्तर्गतत्त्वे सतीत्यनुषङ्गेन तादृशरूपस्य न्यायत्वव्याप्यत्वलाभात् न प्रमेयत्वादिकमादाय दोष इति वाच्यम्। तथा सति प्रतिज्ञादिघटकतावच्छेदकपर्वतपदत्वप्रकारत्वादीनां न्यायानन्तर्गततत्तद्वर्णादिसाधारणतया न्यायत्व–व्याप्यतयैव वारणात्सत्यन्तदलवैयर्थ्यापत्तेः तावतापि तत्तद्वर्णनिष्ठतद्वृत्तित्वादिकमादायातिव्याप्तेर्दुर्वा–रत्वाच्च। एतेन वर्णत्वव्याप्यतानिवेशेन प्रमेयत्वादिवारणमपि परास्तम्। न च प्रतिज्ञादिघटकता–वच्छेदकं यद्यद्रूपं तत्तदवच्छिन्नभेदकूटसमानाधिकरणन्यायत्वव्याप्यधर्मवत्त्वनिवेशेन सामञ्जस्यं तत्तद्व्यक्तित्वादीनां प्रतिज्ञादिघटकतावच्छेदकतत्तद्व्यक्तिनिष्ठवर्णत्वव्याप्यविशेषावच्छिन्नभेदकूट–समानाधिकरणत्वात्तावद्भेदकूटस्यैकाधिकरणान्तर्भावेन सामानाधिकरण्याप्रसिद्धावपि तावद्भेदानां प्रत्येकसामानाधिकरण्यस्य धर्मविशेषणत्वात्प्रतिज्ञात्वादौ भिन्नभिन्नाधिकरणान्तर्भावेण तावद्भेद–सामानाधिकरण्यसत्त्वेनोपपत्तिरिति वाच्यम्। एवमपि प्रतिज्ञादिघटकवर्णद्वयादिवृत्तिद्वित्वादेर्भिन्नाधि–करणान्तर्भावेन तावद्भेदसमानाधिकरणतया वर्णद्वयादावतिव्याप्तेः। न च न्यायघटकतावच्छेदकत्वेन धर्मस्य विशेषणीयतया नोक्तद्वित्वादिकमादायातिप्रसङ्गः तादृशद्वित्वादिना तत्तद्वर्णानां न्यायशरीरे अनिवेशेन तस्य न्यायत्वघटकतानवच्छेदकत्वादिति वाच्यम्। एवं सति प्रतिज्ञाहेत्वादिसमुदायनिष्ठ–वर्णानां प्रतिज्ञादिपञ्चकनिष्ठसमुदायत्वरूपन्यायत्वशरीरे प्रतिज्ञात्वादिनैव निवेशे प्रतिज्ञाद्येकदेश–पर्याप्तधर्मस्य प्रतिज्ञाहेत्वादिसमुदायरूपन्यायैकदेशपर्याप्ततादृशसमुदायत्वस्य न्यायघटकतानवच्छे–दकतयैव तादृशसमुदायेऽतिव्याप्त्यप्रसक्त्याविशेष्यदलवैयर्थ्यादितिचेत्। मैवम्। प्रतिज्ञादिघटकतान–वच्छेदकधर्मवत्त्वमेव सत्यन्तार्थः तद्घटकतावच्छेदकत्वञ्च न स्वावच्छिन्नाविषयकप्रतीतिविषयता–

 In Public domain. Digitization Mahalakshmi Research Academy

नवच्छेदकप्रतिज्ञात्वादिकत्वम् अपि तु स्वाश्रयाविषयकप्रतीत्यविषयप्रतिज्ञात्वाद्याश्रयकत्वमेव तादृशावच्छेकावच्छिन्नभेदकूटसामानाधिकरण्यं तदृशावच्छेदकभेदकूटवत्त्वमेव वा धर्मे निवेश्यं प्रतिज्ञाद्येकदेशाविषयकप्रतीत्या तदेकदेशान्तरस्यावगाहनेन प्रतिज्ञात्वावच्छिन्ने तदविषयकप्रतीति-विषयत्वासत्त्वेऽपि प्रतिज्ञात्वाद्याश्रयतत्तद्भागस्य तत्तद्भागाविषयकप्रतीत्यविषयत्वसत्त्वात्तद्भागवृत्ति-धर्मस्य स्वपदेनोपादानसम्भवात्। प्रतिज्ञादिघटकतावच्छेदकत्वं सुघटं एवञ्च येन रूपेण प्रतिज्ञाशरीरे तदेकदेशस्य न निवेशस्तदेकदेशवृत्तितादृशरूपस्यापि प्रतिज्ञादिघटकतावच्छेदकत्वात्। प्रतिज्ञादि-घटकवर्णद्वयादिवृत्त्यन्यतरत्वादेरपि तथात्वेन तद्वृत्तिद्वित्वादेस्तदवच्छिन्नभेदासमानाधिकरणत्वात्तादृश -वर्णद्वयादिवृत्तिद्वित्वादीनामपि निरुक्तप्रतिज्ञादिघटकतावच्छेदकत्वेनावच्छेदकभेदकूटवत्त्वाभावाच्च न तद्वत्यतिप्रसङ्गः। अथ प्रतिज्ञादिघटकतावच्छेदकावच्छिन्नप्रतियोगिताकभेदकूटसामानाधिकरण्य-स्य प्रतिज्ञादिघटकतावच्छेदकभेदकूटवत्त्वस्य वा धर्मविशेषणत्वे प्रतिज्ञाहेत्वादिघटकसमुदायत्वस्य स्वाश्रयाविषयकप्रतीत्यविषयकप्रतिज्ञादिकतया तद्घटकतावच्छेदकत्वेन तादृशसमुदायत्वाश्रययाव-द्वर्णवृत्त्यन्यतमत्वादिरूपनिरुक्तप्रतिज्ञादिघटकतावच्छेदकतावद्धर्मावच्छिन्नभेदासमानाधिकरणत्वे न च तद्वारणायोपात्तस्य विशेष्यदलस्य वैयर्थ्यप्रसङ्गः। यदि च निरुक्तप्रतिज्ञादिघटकतावच्छेदकता-वत्प्रतिज्ञादिघटकयावद्वर्णवृत्त्यव्यासज्यवृत्त्यन्यतमत्वाद्यवच्छिन्नभेदसामानाधिकरण्यस्य तादृश-प्रतिज्ञात्वादिभेदस्यच प्रतिज्ञात्वादावसत्तत्वेनासम्भवप्रसङ्गात्। प्रतिज्ञात्वादिपर्याप्त्यधिकरणाविषयक -प्रतीतिविषयतावच्छेदकत्वमवश्यं घटकतावच्छेदकशरीरे निवेशयनीयम्। तादृशप्रतीतिविषयता-वच्छेदकत्वञ्च तादृशयत्किञ्चिदेकप्रतीतिविषयताशून्यावृत्तित्वम्। तेन प्रतिज्ञादिघटकयावद्वर्णवृत्त्य-न्यतमत्वप्रतिज्ञात्वादिना प्रतिज्ञादिघटककतिपयवर्णविषयकप्रतीतिविषयत्वस्य स्वरूपसम्बन्धरूपाव -च्छेदकत्वस्य तादृशान्यतमत्वप्रतिज्ञात्वादिसाधारण्येऽपि न क्षतिः। यत्किञ्चित्प्रतीतिनिवेशात्प्रतिज्ञा -घटकयावद्वर्णेष्वेव प्रत्येकं प्रतिज्ञात्वादिपर्याप्त्यधिकरणाविषयकप्रतीतिविषयत्वसत्त्वेन तादृश-विषयताशून्याप्रसिद्धावपि न क्षतिः। एवञ्च प्रतिज्ञाहेत्वादिसमुदायत्वस्य तादृशसमुदायत्वव्यापका-न्यतमत्वस्य च न प्रतिज्ञाघटकतावच्छेदकत्वं प्रतिज्ञात्वादिवत् प्रतिज्ञात्वादिपर्याप्त्यधिकरणा-विषयकप्रतीतिविषयमात्रावृत्तित्वादिति तादृशसमुदायवारकतया विशेष्यदलसार्थक्यमित्युच्यते। तदापि प्रतिज्ञाहेत्वाद्युभयघटितत्वमुपेक्ष्य तदुभयघटकभागद्वयाघटितत्वपर्यन्तनिवेशनमनर्थकम्। तत्पर्यन्तनिवेशनं हि प्रतिज्ञाहेत्वाद्युभयघटककतिपयभागघटितसमुदाये समुदिततदेकतरापरकतिपय-भागघटितसमुदाये चाति प्रसङ्गभङ्गाय। तत्र च प्रथमसमुदायात्वादौ प्रतिज्ञात्वहेतुत्वाद्युभयपर्याप्त्य-धिकरणाविषयकप्रतीतिविषयमात्रवृत्तित्वेन प्रतिज्ञाहेत्वाद्युभयघटकतावच्छेदकत्वात् उत्तरत्र च तदेकतरघटकतावच्छेदकत्वान्नातिप्रसङ्गसम्भव इति चेत्। सत्यम्। प्रतिज्ञात्वादिपर्याप्त्यधिकरण-विषयकत्वाभावं प्रतीतौ पृथक्पृथङ्निवेश्य तद्विषयतावच्छेदकभेदाः न धर्मे निवेश्यन्ते, अपि तु तत्त -द्विषयकत्वाभावकूटविशेषितप्रतीतिविषयतावच्छेदकभेद एव। एवञ्च प्रतिज्ञैकदेशहेतूभयसमुदाये हेत्वेकदेशप्रतिज्ञोभयसमुदायादौ चातिप्रसङ्गवारणाय भागद्वयनिवेशनम्। अन्यथा तादृशसमुदायत्वा-

In Public domain. Digitization Muthulakshmi Research Academy

वच्छिन्नाविषयकप्रतीतौ प्रतिज्ञात्वाद्येकतरपर्याप्त्यधिकरणविषयकत्वनियमेन तत्तत्पर्याप्त्यधिकरण-
विषयकत्वाभावकूटवत्त्वविरहेण प्रतिज्ञादिघटकतावच्छेदकत्वविरहात्। तत्समुदायस्य प्रतिज्ञाहेत्वाद्यु
-भयाघटितत्वाच्च तत्रातिप्रसङ्गस्य दुर्वारत्वात्। अथैवं प्रतिज्ञादिघटकतावच्छेदकत्वस्य हेतुत्वादि-
साधारण्यात्तद्वारणायोपात्तं स्वाश्रयाविषयकप्रतीत्यविषयप्रतिज्ञादिकत्वविशेषणमनर्थकं हेतुत्वादेः
प्रतिज्ञाद्यविषयकप्रतीतिविषयतावच्छेदकत्वेऽपि हेत्वादिविषयकत्वाभावकूटवत्प्रतीतिविषयतावच्छे
-दकत्वविरहेण निरुक्तप्रतिज्ञादिघटकतानवच्छेदकत्वस्याप्यक्षतत्वादितिचेत्। परित्याज्यमेव तत्।
परन्तु धूमादालोकवान् पर्वतोवह्निमान्धूमादित्यादौ प्रतिज्ञैकदेशहेतुसमानाकारकभागे प्रकृत-
हेतुतावच्छेदकावच्छिन्नहेतुविशेषितहेतुत्वप्रतिपादकत्वरूपन्यायावयवत्वघटितहेतुत्वसत्त्वेन तत्प्र-
तीतेर्हेतुविषयकत्वाभावकूटवत्त्वात् प्रसक्तातिव्याप्तेर्वारणाय तद्व्यावृत्तं पूर्वोपदर्शितं हेतुत्वं निवेश-
नीयम्। अथ प्रतिज्ञात्वादिपर्याप्तिः समुदायेऽसत्त्वेन तदेकदेशस्यापि तत्पर्याप्त्यधिकरणविषयताया
अक्षतत्वात्तदेकदेशविषयकप्रतीतेस्तत्पर्यापत्त्यधिकरणाविषयत्वं दुर्घटमिति प्रतिज्ञात्वादिव्यापक-
विषयताकान्यत्वं प्रतीतौ निवेश्यं तथाचैकैकप्रतीज्ञादिव्यक्तिपर्याप्तधीविशेषविषयतारूपप्रतिज्ञात्वादे-
रसङ्ग्रहः एकैकप्रतिज्ञादिविषयिकाया अपि प्रतीतेः प्रतिज्ञात्वाश्रयव्यक्त्यन्तरविषयकत्वेन प्रतिज्ञात्व
-व्यापकविषयताकान्यत्वेनोक्तप्रतिज्ञात्वस्य तादृशप्रतीतिविषयतावच्छेदकत्वं दुर्वारमिति चेन्न।
स्वविषयताननतिरिक्तवृत्तिप्रतिज्ञात्वकान्यत्वेन प्रतीतेर्निवेशात् प्रतिज्ञाव्यक्तिभेदेन प्रतिज्ञात्वस्य भेदेऽपि
तत्तत्प्रतिज्ञात्वाश्रययावद्वर्णविषयकप्रतीतेः स्वविषयताननतिरिक्तवृत्तितत्प्रतिज्ञात्वात्मकतया सर्वस्यैव
प्रतिज्ञात्वस्य निरुक्तप्रतीतिविषयतानवच्छेदकत्वात्। वस्तुतस्तु प्रतिज्ञात्वाद्यवच्छिन्नभेदपञ्चकानु-
योगितावच्छेदकत्वमेव प्रतिज्ञादिघटकतावच्छेदकत्वं (समुदितप्रतिज्ञाहेत्वाद्येकदेशादिवृत्तिसमुदाय-
त्वस्यैकदेशपर्याप्तहेतुत्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वेऽपि प्रतिज्ञात्वाद्यवच्छिन्नभेदपञ्चकानु-
योगितावच्छेदकत्वासम्भवेन तत्समुदायत्वमादायातिप्रसङ्गवारकतया विशेष्यदले भागपर्यन्तनिवेश-
सार्थक्यमित्यवधेयम्।) प्रतिज्ञात्वपर्याप्त्यधिकरणहेत्वैकदेशहेतुत्वपर्याप्त्यधिकरणप्रतिज्ञाद्येकदेशादि
-वृत्तिसमुदायत्वस्यैकदेशपर्याप्तप्रतिज्ञात्वहेतुत्त्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वासम्भवेन तत्समु
-दायत्वमादायातिप्रसङ्गस्य वारकतया विशेष्यदले भागपर्यन्तनिवेशस्य सार्थक्यमित्यवधेयम्। न च
प्रतिज्ञाघटकयावद्वर्णवृत्त्यव्यासज्यवृत्तिधर्मस्य न प्रतिज्ञाभेदानुयोगितावच्छेदकत्वम् अयमेको न
द्वाविति प्रत्ययबलात् न्यूनवृत्तिधर्मस्यैव व्यासज्यवृत्तिधर्माधिकरणतानवच्छदेकत्वेन तदवच्छिन्न-
भेदानुयोगितावच्छेदकत्वादव्यासज्यवृत्तेरप्यन्यूनवृत्तिधर्मस्यातथात्वात् तथा च तादृशधर्मपर्याप्त्यधि
-करणप्रतिज्ञैकदेशेऽप्यवयवव्यवहारापत्तिरिति वाच्यम्। तादृशधर्मस्य व्यासज्यवृत्तित्वेन विशेष-
णीयत्वात्।

In Public domain. Digitization Muthulakshmi Research Academy

[7]ननु प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञादिभिन्नभिन्नत्वरूपं प्रतिज्ञाद्येकदेशसाधारणमपि, भेदस्याव्यासज्यवृत्तितया समुदायवृत्तित्वे एकदेशवृत्तिताया अपि दुर्वारत्वात्। अथ प्रतिज्ञादिभिन्नभेदानुयोगितावच्छेदकरूपवत्त्वं तत्तादृशं च रूपं प्रतिज्ञात्वादिकमेव न तु तदेकदेशपर्याप्तपर्वतपदत्वादिकं, तदवच्छिन्ने व्यासज्यवृत्तिप्रतिज्ञात्वाद्यवच्छिन्नभेदसत्त्वादिति चेन्न। प्रतिज्ञाद्येकदेशे प्रतिज्ञात्वाद्यवच्छिन्नभेदसत्त्वे तादृशभेदावच्छिन्नभेदस्य प्रतिज्ञात्वाद्यवच्छिन्नेऽपि सत्त्वासम्भवात् प्रतिज्ञात्वपर्याप्त्यधिकरणसमुदायस्यैकदेशानतिरिक्तत्वात्। न हि व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकैकदेशभेदः प्रामाणिकः, घटपटौ न घट इत्यादिप्रतीतेरसिद्धेः। प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकं यद्यद्रूपं तदवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकधर्मवत्त्वविवक्षणे च प्रतिज्ञाहेत्वादिसमुदायेऽतिव्याप्तिः। तादृशसमुदायत्वावच्छिन्ने प्रतिज्ञात्वाद्यवच्छिन्नभेदासत्त्वात्तादृशसमुदायत्वस्य निरुक्तरूपान्तर्गतत्वेन तादृशसंकलधर्मावच्छिन्नानुनुयोगिताकभेदप्रतियोगितावच्छेदकत्वात्। प्रतिज्ञात्वाद्यवच्छिन्नानुयो-

---

अव्यासज्यवृत्तिप्रतिज्ञात्वादेर्निवेशेऽपि तादृशान्यतमत्वं प्रतिज्ञादावेति दूषयति। *भेदस्येति* अन्यतमत्वरूपभेदस्येत्यर्थः। *नहीति* न च तद्धर्माधिकरणयत्किञ्चिदवृत्तिधर्मावच्छिन्नभेदस्तद्धर्मवद्यत्किञ्चदवृत्तिप्रतियोगिताकभेदो वा न तद्धर्मावच्छिन्नानुयोगिताक इति न नियमभङ्गस्तादृशभेदा-वच्छिन्नभेदस्योद्देश्यतावच्छेदकरूपाक्रान्तत्वादिति वाच्यम्। प्रतिज्ञात्वाद्यवच्छिन्नभेदावच्छिन्नभेदवत्त्वं सकलस्य प्रतिज्ञैकदेशस्य प्रतियोगितावच्छेदकीभूततादृशभेदवृत्तिप्रतिज्ञात्वाद्यवच्छिन्नभेदावच्छिन्नभेदनिवेशकल्पमाशङ्क्य न हीत्यादेरवतरणीयत्वात्। *यद्यद्रूपमिति* भागवारणाय वीप्सा, व्यापकत्वस्फोरकं वा तत्। प्रतिज्ञात्वादेर्भेदपञ्चकसामानाधिकरण्यादसम्भवः। तत्समानाधिकरणभेदोक्तावेकैकवर्णान्तर्भावेण भागभेदमादायातिव्याप्तिरतोऽवच्छेदकताद्वयनिवेशः। अत्र तावद्वर्णान्यतमत्वव्युदासः। भागवाक्यान्तरोभयभेदवारणाय प्रतियोगितावच्छेदकेति। धर्मवत्त्वं पर्याप्तिसम्बन्धेन। तेन भागे प्रतिज्ञात्वादिसत्त्वेऽपि नातिव्याप्तिः। *प्रतिज्ञात्वादीति* प्रतिज्ञात्वादिपञ्चकेत्यर्थः। तेन हेतुत्वादेः प्रतिज्ञादिनिष्ठभेदप्रितयोगितावच्छेदकत्वेऽपि न क्षतिः। प्रतिज्ञात्वादिसामानाधिकरण्योक्तावसम्भवः। भेदसामानाधिकरण्योक्तौ च प्रतिज्ञाहेतुसमुदायादावतिव्याप्तिरतोऽनुयोगितावच्छेदकता-

---

7. ननु प्रतिज्ञाद्यन्यमत्वमित्यारभ्यविशेषणीयत्वादित्यन्तर्गन्थः गदाधरीयावयवद्वितीयलक्षणे। ननु प्रतिज्ञाद्यन्यतमत्वमित्यारभ्यनिर्बीजत्वापातादित्यन्तस्थाने, केषुचित्कोशेषु पाठान्तरत्वेन दृश्यते, स च न व्याख्यात्रभिमत इति ध्येयम्।

In Public domain. Digitization: Muthulakshmi Research Academy

गिताक[8]भेदप्रतियोगितावच्छेदकं यद्यत्तदवच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वेनापि तादृशधर्मविशेषणे चातिगौरवम्, अतो लघुलक्षणान्तरमाह। **प्रतिज्ञाद्यघटकत्व इति**

---

द्वयनिवेशः। *यद्यदिति* तदवच्छिन्नप्रतियोगिताकभेदकूटनिवेशलाभाय, तेनैकावयवद्वयसमुदायत्वोपादानेऽपरावयवद्वयघटत्वादिकमादाय प्रतिज्ञाहेतुसमुदायादिसामान्ये वा नातिव्याप्तिः। प्रतियोगिताव-च्छेदकत्वं पर्याप्तिसम्बन्धेन निवेश्यम्। अन्यथाऽसम्भवापत्तेः। तादृशभेदप्रतियोगिप्रितियोगिकभेदनिवेशे तादृशभेदप्रितयोगिवृत्तिरूपवत्प्रतियोगिकभेदनिवेशे प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगिताव्यापकप्रतियोगिताकभेदानुयोगितावच्छेदकत्वोक्तौ वा प्रतिज्ञाहेत्वादिसमुदाये वाक्यान्तरोभयभेदमादायातिव्याप्तिः।

अथ प्रतिज्ञाहेतुसमुदायवारणार्थं भट्टाचार्योक्तगुरुतरदलप्रवेशमपेक्ष्य प्रतिज्ञात्वाद्यवच्छिन्नानु-योगिताकभेदप्रतियोगितावच्छेदकान्यत्वनिवेशनमेवोचितम्। न च तत्र प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदानुयोगितावच्छेदकत्वमेव कुतो नोक्तं नञ्पदानिवेशेन लाघवादिति वाच्यम्। तथा सति प्रतिज्ञा-त्वाद्यवच्छिन्नानुयोगिताकघटभेदमादाय प्रतिज्ञाहेतुसमुदायादावतिप्रसङ्गात्। भेदकूटनिवेशे चाति गौरवात्। भट्टाचार्यमते तद्दले प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकत्वावच्छिन्नावच्छेदकताकसामान्यभेदस्यैव मन्मतेऽपि तादृशावच्छेदकत्वावच्छिन्नप्रतियोगिताकभेदस्यैव निवेश्यतया प्रतिज्ञाहेतुसमुदायत्वादेस्तादृशघटभेदप्रतियोगितावच्छेदकान्यत्वेऽपि तादृशसामान्यधर्मावच्छिन्नान्यत्वाभावेन लाघवानपायात्। न चैवं प्रतिज्ञाद्यन्यतमत्वं परित्यज्यलाघवेन प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकान्यत्वमेव प्रवेश्यमिति वाच्यम्। प्रतिज्ञादिनिष्ठतावद्वर्णान्यतमत्ववारणाय व्यासज्यवृत्तित्वनिवेशेऽतिलाघवाभावादिति चेन्न। तस्यापि लक्षणान्तरत्वात्। यथासन्निविष्टार्थकस्य तदघटिततया वैयर्थ्याभावात्। लाघवादेव च प्रतिज्ञात्वाद्यन्यतमधर्मवत्त्वस्यैव ग्रन्थाकारसम्मतत्वात्। तस्य जनकतान्तां न तद्बोधजनकान्यतमपरं, किन्तु तद्बोधजनकत्वान्यतमवत्परमेवेति मूललभ्यत्वात्प्रतिज्ञाहेतुसमुदायवारकोक्तविशेषणानावश्यकत्वाच्च। एतेन प्रतिज्ञात्वाद्यवच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकीभूतो यो यो धर्मस्तदवच्छिन्नानुयोगिताकप्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकान्यभेदप्रतियोगितावच्छेदकत्वनिवेशेनैव प्रतिज्ञाहेतुसमुदायत्ववारणं सम्भवति। प्रतिज्ञात्वाद्यवच्छिन्नानुयोगितात्वे सति हेतुत्वाद्यवच्छिन्नानुयोगिताको यस्तदन्यत्वमन्यान्तार्थः। अन्यथा तादृशानुयोगिताकान्यत्वपञ्चकनिवेशेऽसम्भवः एकैकभेदनिवेशेऽतिव्याप्तिः। प्रतिज्ञाभेदादेः प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदा-

---

8. प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकप्रतियोगितावच्छेदकमिति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

नात्मकतया तादृशान्यतमत्वकूटनिवेशापत्तेः। न चाधिकरणभेदेनाभावभेदादेकदेशवृत्तेः प्रतिज्ञाहेतु-समुदायत्वावच्छिन्नभेदादेः प्रतिज्ञाद्यवच्छिन्नानुयोगिताकान्यतया तादृशभेदप्रतियोगितानवच्छेदक-त्वस्य प्रतिज्ञाहेतुसमुदायत्वादिसाधारणतया भेदे तद्विशेषणदानेऽपि भट्टाचार्योक्तदलस्यावश्यकतेति वाच्यम्। अधिकरणभेदेनाभावभेदानुपगमात्। अन्यथा ग्रन्थकृतः द्वितीयलक्षणव्याख्यानावसरे प्रतिज्ञादिभेदपञ्चकानुयेगितावच्छेदकान्यत्वनिवेशे प्रतिज्ञाघटकतावद्वर्णान्यतमत्ववारणाय व्यासज्य-वृत्तित्वनिवेशनं विरुध्येत। तादृशान्यतमत्वरूपभेदस्य प्रत्येकं भिन्नतया प्रतिज्ञादिभेदपञ्चकानुयेगिता-वच्छेदकतया तदन्यत्वाभावादेव वारणात्। तथा च भट्टाचार्याणां दलद्वयघटितगुरुतरारम्भो वृथैवेति पूर्वपक्षस्यानवकाश इति। अभावाधिकरणकाभावस्याधिकरणस्वरूपतया प्रतिज्ञात्वाद्यवच्छिन्नभेदस्य प्रतिज्ञाहेतुसमुदायभेदस्वरूपतया तदन्यत्वाभावादसम्भव इत्यप्याहुः। यत्तु अधिकरणभेदेनाभावभेदा-भ्युपगमेऽपि प्रतिज्ञात्वावच्छिन्नानुयोगिताकभेदानुयोगितावच्छेदकत्वस्वरूपमन्यतमत्वं सुवचमिति। तन्न। प्रतिज्ञानुयोगिकघटादिभेदे हेत्वाद्यनुयोगिकानां तेषामन्यतमतया तादृशावच्छेदकत्वान्यतमव-द्धर्मवत्त्वपर्यन्तविवक्षयोदक्षरतापातात्। परे तु प्रतिज्ञात्वाद्यवच्छिन्नभेदपञ्चकानुयोगितानवच्छेदकत्वे सति प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितानवच्छेदकत्वमेव साधीयः प्रदर्शितदलद्वयोपादा-नमपेक्ष्य लाघवात्।

अथ स्वान्यूनवृत्तिधर्मावच्छिन्नानुयोगिताकभेदानभ्युपगमेन तावद्वर्णवृत्यन्यतमत्वेऽतिव्याप्ति -रतो यथोक्तार्थकं विशेषणदलमिति चेन्न। एकत्वानवच्छिन्नपर्याप्तिसम्बन्धेन तादृशधर्मत्वस्यावयव-व्यवहारविषयतया तथाविधान्यतमत्वमेयत्वादिकमादाय तद्व्यवहारापादनासम्भवेन यथोक्तार्थक-विशेषणप्रवेशानुपगमात्। एतेनोत्तरलक्षणस्य लाघवेनैवावतरणीयतया गौरवसम्पादनार्थमेव यथोप-दर्शितदलद्वयस्यैव भेदकूटघटितस्योक्तिर्नयुक्ता यथा सन्निवेशोऽवैयर्थ्यादिति निरस्तमित्याहुः। इदन्तु बोध्यम्। प्रतिज्ञादिभेदपञ्चकानुयोगितानवच्छेदको व्यासज्यवृत्तिर्यः प्रतिज्ञात्वाश्रयतदनाश्रयादि-चतुष्टयावृत्तिर्योधर्मस्तद्वत्त्वरूपलक्षणे विशेष्यदलस्थाने प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगि-तानवच्छेदकत्वं प्रवेश्य लघुलक्षणं सम्भवति। इतोऽपि च प्रतिज्ञात्वाद्यन्यतमधर्मवत्त्वरूपं लघु-जनकान्तं न तद्बोधजनकान्यतमपरं किन्तु तत्तद्बोधजनकत्वान्यतमवत्परमिति मूललभ्यञ्च। तथापि लक्षणान्तरत्वाददोष इति। प्रतिज्ञात्वाद्यवच्छिन्नप्रतियोगिताकभेदपञ्चकान्यतमभेदप्रतियोगितावच्छेद-कतापर्याप्त्यधिकरणधर्मवत्त्वं प्रतिज्ञात्वाद्यन्यतमत्वम्। यदि चाभावाधिकरणकोऽभावोऽधिकरणस्वरूप इति तादृशभेदान्यतमनिष्ठपर्वतपदादिभेदप्रतिज्ञाहेतुसमुदायभेदस्याधिकरणरूपस्य प्रतियोगितावच्छे-दकपर्वतपदत्वमादायातिव्याप्तिः। तदा प्रतिज्ञात्वाद्यवच्छिन्ने प्रतियोगितान्यतमप्रतियोगितावच्छेदक-

In Public domain. Digitization Muthulakshmi Research Academy

अत्रापि न्यायान्तर्गतत्वे सतीत्यनुषज्यते। अतो न्यायवहिर्भूतवाक्यव्युदासः। प्रतिज्ञाद्येकदेश-वारणाय प्रतिज्ञाद्यघटकत्वनिवेशनम्। तदर्थश्च प्रतिज्ञादिघटकतानवच्छेदकधर्मवत्वम्। तेन प्रतिज्ञादिघटकतदेकदेशभेदस्य प्रतिज्ञात्वादिरूपव्यासज्यवृत्तिधर्मावच्छिन्नेऽनुपगमेऽपि न क्षतिः। प्रतिज्ञादिघटकतावच्छेदकत्वं च प्रतिज्ञात्वादिन्यूनवृत्तित्वम्। तच्च प्रतिज्ञात्वाद्यवच्छि-न्नभेदानुयोगितावच्छेदकत्वे सति प्रतिज्ञात्वादिसमानाधिकरणत्वम्। तथात्वञ्च तदेकदेशवृत्ति-पर्वतपदत्वादेः, तदवच्छिन्ने प्रतिज्ञात्वाद्यवच्छिन्नभेदसत्त्वान्नतु, प्रतिज्ञात्वादेः। हेतुत्वादेः प्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वात्तत्सङ्ग्रहाय विशेष्यदलम्। न च मिलितभेद-पञ्चकानुयोगितावच्छेदकभिन्नत्वनिवेशे हेतुत्वादेः हेतुत्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्व-विरहात्तादृशानुयोगितावच्छेदकभिन्नत्वमव्याहतमेवेति विशेष्यदलमनर्थकमेवेति वाच्यम्। धूमादालोकवान्पर्वतो वह्निमानित्यादिप्रतिज्ञाघटकधूमादित्यादिभागसाधारणस्य हेतुत्वस्य निवेशे तत्रातिप्रसङ्गभयेन मिलितभेदपञ्चकानुयोगितावच्छेदकत्वस्यैकत्र निवेशासम्भवात्।

---

धर्मवत्त्वं प्रतिज्ञात्वाद्यवच्छिन्नविषयतान्यतमविषयतावच्छेदकधर्मवत्त्वं वा निवेशनीयमित्यप्याहुः। तदेतत्सर्वमभिप्रेत्यातिगौरवमित्युक्तम्। ननु प्रतिज्ञादिघटकतावच्छेदकत्वमित्यस्य स्वावच्छिन्न-विषयिताशून्यप्रतीत्यवृत्तिस्वान्यप्रतिज्ञात्वादिपर्याप्त्यधिकरणनिरूपितविषयिताकत्वमित्यर्थो वाच्यः। स्वान्यत्वं प्रतिज्ञात्वादिवारणायेति तु न युक्तम्। स्वपदेन प्रतिज्ञाहेतुसमुदायत्वादेरप्युपादानसम्भवेनो-भयघटकेत्यादेर्वैयर्थ्यापातात्। न च स्वाश्रयाविषयकप्रतीत्यवृत्तिप्रमेयत्वादिवारणार्थं तदिति वाच्यम्। व्यासज्यवृत्तित्वेन तद्वारणात्। यत्किञ्चिदेकोभयावृत्तित्वेनापि तद्वारणाच्च। यत्तु। स्वावच्छिन्नविषयता-शून्यप्रतीतीत्यादिस्तदर्थः। तथा च तद्भिन्नप्रमेयत्वादिकमादाय भागेऽतिव्याप्तिः। न च न्यायान्तर्गत-त्वमिह न्यायत्वव्याप्यत्वमिति न दोष इति वाच्यम्। तथापि तत्तद्व्यक्तित्वाद्यवारणात्। न च प्रतिज्ञादि-घटकतावच्छेदकं यद्यद्रूपं प्रत्येकं तत्तदवच्छिन्नभेदकूटसमानाधिकरणन्यायत्वव्याप्यत्वं प्रथमदल-द्वयार्थः। प्रत्येकपदोपादानान्नभेदकूटाधिकरणाप्रसिद्धिः। (न्यायत्वव्याप्यत्वञ्च न्यायघटकतावच्छेदक-त्वम्)। धर्मश्च न्यायघटकतावच्छेदकत्वेन विशेषणीयः। तेन न प्रतिज्ञादिघटकवर्णद्वयवृत्तिद्वित्वादि-सङ्ग्रहप्रसङ्ग इति वाच्यम्। उभय घटकेत्यादिविशेषणवैयर्थ्यापातात्। प्रतिज्ञाहेतुसमुदायत्वादेर्न्याय-घटकतानवच्छेदकत्वादिति। तत्प्रामाणिकम्। समुदायत्वरूपपर्वतपदत्वादेर्द्वित्वादिवत्स्वपदेनोपादाना-सम्भवात्। तस्य न्यायघटकतावच्छेदकत्वाभावेनापि व्युदाससम्भवात्। प्रतिज्ञाघटकत्ववैयर्थ्याच्च। यद -प्युभयघटकेत्यादेस्साफल्यायं स्वपर्याप्त्यधिकरणेत्याद्यर्थवर्णनम्। तदप्युदासीनवर्णप्रतिज्ञाघटकभागो

In Public domain. Digitization Muthulakshmi Research Academy

वस्तुतस्तु तद्व्यावृत्तपूर्वोपदर्शितहेतुत्वनिवेशेनैव तादृशभागवारणसम्भवान्मिलितभेदपञ्चकानुयोगितावच्छेदकभिन्नत्वस्यैव निवेशनीयतया नोपादेयमेव विशेष्यदलम्। मिलितभेदपञ्चकानुयोगितावच्छेदकत्वस्य प्रतिज्ञादिघटकतावच्छेदकत्वानात्मकत्वे विशेष्यदले उभयाघटितत्वनिवेशेनैवोपपत्त्या तद्घटकभागद्वयाघटितत्वपर्यन्तनिवेशवैयर्थ्यात्। प्रतिज्ञादिघटकभागद्वयघटितवृत्तिसमुदायत्वस्य प्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वेन प्रतिज्ञाघटकतानवच्छेदकत्वदलेनैव वारणसम्भवात्। मिलितभेदपञ्चकानुयोगितावच्छेदकत्वस्य प्रतिज्ञादिघटकतावच्छेदकत्वे[9] तु प्रतिज्ञात्वपर्याप्त्यधिकरणहेत्वेकदेशहेतुत्वपर्याप्त्यधिकरणप्रतिज्ञैकदेशवृत्तिसमुदायत्वस्य प्रतिज्ञात्वहेतुत्वाद्यवच्छिन्नभेदानुयोगितानवच्छेदकतया तत्समुदायत्वमादायातिप्रसङ्गस्य वारणाय भागद्वयपर्यन्तनिवेशसार्थक्यात्। न चैकप्रतिज्ञात्वव्यक्तेरपरप्रतिज्ञात्वव्यक्त्यवच्छिन्नभेदानुयोगितावच्छेदकतया प्रतिज्ञादिघटकतावच्छेदकत्वं

---

-भयत्वमादाय न्यायान्तर्गतभागेऽतिव्याप्तम्। न्यायत्वव्याप्यत्वादेर्दूषितत्वादित्यत आह। *प्रतिज्ञादीति* *एकत्रेति* प्रतिज्ञात्वावच्छिन्नभेदानुयोगितावच्छेदकत्वे सति प्रतिज्ञात्वसमानाधिकरणं यत्तद्भिन्नत्वे सति हेतुत्वावच्छिन्नभेदानुयोगितावच्छेदकत्वे सति हेतुत्वं समानाधिकरणं यत्तद्भिन्नत्वे सतीत्यादिरित्योदाहरणोपनयनिगमनघटकतावच्छेदके निरुच्य तद्भिन्नो यः प्रतिज्ञात्वादिरूपो धर्मस्तद्वत्त्वं प्रतिज्ञाद्यघटकत्वं बोध्यम्। निरुक्तप्रतिज्ञात्वन्यूनवृत्तित्वाद्यन्यतमावच्छिन्नैकभेदनिवेशोऽपि सम्भवति। पूर्वकल्पपरित्यागबीजं कल्पयति। *मिलितभेदेति* प्रतिज्ञाभेदस्य पर्वतपदेऽव्याप्यवृत्त्यनुयोगिताया हेत्वादौ व्याप्यवृत्त्यनुयोगितायाश्चावच्छेदकतया एकजातीयेत्याशयेनेदम्। अन्यथा तु प्रतिज्ञात्वाद्यवच्छिन्नभेदप्रतियोगितानिरूपितविलक्षणावच्छेदकत्वान्यतमवद्भेद एव मिलितभेदपञ्चकसामानाधिकरण्योक्तावसम्भव इत्यतोऽवच्छेदकतानिवेशः। *उपपत्त्येति* यद्यपि भागपदमुभयाघटितत्वे पर्याप्तेर्निष्फलत्वार्थमित्यग्रे वक्तव्यं तत्र तत्सार्थक्यचर्चा युज्यते तथाप्यर्थविशेषसूचकता तस्यानवद्यैवेति। *प्रतिज्ञादीति* प्रतिज्ञाहेत्वेकदेशसमुदायत्वस्य हेतुत्वावच्छिन्नभेदानुयोगितावच्छेदकत्वे सति हेतुत्वसमानाधिकरणतया प्रतिज्ञैकदेशहेतूभयसमुदायत्वस्य प्रतिज्ञात्वावच्छिन्नभेदानुयोगितावच्छेदकत्वे सति प्रतिज्ञात्वसमानाधिकरणतया च तद्वद्भेदासत्त्वे नैव वारणादिति भावः। इदन्तु बोध्यम्। पर्वतो धूमाद्वह्निमान् धूमादित्यादौ प्रतिज्ञाहेत्वेकदेशसमुदायत्वे हेत्वेकदेशोदाहरणसमुदायत्वे च भागसाधारणहेतुत्वावच्छिन्नभेदानुयोगितावच्छेदकत्वाभावेन तद्वत्यतिव्याप्तिरिति पूर्वकल्पेऽपि

---

9. आत्मकत्वे इति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

दुर्वारमेवेति वाच्यम्। स्वसमानाधिकरणप्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वस्यैवानु-गतरूपावच्छिन्नप्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वस्य वा विशेषणीयत्वात्। घटकतानवच्छेदकधर्मश्च व्यासज्यवृत्तित्वेन विशेषणीयः, तेन प्रतिज्ञादिघटकवर्णान्यतमत्व-मादाय न तदेकदेशातिव्याप्तिः। केचित्तु प्रतिज्ञादिघटकतावच्छेदत्वं स्वाश्रयाविषयकप्रतीत्य-विषयप्रतिज्ञादिकत्वे सति प्रतिज्ञाद्यविषयकप्रतीतिविषयतावच्छेदकत्वम्। सत्यन्तमनिवेश्य

---

प्रतिज्ञाहेत्वोर्हेतूदाहरणयोश्च घटकभागद्वयाघटितत्वपर्यन्तं सार्थकमुदाहरणोपनययोरुपनयनिगमनयोः च घटकभागद्वयाघटितत्वशरीरे तद्वैयर्थ्येऽपि न क्षतिः। अक्षरलाघवानुरोधेन दीधितिकृता तथोक्ते-रिति। प्रसिद्धस्थलाभिप्रायेण वा भागपर्यन्तसार्थक्यप्रकारः प्रदर्शित इति। ***स्वसमानाधिकरणेति*** स्वमनुयोगितावच्छेदकम्। ननु स्वसमानाधिकरणप्रतिज्ञात्वावच्छिन्नभेदनिवेशेन प्रतिज्ञादावव्याप्ति-वारणे उक्तरीत्यैकहेतुत्वव्यक्तेरपरहेतुत्वव्यक्तित्वावच्छिन्नभेदानुयोगितावच्छेदकत्वेन दोष इति स्व-समानाधिकरणत्वस्य निवेशनीयतया सामानाधिकरण्यनिवेशेन पूर्वकल्पादविशेष इति भागद्वयपर्यन्त-निवेशवैयर्थ्यमिति चेन्न। स्वसमानाधिकरणप्रतिज्ञात्वावच्छिन्नभेदशुद्धहेतुत्वादिधर्मावच्छिन्नभेदचतुष्ट-यैतत्पञ्चकं स्वसमानाधिकरणहेतुत्वावच्छिन्नभेदशुद्धप्रतिज्ञात्वाद्यवच्छिन्नभेदचतुष्कैतत्पञ्चकमेवंरीत्यो-दाहरणादिभेदादिकं निवेश्य पञ्चपञ्चघटितकूटपञ्चकानुयोगितावच्छेदकत्वस्य मिलितभेदपञ्चकानुयो-गितावच्छेदकेत्यनेन विवक्षिणीयतया भागद्वयपर्यन्तसार्थक्यसम्भवात्। अत्र तथाविधपञ्चविंशतिभेदा-नुयोगितावच्छेदकान्यत्वस्य न प्रवेशः प्रतियोग्यप्रसिद्धेः। किन्तु एकैकपञ्चघटितकूटानुयोगितावच्छेद-कत्ववदन्यत्वपञ्चकस्य तादृशावच्छेदकत्वान्यतमवदन्यत्वस्यैवेत्यवधेयम्। अथवा स्वसमानाधिकरण-न्यायत्वसमानाधिकरणप्रतिज्ञात्वावच्छिन्नभेदपञ्चकानुयोगितावच्छेदकत्वस्य तेन विवक्षासम्भवात्तत्सा-र्थक्यम्। वस्तुतस्तु यत्किञ्चिदनुगतरूपविशिष्टप्रतिज्ञात्वाद्यवच्छिन्नभेदकूटानुयोगितावच्छेदकत्वस्यै-तत्प्रतिज्ञाहेतूभयसमुदायत्वादेः प्रतिज्ञाहेत्वन्तरावृत्तितयाऽतिव्याप्तिरतो यादृशप्रतिज्ञादिभेदपञ्चकानु-योगितानवच्छेदकत्वं तादृशप्रतिज्ञातादृशहेतूभयावृत्तित्वस्य वा विवक्षणीयतयाशङ्काया एवासङ्गतेस्त-त्सार्थक्यमिति। ***न तदेकदेशेति*** व्यासज्यवृत्तिधर्माधिकरणतानवच्छेदकस्य न्यूनवृत्तेरेव धर्मस्य तद-वच्छिन्नभेदानुयोगितावच्छेदकत्वम्। अन्यथा एको न द्वाविति तदुभयान्यतरो न द्वाविति प्रतीत्यापत्तिरि-त्यतिप्रसङ्गो नेत्यर्थः। व्यासज्यवृत्तित्वं न्यायान्तर्गतत्वं च वक्ष्यमाण केचित्तु मतेऽपि निवेश्यम्। अत्र सत्यन्तमनिवेश्य विशेष्यमात्रनिवेशेऽसम्भवो वाच्यः। स च विशेष्यदलस्य प्रतिज्ञादिपञ्चकविषयकत्वा-भावकूटवत्प्रतीतिविषयतावच्छेदकत्वेन सम्भवति पर्वतपदत्वादेरेव प्रतिज्ञादिपञ्चकविषयकत्वाभावकूट

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिज्ञादिविषयकत्वाभावकूटवत्प्रतीतिविषयतावच्छेदकत्वनिवेशे धूमाद्वह्निमतस्सधर्मा पर्वतो वह्निमान् धूमादित्यादिन्यायान्तर्गतप्रतिज्ञैकदेशे धूमादित्यादिभागेऽतिव्याप्तिः। तत्र प्रकृतहेतुतावच्छेदकावच्छिन्न[10]विशिष्टहेतुत्वप्रतिपादकत्वरूपहेतुत्वसत्वेन तत्प्रतीतेर्हेत्वविषयकत्वघटिताभावकूटवत्त्वाभावात्, अतः प्रतिज्ञाद्यविषयकप्रतीतिविषयतावच्छेदकत्वहेत्वविषयकप्रतीति -विषयतावच्छेदकत्वाद्यवच्छिन्नभेदकूटवद्धर्मवत्त्वमेव प्रतिज्ञाद्यघटकत्वमित्यनेन विवक्षणीयम् । तथा चासम्भववारणाय सत्यन्तमवच्छेदकविशेषणं, प्रतिज्ञाद्येकदेशाविषयकप्रतीतिविषयत्वस्य प्रतिज्ञात्वाद्याश्रयतदेकदेशान्तरे सत्वेन तदाश्रयसमुदायस्य तादृशप्रतीत्यविषयत्वासम्भवेऽपि प्रतिज्ञात्वाद्याश्रयतत्तदेकदेशस्य तत्तदेकदेशाविषयकप्रतीत्यविषयतयैव तत्तदेकदेशवृत्तिधर्मे सत्यन्तनिर्वाहः प्रतिज्ञादिपदस्य पर्याप्त्यतिरिक्तस्वरूपसम्बन्धेन प्रतिज्ञात्वाद्याश्रयपरत्वात्। सत्यन्तस्थस्वपदेन प्रतिज्ञात्वादेरव्युपादातुं शक्यतया असम्भव इति विशेष्यदलम्। तच्च प्रतिज्ञाद्येकदेशमात्रवृत्तिपर्वतपदत्वादेरेव, तदाश्रयमात्रविषयकप्रतीतेस्तत्समुदाय -रूपप्रतिज्ञाद्यविषयकत्वस्याव्याहतत्वात्। न तु प्रतिज्ञात्वादेरेकदेशमात्रविषयकप्रतीतिविषयतायामतिप्रसक्तस्य तस्यावच्छेदकत्वासम्भवात्। न चैकदेशमात्रविषयिकाया अपि

-वत्प्रतीतिविषयितावच्छेदकत्वेन तद्भिन्नत्वस्य प्रतिज्ञात्वादावक्षतत्वादित्यालोच्यान्यादृशार्थकविशेष्यदलनिवेशासम्भवं वक्तुं प्रथमत एतादृशार्थनिराकरणायातिव्याप्तिमाह। ***सत्यन्तमिति*** ***प्रतिज्ञादीति*** प्रतिज्ञात्वादिपर्याप्त्यधिकरणविषयकेत्यर्थः। तेन भागेनातिव्याप्तिः। पूर्वोक्तहेतुत्वनिवेशे सत्यन्त -वैयर्थ्यादाह। ***प्रकृतेति*** ***असम्भवेति*** प्रतिज्ञात्वादेर्हेत्वाद्यविषयकप्रतीतिविषयतावच्छेदकत्वादिति भावः। ***सत्यन्तमिति*** तथा च स्वाश्रयाविषयकप्रतीत्यविषयप्रतिज्ञाकत्वे सति प्रतिज्ञाविषयकप्रतीति -विषयतावच्छेदकं यद्यत्तद्भेदकूटवत्त्वेसतीत्यादिक्रमेण भेदकूटं निवेश्यमिति भावः। ***अतिप्रसक्तस्येति*** अग्रेऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्यानुपदमेव ग्रन्थकारेणैव विवक्षणीयातिप्रसक्तेनातिरिक्तावृत्तित्वरूपावच्छेदकत्वं सम्भवतीत्याशयः। तेनातिप्रसक्तस्यापि स्वरूपसम्वन्धरूपावच्छेदकत्वे वाधकाभावादिदमसङ्गतमिति न शङ्क्यम्। यत्तु अतिप्रसक्तस्येत्यस्यातिप्रसक्तत्वेन भानस्येत्यर्थात्स्वरूप -सम्वन्धरूपावच्छेदकत्वमेव निराकृतमित्याशयवर्णनमिति। तत्तुच्छम्। तथा सत्यग्रे पारिभाषिकावच्छेदकत्वनिवेशे सन्दर्भविरोधात्। स्वाश्रयाविषयकप्रतीत्यविषयतादृशप्रतिज्ञात्वाश्रये तादृशप्रतिज्ञात्वाश्रयवर्णसमुदायाविषयकेति। अथात्र पर्वतपदत्वस्य निरुक्तघटकतावच्छेदकत्वं दुर्घटं स्वपदेन पर्वत -पदत्वादेरादानेन तदाश्रयाविषयणी या वह्निमानिति प्रतीतिस्तादृशप्रतीत्यविषयता च पर्वतपदाद्यात्म-

10. हेतुरिति पाठभेदः

In Public domain. Digitization Muthulakshmi Research Academy


प्रतीतेः प्रतिज्ञात्वाद्याश्रयाविषयात्वासम्भवेन तदाश्रयसमुदायाविषयकत्वविवक्षणे एकैक-प्रतिज्ञादिविषयिकाया अपि प्रतीतेः प्रतिज्ञात्वाद्याश्रयापरव्यक्त्यविषयकत्वेन तदाश्रयसमुदाया-विषयकतया एकैकप्रतिज्ञादिव्यक्तिपर्याप्तप्रतिज्ञात्वादिकं तादृशप्रतीतिविषयतावच्छेदकत्वमेव तदनतिप्रसक्तत्वादिति वाच्यम्। स्वाश्रयाविषयकप्रतीत्यविषयता यादृशप्रतिज्ञात्वाद्याश्रये तादृशप्रतिज्ञात्वाद्याश्रयवर्णसमुदायाविषयकप्रतीतिविषयतावच्छेदकत्वविवक्षया प्रतिज्ञादि-विषयकसकलप्रत्ययानामेव तादृशसमुदायविषयकत्वेनादोषात्। अवच्छेदकत्वं चेहानतिरिक्त-वृत्तित्वरूपमेव, न तु स्वरूपसम्बन्धविशेषः, तेन प्रतिज्ञात्वादिना तदेकदेशमात्रविषयकज्ञान-विषयतायां प्रतिज्ञात्वादेस्तथाविधावच्छेदकत्वसत्त्वेऽपि न क्षतिः। तथाविधयत्किञ्चिदेकज्ञान-विषयतात्वावच्छिन्नानतिरिक्तवृत्तित्वमिह निवेशनीयं, तेन प्रतिज्ञादिघटकेषु सकलवर्णेष्वेव

---

कप्रतिज्ञात्वाश्रय एव तादृशप्रतिज्ञात्वाश्रय समुदायश्च पर्वत इति समुदाय एव तदविषयकप्रतीति-विषयतावच्छेदकत्वञ्च न पर्वतपदत्वस्येति चेन्न। स्वाश्रयाविषयकप्रतीत्यविषयता यादृशप्रतिज्ञात्वा-श्रयवर्णसमुदायत्वाश्रये तादृशप्रतिज्ञात्वाश्रयवर्णसमुदायत्वावच्छिन्नविषयकप्रतीतिविषयतावच्छेदक-त्वं प्रतिज्ञाघटकतावच्छेदकत्वमिति निष्कर्षः। वस्तुतस्तु प्रतिज्ञात्वस्य समुदायत्वरूपतया यादृश-त्वस्य प्रतिज्ञात्वविशेषणतया यत्प्रतिज्ञात्वाश्रये स्वाश्रयाविषयकप्रतीत्यविषयता तादृशप्रतिज्ञात्वपर्या-प्त्यधिकरणाविषयकत्वेत्यादिक्रमेण निवेशादयं पूर्वपक्ष एव नावतरतीति। स्वाश्रयाविषयकप्रतीति-विषयत्वाभावसमानाधिकरणप्रतिज्ञात्वपर्याप्त्यधिकरणाविषयकेत्यादिरीत्याऽर्थे प्रतिज्ञात्वाभेदोऽपि न विवक्षणीय इति तु बोध्यम्। यत्त्वेकदेशस्य पर्याप्त्यनधिकरणत्वे तद्घटितसमुदायस्य तदधिकरणत्वं दुर्घटमित्यतिव्याप्तिरतः प्रतिज्ञात्वव्यापकविषयताकान्यत्वमर्थो वाच्यः। तत्रैव चालिनीन्यायेन तत्त-त्प्रतिज्ञाविषयतानां प्रतिज्ञात्वव्यापकता न सम्भवतीत्याशङ्क्य स्वविषयताननतिरिक्तवृत्तिप्रतिज्ञात्व-कान्यत्वमविषयकान्तार्थ इति समाधानम्। तत्तुच्छम्। प्रतिज्ञात्वत्वसामानाधिकरण्येनानतिरिक्त-वृत्तित्वनिवेशमपेक्ष्य विषयतासम्बन्धेन यत्किञ्चित्प्रतिज्ञानिष्ठभेदप्रतियोगितानवच्छेदिकाः या याः प्रतीतयस्तत्तद्भेदकूटवत्त्वमेवान्यत्वान्तार्थः। तच्च विषयताभेदेऽपि न दुर्घटं प्रतिज्ञात्वस्य यत्किञ्चित्त्व-घटितत्वाच्च न यत्किञ्चित्त्वनिवेशप्रसङ्गः। प्रतिज्ञात्वपर्याप्त्यधिकरणपर्याप्तविषयताकेत्यर्थोद्वा न प्रत्येकमपि पर्याप्तिनिबन्धनदोषः, एकदेशत्वानवच्छिन्नपर्याप्त्युपादानान्योभयघटकेत्यस्य वैयर्थ्यमिति। वस्तुतस्तु पर्याप्तिसम्बन्धेन यदनुगतरूपोपलक्षितप्रतिज्ञात्वादिविशिष्टं विषयतासम्बन्धेन तद्भेद एव निवेश्यते तेन घटमात्रप्रतीतौ घटपटोभयवद्भेदस्येव भागमात्रप्रतीतौ तादृशप्रतिज्ञात्वविशिष्टवद्भेदो

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिज्ञाद्यविषयकप्रतीतिविषयत्वसत्त्वेन तादृशविषयतासामान्यशून्याप्रसिद्धावपि स्वव्यापक-तादृशविषयतात्वावच्छिन्नकत्वस्य प्रतिज्ञात्वादिसाधारणत्वेऽपि च न क्षतिरिति वदन्ति।

अव्याहत एवेति नोक्तदोषः। न वा यत्किञ्चित्प्रतिज्ञात्वपर्याप्त्यधिकरणाविषयकप्रतीतिविषयतावच्छेद-कत्वस्य प्रतिज्ञात्वादौ सत्त्वेऽप्यसम्भवः। अनुगतरूपवत्त्वे च जनकतावच्छेदकयत्किञ्चिज्ज्ञानीय-विषयताश्रयवर्णत्वव्यापकतासम्बन्धसाध्यशाब्दवत्त्वात् वस्तुतस्तु लाघवात्पक्षे साध्यवैशिष्ट्यावगाहि-शाब्दत्वावच्छिन्नजनकतावच्छेदकविषयताशून्ययत्किञ्चत्प्रतीत्यादिरर्थः। एवञ्च यादृशप्रतिज्ञात्वाश्रये-त्यादिविवक्षणमपि न कार्यम्। तादृशविषयितासामान्यशून्यत्वस्यैकदेशप्रतीतावेव सत्त्वात्। एतेन प्रतिज्ञात्वाद्यवच्छिन्नविषयताशून्यप्रतीतिविषयतावच्छेदकत्वं कुतो नोक्तम्। अवच्छेदकताद्वयं स्वरूप, सम्बन्धविशेषः। न चानुगतरूपविशिष्टप्रतिज्ञात्वाद्यवच्छिन्नविषयताशून्यत्वस्य निरवच्छिन्नप्रतिज्ञा-त्वावच्छिन्नविषयताशून्यत्वस्य वा निवेशे प्रतिज्ञात्वादेरपि तादृशप्रतीतिविषयतावच्छेदकमेवेति वाच्यम्। प्रतिज्ञात्वावच्छिन्नविषयतासामान्यशून्यत्वस्य निवेशादित्यपि समाहितम्। उभयघटके-त्यादिविशेषणवैयर्थ्यात्। प्रतिज्ञाहेतुसमुदायत्वादेः समुदायत्वविशेषात्मकप्रतिज्ञात्वाद्यवच्छिन्ना-विषयकप्रतीतिविषयतावच्छेदकत्वेनैव वारणात्। न चानुपूर्वीरूपेण प्रतिज्ञाहेतुसमुदायप्रतीतेः समुदाय-त्वात्मकप्रतिज्ञात्वपर्याप्त्यधिकरणविषयकत्वेऽपि घटकभागनिवेशनं व्यर्थम्। प्रतिज्ञैकदेशहेतुसमुदाय-प्रतीतेः प्रतिज्ञात्वपर्यप्त्यधिकरणविषयकत्वादिति वाच्यम्। तथापि विशेषणस्यावश्यकत्वात्। प्रतिज्ञा-त्वहेतुत्वपर्याप्त्यधिकरणोभयावृत्तित्वमात्रेण प्रतिज्ञाहेतुसमुदायत्ववारणसम्भवेऽपि तत्र पर्याप्त्यनुधाव-नस्य निष्प्रयोजनकतासूचनार्थं घटकभागोपादानात्। तत्तद्भागत्वे यत्किञ्चिद्विषयतानतिरेकवृत्तित्वा-भावादतिव्याप्तिरतो विषयतात्वेति। *अप्रसिद्धावपीति* प्रतिज्ञाघटकवर्णेषु प्रतिज्ञाद्यविषयकप्रतीति-विषयत्वोपपादनेन तद्भिन्नपदार्थमात्रे तत्सत्त्वेन च जगन्मात्रस्य तथात्वात्। *स्वेति* स्वव्यापकता-वच्छेदकतादृशविषयताकत्वमर्थः। अत्र वदन्ति। प्रत्येकं प्रतिज्ञात्वादिपर्याप्त्यधिकरणाविषयकत्वं पृथक्प्रतीतौ न निवेश्यते भागनिवेशवैयर्थ्यात्। किन्तु प्रतिज्ञात्वपर्याप्त्यधिकरणविषयकत्वाभावकूटव-त्त्वमेव। एवञ्च तथाविधकूटविशिष्टप्रतीतिविषयतावच्छेदकत्वमेवार्थः। एवञ्च प्रतिज्ञैकदेशहेत्वादि-समुदायादिवारणाय भागनिवेशनं सार्थकम्। अथैवं प्रतिज्ञादिघटकतावच्छेदकत्वस्य हेतुत्वादि-साधारण्यवारणायोपात्तस्वाश्रयाविषयकप्रतीत्यविषयप्रतिज्ञादिकत्वप्रतिज्ञात्वाश्रयवृत्तित्वं वा विशेषणं व्यर्थं हेतुत्वादेर्हेतुत्वादिविषयकत्वाभावकूटवत्प्रतीतिविषयतानवच्छेदकत्वेनैव वारणादिति चेत्। परित्याज्यमेव हि तत्। परन्तु धूमादालोकवानित्यादौ प्रतिज्ञाघटकधूमादिति भागेऽतिव्याप्तिस्तत्प्रती-तेर्हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वप्रतिपादकत्वरूपन्यायावयवत्वाद्यघटितहेतुत्वविषयकत्वेन तद

In Public domain. Digitization Muthulakshmi Research Academy

तदसत्। एतदपेक्षयोक्तप्रतिज्ञाद्यन्यतमत्वस्यैव लाघवात्तत्रानिर्भरस्य निर्वीजतापातात्। एतेन प्रतिज्ञाघटकतावच्छेदकत्वं स्वसमानाधिकरणस्वानधिकरणवृत्तिप्रतिज्ञात्वादिकत्वमित्यपि हेयम्। स्वत्त्वाननुगमेन तादृशं स्वं यद्यद्विशिष्य तावतामनन्तभेदानां निवेशनीयतया महागौरवात्।

---

-भावघटितकूटवत्त्वाभावादतस्तद्यावृत्तं पूर्वोपदर्शितहेतुत्वमेव निवेश्यमितिकृतं पल्लवितेनेति। *एतदिति* प्रतिज्ञाद्यघटकत्वेत्यर्थः। प्रतिज्ञाघटकतावच्छेदकानां सत्यन्तार्थविशेषितप्रतिज्ञाऽविषयक प्रतीतिविषयितावच्छेदकत्वेन निवेशमपेक्ष्य तदविशेषितप्रतिज्ञाभेदानुयोगितावच्छेदकत्वेन निवेशे लाघवम्। एवं हेत्वादिघटकतावच्छेदकानां स्वातन्त्र्येणैकैकसत्यन्तार्थविशेषितहेत्वाद्यविषयकप्रतीतिविषयितावच्छेदकत्वेन निवेशमपेक्ष्य तत्रैव प्रतिज्ञाभेदवति हेत्वादिभेदवत्त्वं निवेश्यमित्यतिलाघवम्। न च प्रतिज्ञाभिन्नं यद्धेत्वादिभिन्नं तदन्यत्वोक्तौ एकदेशवारणं नास्तीत्युक्तमिति वाच्यम्। प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकान्यत्वस्य वाच्यत्वात्। प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकं यद्यत्तदवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकत्वोक्तावपि लाघवानपायात्। एवं चोभयघटकभागद्वयाघटितत्वविशेषणेन प्रतिज्ञाहेतुसुमादयादेर्वारणान्नाभासोक्तगुरुतरविशेषणान्तरप्रवेश इति भावः। *गौरवादिति* ननु मिलितभेदपञ्चकानुयोगितावच्छेदकं यद्यत्तत्तद्भिन्नत्वमित्यादिना भेदकूटनिवेशस्य सिद्धान्तकल्पेऽपि दुर्वारत्वात्तुल्यमिति चेन्न। प्रतिज्ञाघटकभागधूमादिति हेत्ववयवोदाहरणघटकभागैतत्त्रितयादिवृत्तिसमुदायत्वादेस्स्वसमानाधिकरणस्वानधिकरणवृत्तिप्रतिज्ञात्वादिकत्वसत्त्वेन तद्भेदस्यैतन्मते निवेशनीयतयागौरवम्। भट्टाचार्यमते तत्समुदायत्वस्य मिलितभेदपञ्चकानुयोगितावच्छेदकत्वाभावेन तद्भेदस्यानिवेशादिति गौरवस्य न तुल्यता। न चैतेनेत्यादिमते भागद्वयेत्यस्य वैयर्थ्यभिया स्वसमानाधिकरणत्वस्थाने स्वव्यापकाधिकरणताकत्वस्यावश्यं निवेशनीयतयोक्तसमुदायत्वस्य स्वपदेन दुर्धरतेति तद्भेदनिवेशे न गौरवं तुल्यमिति वाच्यम्। प्रयोजनान्तराभावेन तथा विवक्षितुमशक्यत्वात्। भागद्वयस्य तर्हि वैयर्थ्यमिति चेत्, एतन्मते तदपि दूषणमस्तु। वस्तुतस्तु भट्टाचार्यमतेऽपि भागद्वयस्य विशिष्य निवेशो नास्तीत्यग्रे व्यक्तम्। उभयावृत्तित्वार्थकताया एवाग्रे करणाद्येन तत्सार्थक्याय स्वव्यापकाधिकरणताकत्वविवक्षणं स्यादिति भावः। यत्तु एतेनेत्यादिमते उभयावृत्तित्वस्य कथं सार्थक्यम्। प्रतिज्ञाहेतूभयसमुदायत्वादेरपि स्वसमानाधिकरणस्वानधिकरणवृत्तिप्रतिज्ञात्वादिकत्वेन प्रतिज्ञादिघटकतावच्छेदकत्वात्। एवञ्च समानानुपूर्वीकप्रतिज्ञासामान्यं तादृशहेतुसान्योभयादिसमुदायेऽपि नातिव्याप्तेः। स्वाधिकरणवृत्तित्वस्वाधिकरणावृत्तिसमानानुपूर्वीकप्रतिज्ञासामान्यतादृशहेतुसामान्योभयवृत्तिभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन प्रतिज्ञात्वादिमद्भिन्न इति। तन्न। दर्शितनिरुक्तौ

In Public domain. Digitization Mutt Research Academy

प्रतिज्ञाहेत्वादिसमुदायवारणाय **उभयेत्यादि** उभयघटकभागद्वयावृत्तिधर्मवत्त्वार्थकम्। तथा च प्रतिज्ञादिघटकतानवच्छेदकत्वे सति, उभयघटकभागद्वयावृत्तिर्यो धर्मस्तद्वत्त्वं दलद्वयार्थः प्रतिज्ञाद्येकैकावयवघटकभागद्वयस्यापि यत्किञ्चिदुभयघटकत्वादसम्भव इत्यतः प्रतिज्ञाहेत्वाद्युभयचतुष्टयस्य विशेष्योभयपदार्थतामाह। **उभयञ्चेति** इति विशिष्यवक्तव्यमित्यग्रिमेणान्वयः। **इति** इतिरीत्या प्रतिज्ञाहेत्वाद्योरपि प्रतिज्ञाहेतूभयत्वादिना न घटकत्वांशे विशेषणतातादृशोभयघटकभागाप्रसिद्धेः किन्तु प्रत्येकं प्रतिज्ञात्वहेतुत्वादिना। तथा च प्रतिज्ञाघटको यो भागः यश्च हेतुघटकः तदुभयाघटितत्वमिति क्रमेणाघटितत्वञ्चतुष्टयं निवेशनीयम्। प्रतिज्ञाहेत्वाद्येकदेशघटितसमुदायवारणाय घटकभागनिवेशनम्। प्रतिज्ञादिघटकत्वं चैकदेशसाधारणं प्रतिज्ञात्वाद्याश्रयत्वं तथा च प्रतिज्ञात्वाश्रयहेतुत्वाश्रयोभयावृत्तित्वादिरूपविशेषणचतुष्टयं धर्मविशेषणं पर्यवसितम्। न चैवं धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमान् धूमादित्यादिन्यायघटकप्रतिज्ञायामव्याप्तिः, तस्य हेतुलक्षणाक्रान्तभागघटितत्वात्तद्व्यावृत्तस्य पूर्वोपदर्शितहेतुत्वस्य निवेशोऽपि निगमनेऽयं पदानुषङ्गपक्षे

---

स्वानधिकरणेत्यत्र पर्याप्तिप्रवेशे स्वपदेन प्रतिज्ञात्वादेरप्युपादानप्रसङ्गेनासम्भव इति। तदनिवेशे तत्सार्थक्यात्। तादृशपरम्परायास्सम्बन्धत्वाभावाददोष इति चेत्। तदात्वनिवेशादनन्तानुगतरूपविशिष्टप्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकान्यत्वमेव लघीय इत्यत्र तात्पर्यम्। (केचित्तु स्वाधिकरणवृत्तित्वस्वाधिकरणभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन प्रतिज्ञात्वादिमद्भिन्नत्वस्यैक एव भेद इति चेत्तदानुगतरूपविशिष्टप्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकान्यत्वमेव लघीय इत्याहुः) । ननु भागद्वयाघटितत्वं भागद्वयाविषयकप्रतीतिविषयत्वं प्रतिज्ञादेः प्रतीतिमादाय प्रतिज्ञाहेतुसमुदायादावपीति तादृशयत्किञ्चित्प्रतीतिविषयपर्याप्तधर्मवत्त्वं वाच्यं तच्च गुर्वित्यत आह। *भागद्वयावृत्तीति* प्रमेयत्वादिकञ्च न प्रतीतिभेदपञ्चकानुयोगितावच्छेदकं प्रतियोग्यवृत्तेरेवानुयोगितावच्छेदकत्वादिति तद्वत्युभयघटकभागद्वयावृत्तिपर्वतपदत्वमादायैकदेशेऽतिव्याप्तिर्मिलितभेदपञ्चकानुयोगितावच्छेदकव्यासज्यवृत्तिधर्मनिवेशे द्वेधा धर्मनिवेशापत्तिरत एकधर्मं विवक्षति। *तथाचेति* उक्तसमुदायादेः प्रतिज्ञात्वहेतुत्वान्यतरधर्मवत्त्वादाह। *यो धर्म इति* वक्ष्यमाणाघटितत्वचतुष्टय लाभायाह। *इति रीत्येति* *घटकत्वांशे* आश्रयत्वांशे अवयवद्वयैकदेशसमुदायस्य प्रतिज्ञाद्यघटकत्वेनैव वारणादाह। *प्रतिज्ञेति* *एकदेशेति* प्रतिज्ञाहेतूभयघटकत्वं प्रतिज्ञात्वावच्छिन्नभेदानुयोगित्वे सति हेतुत्वावच्छिन्नभेदानुयोगित्वं यदि स्यात्तदा प्रतिज्ञाघटकंभागस्यापि प्रत्येकं तादृशभेदद्वयानुयोगितया तद-

In Public domain, Digitized by Muthulakshmi Research Academy



तत्रोपनये चाव्याप्तिर्दुर्वारैव। तस्योपनयघटकेनायं, पदेनोपनयस्य च तद्घटकेन तेन घटितत्वादिति वाच्यम्। अनुषङ्गपक्षे उपनयघटकभागनिगमनघटकभागद्वयाघटितत्वशरीरे उपनयाघटकत्वेन निगमनघटकस्य निगमनाघटकत्वेन चोपनयघटकस्य भागस्य विशेष्य-वाचकपदातिरिक्तत्वेन वा भागद्वयस्य विशेषणीयत्वात्। अयं तस्मादित्यादिभागस्य च सत्यन्तेनैव वारणात्। स्वानाश्रयान्तरितभागद्वयवृत्त्यन्यत्वेन च धर्मो विशेषणीयः। तेन हेत्वाद्यंशपरित्यागेन प्रतिज्ञोदाहरणादिसमुदाये न्यायान्तर्गते नातिप्रसङ्गः। वस्तुतस्तु प्रतिज्ञा-हेतू इत्यादौ हेत्वादिपदं प्रतिज्ञाद्यतिरिक्तपरम्। तथा चोदाहरणादेः प्रतिज्ञाद्यतिरिक्तत्वान्न-दोषः। प्रतिज्ञाद्यतिरिक्तघटकत्वञ्च प्रतिज्ञाद्येकदेशव्यावृत्तं प्रतिज्ञात्वाद्यनाश्रयत्वमेव पर्यवसितं बोध्यमिति दिक्।

---

वृत्तित्वं प्रतिज्ञात्वस्य न सम्भवतीत्यतो घटकत्वमेकदेशसाधारणमुक्तम्। *तथाचेति* प्रतिज्ञात्वाश्रय-वृत्तित्वहेतुत्वाश्रयवृत्तित्वोभयाभावादिर्बोध्यः। तेन प्रतिज्ञाहेतुसमुदायत्वादितः प्रतिज्ञाहेत्वेकदेश-समुदायत्वादेरन्यतया एकरूपेण निवेशासम्भवेऽपि न क्षतिः। ***उपनयाघटकत्वेन*** उपनयत्वाना-श्रयत्वेन, अनुषक्तस्य निगमनाघटकत्वं तु मतान्तरम्। एतन्मते च निगमनशरीरे विशिष्टहेतुज्ञानज्ञाप्य साध्यसम्बन्ध्यवगाहिशाब्दबोधस्यैव प्रवेश इति न दोषः। ननु अयं तस्मादित्यत्र यथाश्रुते उपनय-निगमनघटकत्वेन यातिव्याप्तिर्निस्थिता सा प्रकारद्वयेऽपि सम्पादिता अयं पदस्योपनयघटकनिगमन-घटकत्वात्। विशेष्यवाचकपदत्वाच्चेत्यत आह। ***अयं तस्मादिति*** ***स्वेति*** ननु स्वानाश्रयान्त-रितत्वं स्वानाश्रयोत्पत्त्यधिकरणक्षणवृत्तिध्वंसप्रागभावान्यतरप्रतियोगित्वं वाच्यम्। तथा च हेतुत्वादेः स्वानाश्रयप्रतिज्ञाद्यन्तरितभागद्वयवृत्तित्वादव्याप्तिस्स्वानाश्रयोत्पत्त्यधिकरणैकक्षणवृत्तिध्वंसप्रागभाव-प्रतियोगित्वोक्तौ गौरवादिति चेन्न। स्वाश्रयीभूतैकभागध्वंसाधिकरणक्षणोत्पत्तिकत्वे सति स्वाश्रय-भागान्तरप्रागभावाधिकरणक्षणोत्पत्तिकस्वाश्रयप्रतियोगिकध्वंसाधिकरणो यस्स्वाश्रयप्रतियोगिकप्राग-भावाधिकरणस्तत्प्रतियोगिको वा यः स्वानाश्रयस्तत्कं यत्स्वं तदन्यत्वस्य विशेषणपदार्थत्वात्। प्रतिज्ञोदाहरणसमुदायत्वं निरुक्तस्वानाश्रयहेतुवाक्यत्वमेवेति नातिप्रसङ्गः। विशेषणपूरणभयादाह। ***वस्तुतस्त्विति*** ***एकदेशेति*** तथा च न प्रतिज्ञात्वावच्छिन्नभेदानुयोगित्वनिवेशानिबन्धनोसम्भवः। ननु हेतुत्वभिन्नं यद्धेतुत्वाश्रयवृत्तिसमुदायत्वं तद्भिन्नत्वे सत्युपनयत्वभिन्नं यदुपनयत्वाश्रयवृत्ति-समुदायत्वं तद्भिन्नत्वमेव लाघवादुचितमिति चेन्न। यदि स्वानाश्रयेत्यादिविशेषणं तदा हेतुत्वाश्रय-तदनाश्रयोभयावृत्तित्वम् उपनयत्वाश्रयतदनाश्रयोभयावृत्तित्वमेव च सम्यक्। वस्तुतः स्वानाश्रये-

In Public domain. Digitization Muthulakshmi Research Academy

मूलस्थं शाब्दज्ञानकारणशाब्दज्ञानान्तमन्यतमत्वेनानुगतरूपेणावयवप्रतिपाद्य तत्तद्विशिष्टार्थविषयकशाब्दबोधपरमतो नाननुगमः। तादृशबोधजनकानां वाक्यानामन्यतमत्वेनानुगमे व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकान्योऽन्याभावानभ्युपगमे पूर्वोपदर्शितानुपपत्तिप्रसङ्गात्। शाब्दबोधानामन्यतमत्वेनोपात्तुं[11] युक्तत्वादित्यभिप्रायेण मूलोक्तावयवलक्षणमन्यथा व्याचक्षाणानां केषाञ्चिन्मतमाह। **प्रतिज्ञादिप्रतिपाद्येति** विशिष्य निवेश्यानां विशिष्टार्थविशेषाणां साध्यविशिष्टपक्षादीनां परिचायकमात्रमेतत्। न तु प्रतिज्ञादिप्रतिपाद्यत्वेन तेषां निवेशः। विशिष्टार्थविशेषमनन्तर्भाव्य प्रतिज्ञात्वादीनां दुर्निर्वचनतया तेषां विशिष्य निवेशस्यावश्यकत्वे तत्तद्विशिष्टार्थबोधजनकवाक्यप्रतिपाद्यत्वेन तत्तद्विशिष्टार्थनिवेशस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वात्। एतत्सूचनायैव तत्तदित्युक्तम्। न चात्र नानावयवजन्यसमूहालम्बनबोधं प्रतिज्ञाहेत्वादिजन्यविशिष्टार्थबोधञ्चादाय तज्जनकसमुदायेऽतिव्याप्तिः, तत्तद्विशिष्ट[12]-बोधजनिष्ठतदेकदेशबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकताश्रयेऽवयवैकदेशे चातिव्याप्तिरिति वाच्यम्। तत्तद्विशिष्टार्थविषयकशाब्दबुद्धित्वावच्छिन्नजन्यत्वान्यन्यतमत्वेनोपादाय तन्नि-

---

त्यादेः स्वत्त्वघटितत्वेन प्रतिज्ञोदाहरणसमुदायप्रतिज्ञानिगमनसमुदयोदाहरणनिगमनसमुदायप्रतिज्ञोदाहरणनिगमनैतत्त्रयसमुदायप्रतिज्ञोदाहरणैकदेशसमुदायादिवारणाय बहूनि विशेषणानि अतः प्रतिज्ञात्वाश्रयतदनाश्रययोभयावृत्तित्वं निगमनत्वाश्रयतदनाश्रयोभयावृत्तित्वञ्च द्वयमेवेति दीधितकृतां रमणीयः पन्थाः। *दिगिति* तादृशधर्मस्य पर्याप्तिसम्बन्धेनैवावयवपदप्रवृत्तिनिमित्तत्वान्नैकदेशे अवयवव्यवहारः। वाक्यान्तरसाधारणैकैकावयवृत्तिसमुदायत्वस्य तादृशधर्मतयाऽतिव्याप्तिस्तु न्यायान्तर्गतत्वविशेषणेनैव वार्यते। स्वनिष्ठन्यूनवृत्तितानिरूपकान्यत्वस्य दाने चाघटितत्वचतुष्टयं नदेयमिति दिगर्थः। दीधितिकारेण जनकत्वान्तस्य परिचायकतया प्रतिज्ञाजन्यबोधान् विशिष्यनिवेश्यवाक्यानामेवानुगमकेनान्यतमत्वेन निवेशोऽङ्गीकृतः। ये तु बोधानामैवान्यतमत्वेन निवेशं वदन्ति तन्मतमवतारयति। *मूलस्थमिति* दीधितिकारमतं खण्डयति। *तादृशेति* अनुपपत्तिरसम्भवः। प्रतिज्ञात्वाद्यन्यतमत्वरूपपरिष्कारे च पुनः पनर्जनकत्वनिवेशेन गौरवरूपो दोष एवेति भावः। नन्वन्यतमबोधजनकैकवाक्यत्वमवयवलक्षणम्। तथा च न्यायेनातिव्याप्तिस्तस्यैकवाक्यत्वाभावादत आह। *विशिष्टार्थबोधमिति* ननु केवलप्रतिज्ञाद्यर्थविषयकज्ञानव्यक्तीरेवोपादाय तादृशज्ञानपञ्चकान्यतमजनकत्वनिवेशान्नैष दोष इत्यतो विभिन्नानुपूर्वीकप्रतिज्ञादिज्ञानजन्यज्ञानानामेकोपादानेऽन्यानुपूर्वीकप्रतिज्ञा-

---

11. उपादातुम् इति पाठान्तरम्    12. विशिष्टार्थ इति पाठान्तरम्

In Public domain. Digitization: Muthulakshmi Research Academy


रूपितजनकतावच्छेदकधर्मपर्याप्त्यधिकरणताया निवेशनीयत्वात्, तादृशो धर्मः पर्वतो वह्निमा-नित्यादिवाक्यत्वमेव, वाक्यत्वस्य व्यासज्यवृत्तितया नैकदेशेऽतिव्याप्तिः। तादृशशाब्दबुद्धित्वावच्छिन्नत्वञ्च, तादृशशाब्दबुद्धित्वपर्याप्तावच्छेदकतात्वम्, अतः प्रतिज्ञाहेतुसमुदायादेस्साध्यविशिष्टपक्षावगाहिशाब्दत्वघटितधर्मावच्छिन्नजनकत्वेऽपि नातिप्रसङ्गः। वाक्यज्ञानस्य जनकतामते तु तादृशजनकतायां विषयितासम्बन्धेन यादृशधर्मावच्छिन्नं यादृशधर्मावच्छिन्नविषयकत्वं वा अवच्छेदकं तादृशधर्मपर्याप्त्याश्रयत्वं विवक्षणीयमिति नासम्भवः। तादृशोऽपि धर्मः पर्वतो वह्निमानित्यादिवाक्यत्वमेव।

अथाकाङ्क्षादिमत्पदसमूहत्वरूपवाक्यत्वमेव व्यासज्यवृत्ति तदवच्छिन्नविषयकज्ञानत्वेन च न शाब्दबुद्धिजनकत्वं समूहत्वज्ञानस्यानुपयुक्तत्वात्। किन्त्वानुपूर्वीविशेषात्मकाकाङ्क्षा-वच्छिन्नविषयकज्ञानत्वेनैव तथात्वम्, आनुपूर्वीविशेषश्च, एकवर्णनिष्ठापरवर्णानन्तर्यरूपो न व्यासज्यवृत्तिरित्येकदेशातिप्रसङ्गो दुर्वारः। न च तादृशजनकतावच्छेदकीभूतविषयितानिरूपकवर्णसमुदायत्वमेव विवक्षणीयमतो नातिप्रसङ्ग इति वाच्यम्। तत्तत्प्रतिज्ञादिव्यक्तिभिन्न-

---

दावव्याप्तिस्तस्य तज्ज्ञानाजनकत्वात्सकलोपादाने चान्यतमत्त्वशरीरगौरवमिति दोषं स्फुटतयोपेक्ष्य स्थलान्तरे दोषमाह। *अवयवैकदेशे चेति* ननु वाक्यज्ञानस्य जनकतामते प्रतिज्ञादिविषयकज्ञानत्वमेव जनकतावच्छेदकं तत्पर्याप्त्यधिकरणत्वस्य वाक्येऽसत्त्वादसम्भव इत्यत आह। *वाक्यज्ञानस्येति* विषयस्यानवच्छेदकत्वादाह। *यादृशधर्मावच्छिन्नविषयकत्वं वेति* अथ तादृशशाब्दत्वपर्याप्तावच्छेदकताकजन्यतानिवेशो सम्भवः। व्यभिचारवारणाय तादृशतादृशानुपूर्वीप्रकारकज्ञानोत्तरत्वस्यापि जन्यतावच्छेदकघटकत्वात्। न च यत्किञ्चज्ज्ञानोत्तरत्वसहिततत्तदर्थशाब्दत्वपर्याप्तजन्यतावच्छेदकताकत्वं वाच्यम्। तादृशतादृशानुपूर्वीविषयिताया अपि जन्यतावच्छेदकघटकतया तदनिवेशे पर्याप्त्यसम्भवादिति चेत्। अत्र केचित्। यादृशयादृशानुपूर्व्यवच्छिन्नज्ञानस्य हेतुत्वं तादृशतादृशानुपूर्व्यवच्छिन्नज्ञानाव्यवहितोत्तरत्वसहिततत्तदर्थशाब्दत्वपर्याप्तावच्छेदकजन्यतानामन्यतमत्वेन निवेशः। न च तादृशतादृशानुपूर्वीभेदेनान्यतमत्वस्य शरीरगौरवात्तत्तदानुपूर्व्यवच्छिन्नज्ञानाव्यवहितोत्तरोत्पन्नज्ञान-व्यक्तीनां तत्तद्व्यक्तित्वेनोपादानमुचितमिति वाच्यम्। तथा सत्येकदेशेऽतिव्याप्तिप्रसङ्गादिति। परे तु यत्किञ्चिज्ज्ञानाव्यवहितोत्तरत्वघटितधर्मसहिततत्तदर्थविषयकशाब्दत्वपर्याप्तावच्छेदकताकजन्यताना-मन्यतमत्वेन निवेश इत्याहुः। परन्तु मतद्वय एवाव्यवहितोत्तरत्वस्य निविष्टतया विषयविषयित्वस्य कार्यतावच्छेदककोटिप्रवेशो निष्फल इति कथं तादृशविषयिताघटितधर्मेऽवच्छेदकतापर्याप्तिनिवेश-

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिज्ञादिघटकवर्णानामपि तादृशसमुदायघटकतया क्वचिदप्यवयवव्यक्तौ तादृशसमुदायत्वा-पर्याप्तेः प्रत्येकमवयवव्यवहारानुपपत्तेः। मैवम्। तादृशबोधजनकतावच्छेदकीभूतयत्किञ्चि-

---

त्स्सम्भवतीति बोध्यम्। वस्तुतस्तु प्रतिज्ञादिप्रतिपाद्यतत्तदर्थशाब्दत्वं कार्यतावच्छेदकीकृत्य यावत्यः प्रतिज्ञाद्यानुपूर्व्यस्तदवच्छिन्नविषयतान्यतमत्वेन कारणत्वोपगमान्नविषयविषयिताघटितधर्मे कार्यता-वच्छेदकत्वपर्याप्तिबाध इति सम्यक्। केचित्तु तत्तदर्थविषयकशाब्दबोधवृत्त्यवयवद्वयाप्रयोज्य यत्किञ्चि-ज्जन्यतान्यतमजन्यताशून्यज्ञानवृत्तिजन्यत्वादिनिरूपितजनकतानिवेशान्नैकदेशेऽतिव्याप्तिः। अवयव-द्वयाप्रयोज्यत्वनिवेशान्नहेत्वर्थविशिष्टवैशिष्ट्यावगाहित्वावच्छिन्ने जन्यतामादाय प्रतिज्ञादावव्याप्तिः। अवयवद्वयादिवारणन्तु जनकताद्वयशून्यत्वादिनैवेत्याहुः। यत्तु तत्तदर्थशाब्दत्वव्याप्यजन्यतान्यतम-जन्यतानिवेशः कार्यः। उक्तरीत्याविषयविषयिताया अनिवेशेऽपि तद्वन्निष्ठभेदप्रतियोगितावच्छेदकत्व-रूपव्याप्यत्वं सकलजन्यतास्वक्षतम्। लक्षणेऽव्यवहितोत्तरत्वं न निवेश्यते वैयर्थ्यात्। प्रतिज्ञाहेतु-समुदायादेश्च जनकताद्वयशून्यत्वादिविशेषणेन वारणम्। न च वह्निसम्बन्धिबुद्धित्वाद्यवच्छिन्नजन्यता-मादायैकदेशेऽतिव्याप्तिः। प्रतिज्ञाद्यघटकत्वं चैतन्मते तद्विशेषणं नास्तीति वाच्यम्। तथापि तादृश-शाब्दान्यावृत्तित्वरूपव्याप्यत्वस्यैव निवेशात्। महानसो वह्निमानिति शाब्दबुद्धिसाधारण्याः वह्निमत्त्व-रूपानुपूर्व्यवच्छिन्नज्ञानाव्यवहितोत्तरत्वावच्छिन्नजन्यतायास्साध्यविशिष्टपक्षशाब्दत्वव्यभिचारित्वात्। अत्यन्ताजन्यभिन्नविषयकप्रत्यक्षादिसाधारण्यवारणाय कार्यतावच्छेदककोटौ शाब्दत्वनिवेशान्नतत्का-र्यतायास्तादृशशाब्दत्वव्यभिचारित्वेनासम्भव इति। तन्न। शाब्दत्वनिवेशेऽपि भूतलं घटवदित्यानुपूर्वी-पर्वतो वह्निमानित्यानुपूर्वीज्ञानोत्तरं भूतले घटशाब्दबोध एव प्रतिबन्धकवशेन च पर्वते वह्निशाब्दबोधो न जातस्तत्र कार्यतासत्त्वेनासम्भवात्। यदपि समानासमानानुपूर्वीकसमानार्थकप्रतिज्ञाधीनजन्यतायां तथाविधहेत्वधीनजन्यत्वादौ च वैलक्षण्यं स्वीकृत्य तत्तदर्थशाब्दबोधवृत्तिविलक्षणजन्यतान्यतम-निवेशः कार्य इति। तत्तुच्छम्। कार्यतावच्छेदकधर्मावच्छेद्यत्वादन्यस्य जन्यतावैलक्षण्यस्याप्रामाणि-कत्वात्। अन्यथा जगतीतले यावन्तो बोधास्तज्जन्यतावैलक्षण्यमादाय न्यायादेरननुगतत्वापत्तेः। *तादृशेति* अत्र तादृशैकदेशार्थबुद्धित्वावच्छिन्नजनकतामादाय पूर्वोक्तजन्यतात्वनिवेशो बोध्यः। पूर्वोक्तपर्याप्तिमभिप्रेत्य समाधत्ते। *तादृशबोधेति* अथ तादृशजनकताश्रययत्किञ्चिज्ज्ञानविषयवर्ण-समुदायत्वमेवास्तु किमवच्छेदकत्वोपादानेन यत्किञ्चित्त्वनिवेशेन प्रत्येकमवयवव्यवहारोपपत्तेः। यत्त्वेवं सति प्रतिज्ञाहेत्वेकदेशसमुदायादावतिव्याप्तिः तज्ज्ञानस्य तथाविधजनकताद्वयशून्यत्वात्। स्वानवच्छेदकविषयतायां तथाविधजनकतावच्छेदकत्वस्य निवेश्यतया तद्विशिष्टतादृशजनकताशून्य-त्वाच्चेत्यवच्छेदकत्वमुक्तमिति। तन्न। तादृशसमुदायत्वन्यूनवृत्तित्वानिरूपकत्वं निवेश्यैतत्फलस्याप-

In Public domain. Digitization Muthulakshmi Research Academy


ज्ञानीयविषयतानिरूपकवर्णसमुदायत्वस्य विवक्षणीयत्वात्। तादृशञ्च ज्ञानं तथाविध-जनकताद्वयशून्यत्वेन विशेषणीयम्। तेन प्रतिज्ञाहेत्वादिसमुदायेनातिव्याप्तिः। न चैवं हेत्वर्थ-प्रतिपादकभागघटितप्रतिज्ञाविशेषेऽव्याप्तिः, तद्विषयकज्ञाने हेत्वर्थबोधकतानियमादिति वाच्यम्। व्याप्यव्यापकभावानापन्नजनकताद्वयशून्यताया निवेशनीयत्वात्।

---

वाहयितुं शक्यत्वात्। मैवम्। तादृशान्यतमबोधस्वरूपयोग्यावयवसङ्ग्रहायावच्छेदकत्वनिवेशात्। केचित्त्ववच्छेदकत्वानुपादाने पर्वतो वह्निः सम्बन्धीति निराकाङ्क्षवाक्ये तादृशवर्णत्वसमनियत-समुदायत्वपर्यन्तोक्तौ तु तद्घटितसमुदायेऽतिव्याप्तिः। स्वानवच्छेदकतथाविधजनकतावच्छेदक-विषयिताशून्यप्रतिज्ञाविषयकतद्विषयकज्ञानविषयत्वात्। न च तादृशप्रतिज्ञात्वाश्रयनिराकाङ्क्षोत्तर-हेतूत्तरेत्याद्यानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगितावच्छेदकत्वस्य निराकाङ्क्षे सत्त्वात्। साध्यविशिष्ट-पक्षबोधकतावच्छेदकविषयिताघटितमुचितानुपूर्वीकत्वं निवेश्यं तथाचोक्तनिराकाङ्क्षस्य न्यायान्तर्ग-तत्वाभावाद्वारणे किमवच्छेदकत्वनिवेशेनेति वाच्यम्। एवमुचितानुपूर्वीघटकहेतुत्वादिशरीरेऽवच्छेदक-त्वनिवेशमपेक्ष्यैकत्रैव तन्निवेशे लाघवादित्याहुः। तन्न। अवच्छेदकत्वाघटितोचितानुपूर्वीकत्वनिवेशे उदासीनेऽतिव्याप्तेः। तदुत्तरनिराकाङ्क्षहेत्वादिवाक्यानुपूर्व्या उचितत्वात्। इदन्तु बोध्यम्। तथाप्यव-यवैकदेशवारणाय तादृशवर्णत्वव्यापकत्वं निवेश्यम्। एवमपि प्रतिज्ञोदासीनसमुदयेऽतिव्याप्तिः। न्यायान्तर्गतत्वेन तद्वारणमिति चेत्। प्रतिज्ञाहेतुघटकवृत्तिसमुदायत्वमादायातिव्याप्तिः। निरूपक-त्वान्तेन वारणं चेत्तर्हि तथाविधजनकताद्वयशून्यत्वादिवैयर्थ्यमिति। यदपि वर्णसमुदायत्वस्यैकदेशे सत्त्वात् वर्णत्वसमनियतसमुदायत्वं निवेश्यं तत्र प्रतिज्ञाहेतुसमुदायत्वादेस्तथाविधजनकताद्वयशून्य-त्वादिमज्ज्ञानविषयवर्णत्वव्यापकत्वादतिव्याप्तिरतो व्याप्यत्वान्तनिवेशः। एवञ्च व्याप्यदिशि तथाविध-जनकताद्वयशून्यत्वादिवैयर्थ्येऽपि व्यापकदिशि तत्सार्थक्यमेकधैव वर्णत्वान्तनिवेशाच्च तत्सार्थक्य-मिति। तदपि न सत्। अनिरूपकत्वान्तनिवेशेनैवोपपत्तौ व्याप्यत्वान्तनिवेशस्य तथाविधजनकताद्वय शून्यत्वादिसार्थक्यस्य चानुपयुक्तत्वादिति। न चानिरूपकत्वान्तनिवेशे हेत्वर्थबोधकभागघटितप्रतिज्ञा-यामव्याप्तिः। प्रतिज्ञात्वस्य धूमादिति भागमात्रवृत्तिहेतुत्वनिष्ठन्यूनवृत्तितानिरूपकत्वादिति वाच्यम्। यत्किञ्चित्तादृशसमुदायत्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वे सति तद्भिन्नत्वस्यैव निरूपक-त्वान्तार्थत्वात्। नन्वेवमपि पर्वतो धूमज्ञानज्ञाप्यवह्निमानिति बोधमादाय प्रतिज्ञाहेतुसमुदायेऽतिव्या-प्तिरत आह। *तादृशेति* व्याप्यव्यापकभावानापन्नतथाविधजनकताद्वयत्वञ्च यत्किञ्चित्तादृशजनकता-स्वानाश्रयवृत्तित्वस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन तद्विशिष्टजनकत्वोभय-त्वम्। एतद्विशेषणञ्च पर्याप्त्युपादानेऽप्यन्यतमत्वेऽनुगतजन्यतानिरूपितजनकभावावच्छेदकविषय-

In Public domain. Digitization Mumukshu Research Academy

वस्तुतस्तु स्वानवच्छेदकविषयिताविशिष्टजनकतानाश्रयत्वं ज्ञाने विशेषणं देयं, स्वं, जनकता, प्रतिज्ञाहेतूभयादिविषयकज्ञानञ्च, प्रतिज्ञाद्यर्थबोधजनकतानवच्छेदकीभूतहेत्वादि-

तात्वेन विषयतामादाय प्रतिज्ञाहेत्वादिसमुदायवारणायावश्यकमिति। तन्निवेशस्य पर्याप्त्युपादाने प्रयोजनं वक्ष्यते। तत्तद्भागविषयित्वावच्छिन्नजनकतामादायासम्भववारणाय तथाविधपदम्। ननूदाहरणे कथं लक्षणसमन्वयः। तज्ज्ञानस्य व्याप्यव्यापकभावापन्नतादृशजनकताद्वयशालित्वात्। मैवम्। उदाहरणार्थबोधीय जनकतासमुदायान्यत्वेन तादृशजनकताद्वयस्य विशेषणीयत्वात्। हेतूदाहरणसमुदायादौ च हेत्वर्थबोधजनकतोदाहरणार्थबोधीयैकजनकतैतद्वयस्य तादृशसमुदायान्यत्वेन नाति प्रसङ्गः। अवयवघटकतानवच्छेदकीभूतयत्किञ्चज्ज्ञानसमुदायत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति तद्भिन्नत्वस्यैव निरूपकान्तार्थत्वात्। वस्तुतोऽवयवघटकतानवच्छेदकीभूतत्वं न देयम्। नापि हेतुतावच्छेदकविशिष्टहेतुविशिष्टविषयकत्वावच्छिन्नान्यत्वमनिरूपकत्वान्तदलं निवेश्यते। निष्प्रयोजनकत्वात्। प्रतिज्ञैकदेशहेतूभयत्ववारणन्तु तत्समुदायत्वभेदं निवेश्यैव। तावतापि लाघवानपायात्। उदाहरणसङ्ग्रहाय च निरूपकयत्किञ्चित्तादृशसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वे सत्युदाहरणभिन्नत्वं निरूपकत्वान्तार्थः। तस्माद्वर्णपर्याप्तिसमुदायत्वमर्थ इत्यलं पल्लवितेन। यद्वा तथाविधयत्किञ्चिज्जनकत्ववदनाश्रयत्वेनानुगतजन्यतावृत्तितत्समानाधिकरणभेदप्रतियोगितावच्छेदकतथाविधजनकत्वोभयशून्यत्वपरं व्याप्यव्यापकभावेति विशेषणार्थः तत्राव्याप्तिकरोभयाभावो न घटकस्स्वावच्छेदकेत्याद्यग्रिमविशेषणयोदाहरणार्थबोधीयजन्यत्वे द्वित्वेन निवेश्य तदीयजनकतेति, अपरे नोपादेये इति न तत्राप्यव्याप्तिः। ※स्वानवच्छेदकेति※ तादृशहेत्वादिविषयितासमानाधिकरणायाः प्रतिज्ञाज्ञानत्वाद्यवच्छिन्नजनकतायाः केवलप्रतिज्ञादिज्ञाने सत्त्वादसम्भव इति विशिष्टपदम्। अथ प्रतिज्ञाविषयकसमूहालम्वनस्य विशिष्टजनकताशून्यत्वाभावेन प्रतिज्ञादौ कथं लक्षणगमनमिति चेन्न। यत्किञ्चित्त्वस्य ज्ञानविशेषणतया प्रतिज्ञामात्रविषयकमेकं ज्ञानमादायेति गृहाण। अथ प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिवारणाय स्वानवच्छेदकविषयिताविशिष्टतादृशजनकताशून्यत्वस्य ज्ञाने निवेशे धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादौ प्रतिज्ञायामव्याप्तिः। तादृशप्रतिज्ञाज्ञानस्यापि धूमादित्यानुपूर्व्यवच्छिन्नज्ञानत्वावच्छिन्नजनकताकत्वात्। तादृशजनकत्वस्य निरुक्तान्यतमजन्यतानिरूपितत्वात्। स्वानवच्छेदकीभूतपर्वतादिपदविषयितावत्त्वाच्चेति चेन्न। तादृशान्यतमजन्यतानिरूपिता या जनकता स्वानवच्छेदकविषयिताविशिष्टतादृशजनकताशून्यज्ञानीयस्वावच्छेदकविषयितानिरूपकवर्णसमुदायत्वमर्थः। तादृशज्ञानीयत्वस्वावच्छेदकत्वोभयसम्बन्धेन जनकताविशिष्टविषयतेति यावत्। तथा च स्वपदं यज्जनकताव्यक्तिमादाय यदालक्षणसमन्वयः कर्तव्यस्तदा तत्परम्।

In Public domain. Digitization Muthulakshmi Research Academy


विषयताविशिष्टतादृशजनकताश्रय एव, धूमादालोकवान्पर्वतो वह्निमानित्यादिप्रतिज्ञामात्रविषयकज्ञानञ्च, न तादृशविशिष्टजनकताश्रयः, तन्निष्ठहेत्वर्थबोधजनकतावच्छेदकविषयताया अपि विशिष्टप्रतिज्ञार्थबोधजनकतायामवच्छेदकत्वात्। एतेन व्याप्यव्यापकभावानापन्न तथाविधजनकताद्वयशून्यत्वप्रवेशे धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादिसमुदायेऽतिव्याप्तिः तादृशसमुदायविषयकज्ञाननिष्ठप्रतिज्ञार्थबोधजनकता हेत्वर्थबोधजनकतयोर्व्याप्यव्यापकभावसत्वात् व्याप्यव्यापकभावानापन्न तथाविधजनकताद्वयशून्यत्वादिति निरस्तम्। तादृशवाक्यविषयकज्ञानीयप्रतिज्ञाघटकहेतुसमानाकारकवाक्यविषयताया विशिष्टप्रतिज्ञार्थबोधजनकतावच्छेदकत्वेऽपि प्रतिज्ञावाक्यविषयतानन्तः पातिन्या हेतुविषयतायास्तादृशजनकतानवच्छेदकत्वात्।

---

एवञ्च धूमादालोकवान्पर्वतो वह्निमानित्यादिप्रतिज्ञाज्ञानत्वावच्छिन्ना या जनकता तदवच्छेदकविषयता-विशिष्टतादृशजनकताशून्यत्वं प्रतिज्ञाज्ञानस्यास्त्येवेति लक्षणसमन्वयसम्भवान्नानुपपत्तिः। अन्यतम-निरूपितजनकतामात्रपरत्वे तु ज्ञानज्ञाप्यत्वं धूमीयमिति बोधजनकताया अपि तथात्वेन तदनवच्छेदकीभूतपर्वतो वह्निमानिति भागविषयिता विशिष्टजनकतावत्त्वेन तादृशप्रतिज्ञाज्ञानासङ्ग्रहापत्तेः। न चात्र तादृशविषयिविषयिताशून्यत्वमेव निवेश्यतां किं तादृशजनकताप्रवेशनेनेति वाच्यम्। तथा सति तादृशान्यतमजन्यतानिरूपिता या जनकता तदनवच्छेदकविषयिताशून्यत्वनिवेशेनैवोपपत्तौ विषयितायां पुनस्तादृशान्यतमजन्यतानिरूपितजनकतावच्छेदकत्वरूपविशेष्यदलवैयर्थ्यापत्तेः। अस्माकं त्वेकदेशज्ञानस्यापि तादृशतादृशान्यतमजन्यतानिरूपितजनकतानवच्छेदकविषयताविशिष्टतादृशजनकताशून्यत्वात्। एकदेशवारकतयैव तद्दलसार्थक्यात्। अन्यथा परस्परनिरूप्यनिरूपकभावापन्नसकलविषयितानां तादृशजनकतावच्छेदकत्वेनैकदेशमात्रविषयकज्ञानीय विषयताया अतधात्वेन जनकतानवच्छेदकतया तत्रातिव्याप्त्यभावाद्विशेषदलवैयर्थ्यापातात्। अत एव तादृशपदमप्यावश्यकं, अन्यथैकदेशज्ञानस्यापि तादृशविषयिताविशिष्टयथाकथञ्चिज्जनकताशालित्वेन तद्दलवैयर्थ्यापातात्। यत्तु तादृशविषयताशून्यत्वानिवेशे विषयताया अव्याप्यवृत्तित्वेनाव्यावर्तकत्वमिति जनकत्वोऽपादानम्। विषयिताविशिष्टजनकत्वञ्च नाव्याप्यवृत्तीति न दोष इति। तन्मन्दम्। तथा सति प्रमेयत्वसाधारणतादृशविषयिताविशिष्टत्वं निवेश्य तच्छून्यत्वस्यैव निवेशेनोपपत्तेस्तादृशजनकतापर्यन्तनिवेशवैयर्थ्यस्य वज्रलेपत्वात्। नन्वेवं स्वानवच्छेदकविषयतावदन्यत्वस्यैव सम्यक्त्वे विशिष्टजनकताशून्यत्वनिवेशो नातिप्रयोजक इति चेत्। तर्ह्यग्रिमदूषणगणमध्ये एतद्दूषणस्यापि गणने

का क्षतिः, एवं प्रातिस्विकरूपेण तादृशजनकत्वाभावनिवेशोऽसम्भवः वैशिष्ट्यावच्छिन्नतादृशजनकत्वाभावनिवेशे तु तादृशजनकत्वं व्यर्थमित्यपि दूषणमस्वरसमध्य एव। परे तु। स्वत्वस्याननुगततया न प्रतिस्वमादायानुगतलक्षणनिर्वाह इति स्वानवच्छेदकविषयताविशिष्टतादृशजनकतात्मकं यद्यत्स्वं तत्तदभावकूटवत्त्वमेव ज्ञाने निवेशनीयं तादृशञ्च प्रतिज्ञाहेतूभयज्ञानादौ प्रसिद्धं तत्र च हेतुज्ञानत्वावच्छिन्नाजनकता न प्रवेश्यते। किन्तु तदन्यचतुष्टयीति न धूमादालोकवान्पर्वतो वह्निमानित्यादिप्रतिज्ञायामव्याप्तिः। एवञ्च जनकत्वनिवेशखण्डनमप्रसक्तमेवेत्याहुः। तदपि नातीव सन्दर्भशुद्धं प्रतिभाति। ईदृशरीत्यैव प्रतिज्ञाहेतुसमुदायादिवारणे तत्तदर्थविषयकशाब्दत्वपर्याप्तावच्छेदकतानिवेशस्य व्यर्थतापत्तेः। अस्माकं तु प्रतिज्ञाहेतुज्ञानत्वावच्छिन्नजनकत्वं स्वपदेनोपादाय लक्षणसमन्वयसम्भावनावारणाय पर्याप्तिनिवेशनमावश्यकं स्वत्वाननुगमदोषस्तु यत्किञ्चित्त्ववदेतल्लक्षणेऽस्वरसमध्य एवेति। अत्र वदन्ति। प्रतिज्ञैकदेशहेतुघटितसमुदायवारणाय पर्याप्तिनिवेशनमावश्यकम्। अन्यथा तत्समुदायत्वे हेत्वर्थविषयकशाब्दत्वघटितधर्मावच्छिन्नजन्यतानिरूपिता या तद्विषयकत्वावच्छिन्नाजनकतातदवच्छेदकविषयतानिरूपकवर्णावृत्तित्वस्य वह्निमत्पदविषयितायाश्च प्रतिज्ञैकदेशहेतुज्ञानत्वावच्छिन्नजनकतावच्छेदकतया ज्ञाने तादृशजनकत्वाभावकूटवत्त्वस्य च सत्त्वेनातिव्याप्तेः। पर्याप्तिनिवेशे च हेत्वर्थविषयकशाब्दत्वपर्याप्तावच्छेदकताकजन्यताकजनकताहेतुज्ञानत्वावच्छिन्नैव। तदन्यस्वानवच्छेदकवह्निमत्पदविषयताविशिष्टतथाविधजनकताशून्यप्रकृतज्ञानीय तदवच्छेदकविषयतानिरूपकवर्णसमुदायत्वासत्त्वेन नातिव्याप्तिः। एवं धूमादालोकवान्पर्वतो वह्निमानित्यादौ धूमादालोकवत्पर्वत इत्यादिभागेऽतिव्याप्तिः। धूमादालोकवान्पर्वत इति भागज्ञानत्वावच्छिन्नजनकताया हेत्वर्थविषयकशाब्दत्वघटितधर्मावच्छिन्नजन्यतानिरूपितत्वसत्त्वेन तज्ज्ञाने तादृशजनकत्वाभावकूटवत्त्वसत्त्वेन च तत्र तदवच्छेदकविषयतानिरूपकवर्णसमुदायत्वसत्वादिति। अत्र तथापि प्रतिज्ञैकदेशे धूमादितिभागेऽतिव्याप्तिः। तत्र हेत्वर्थविषयकशाब्दत्वपर्याप्तावच्छेदकताकजन्यतानिरूपितजनकतावच्छेदकविषयतानिरूपकवर्णसमुदायत्वसत्त्वात्। तज्ज्ञाने तादृशजनकत्वाभावकूटवत्त्वाच्चेति भट्टाचार्याणामस्वरससङ्गतिरिति। न च स्वानवच्छेदकविषयताबहिर्भूताया तत्तदर्थविषयकशाब्दत्वनिष्ठावच्छेदकताकजन्यतान्यतमजन्यतानिरूपितजनकतावच्छेदकविषयता तन्निरूपकसमुदायत्वमेव समुदितार्थः। तत्र विशेष्यदले पर्याप्तिर्न प्रवेश्यते। किन्तु यां जनकतावच्छेदकविषयतामादाय लक्षणसमन्वयः पर्याप्तिघटितार्थकतज्जनकतां स्वपदेनोपादाय तस्यां तदवच्छेदकविषयतान्यत्वमपेक्षितम्। तथा च हेत्वर्थविषयकशाब्दत्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतानवच्छेदकविषयतायास्तद्विषयकशा-व्दत्वपर्याप्तावच्छेदकताकजन्यतानिरूपितजनकतानवच्छेदकीभूतवह्न्यालोकादिमत्पदविषयतान्यत्वा

In Public domain. Digitization Muthulakshmi Research Academy

यदि चोदासीनपदार्थविषयित्वानियतविषयिताकावयवव्यक्तिः प्रामाणिकी, तदा स्वानवच्छेदकविषयिता तथाविधजनकतावच्छेदकत्वेन विशेषणीया, तादृशावयवव्यक्तिविषयक-

---

-भावान्नोक्तस्थलेऽतिव्याप्तिरिति। एवं सत्यनुगमेन प्रतिज्ञाहेतुविषयिते उपादाय प्रतिज्ञाहेतुसमुदाये अतिव्याप्तिस्तु न शङ्क्या। स्वानवच्छेदकविषयितान्यत्वकूटनिवेशात्। विषयिता या यज्ज्ञानवृत्तिस्तद्वृत्तिर्या जनकता स्वपदेन तस्या एवोपादानान्न प्रतिज्ञाविषयित्वादौ हेतुज्ञानत्वाद्यवच्छिन्नजनकतामादायातिव्याप्तिरिति वाच्यम्। तस्य लक्षणान्तरत्वात्। प्रकृतलक्षणपरिष्काररूपत्वे स्वपदेन प्रतिज्ञार्थविषयकशाब्दत्वपर्याप्तावच्छेदकताकजन्यतानिरूपितजनकतैव हेतौ लक्षणगमनाय हेत्वर्थविषयकशाब्दत्वपर्याप्तावच्छेदकताकजन्यतानिरूपितजनकताया अप्युपादेयतया हेतुज्ञानत्वावच्छिन्नाजनकता न प्रवेश्यते किन्त्वन्यचतुष्टयीत्यस्यासङ्गतेः। अत एवात्र स्वपदेन हेतुज्ञानत्वावच्छिन्नजनकता गृह्यते तथा च स्वानवच्छेदकवह्न्यालोकपदादिविषयिताविशिष्टहेतुज्ञानत्वावच्छिन्नजनकतावत्त्वेन तादृशज्ञानस्य तत्कूटवत्त्वाभावादेव नातिव्याप्तिरिति पर्याप्त्युपादानं व्यर्थमिति समाहितम्। स्वपदेन हेतुज्ञानत्वावच्छिन्नजनकत्वस्योपादाने धूमादलोकवान्पर्वतो वह्निमानिति प्रतिज्ञायामव्याप्तेश्च। तज्ज्ञानस्य हेत्वर्थविषयकशाब्दत्वपर्याप्तावच्छेदकताकजन्यतानिरूपितजनकतानवच्छेदकपर्वतपदादिविषयिताविशिष्टजनकतावत्त्वात्तादृशकूटाभावादिति। यदि च स्वानवच्छेदकेति स्वपदेन प्रत्येकं तादृशजनकतापञ्चकमपि गृह्यते हेतुज्ञानत्वावच्छिन्नजनकता न ग्राह्येति तु यथाश्रुतहेतुत्वाभिप्रायेण योज्यते। न चैवं निरुक्तप्रतिज्ञायामव्याप्तिः। तज्जन्यशाब्दबोधस्य विवक्षितहेत्वर्थाविषयकत्वात्। तथा च न कोऽपि दोष इति विभाव्यते तदा प्रतिज्ञैकदेशहेत्वादिवारणात्। स्वानवच्छेदकेत्यादिभट्टाचार्योक्तविशेषणवैयर्थ्ये इष्टापत्तिरिति मन्तव्यम्। ननु यथाश्रुतमते स्वानवच्छेदकत्वं स्वानतिरिक्तवृत्तिभिन्नत्वं तथा च, हेतुज्ञानत्वावच्छिन्नजनकत्वोपादानेऽपि प्रतिज्ञाविषयितायास्तदनतिरिक्तवृत्तितया तद्भिन्नविषयिताविशिष्टजनकत्वाभावघटितकूटमक्षतमिति चेत्तर्हि हेतुविषयितायाः प्रतिज्ञाजनकतातिरिक्तवृत्तित्वादव्याप्तिरिति दिक्। यत्तु स्वस्य स्वधर्मितावच्छेदकत्ववारणाय प्रतिज्ञाज्ञाने पत्वादिप्रकारतानिरूपितविशेष्यताया अप्युपगमे तादृशप्रकारतायास्स्वानवच्छेदकविषयिताशून्यत्वविरहेण प्रतिज्ञायामव्याप्तिर्जनकता निवेशे चावच्छिन्नत्वसम्बन्धेन तद्विशिष्टत्वाभावान्न दोष इति। तदसत्। अवच्छिन्नत्वसम्बन्धेन तादृशविषयितावैशिष्ट्यानिवेशे यदिचेत्यादिग्रन्थविरोधात्। उदासीनपदार्थविषयितायाः स्वानवच्छेदकत्वेऽपि तादृशजनकत्वस्य तदवच्छिन्नतयाऽव्याप्तियोगेन विषयितायां तादृशान्यतमजनकतावच्छेदकत्वस्योन्मत्तप्रलपितत्वापत्तेरिति। यादृशप्रतिज्ञादिज्ञानमुदासीनपदार्थविषयकमेव जायते तादृशप्रतिज्ञादि-

ज्ञाने अवयवान्तरविषयतानैयत्यस्यं प्रामाणिकत्वे त्वगतिरेवेति ध्येयम्। समानाकारकप्रतिज्ञा-द्वयाद्यात्मकसमुदायस्यावयवत्वपर्याप्त्याश्रयत्वमिष्टमेव, तस्यातथात्वे तद्वारणप्रकारोऽपि चिन्तनीयः। न्यायान्तर्गतत्वस्यापि निवेशनीयतया नोदासीनवाक्यसाधारण्यमित्यपि

---

व्यक्तावव्याप्तिमाशङ्कते। *यदिचेति* समाधत्ते। *तदेत्यादि* एवञ्च स्वानवच्छेदिकाया तथाविध-जनकतावच्छेदकविषयिता तद्विशिष्टतादृशजनकताशून्यत्वं ज्ञानविशेषणमित्यर्थः। अत्र स्वानवच्छे-दकतादृशजनकतावच्छेदकविषयिताशून्यत्वमेवास्तु भागविषयितायास्तादृशजनकतानवच्छेदकत्वेन तत्रातिव्याप्तेर्विशेष्यदलसार्थक्यसम्भवादिति तु बोध्यम्। *अगतिरेवेति* इदञ्चात्रालोचनीयम्। स्वान-वच्छेदकतादृशजनकतावच्छेदकविषयिताविशिष्टस्वन्यूनवृत्तिजनकताशून्यत्वं गतिः। पञ्चानामप्यव-यवानां विषयितानैयत्योपगमेऽपि स्वन्यूनवृत्तिजनकतास्थाने स्वन्यूनवृत्तिस्वानवच्छेदकविषयिता-निवेश्या। वस्तुतस्तु स्वानवच्छेदकेत्यादिकमपहाय स्वाश्रयत्वस्वसमानाधिकरणभेदप्रतियोगिताव-च्छेदकविषयित्वोभयावत्त्वेन ज्ञानं विशेष्यं स्वानवच्छेदकतथाविधजनकतावच्छेदकविषयित्वानिरूप-कत्वेन वा वर्णो विशेषणीय इति। असमानाकारकप्रतिज्ञाद्वये जन्यताभेदमते दोषाप्रसक्तेस्समानेति। *इष्टमेवेति* एकप्रतिज्ञाप्रतिज्ञाद्वयं नेतिप्रत्ययसम्भवेऽपि नावयव इति प्रत्ययासम्भवात्। *तस्या-तथात्वे* प्रतिज्ञाद्वयस्यावयवत्वास्वीकारे। *परिचिन्तनीय इति* प्रतिज्ञाद्वयस्यालक्ष्यतापक्षे तादृश-समुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वं देयमित्यभिप्रायः। नन्वेतेनैव प्रतिज्ञाहेतुसमुदायातिव्याप्ति-वारणे स्वानवच्छेदकेत्यादेर्वैयर्थ्यप्रसङ्ग इति चेत्, एतत्कल्पे इष्टत्वात्। अत्रायं भट्टाचार्याणामाशयः। प्रतिज्ञैकदेशवर्णवृत्तिसमुदायत्ववारणाय तादृशयत्किञ्चज्ज्ञानीय विषयितानिरूपकवर्णत्वसमनियत-समुदायत्वनिवेशान्न प्रतिज्ञाहेतुसमुदायादावतिव्याप्तिर्न वा स्वानवच्छेदकेत्यादिविशेषणवैयर्थ्यम्। एवं प्रतिज्ञाद्वयादिवारणाय तत्तत्समुदायत्वभिन्नत्वमेव निवेश्यम्। न चैवं स्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वं सम्यक्, लाघवात्। वर्णत्वसमनैयत्यनिवेशने नातिव्याप्तिं सम्पाद्य स्वानवच्छेदकेत्यादेस्तत्तत्समुदा-यत्वभिन्नत्वस्य च प्रवेशे महागौरवादिति वाच्यम्। धूमादालोकवानिति प्रतिज्ञायामव्याप्तेस्तन्निष्ठ-समुदायत्वे धूमादितिभागमात्रवृत्तिनिरुक्तसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वात्। उदाहरणनिष्ठसमु-दायत्वस्य तदेकदेशवृत्तितथाविधयत्किञ्चित्समुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वात्। धूमदितिभाग-मात्रवृत्तिसमुदायत्वस्य निरुक्तसमुदायत्वरूपतयाप्रतिज्ञानिष्ठसमुदायत्वस्य तन्निष्ठन्यूनवृत्तितानिरूप-कत्वेनाव्याप्तेरुक्तकल्पस्यैव साधीयस्त्वात्। प्रतिज्ञाद्वयस्य लक्ष्यत्वमङ्गीकृत्य वा तद्वारकमुक्तविशेषणं हेयम्। इत्थञ्चावच्छेदकत्वनिवेशनमपि सार्थकम्। अन्यथा हेतुप्रतिज्ञैकदेशज्ञानस्य स्वानवच्छेदक-

In Public domain. Digitization by Muthulakshmi Research Academy

वोध्यम्। अत्र यत्किञ्चित्त्वनिवेशादननुगमो दुर्वारः। एवं प्रतिज्ञादिघटकहेत्वर्थप्रतिपादकभागेऽतिव्याप्तिः। एवमुदाहरणस्य वाक्यद्वयात्मकस्य सङ्ग्रहाय तत्प्रतिपाद्यसाध्यविशिष्टधर्मिविषयकशाब्दबुद्धित्वावच्छिन्नजन्यता तथाविधहेतुविशिष्टधर्मिविषयकशाब्दबुद्धित्वावच्छिन्नजन्यता चान्यतमजन्यतागर्भे निवेशनीया। तथा च तद्घटकप्रत्येकवाक्येऽतिव्याप्तिः। एतादृशार्थद्वयविषयकबुद्धित्वञ्च न समुदायस्यापि जन्यतावच्छेदकमिति तदवच्छिन्नैकजन्यतानिवेशासम्भवात्। न च जनकता एवान्यतमत्वेन निवेशनीयाः, तच्छरीरे चोदाहरणप्रतिपाद्य

---

तादृशान्यतमजन्यतानिरूपितजनकतावच्छेदकविषयिताविशिष्टजनकताशून्यतया तत्समुदायेऽतिप्रसङ्गादिति तद्विशेषणमण्डनम्। वस्तुतस्तु तत्तदर्थशाब्दत्वपर्याप्तावच्छेदकताकजन्यतान्यतमजनकताश्रययत्किञ्चज्ज्ञानविषयवर्णत्वव्यापकसमुदायत्वं वाच्यं तत्र च पूर्वोक्तस्वनिष्ठन्यूनवृत्तितानिरूपकत्वं निवेश्यं प्रतिज्ञाद्वयादिकमलक्ष्यमवच्छेदकत्वञ्च त्याज्यम्। एवं तादृशजनकताद्वयशून्यत्वादिकं तत्तत्समुदायत्वभिन्नत्वञ्च व्यर्थमिति तत्खण्डनम्। ननु यत्किञ्चित्त्वमेकमात्रवृत्तिधर्मः तथाचाधेयतासम्बन्धेन ज्ञानवृत्तिरेकमात्रवृत्तिर्यो धर्मस्तद्विशिष्टायास्स्वाधिकरणयत्किञ्चिद्वृत्तित्वसम्बन्धेन ज्ञानत्वविशिष्टविषयितायावान्निवेशान्न दोष इत्यत आह। *एवमिति* दोषद्वयं जन्यतानिवेशपक्षे भागे धूमादालोकवान्पर्वत इति प्रतिज्ञाघटकधूमादित्येकदेशे न तु पर्वतो वह्निमानिति प्रतिज्ञाघटकपर्वतपदे तन्मात्रज्ञानस्य तथाविधजनकतानाश्रयत्वादत उक्तं हेत्वर्थेति। प्रतिज्ञादीत्यादिना धूमाद्वह्निसाध्यकोदाहरणादिपरिग्रहः। नन्वत्र साध्यविशिष्टपक्षविषयित्वाद्यन्यतमनिष्ठप्रयोज्यतानिरूपितप्रयोजकतावच्छेदकयत्किञ्चिद्विषयिताकवर्णसमुदायत्वं वाच्यम्। तत्र च प्रकृतपक्षविशेषणतापन्नप्रकृतसाध्यान्वितप्रकृतहेतुविशिष्टहेतुत्वविषयितानिवेशान्न प्रतिज्ञादिघटकहेत्वर्थबोधकभागेऽतिव्याप्तिः। यादृशानुपूर्वीप्रकारकज्ञानोत्तरं कदापि तादृशसाध्यान्वितहेतुत्वविषयिताशालिकार्यानुदयः तन्मुखविशेष्यताया अपि तादृशसाध्यविषयतानिरूपितत्वोपलक्षिततादृशहेतुत्वविषयतां प्रति प्रयोजकत्वासम्भवात्। तादृशविषयताशालिवोधे प्रतिज्ञोत्तरहेतुज्ञानत्वेन हेतुत्वेऽपि हेत्ववयवस्य तत्प्रयोजकत्वम्। हेतुस्स्वार्थविषयिताप्रयोजक इति व्यवहारात्। हेतुविषयतायां व्याप्त्यादिविषयित्वानिरूपितत्वं देयम्। तेन निगमनघटकतस्मात्पदे नातिव्याप्तिरित्य आह। *एवमिति* *वाक्यद्वयात्मकस्येति* वाक्यचतुष्टयात्मकस्येत्यर्थः। ननु पक्षतावच्छेदकाद्यवच्छिन्नहेतुसाध्यवैशिष्ट्यावगाहिशाब्दत्वपर्याप्तावच्छेदकताकजन्यतामाशङ्क्यार्थसमाजरूपवाधकेन निराकरोति। *तादृशार्थद्वयेति* (*तथाचेति* ननूदाहरणेऽव्याप्यकथानान्न्यूनता व्याप्यव्यापकभावानापन्नजनकताद्वयसत्त्वात्स्वानवच्छेदकविषयिताविशिष्टतादृश-

In Public domain. Digitization Muthulakshmi Research Academy

तत्तद्विशिष्टार्थबुद्धित्वावच्छिन्ननिरूपिताजनकताद्वयं द्वित्वेन निवेशनीयम्, अतः एकैक-जनकताश्रयप्रत्येकभागविषयकज्ञानमादाय न प्रत्येकभागेऽतिव्याप्तिरिति वाच्यम्। उभय-भिन्नत्वस्य प्रत्येकमुभयोस्सत्त्वादुभयभिन्नभिन्नत्वस्योभयत्रासम्भवादन्यतमत्वेनोभयोपादाना-सम्भवात्, व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकभेदोपगमे तु, तादृशान्यतमत्वाश्रयप्रत्येक-जनकतामादायातिप्रसङ्गस्य दुर्वारत्वात्। पूर्वकल्पे तु प्रतिज्ञाद्यघटकत्वविशेषणेनैव नाति-प्रसङ्गावकाशः, यो यो धूमावानित्यादिप्रत्येकवाक्यस्य वाक्य(समुदाय)द्वयात्मकोदाहरण-घटकत्वात्। न च वाक्यद्वयपर्याप्तमुदाहरणत्वं दुर्वचम्। स्वघटकयत्पदोपस्थाप्यधर्मिणि

---

जनकताकत्वाच्चेति चेन्न। तथाविधयत्किञ्चिज्जनकत्वतदनाश्रयवृत्तितत्समानाधिकरणभेदप्रतियोगिता-वच्छेदकजनकत्वोभयशून्यत्वं व्याप्यव्यापकभावेति विशेषणार्थः। उदाहरणे च तथाविधं जनकता-द्वयमेव द्वित्वेनोदाहरणार्थबोधीयजन्यताद्वयनिवेशात्तथाविधजनकताद्वयशून्यत्वपञ्चकनिवेशाद्वा ना-व्याप्तिः प्रतिज्ञाहेतुज्ञानत्वावच्छिन्नजनकत्वद्वयञ्च न धर्तुं शक्यमिति नातिव्याप्तिः। स्वानवच्छेदकेत्यादि -विशेषणे वह्नित्वेनोदाहरणार्थबोधजन्यत्वे प्रवेश्य तदीयजनकत्वे स्वपदेनोपादेये तादृशजनकता चोदा -हरणज्ञानीयजनकतयोर्भेदो निवेश्य इति) *द्वित्वेनेति* उदाहरणघटकवाक्यचतुष्टयविषयकप्रत्येक-ज्ञानचतुष्टयनिष्ठजनकतामादाय तन्निष्ठचतुष्टयावच्छिन्नभेदस्यैवान्यतमत्वकुक्षौ निवेशात्तादृशजनकता-चतुष्टयावच्छेदकविषयितानिरूपकवर्णसमुदायत्वस्य, सम्पूर्ण एव सत्त्वान्नैकदेशेऽतिव्याप्तिरिति भावः। यद्यपि द्वित्वेन निवेशेऽपि वाक्यचतुष्टयसमुदायत्वसङ्ग्रहः। तथापि तथानिवेशे तस्य वाक्यद्वयवृत्ति-समुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वमिति चतुष्टयानुधावनम्। *दुर्वारत्वादिति* अन्यतमत्वस्या-व्यासज्यवृत्तितया पर्याप्तिविवक्षायाः असम्भवात्। इदन्तु बोध्यम्। तथाविधजनकतात्वावच्छिन्न-भेदान्यतमभेदप्रतियोगितावच्छेदकधर्मपर्याप्त्यधिकरणावच्छेदकविषयितेत्यादिक्रमेण निवेशे उदाहरणे नाव्याप्तिः। तदेकदेशे नातिव्याप्तिश्च। भेदान्यतममध्ये उदाहरणप्रतिपाद्य तत्तद्विशिष्टार्थबुद्धिजनकता-द्वयभेदनिवेशात्। यद्वा प्रतिज्ञाप्रतिपाद्यतद्विशिष्टार्थबुद्धित्वावच्छिन्नजन्यताहेतुप्रतिपाद्यतद्विशिष्टार्थ-बुद्धित्वावच्छिन्नजन्यतोपनयनिगमनप्रतिपाद्यतत्तद्विशिष्टार्थबुद्धित्वावच्छिन्नजन्यत्वे इति जन्यता-चतुष्टयमन्यतमत्वेन निवेश्य तन्निरूपितजनकतावच्छेदकविषयतानिरूपकवर्णसमुदायत्वोदाहरणत्वा-न्यतरवत्त्वं लक्षणम्। उदाहरणत्वं चाग्रिममनुगतमिति न कोऽपि दोष इति। ननु दीधितिकृन्मतेऽप्यु-भयघटकभागद्वयाघटितत्वस्यैकदेशसाधारणतयाऽतिव्याप्तिर्दुर्वारेत्यत आह। *पूर्वेति* ननूदाहरण-त्वस्य दुर्वचतया कथं तद्भेदानुयोगितावच्छेदकत्वमित्याशयेन शङ्कते। *न चेति* *दुर्वचमिति* इतरा

In Public domain. Digitization Muthulakshmi Research Academy

-वयवानन्वितस्वार्थबोधकत्वं नेहोदाहरणत्वमात्माश्रयात्। अतः व्याप्यत्वाभिमतवह्निष्ठव्यापकत्वाभिमतसम्बन्धबोधकत्वमुदाहरणत्वमिति मूलोक्तलक्षणं परिष्करोति। *स्वघटकेति* स्वं वाक्यम्। स्वघटकयत्पदोपस्थाप्यतावच्छेदकदृष्टान्ततावच्छेदकधर्मावच्छिन्नविशेष्यतानिरूपितप्रकृतहेतुप्रकारताशालिशाब्दबोधजनकतावच्छेदकत्वतथाविधतदवच्छिन्नभेदावच्छिन्नविशेष्यतानिरूपितप्रकृतहेतुप्रकारताशालिशाब्दबोधजनकतावच्छेदकत्वोभयवत्प्रकारताश्रयानुपूर्वीघटकवर्णत्वव्यापकतदाश्रयाधिकरणकालध्वंसोत्पत्त्यधिकरणक्षणध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिकध्वंसप्रतियोगिक्षणवृत्तिवृत्तिस्वघटकतत्पदोपस्थाप्यतावच्छेदकदृष्टान्ततावच्छेदकधर्मतदवच्छिन्नभेदावच्छिन्नविशेष्यतानिरूपतप्रकृतसाध्यप्रकारताद्वयशालिशाब्दबोधजनकतावच्छेदकप्रकारताश्रयानुपूर्वीघटकवर्णत्वव्यापकं समुदायत्वमित्यर्थः। स्वमानुपूर्वी। महानसत्वचत्वरत्वादिना भाने तु तादृशभेदानुयोगितावच्छेदकावच्छिन्नविशेष्यता निवेश्या। उचितानुपूर्वीकहेतुसाध्यविशिष्टधर्मिबोधकद्वयकसमुदायत्वमप्येतदेव। यद्यपि प्रकृतहेतुविशिष्टतत्तदन्यप्रकृतसाध्यविशिष्टतत्तदन्यधर्मिविषयकसमूहालम्बनबोधीययावत्कारणतावच्छेदकयत्किञ्चिद्विषयताश्रयवर्णत्वव्यापकसमुदायत्वमुपाध्यायानामुदाहरणत्वं सम्भवति। तथापि सवह्निमान् यो यो धूमवानिति वाक्यस्य वारणाच स्वाश्रयीभूतसाध्यविशिष्टबोधकवाक्याव्यवहितोत्तरत्वशून्यहेतुविशिष्टबोधकवाक्यवृत्तियत्समुदायत्वं तद्भिन्नत्वनिवेशे गौरवात्तन्नोक्तम्। इदन्तु बोध्यम्। स्वघटकयत्पदोपस्थाप्यधर्मिणि यो हेतुमत्त्वबोधः यश्च हेतौ तादृशधर्मिबोधः तदन्यतरबोधजनकं यद्वाक्यं यच्च यदनन्तरप्रयुक्तं स्वघटकतत्पदोपस्थाप्यधर्मिणि साध्यवत्ताबोधः यश्च साध्ये तादृशधर्मिबोधस्तदन्यतरबोधजनकं यद्वाक्यं तदुभयत्वमुदाहरणत्वम्। तेन यत्र धूमस्तत्राग्निरित्युदाहरणेनाव्याप्तिः। पाककृतीतरभेदादौ साध्ये तत् स्पष्टम्। वस्तुतस्तु हेतुमत्ताबोधकेत्यत्र धर्मिविषयतानिरूपितहेतुविषयताकत्वेन बोधयोरनुगमस्तत्र धर्मिविषयताया हेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतासम्बन्धानवच्छिन्नप्रकारतान्यत्वनिवेशाद्धूमो यद्वानिति बोधस्य हेतुतावच्छेदकसम्बन्धानवच्छिन्नप्रकारतान्यत्वनिवेशाद्धूमो यो य इति बोधव्युदासः। अयं हेतुमत्ताबोधकान्तार्थः। साध्यवत्ताबोधकान्तस्याप्येवमेवार्थः। एवं साध्यवत्ताबोधकेत्यत्र तथाविधसाध्यविषयताकबोधत्वे नानुगमः। तत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नाधेयतासम्बन्धानवच्छिन्नप्रकारतान्यत्वं साध्यतावच्छेदकसम्बन्धानवच्छिन्नप्रकारतान्यत्वं विषयितयोर्विशेषणमिति विशेषः। यो धूमवान्तत्र वह्निरित्यादेर्वारणीयत्वे तु तत्समुदायत्वभेदो निवेश्यः। मतुप्सप्तम्यादेरर्थवत्त्वे तु यत्पदोपस्थाप्ययादृशधर्महेतूभयघटितानां तत्पदोपस्थाप्य तादृशधर्मिसाध्योभयघटितानाञ्च यादृशयादृशविशिष्टार्थानां बोधकान्युदाहरणघटकानि साम्प्रदायिकानि तादृशतादृशविशिष्टार्थबोधानामेव निवेशः। न तु यादृशपक्षसाध्यहेतुकानि यादृशे

In Public domain. Digitization Muthulakshmi Research Academy

हेतुमत्तावोधकं यद्वाक्यं यच्च तदनन्तरप्रयुक्तं स्वघटकतत्पदोपस्थाप्यतादृशधर्मिणि साध्यवत्ता -बोधकं यद्वाक्यं तदुभयत्वस्यैव तथात्वात्। अथात्रापि प्रतिज्ञाद्यघटकत्वं निवेशनीयमिति चेत्, तर्हि गुरुशरीरस्य तादृशविषयतानिरूपकवर्णसमुदायत्वस्य निवेशापेक्षया निरुक्तोभय-घटकभागद्वयाघटितत्वनिवेशनमेवोचितमित्यरुचिवीजमवसेयम्।

ननु न्यायजन्यज्ञानस्याप्युपनयार्थव्याप्यवत्पक्षावगाहितया परामर्शरूपत्वात्परामर्श -जनकवाक्यत्वमेव न्यायत्वं कुतो नोच्यते? एवं तादृशवाक्यघटकवाक्यत्वमेवावयवत्वमस्तु, किमुक्तगुरुतरन्यायतदवयवलक्षणानुसरणेनेति प्रतिज्ञादिपञ्चकस्य विशिष्टैकार्थप्रतिपादकत्वा-भिमानिनामाशङ्कां मूलकृन्निराकरोति। **अत एवेति** तादृशलक्षणमुपेक्ष्य यथोक्तलक्षणा-

---

यादृशे धर्मिणि यादृशयादृशविशिष्टार्थवत्त्वसमूहालम्बनवोधजनकान्युदाहरणानि तादृशानि। तावद्वो-धानां व्युत्क्रमोक्तस्वघटकभागकसमुदाय वारणाय तत्तत्समुदायत्वभेदकूटस्य निवेशनीयतापत्तेः। एवं स्वघटकयत्पदोपस्थाप्यधर्मिणि साध्यसामान्याभावसाध्यवद्भेदबोधौ तादृशाभावे तादृशभेदे धर्मि-बोधश्च निवेश्य पूर्वप्रयोगार्हं तद्घटकम्। एतादृशरीत्योत्तरप्रयोगार्हश्च तद्घटकं निरुच्य व्यतिरेक्यु-दाहरणलक्षणं कार्यम्। अत्यन्ताभावसाध्यके तु तादृशधर्मिणि प्रतियोगितावच्छेदकानवच्छिन्नवत्ता-बोधः प्रतियोगिनि तादृशधर्मबोधश्चाधिको निवेश्यः। भेदसाध्यके च तादृशधर्मिणि प्रतियोगिता-वच्छेदकबोधः। प्रतियोगितावच्छेदके च तादृशधर्मिबोधोऽधिकः। मतुप्सप्तम्यादेरर्थवत्त्वपक्षे तूह्यम्। एवमितरभेदादिसाध्यकेऽपि। व्यतिरेकिन्यायत्वं व्यतिरेक्यवयवत्वं च भिन्नमेवेतिकृतमधिकेन। ननूदा-हरणैकदेशवारणाय मयापि प्रतिज्ञाद्यघटकत्वं निवेश्यत इत्यत आह। *अत्रापीति* *गुर्विति* न च उपाध्यायानामुदाहरणाघटकत्वमात्रं दीधितिकृतान्तु प्रतिज्ञाद्यघटकत्वचतुष्टयादिकमेवमुभयघटके-त्यत्र जनकताप्रभृतिसमुदायत्वान्ताष्टकमुपाध्यायानान्तु तदेकमेवेति विपरीतगौरवं स्वानवच्छेदके-त्यादिविशेषणघटकस्य विषयितान्तस्य भेदद्वयात्मकस्य च विशेष्यघटकस्य तस्य, न चतुष्टयस्य, भेद-द्वयात्मकान्यतमत्वस्यैव च व्यापकताघटकतावच्छेदकविषयतादिसमुदायत्वसप्तकाक्रान्तत्वादिति वाच्यम्। स्वानवच्छेदकेत्यत्र स्वत्वस्य घटकतया विशेष्य चतुष्टयस्यान्यतमत्वगर्भस्य निवेशेन गौरवस्य दुर्वरत्वात्। न्यायजन्यज्ञानस्येत्याद्याशङ्कामित्यन्तस्योक्तगुरुतरलक्षणद्वयमपेक्ष्य परामर्श-प्रयोजकवाक्यत्वं न्यायत्वं तथाविधवाक्यघटकवाक्यत्वमवयवत्वमिति क्रमेण न्यायावयवलक्षणे लाघवात्। प्रतिज्ञादिपञ्चवाक्यजन्यमहावाक्यार्थबोधस्योपनयार्थविषयकत्वेन परामर्शरूपतया न्यायादौ क्रमेण लक्षणसमन्य इत्याशङ्कामित्यर्थः। *निराकरोतीति* तस्मिन् निराकृते स्वीयलक्षणद्वयस्याति-

In Public domain. Digitization Muthulakshmi Research Academy

नुसरणादेवेत्यर्थः। **परामर्शस्य** परामर्शमात्रस्य। **परामर्शजनकस्य** परामर्शजनकमात्रस्य मात्रपदात्पूर्वोपवर्णितन्यायतदवयवलक्षणघटकशाब्दबोधविशेषौ क्रमेण व्यवच्छेद्यौ। समुदायस्येव प्रत्येकवाक्यस्यापि न्यायत्वमिष्टमेव, परामर्शप्रयोजकवाक्य एव न्यायव्यवहारात्तत्त्वस्य समुदायवत्प्रत्येकमात्रेऽपि सत्त्वाच्च। एवञ्च परामर्शप्रयोजकवाक्यत्वमेव न्यायलक्षणमिति केचित्, तन्मतमुपन्यस्यति। **यत्त्विति** **सङ्क्षेपतः** लाघवतः सोऽपि न्याय एवेत्यनेनान्वयः। **परामर्शप्रयोजकेति** वह्निव्याप्यधूमवानयमिति वाक्यस्यापीत्यादिः। **विशेषेति** वाक्यपञ्चकात्मकसमुदायादित्यादिः। यादृशवाक्यप्रयोगो नार्थान्तरादिनिवन्धननिग्रहप्रयोजकः। तदेव न्यायव्यवहारविषय इति नियमाभिप्रायेण दूषयति। **तन्नेति** **कथायाम्** विचारसमये। **आकाङ्क्षाक्रमेणैवाभिधानम्** निग्रहाप्रयोजकमिति शेषः। **इति** अतः तदभिधाने निग्रहादित्यग्रिमेणान्वयः। **विशिष्टवैशिष्ट्ये** पक्षस्य व्याप्तिविशिष्टहेतुमत्वे। **आकाङ्क्षा** जिज्ञासा। **नास्तीति** विप्रतिपत्तितः साध्यतदभावसंशयवतः तदेकतरकोटिकजिज्ञासाप्रथममुदेति, ततः प्रतिज्ञावाक्यात्तन्निश्चये तद्धेतौ तत्प्रतीतौ च तद्गमकतौपयिकव्याप्तौ तदनन्तरमेव च पक्षस्य तादृशहेतुमत्त्व इति भावः। **तदभिधाने।** विशिष्टवैशिष्ट्यप्रतिपादक-

---

व्याप्तिं निराकरोतीत्यर्थः। तथा च मूलस्थातिव्याप्तिपदस्य परामर्शप्रयोजकवाक्यत्वस्य न्यायत्वमते वह्निव्याप्यधूमवानयमिति वाक्येऽतिव्याप्तिः। एवं तादृशवाक्यघटकत्वस्यावयवलक्षणत्वमते तदेकदेशे अतिव्याप्तिरित्यर्थः। स्वमतेऽतिव्याप्तिशङ्कैव नास्तीत्याह। मूले। *तेनेति* ननु तेनेत्यादिमूलमसङ्गतं यथोक्तलक्षणासत्त्वस्यालाभादित्यतो मात्रपदं पूरयति। *परामर्शमात्रस्येति* *विशेषाविति* प्रयोजकान्तपरिचयाविति शेषः। तथा च यथोक्तलक्षणासत्त्वलाभः। *तत्त्वस्येति* तथा च व्यवहर्तव्यतावच्छेदकसत्तानिबन्धनोव्यवहारोऽभ्युपेयत इति भावः। *लाघवतः* सङ्ग्राहकलाघवात्। *न्याय एव* न्यायव्यवहारविषय एव, सोऽपीत्यस्योपनयोपीत्यर्थोऽतः परामर्शनीयं पूरयति। *वह्नीति* अवध्यपेक्षां निरस्यति। *वाक्येति* तथा च विशेषः न्यायव्यवहार्यताव्यावर्तकस्तदवच्छिन्नभेदव्याप्यः भेदे प्रतियोगित्वरूपपञ्चम्यर्थान्वयो बोध्यः। अन्यादृशन्यायव्यवहारविषयासत्त्वे दूषणां सङ्गतिरतो यादृशेति नियमं लङ्घयितुं विधेयं पूरयति। *निग्रहेति* *विशिष्टेति* समूहालम्वनत्वस्यार्थसमाजग्रस्ततया कस्यचित्कार्यतानवच्छेदकत्वाद्विशिष्टबोध आवश्यकः। *तद्धेताविति* जिज्ञासोदेतीत्यनुवर्तते। एवमग्रेऽपि उपनयप्रयोगानुपपत्तिं निरस्यति। *अत्रापीति* नन्वाकाङ्क्षाविरह इति मूला-

In Public domain. Digitization Muthulakshmi Research Academy

वाक्योच्चारणे। अत्रापि प्रथममित्यनुषज्यते। **अन्यथा** लाघवमात्रमादृत्य तस्य लक्षणत्वोपगमे। **परामर्शजनकतयेति।** लाघवाद्वाक्यत्वमप्यनन्तर्भाव्यपरामर्शप्रयोजकत्वमात्रस्य लक्षणत्वौचित्यादिति भावः।

ननु मध्यस्थाकाङ्क्षा यतो निवर्तते स एव न्यायः सा च शाब्दत्वप्रकारिकाविषयसिद्धिनिर्वाहकशाब्दादेव निवर्तते न तु प्रमाणान्तरादिति न च क्षुरादेर्न्यायत्वमित्यत आह। **आकाङ्क्षेति** आकाङ्क्षानिवृत्तिविरह इत्यर्थः। **तुल्य एवेति।** व्याप्यवत्तावोधकवाक्यस्य प्रथमं प्रयोगेऽपि साध्यसन्देहाद्यधीनानां मध्यस्थाकाङ्क्षाणामनिवृत्तेरिति भावः। **दुर्निरूपम्** असम्भवि, जनकताया अवच्छेदकनियतत्वात्तज्ज्ञानस्यावच्छेदकज्ञानाधीनत्वादिति भावः।

---

सङ्गतिः। चक्षुरादेर्वह्निव्याप्यवत्तावोधकवाक्यस्येव जिज्ञासितविषयकत्वादित्यतस्तन्मूलमवतारयति। **नन्विति** अवतरणानुसारेणार्थमाह। **आकाङ्क्षानिवृत्तीति** ननु विजातीयबोधजनकत्वमेवन्यायत्वं विजातीयबोधजनकत्वमेव च प्रतिज्ञात्वादिकम्। एतादृशवैजात्यस्य परामर्शादावकल्पनान्नोपनयेति व्याप्तिरित्यन्येषां मतमुपन्यस्यति। **मूले अन्येत्विति** विजातीयबोधजनकत्वस्य न्यायपदशक्यतावच्छेदकतया तत्कुक्षिनिक्षिप्तत्वेन वैजात्यप्रसिद्धिः। एवं पर्वतो वह्निमानितिवाक्यनिष्ठं यद्विजातीयबोधजनकत्वं तदेव प्रतिज्ञादिपदशक्यतावच्छेदकमित्याशयः। अत्र प्रतिज्ञापदवाच्यानां पर्वतो वह्निमानित्यादिवाक्यानां तत्तद्व्यक्तित्वेन कारणत्वे चालिनीन्यायेन व्यभिचारात्। अनुगताननतिप्रसक्तरूपस्य दुर्मिलिततया विजातीयबोधजनकत्वस्यैवासम्भावितत्वेन तस्य प्रतिज्ञापदशक्यतावच्छेदकत्वाभावेन तद्घटकतया वैजात्यसिद्धेरसम्भवात्तद्घटितलक्षणमसम्भवग्रस्तमित्याशयेन दूषयति। **तत्र ज्ञानेति।** ननु दुर्निरूपमिति मूलमसङ्गतं जनकतानिरूपणेऽनुगतरूपानपेक्षणादतो व्याचष्टे। **गादाधर्याम् असम्भवीति** तथा च किञ्चिद्धर्मावच्छिन्नजनकतानिरूपितकार्यतावच्छेदकतयैव वैजात्यसिद्धेर्वक्तव्यतया कारणतावच्छेदकत्वस्य दुर्निरूपत्वे वैजात्यसिद्धेरसम्भवेन लक्षणमसम्भवग्रस्तमिति भावः। **तज्ज्ञानस्येति** तथा च तादृशरूपग्रहमन्तरेण जनकत्वं दुर्ग्रहमिति मूलार्थः। इदमापाततः। तादृशरूपग्रहमन्तरेणापि जनकतायास्सुग्रहत्वात्। तद्धर्मावच्छिन्नत्वविशिष्टजनकताग्रह एव विशेषणज्ञानविधया तद्धर्मग्रहस्य हेतुत्वात्। अत एव दण्डत्वाग्रहेऽपि द्रव्ये घटकारणताग्रहनिर्वाहः। ननु पर्वतो वह्निमानित्यनन्तवाक्यनिष्ठानुपूर्वीमत्त्वस्यैवानुगताननतिप्रसक्तस्य मिलिततया तद्रूपेण विजातीयबोधं प्रति जनकतासम्भवात्तथाविधजनकत्वस्य न्यायादिपदशक्यतावच्छेदकत्वं भविष्यतीत्यत आह।

In Public domain. Digitization Muthulakshmi Research Academy



लक्षणान्तरसम्भवस्य लक्षणान्तरादूषकतया तस्यैव लक्षणत्वादिति मूलमसङ्गतमतो दीधितिकृत्तद्भावमाचष्टे। **तथा चेति** तादृशानुगतरूपस्वीकारेचेत्यर्थः। **साधकाभाव इति** तादृशधर्मस्यैव न्यायादिपदप्रवृत्तिनिमित्तत्वसम्भवेन तत्प्रवृत्तिनिमित्ततया ज्ञाननिष्ठ-जातिविशेषसिद्ध्यसम्भवात्, युक्त्यन्तरस्य चासत्त्वादिति भावः।

---

*मूले तत्स्वीकार इति* *तस्यैव* तादृशानुपूर्वीमत्त्वस्यैव। एवकारेण वैजात्यघटितस्य लक्षणत्वव्यवच्छेदः। गादाधर्याम्। *लक्षणान्तरेति* उभयोरपि लक्षणत्वं सम्भवतीति भावः। *न्यायादीति* लाघवादित्यादिः। एवञ्च विजातीयबोधजनकत्वस्य तथात्वं नोपगम्यत इति तद्घटक-तया वैजात्यसिद्ध्यभावात्। (तथा च तादृशानुपूर्व्या एव लक्षणत्वसम्भवे किमुक्तवैजात्यघटितत्व-लक्षणेनेति। ननु लक्षणस्य लक्षणान्तरादूषकतयोभयोरपि लक्षणत्वमिति चेन्न। अनुगतानुपूर्वीकताया आवश्यकत्वेन तस्या एव लाघवेन प्रतिज्ञापदशक्यतावच्छेदकत्वसिद्धौ विजातीयबोधजनकत्वस्य तथात्वेनोपगम्यते येन तद्घटकतया वैजात्यसिद्धिस्स्यादेवञ्च) वैजात्यघटितलक्षणमसम्भवदुक्तिकमिति भावः। ननु प्रतिज्ञादौ विजातीयबोधजनकत्वस्यानुपूर्वीरूपधर्मयोरुभयोरपि विनिगमनाविरहेण शक्यतावच्छेदकताया आवश्यकतया वैजात्यासिद्धिर्दुर्वारैवेत्याशङ्क्य तत्स्वीकारे बाधकं मूले वक्ष्यति। *अन्यथेति* ननु वैजात्यस्य नानात्वस्वीकारान्नसङ्करावकाश इति चेन्न। तथा सति प्रतिज्ञाहेतूभय-जन्यबोधे प्रतिज्ञाजन्यतावच्छेदकवैजात्यस्वीकारापत्तेः। अन्यथा तत्र तादृशप्रतिबन्धकताकल्पना-रूपगौरवापातात्। तथा च तदवच्छिन्नबोधजनकत्वस्य हेतावतिप्रसक्तिः। एतद्भयेन गुरुभूतमपि प्रति-बन्धकत्वमुपगम्य तत्र वैजात्यानुपगमे तत्प्रतिज्ञायामव्याप्तिः। न च तादृशबोधे तादृशवैजात्या-नुपगमेऽपि न क्षतिः विजातीयबोधजनकतारूपलक्षणे जनकत्वं न फलोपधानमपि तु स्वरूपयोग्यतेति केवलप्रतिज्ञाव्यक्त्यन्तरजन्यबोधं प्रति तत्तत्प्रतिज्ञाव्यक्तेः फलोपहितत्वाभावेऽपि स्वरूपयोग्यता-सद्भावेन लक्षणसमन्वयादिति वाच्यम्। स्वरूपयोग्यता हि तादृशवैजात्यावच्छिन्नबोधजनकता-वच्छेदकधर्मवत्त्वं, एवञ्च कारणतावच्छेदकत्वेनाभिमतस्य धर्मस्यैव लाघवेन लक्षणत्वस्य प्रतिज्ञापद-शक्यतावच्छेदकत्वस्य च सम्भवादुक्तवैजात्यावच्छिन्नबोधजनकतावच्छेदकधर्मवत्त्वस्य गुरुतया लक्षणत्वस्य शक्यतावच्छेदकत्वस्य वा सम्भवात्तद्घटकतया वैजात्यसिद्धेरभावान्न वैजात्यस्य नानात्व-स्वीकारस्समुचित इति भावः। यत्तु तत्स्वीकारेत्विति प्रतिज्ञादिपदशक्यतावच्छेदकतया सिद्ध-वैजात्यादेः कारणतावच्छेदकस्य सुनिरूपतया नानुगतरूपस्य दुर्निरूपतेति भाव इति। तन्न। तथा सति तस्यैव लक्षणत्वादित्यस्य तथा च साधकाभाव इति दीधित्यसङ्गतेः। उक्तरीत्या प्रतिज्ञापदशक्यता-

बाधकमित्यस्य प्रतिज्ञादिजन्यतावच्छेदकजातावित्यादिः, तेन वक्ष्यमाणसङ्करस्य न्यायजन्यतावच्छेदकजातावसम्भवेऽपि न क्षतिः।

अन्यथेति मूलस्य प्रतिज्ञादिजन्यतावच्छेदकजातिस्वीकारे सङ्कीर्णजातिस्वीकार-प्रसङ्ग इत्यर्थकत्वमभिप्रेत्य सङ्करं विवृणोति। **न्यायेति** न्यायजन्यञ्च ज्ञानं विशिष्टैकार्थ-विषयकं तावद्वाक्यार्थविषयकसमूहालम्बनरूपं वेत्यन्यदेतत्। **पञ्चेति** जातय इत्यग्रि-मेणान्वयः।

तथा च तत्रैव प्रतिज्ञादिजन्यतावच्छेदकपञ्चजातीनां समावेश इति भावः। अन्य-त्रापि सामानाधिकरण्यमाह। **द्वित्रादीति** मिथो व्यभिचारितामाह। **एकैकेति** नन्वेकैकजन्यनानावयवजन्यबोधगततत्तदवयवजन्यतावच्छेदकजातीनां नानात्वोपगमान्न सङ्करावकाश इत्यत आह। **तत्र तत्रेति** **सुतरां मानाभाव इति।** प्रतिज्ञाहेत्वादि-नानावयवजन्यबोधनिष्ठप्रतिज्ञादिजन्यतावच्छेदकजातेर्हेत्वादिजन्यतावच्छेदकतया हेत्वादा-वपि प्रतिज्ञादिलक्षणातिव्याप्त्या तादृशजातिघटितलक्षणकरणासम्भवेन तादृशजातौ लक्षणानु -रोधरूपयुक्त्यनवकाशात्। एकैकावयवजन्यबोधवृत्तिजातीरुपादाय स्वरूपयोग्यताघटित-लक्षणस्य निर्दोषत्वेऽपि उभयादिजन्यबोधे तज्जात्यभावनिर्वाहकप्रतिबध्यप्रतिबन्धकताकल्पने महागौरवात्। तत्तज्जात्यवच्छिन्नजनकतावच्छेदकत्वेनाभिमतानां गुरुशरीराणां यथोक्त-धर्माणां प्रतिज्ञादिपदप्रवृत्तिनिमित्तत्वौचित्येन तज्जातिकल्पने प्रवृत्तिनिमित्तलाघवरूपाया अपि युक्तेरनवकाशादिति भावः। अननुगमेन तत्तज्जातिघटितलक्षणासम्भवात् लक्षणानुपपत्ति-

---

वच्छेदकतया सिद्धवैजात्यस्यैव शाब्दनिष्ठवैजात्यसाधकत्वसम्भवात्। केचित्तु तस्यैवेति। तथा च सुनिरूप्यत्वे तस्यैव लक्षणत्वापत्तिभयेन सुनिरूपितत्वस्य वक्तुमशक्यतया तद्दुर्निरूपमेवेति भावः। कारणतावच्छेदकस्य दुर्निरूपत्वेऽपि जातिसिद्धिस्वीकारे बाधकमाह। *अन्यथेति* एतदेव दीधिति-कृता केचित्त्वित्यादिनाऽभिधास्यते। *युक्त्यन्तरस्येति* प्रवृत्तिनिमित्तानुपपत्तिभिन्नयुक्तेः। मानाभाव-रूपयुक्त्यभाव इत्याह। *प्रतिज्ञेति* न्यायजन्येति यावत्। *स्वरूपेति* तत्तद्बोधानुपधानेऽपि प्रतिज्ञा-दिव्यवहारसिद्धये औचित्येनेति। तथा च धर्माणामावश्यकतया वैजात्यघटितविजातीयज्ञानजनकत्वं स्वीकृत्य तत्र प्रवृत्तिनिमित्तोपगमे गौरवादिति भावः। मानाभाव इत्यस्य तात्पर्यान्तरं वदतां मतमुत्थापयति। *अननुगमनेति* वैजात्ये कोऽनुगतलक्षणं स्यात्तदेव तु नेत्यर्थः। अयञ्चासम्भवे

In Public domain. Digitization Muthulakshmi Research Academy


रूपयुक्तेस्तु दूरपराहतत्वादिति भाववर्णनमनुपादेयम्। एकैकजन्यवोधवृत्तिजातिमादायैव स्वरूपयोग्यतावघटितलक्षणसम्भवात्। अन्यथेत्यादिमूलमन्यथाव्याचक्षाणानां मतमाह। **केचिदिति** तदेत्यन्तमन्यथेत्यस्यार्थः। **कदाचिदिति** हेत्वादिजन्य इत्यत्राप्यनुषज्यते। तेन परस्परव्यभिचारलाभः। **स्यादिति** वर्तेतैवेत्यर्थः। नियामकाभावादिति भावः।

ननु नियमेन सर्वत्रैव प्रतिज्ञादिजन्यवोधे हेत्वादिजन्यव्यक्तिवृत्तिजातिमत्त्वसम्भवेन परस्परव्यभिचारिताया दुर्घटत्वान्नसङ्करावकाश इत्यत्र वाधकान्तरं पूरयति। **सर्वेषामिति** सर्वत्र सर्वजातिसत्त्वे जातीनां समनैयत्याद्भेद एव दुर्लभ इति सर्वजातीयत्वप्रसङ्गोऽसङ्गत इत्यत आह। **एकेति** इत्थञ्च विजातीयशाब्दवोधजनकत्वघटितप्रतिज्ञादिलक्षणमसम्भवदुक्तिकमेवेति भावः।

अत्र चानुगतकारणाभावेऽप्यनुगतकारणघटितसामग्रीणां जातिविशेषनियामकत्वं सम्भवतीति नोक्तरीत्या जातिसङ्कराद्यवकाशः। अन्यथाऽनुमितित्वादिजातेरप्यनियमेन प्रत्यक्षादिसाधारण्यापत्तेः। तत्रापि वह्निव्याप्यवत्तापरामर्शादीनामननुगतत्वात्। अनुगतस्य कस्यचित्कारणस्य सम्भवेऽपि तस्यातिप्रसक्तत्वात्तादृशस्य प्रकृतेऽपि सम्भवाच्च। न च व्यभिचारेण तादृशजात्यवच्छिन्नशाब्दबोधं प्रति अननुगतस्य कारणत्वासम्भवात्तादृशजातीनां कारणनियम्यत्वं न सम्भवतीत्येकस्यान्यजातीयताप्रसङ्गो दुर्वार इति वाच्यम्। अनुमितौ परामर्शस्येवाननुगतकारणस्य कार्यतावच्छेदकसङ्कोचेन व्यभिचारवारणसम्भवादित्यस्वरसबीजमवसेयम्। न चानुगतनियामकाभावस्याकिञ्चित्करत्वेऽनुगतानतिप्रसक्तरूपमन्तरेण दुर्निरूपमिति मूलासङ्गतिरिति वाच्यम्। स्वमतेऽनुगतनियामकाभावे, न निर्भरः अपि तु न्याय-जन्यबोधादौ सङ्कररूपवाधक एवेति वक्तुं शक्यतया तादृशबाधकस्य विचारासहत्वेऽपि क्षतिविरहात्।

---

हेतुः। एकवैजात्यघटितलक्षणस्यान्यप्रतिज्ञायामव्याप्तिरित्याशयः। *एकैकेति* अनेकावयवजन्यतावच्छेदकजातिघटितलक्षणादाववयवान्तरान्यत्वप्रवेशे गौरवम्। यद्यतिप्रसञ्जकजातिघटितावयवान्तरलक्षणं भवति परन्तु तदा एतदवयवलक्षणमपि तथाविधं भवतीति बोध्यम्। *कदाचित्* क्वचित्। *स्यादिति* सम्भावनामात्रान्नव्यभिचारित्वलाभ इत्यतो वर्तेतेति। कस्यचित्। *मन आदेः* *तादृशस्य* अतिप्रसक्तत्वेऽप्यनुगतस्य। तादृशजातिः। जातिविशेषः। *अनुगतेति* दुर्निरूपमिति

In Public domain. Digitization Muthulakshmi Research Academy


इदं पुनरिहावधेयम्। प्रतिज्ञाद्यवयववाक्यादित्यादिमूलं न जातिविशेषघटितप्रतिज्ञा-लक्षणाभिप्रायकं तथा सति तादृशप्रतिज्ञादिलक्षणस्यात्रैव निराकृतत्वेन प्रतिज्ञादिग्रन्थे प्रतिज्ञा-दिजन्यं विजातीयं ज्ञानमित्यादिना जातिघटितप्रतिज्ञादिलक्षणमाशंक्यानेनैव दोषेण तन्निरा-करणस्य पौनरुक्त्यापत्तेः। किन्त्ववयवसामान्यलक्षणपरं प्रत्येकमित्यस्यावयवान्तरासह-कारेणेत्यर्थः। तेन न्यायजन्यबोधतो वाक्यैकवाक्यताधीनप्रतिज्ञाहेत्वादिजन्यबोधतश्च वैलक्षण्यलाभेन तदात्मकसमुदायेऽतिव्याप्तिशङ्कानिरासः। विजातीयत्वञ्च प्रतिज्ञाद्येकदेश-जन्यबोधावृत्तिजातिमत्त्वम्। एतेनावयवैकदेशेऽतिव्याप्तिशङ्कानिरासः। मूले तज्जनकशब्दत्वं तल्लक्षणमिति पाठः। तल्लक्षणमित्यस्यावयवलक्षणमित्यर्थः। एवं चान्यथेत्यादिमूलस्य प्रतिज्ञाहेत्वादिजन्यतावच्छेदकजातीनां परस्परसङ्करपरत्वं न घटत इति। यदि लक्षणानुरोध-मात्रेण जातिस्वीकारस्तदातत्साध्यपक्षहेतुकन्यायादिलक्षणानुरोधेनापि विभिन्नसाध्यादिक-न्यायजन्यबोधेषु विभिन्नानां प्रतिज्ञाद्येकदेशजन्यबोधावृत्तिनानाजातीनां स्वीकरणीयतया तासाञ्च तथाविधद्वित्रादिन्यायजन्यबोधे समावेशेन सङ्कीर्णजातिस्वीकारप्रसङ्ग इति तादृश-मूलार्थः। यदि च सङ्कररूपबोधकभयेन जातिकल्पनासम्भवाज्जातिघटितन्यायविशेषादि-लक्षणं न सम्भवतीत्यन्यथैव तत्साध्यपक्षहेतुकन्यायादयोदयो निर्वचनीया इत्युच्यते। तदा व्याप्त्यादिपदवत् न्यायादिपदस्यापि नानार्थत्वे क्षतिविरहात्सर्वसाधारणन्यायत्वादिनिर्वचनानु-रोधेन जातिस्वीकारोऽप्यनुचित इति भावः।

---

दूषणे इति शेषः। *अपित्विति* तथाचान्यथेत्यादिदूषण एव मणिकृतां निर्भर इत्यर्थः। प्रतिज्ञाद्य-वयवादिति मूलस्य प्रतिज्ञादिलक्षणपरतां दीधितिकारोक्तां तज्जनकेति मूलपाठमालम्ब्य खण्डयति। *इदमित्यादिना* *अनेनैवेति* दोषभेदप्रयुक्तापौनरुक्त्यशङ्कानिराकरणाय किन्त्विति न्यायपदादे-र्नानार्थत्वे मानाभावाज्जगतीतले यावन्तो विभिन्नपक्षसाध्यकहेतुकन्यायास्तेषां सर्वेषामनुगतलक्षणं कार्यम्। तच्च न्यायसामान्यावयवैर्मिलित्वैकस्समूहालम्बनात्मको बोधो जायते। तत्र एकं वैजात्यं स्वीकृत्य तादृशवैजात्यावच्छिन्नबोधजनकत्वं न्यायसामान्यलक्षणम् एवं जगति विद्यमाना-वयवसामान्यलक्षणमपीति मूलकृदाशयमभिप्रेत्य। अत्र प्रत्येकमित्यादेर्वैयर्थ्यमाशङ्क्यार्थकथनपूर्वकं परिहरति। *प्रत्येकमिति* नन्वेवं न्यायादिसामान्यलक्षणस्यान्यथेत्यादिना न दूषणं भवतीत्यत आह। *एवञ्चेति* *तदेति* एवं रीत्या सामान्यलक्षणसिद्धौ वैजत्यन्तरस्वीकारमपि स्वीकृत्य न्यायविशेष-

In Public domain. Digitization Muthulakshmi Research Academy

दीधितिकारस्ततत्तद्धीजनकवाक्यत्वं तत्तल्लक्षणमिति मूलपाठाभिप्रायेण प्रतिज्ञा-हेत्वादिजन्यतावच्छेदकजातीनां न्यायजन्यवोधादौ सङ्करपरतया जातिसङ्करप्रसङ्ग इति मूलं व्याख्यातवान्। तादृशपाठे तद्ग्रन्थस्यावयवसामान्यलक्षणपरत्वानुपपत्तेः।

एवञ्च सत्यगत्या भिन्नप्रस्तावे जातिघटितप्रतिज्ञालक्षणं विस्मृत्य प्रतिज्ञाग्रन्थे पुनस्तदा शङ्केति यथाकथञ्चिदग्रिमग्रन्थावतारो वोध्यः।

## इति गदाधरीयेऽवयवलक्षणम्

---

लक्षणमपि कार्यमिति विशेषलक्षणानुरोधेन भिन्नभिन्नवैजात्यस्वीकारे सङ्करः। एवमवयवसामान्य-लक्षणतयोक्तत्वेन तद्विशेषेऽपि सङ्कर इत्यर्थः। जातिस्वीकारो सङ्कीर्णेत्यादिः। ***अनुचित इति*** एव-ञ्चेदानीं प्रतिज्ञासामान्यलक्षणस्यानुक्तत्वेनाग्रे तल्लक्षणोक्तौ न पौनरुक्त्यमिति भावः ***कथञ्चिदिति*** तथा च मूलकृतामेव विस्मरणं पुनः कथनबीजं न तु तत्तत्पदमालोचयतां दीधितिकाराणामिति भावः।

## इति कृष्णम्भट्टीयेऽवयवलक्षणम्

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain, Digitization Muthulakshmi Research Academy



## अथ गदाधरीये प्रतिज्ञालक्षणं निरूप्यते

साध्यपदमनुमितिविधेयवाचकमित्यभिप्रायेण मणिकारदूषितं सूत्रकारीयप्रतिज्ञालक्षणं साध्यपदस्य प्रकृतानुमितिविधेयविशिष्टार्थपरतां स्वीकृत्य परिष्कर्तुमारभते। **साध्येति** सामान्यतो विधेयत्वस्य धर्मित्वस्य च केवलान्वयितयाऽवयवान्तरे विधेयविशिष्टधर्मिवोधकत्वमतिप्रसक्तम्। एवं प्रतिज्ञासमानाकारन्यायवहिर्भूतवाक्येऽपीत्यतः साध्यपदस्य तद्विशेषपरत्वं निर्देशपदस्य च वोधजनकन्यायावयवरूपवाक्यविशेषपरत्वमनुसृत्य पर्यवसितार्थमाह। **तथा चेति** पक्षतावच्छेदकसाध्यतावच्छेदकयोर्न तत्त्वेन विवेशः।

अपि तु विशिष्यैवेति सूचनाय पर्वतत्वादीति वह्नित्वादीति च। तादृशविशिष्टवैशिष्ट्या-वगाहिशाब्दवोधत्वावच्छिन्नजनकयत्किञ्चिज्ज्ञानीयवर्णसमुदायत्वमिह विवक्षणीयम्। अतो हेत्वर्थादिविषयकप्रतिज्ञार्थबोधजनकताया हेत्ववयवादिमात्रविषयकवोधसाधारण्येऽपि न हेत्व-

---

## अथ कृष्णम्भट्टीये प्रतिज्ञालक्षणं निरूप्यते

विषयो विधेयः। क्वचित्तथैव पाठः। *अवयवान्तरे* धूमादिति हेत्ववयवादौ तस्यापि हेतुत्वोद्देश्यकधूमविधेयकवोधादिजनकत्वात्। *तद्विशेषपरत्वम्* साध्यवत्पक्षपरत्वम्। वोधजनकेत्यत्र तदेकदेशे वोधे विषयितासम्वन्धेन साध्यवत्पक्षान्वयः। एवञ्च साध्यवत्पक्षविषयकवोधजनकत्वे सति न्यायावयवत्वमिति निष्कर्षः। *न तत्वेनेति* तथा सति न्यायत्वघटकप्रतिज्ञायां विशिष्यतन्निवेशे अप्यवयवान्तरेऽतिव्याप्तिः पक्षतावच्छेदकत्वादेः केवलान्वयित्वात्। *अतः* विशिष्टवैशिष्ट्यावगाहित्वावच्छिन्नजनकतानिवेशात्। *हेत्विति* तस्य प्रतिज्ञासहकारेण हेत्वादिजन्यत्वात्। इदन्तु बोध्यम्। परस्परव्यभिचारवारणाय कारणतानन्तर्यस्यावश्यकतया न विषयविषयित्वनिवेशसम्भवः। तादृशशाब्दत्वस्य न्यूनवृत्तेर्व्यापिकायाः कार्यतायाः निवेशे प्रथमेऽवयवान्तरे द्वितीये हेत्वर्थघटितप्रतिज्ञास्थलीयहेतावतिव्याप्तिः। तत्समनियतायास्साध्यविशिष्टपक्षेतरविषयकबोधावृत्तेर्वा तस्याः निवेशे चाप्रसिद्धिः। तादृशपक्षेतरविषयकत्वानवच्छिन्नायास्तस्याः निवेशे तु अवयवान्तरेऽतिव्याप्तिः। तज्जन्यताया अपि विषयविषयित्वानवच्छिन्नत्वात्। तादृशपक्षविषयित्वाघटकविषयिताशून्यबोधोक्तावपि हेत्वर्थभागघटितप्रतिज्ञादौ हेत्वादावतिव्याप्तिः। तस्माद्यादृशयादृशानुपूर्व्यवच्छिन्नज्ञानस्य प्रकृतसाध्यविशिष्टपक्षबोधकत्वं तत्तदुत्तरत्वावच्छिन्नजन्यतान्यतमजन्यतानिवेश्या। वस्तुतस्तु तादृशतादृशानुपूर्वीविषयितान्यतमविषयिताशालित्वेन जनकत्वोपगमान्न कारणानन्तर्यनिवेशप्राप्तिरिति तादृशविशिष्ट-वैशिष्ट्यावगाहिशाब्दत्वावच्छिन्नजन्यतानिवेशस्सम्यक्। नन्वेवमेकदेशार्थबुद्धित्वावच्छिन्नजन्यता-

In Public domain. Digitization Muthulakshmi Research Academy

वयवादावतिव्याप्तिः। न्यायान्तर्गतत्वमुपेक्ष्य न्यायावयवत्वनिवेशात् प्रतिज्ञार्थबोधजनक-प्रतिज्ञाहेत्वादिविषयकज्ञानमादाय प्रतिज्ञाहेत्वादिसमुदाये नातिव्याप्तिः। पक्षतावच्छेदक-विशिष्टत्वादिनिवेशनप्रयोजनमाह। ****उदाहरणाच्चेति****

यद्यपि साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानजनकत्वमात्रस्यैव निवेशे उपनय-निगमनयोरप्यतिव्याप्तिः। तथापि यत्किञ्चिद्धर्मविशिष्टे शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्य-ज्ञानजनकत्वनिवेशने, न तत्रातिप्रसङ्गः उपनयजन्यबोधे उपनयार्थव्याप्तिशरीरघटकसाध्यस्य धर्मितावच्छेदकाप्रवेशात्। निगमनजन्यबोधे च साध्यांशे हेतुज्ञानज्ञाप्यत्वस्याधिकस्य

---

वारणे नैकदेशवारणान्न्यायान्तर्गतत्वमेवास्त्वित्यत आह। ***न्यायेति*** ***प्रतिज्ञार्थेति*** पर्याप्तिनिवेशेन पर्वतो धूमाद्वह्निमानिति बोधवारणसम्भवात्। ***निगमनेति*** (न च मतुपो निरर्थकतया केवलनिगम-नान्नसाध्यविशिष्टवैशिष्ट्यावगाहिबोधसम्भवः। यद्यप्ययमादिनिगमनान्तभागेऽतिव्याप्तिस्सम्भवति। तथापि अनुषङ्गपक्षानुरोधेन विशेष्यवाचकपदान्योपनयनिगमनघटकभागद्वयाघटितत्वस्य वाच्यत्वात्। वस्तुतस्तु एतदवयवत्वशरीरे प्रतिज्ञाहेतूभयघटकभागद्वयाघटितत्वमात्रं निवेश्यम्। नत्वन्यत्। तथा च पक्षतावच्छेदकनिवेशेऽपि अनुषङ्गपक्षे एतद्दोषतादवस्थ्यात् नेदानीं तदतिव्याप्तिरुद्भावयितुं शक्येति वाच्यम्। अननुषङ्गपक्ष एव तस्या उक्तत्वात्। तत्रोपनयार्थधर्मिकनिगमनार्थसाध्यवैशिष्ट्यावगाहि-तज्जनकत्वस्य उपनयसाधारण्येऽपि न्यायावयवत्वविशेषितं तादृशजनकत्वं निगमन एवेति नाति-व्याप्तिः। इदानीञ्च तथाविधयत्किञ्चिज्ज्ञानविषयवर्णसमुदायत्वं न विवक्षितमित्याशयः। यद्वा मतुप्सार्थ-क्यमते निगमनेऽतिव्याप्त्यभिधानम्। अन्यथा पक्षतावच्छेदकान्तर्भावेऽपि अनुषङ्गपक्ष इति पङ्क्ति-सूचननैरर्थक्यापत्तेः। अथवा मतुप्सार्थक्यमते प्रतिज्ञायां व्याप्त्यंशे साध्यस्य यादृशं विशेषणत्वं तादृश-विशेषणत्वलाभात्। परन्तु समाधाने किञ्चिद्धर्मविशिष्टे साध्यविशेषणत्वमात्रनिवेशः न तु प्रतिज्ञा साध्यस्य यादृशं विशेषत्वं तन्निवेशः। मतुप्सार्थक्येऽपि निगमनेऽतिव्याप्त्यसत्त्वेन शुद्धत्ववैयर्थ्यात्। एतल्लक्षणे साक्षात्परम्परासाधारणप्रकृतपक्षविषयत्वेन साध्यविषयत्वन्तु न निविष्टम्। मतुप् निरर्थक-तायामेव अनिर्भरात्। अन्यथा तथाविधविशेषणत्वेनेत्युक्तौ वा उपनयवारणाय किञ्चिद्धर्मविशिष्टेत्यस्य वैयर्थ्यापत्तेरिति ध्येयम्)। अननुषङ्गपक्षे। अन्यथात्वयमादिनिगमनान्तभागेऽनुषङ्गपक्षानुरोधेन विशेष्य-वाचकपदान्योपनयनिगमनोभयघटकभागद्वयाघटितत्वस्य वाच्यत्वात्। वस्तुतस्तु एतन्न्यायावयवत्व-शरीरे प्रतिज्ञाहेतूभयघटकभागद्वयाघटितत्वमात्रं निवेश्यं नत्वन्यत्। लघुतरशुद्धत्वनिवेशे नैवैतद्दोष-स्य संवारत्वात्तेन मतुपो निरर्थकतया केवलनिगमनात्साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिबोधा-

In Public domain. Digitization: Muthulakshmi Research Academy

भानात्। अन्यथा पक्षतावच्छेदकान्तर्भावेऽप्यनुषङ्गपक्षेऽनिस्तारादित्युदाहरणमात्रानुसरणम्। तदप्युदाहरणजन्यबोधे व्यापकत्वं न विधेयतावच्छेदकघटकतया भासते। अपि तु शुद्धवह्नित्वाद्यवच्छिन्नमेव सकलहेत्वधिकरणे भासत इति प्राचीनमतमनुसृत्य निगमने अयं पदान-

---

जननेऽपि न क्षतिः। (*अनुषङ्गपक्ष इति* पक्षतावच्छेदकान्तर्भावेऽपि ज्ञानं जन्यं रुच्यक्रियात्वादित्यादौ ज्ञाप्यतायाः पञ्चम्यर्थत्वात्तत्र प्रकृतपक्षे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वेऽपि मुख्यविशेष्यतानिवेशेनापि हेतोरवारणात् न शुद्धत्वस्यावश्यकत्वमित्येतदनुधावनम्)। *व्याप्तीति* साध्याधिकरणत्वेन साध्ये नैव वा रूपेणाधिकरणस्य निवेशात्। साध्याभाववदवृत्तित्वरूपव्याप्तावभावरूपसाध्यधर्मितावच्छेदकप्रवेशाच्च। ननूदाहरणस्य व्यापकत्वेन साध्यबोधकतया शुद्धत्वनिवेशादेव वारणे किं पक्षतावच्छेदकनिवेशेनेत्यत आह। *तदपीति* *सकलेति* यत्तच्छब्दवशे नेत्यादिः। यत्र यावतां हेत्वधिकरणानां सम्भवः तत्र तावतां तेषां विभिन्नविषयतालाभार्थं यत्पदं विवक्षितं न तदर्थस्य महानसत्वादेरपि भानम्। नन्वत्र शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वं न तावत्साध्यतावच्छेदकनिष्ठनिरवच्छिन्नप्रकारतावच्छेदकताकत्वम्। तथा सति निगमनेऽतिव्याप्तेरवारणापत्तेः। तत्र ज्ञानज्ञाप्यत्वधर्मितावच्छेदकसाध्यतावच्छेदकनिष्ठावच्छेदकतायानिरवच्छिन्नत्वात्। नापि साध्यतावच्छेदकेतरधर्मानवच्छिन्नप्रकारताकत्वमुपनये च व्यापकतावच्छेदकसाध्यतावच्छेदकभावादेतदक्षतमिति यत्किञ्चिद्धर्मविशिष्ट इत्युक्तमिति वाच्यम्। तथा सति धूमवान् धूमव्यापकवह्निमानित्युदाहरणजन्यबोधमादायाप्यतिव्याप्तेस्सङ्गमयितुं शक्यतया पक्षतावच्छेदकनिवेशेन तत्परिहारस्य सुकरतया च प्राचीनमतानुधावनासङ्गतेरिति चेत्। अत्र केचित्। साध्यतावच्छेदकताविशिष्टप्रकारताकत्वं तद्विवक्षितम्। वैशिष्ट्यञ्च। स्वपर्याप्त्यनवच्छेदकधर्मावच्छिन्नावच्छेदकत्वानिरूपकत्वस्वसामानाधिकरण्यावच्छेदकतानिरूपकत्वोभयसम्बन्धेन। स्वं साध्यतावच्छेदकता, निगमने च स्वपर्याप्त्यनवच्छेदकधर्मो ज्ञाप्यत्वमेवेति नातिव्याप्तिः। साध्यतावच्छेदकेतरधर्मानवच्छिन्नसाध्यप्रकारताकत्वनिवेशे लाघवेऽपि प्रकृतपक्षनिवेशविद्वेषिभिरुदाहरणे व्यापकतावच्छेदकत्वविशिष्टसाध्यतावच्छेदकभानमते तद्वारणार्थमगत्या गौरवस्याप्यङ्गीकारान्निरवच्छिन्नसाध्यतावच्छेदकत्वान्यावच्छेदकत्वानिरूपकप्रकारतानिवेशासम्भवाच्च। एवञ्चोदाहरणेऽतिव्याप्तिसङ्गमनार्थं प्राचीनमतानुसरणमावश्यकमिति। हेत्वधीनस्य हेतुत्वं धूमीयमिति बोधस्य वारणाय द्वितीयसम्बन्धनिवेशः। एतेन पर्वतो ज्ञानविषयवानित्यादिस्थलीयनिगमनेऽतिव्याप्तिः। साध्यतावच्छेदकविषयत्वस्य विषयतात्वेनैव भानात्। अवच्छेदकत्वानिरूपकत्वदले साक्षात्परम्परासाधारणावच्छेदकतानिवेशेन प्रकारतायास्तादृशजन्यतादिधर्मावच्छिन्नावच्छेदकतानिरूपकत्वेन तदतिव्याप्तिवारणे च पर्वतो वह्नित्वावच्छिन्नवानिति प्रतिज्ञायां वह्निप्रकारतायास्तादृ-

In Public domain. Digitization Muthulakshmi Research Academy

शावहित्वत्वघटकधर्मावच्छिन्नावच्छेदकत्वनिरूपकत्वादव्याप्तिः। स्वानवच्छेदकेत्यत्रापि साक्षात्परम्परा-साधारणावच्छेदकतानिवेशे तु पर्वतो धूमज्ञानज्ञाप्यवान् धूमादित्यादिस्थलीयनिगमनेऽयं पदानुषङ्ग-पक्षेऽतिव्याप्तिर्दुर्वारैवेति प्रत्युक्तम्। तादृशव्याप्त्याद्यवच्छिन्नावच्छेदकतानिरूपकत्वात्। साध्यतावच्छे-दकतापर्याप्त्यनवच्छेदकधर्मावच्छिन्नावच्छेदकत्वानिरूपकसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्वं शुद्ध-साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वमित्यर्थः। यत्तु शुद्धत्वादेरवच्छेदकताविशिष्टान्यसाध्यताव-च्छेदकनिष्ठावच्छेदकताकप्रकारत्वमर्थः। अवच्छेदकतावैशिष्ट्यञ्च स्वनिरूपितप्रकारतानिरूपितत्वस्व-भिन्नत्वोभयसम्बन्धेन तेनोपनयवारणमुपनये व्यापकतावच्छेदकत्वेन साध्यतावच्छेदकभानादतो यद्धर्म-विशिष्टेत्यस्य सार्थक्यमिति। तन्न। उदाहरणे तथैव साध्यतावच्छेदकभानेनातिव्याप्तिसङ्गतेः प्राचीन-मतानुधावनं व्यर्थं स्यात्। यदि च तत्र व्यापकत्वधर्मितावच्छेदकतया तद्भानं प्रतियोगिताधर्मिको नाभावकत्वमालम्ब्य ब्रूयात्। तदोपनयेऽपि तथा भानाद्यत्किञ्चिद्धर्मविशिष्टेत्यस्य वैयर्थ्यम्। वस्तुतस्त-त्रापि हेतुमत्यभावप्रतियोगिसामान्याभावीयसाध्यताघटकसम्बन्धावच्छिन्नव्यापकतावच्छेदकत्वनिष्ठ-प्रतियोगिताश्रयावच्छेद्यताकत्वरूपदलस्यैव निवेशेनेति। अन्ये तु निरवच्छिन्नसाध्यतावच्छेदकनिष्ठा-वच्छेदकत्वान्यावच्छेदकत्वानिरूपकप्रकारत्वादिविवक्षणान्नकोऽपि दोष इत्याहुः। तन्न। यत्किञ्चिद्धर्म-विशिष्टेत्यस्य वैयर्थ्यापातात्। नन्वेवमुपनयार्थस्य व्यापकसामानाधिकरण्यरूपव्याप्तिघटिततया व्यापकतावच्छेदकतायास्साध्यतावच्छेदकांशविशेषणत्वेन शुद्धत्वनिवेशादेवोपनयस्यापि वारणासम्भ-वाद्यत्किञ्चिद्धर्मिविशिष्टेत्यस्य वैयर्थ्यम्। न चाननुषङ्गपक्षे शुद्धत्वस्य त्याज्यतया तत्पक्षे उपनय-वारणार्थमेव तदावश्यकमुपनयस्य पक्षद्वयेऽपि वारणीयत्वादिति वाच्यम्। अग्रे तत्त्यागस्य चिन्तनीय-ताभिधानादिति चेन्न। उपनयार्थे साध्यपदन्यावृत्तित्वरूपव्याप्तिर्घटिकेत्यभिप्रायेण तदुपादानात् (न तु साध्याभाववदवृत्तित्वरूपाव्याप्तिरभावत्वरूपसाध्यधर्मितावच्छेदकप्रवेशादनुयोगितायामेव साध्यीयत्व-निवेशाच्च हेतुत्वं प्रमेयं प्रमेयादित्यादौ हेतुवारणाय साध्यतावच्छेदकसम्बन्धस्य निवेशनीयत्वात्)। उपनयार्थे साध्यसम्बन्धितावच्छेदकरूपवत्त्वव्याप्तिर्घटिकेति केचित्। नन्वेवं विपक्षव्यावृत्तत्वस्योदा-हरणार्थतायाः पूर्वमभिधानेन साध्यवदन्यावृत्तित्वस्यैवोदाहरणार्थघटकतासम्भवाद्भट्टाचार्याणां प्राचीन-मतरीत्योदाहरणं व्यर्थमिति चेन्न। उदाहरणार्थे व्याप्तिर्न घटिका किन्तूपनयार्थे एव तत्र तद्भाने धूमवान् वह्निमद्भिन्नो न वेति संशयापसरणार्थं विशिष्योपस्थितसकलहेत्वधिकरणे वह्निमत्ताबोध आवश्यक उदाहरणार्थे व्याप्तिप्रवेशे तद्भानार्थमुक्तबोधस्यान्यतोऽपेक्षणीयतापत्तेरिति प्राचीनमतादरणं सम्यगेव। यद्यपि वह्निमत्कालीनपर्वतपक्षके उपनयार्थे व्यापकसामानाधिकरण्यरूपव्याप्तिभानेऽपि यत्किञ्चिद्धर्मविशिष्टेत्यस्य सार्थक्यम्। न च साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितमुख्यविशेष्य-

In Public domain. Digitization Muthulakshmi Research Academy


त्वावच्छिन्नत्वपर्यन्तनिवेशेन तत्प्रयोजनं गतार्थं न तु विशेष्यतायां किञ्चिद्धर्मावच्छिन्नत्वपर्यन्तस्येत्याशय इति वाच्यम्। तथा सति साध्यवदन्यावृत्तित्वरूपव्याप्तिभानेऽपि तावत्पर्यन्तं प्रयोजनालाभात्। तथापि प्रसिद्धस्थले दर्शितव्याप्तिनिवेशेनैव प्रयोजनमिति बोध्यम्। वह्निमन्महानसकालीनपर्वतपक्षकोपनये त्वगतिरेव। महानसत्वावच्छिन्ने शुद्धवह्नित्वावच्छिन्नप्रकारकबोधजनकत्वात्। यदि च यत्किञ्चिद्धर्मविशिष्टे साध्यतावच्छेदकावच्छिन्नप्रकारतायां धर्मितावच्छेदकतान्यत्वविशेषणं, साध्यस्य हेत्वादिविशेषणत्वे व्याप्तिधर्मितावच्छेदकत्वेन वारणं, तथा च कोपनयेऽगतिरित्युच्यते तदा विशेषणान्तरपूरणम्। यद्वा व्यापकसामानाधिकरण्यरूपव्याप्तेर्नक्वाप्युपनयार्थघटकता तथाचोपनयसामान्येनातिव्याप्तिरित्याशयः।वस्तुतस्तु यत्किञ्चिद्धर्मावच्छिन्नत्वेन निर्भरः निर्भरस्तु मुख्यत्व एव। एवञ्चोपनये साध्यवदन्यावृत्तित्वभानेन वह्निमन्महानसस्य पक्षघटकत्वे वा न क्वापि दोष इति। केचित्तु। दीधितावुदाहरणसामान्ये पक्षतावच्छेदकसाध्यनिवेशप्रयोजनं दर्शितम्। तदुपर्युपनयार्थे व्यापकसामानाधिकरण्यस्यैव प्रवेशेऽपि भेदः प्रतियोगितासम्बन्धेन वह्निमानित्यत्रैवोपनये व्यापकतावच्छेदकवह्नित्वभाने दर्शितावच्छेदकघटकवह्नीतरावृत्तित्वे स्वरूपतो वह्नित्वभानात्साध्यतावच्छेदकसम्बन्धावच्छिन्नशुद्धसाध्यतावच्छेदकावच्छिन्नप्रकारतासत्त्वादतिव्याप्तिमाशङ्क्य यत्किञ्चद्धर्मविशिष्टेति निवेश्य समाधीयते। तथा च संयोगेन वह्न्यादिसाध्यकोपनयसामान्ये साध्यतावच्छेदकसम्बन्धेन शुद्धसाध्यतावच्छेदकावच्छिन्नप्रकारताविरहेणातिव्याप्त्यसत्त्वेऽपि न क्षतिरित्याहुः।

अत्र वदन्ति। उपनयवाक्याद्व्यापकत्वस्य व्यापकतावच्छेदकत्वविशिष्टसाध्यतावच्छेदकस्य भानेऽपि साध्यतावच्छेदकपर्याप्तावच्छेदकताकसाध्यप्रकारताकबोधजनकत्वं तत्रास्त्येव व्यापकतावच्छेदकताया अवच्छेदकतावच्छेदकत्वात्। उदारहरणवाक्यात्तादृशव्यापकत्वभानेऽपि पक्षतावच्छेदकनिवेशेनैव तद्वारणमिति प्राचीनमतानुसरणं व्यर्थमिति। वस्तुतस्तु तादात्म्येन साध्यसाधनभावस्थलीयद्रव्यवद्व्याप्यधूमवानयमित्युपनयवारणाय यत्र यादृशं साध्यतावच्छेदकं तत्र तादृशसाध्यतावच्छेदकपर्याप्तप्रकारतावच्छेदकताकबोधत्वमेव शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिबोधत्वं वाच्यम्। तथा च प्राचीनमतानुसरणमावश्यकमिति। केचित्तु महानसं तद्भिन्नं च धूमवद्वह्निमच्चेतिबोधः परन्तु नव्यमतेऽभेदेन सम्बन्धिनः प्रकारत्वान्नातिव्याप्तिरतः प्राचीनेत्युक्तमित्याहुः। साध्यसम्बन्धे स्वरूपसम्बन्धरूपं हेतुमत्त्वावच्छेद्यत्वं भासत इत्यर्थमप्याहुः। पक्षतावच्छेदकावच्छिन्नेत्यस्यानिवेशे यत्किञ्चिद्धर्मावच्छिन्ने साध्यतावच्छेदकावच्छिन्नसाध्यावगाहित्वनिवेशे साध्ये शुद्धत्वानिवेशेऽपि निगमनेऽनुषङ्गपक्षे नातिव्याप्तिरननुषङ्गपक्षस्यावलम्बनीयत्वात्। केवलनिगमनाच्छाब्दबोध एव न जायते निर्दर्शितावच्छेदकशाब्दबोधानङ्गीकारात्। पर्वतो वह्निमानित्यादिप्रतिज्ञादौ मतुपो

In Public domain. Digitization Muthulakshmi Research Academy

नुषङ्गपक्षे शुद्धसाध्यतावच्छेदकविशिष्टत्वं न निविष्टं विशेषणान्तरावच्छिन्नवह्न्यादिसाध्यक-न्यायान्तर्गतप्रतिज्ञायां शुद्धवह्नित्वावच्छिन्नसाध्यकप्रतिज्ञालक्षणातिप्रसक्तेः प्रकृतन्यायान्तर्गतत्वाभावेनैव वारणादित्यभिप्रायकमिदम्। अतो व्यापकत्वस्याधिकस्योदाहरणजन्यबोधे भानेऽपि न क्षतिरिति केचित्। तन्मते निगमनोपेक्षाबीजं चिन्तनीयम्। यत्तत्पदस्योदाहरण-स्थस्य न पक्षतावच्छेदकावच्छिन्नपरत्वम्।

अपि तु पक्षान्यसाध्यवत्साधारणरूपावच्छिन्नपरत्वमेव पक्षतावच्छेदकावच्छिन्ने हेतु-मत्त्वस्य ततो लाभे उपनयानुत्थानात्तदवच्छिन्ने साध्यवत्त्वस्य च प्रतिज्ञात एवं लाभेनानाकाङ्क्षितत्वाच्चेति पक्षतावच्छेदकप्रवेशे नोदाहरणातिप्रसङ्गः। अत्र यत्किञ्चिद्धर्मावच्छिन्न-

---

निरर्थकत्वेऽपि पर्वतपदेन भेदाकाङ्क्षानिर्वाहात्तत्र शाब्दबोधोपपत्तेरित्युदाहरणमात्राभिधानमिति वदतां मतमाह। *निगमन इति* शुद्धत्वानिवेशे पर्वत आर्द्रेन्धनप्रभववह्निमानिति वाक्येऽतिव्याप्तिमाशङ्क्य निराकरोति। *विशेषणान्तरेति* *प्रतिज्ञायामिति* न च तत्र यो यो धूमवान् स आर्द्रेन्धनप्रभववह्निमानित्युदाहरणं वाच्यम्। तथा च नातिव्याप्तिः। यद्रूपावच्छिन्नसाध्यकोदाहरणादिघटितन्यायान्तर्गतत्वं शुद्धतद्रूपविशिष्टवैशिष्ट्यावगाहिबोधजनकत्वरूपप्रतिज्ञालक्षणे शुद्धत्वानिवेशेऽप्यक्षतेरिति वाच्यम्। पर्वत आर्द्रेन्धनप्रभववह्निमान् धूमात् यो यो धूमवान् सवह्निमानित्यादिपञ्चवाक्यान्तर्गत-प्रथमवाक्यस्य प्रतिज्ञापदेनोक्तत्वात्। *प्रकृतेति* तद्धर्मावच्छिन्नसाध्यकोदाहरणादिघटितन्यायशरीरे शुद्धतद्धर्मावच्छिन्नवैशिष्ट्यावगाहिबोधजनकवाक्यत्वरूपप्रतिज्ञात्वनिवेशात्। तादृशन्यायान्तर्गतत्वा-भावेनेत्यर्थः। तावतैव वातिप्रसङ्गवारणाद्दलान्तरे शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वनिवेशो व्यर्थ इति भावः। *चिन्तनीयमिति* अननुषङ्गपक्षे केवलनिगमनान्न शाब्दबेधः। किन्तूपनयार्थेन सममेवेति निगमनेऽप्यतिव्याप्तिस्सम्भवाद्दीधितिकाराणामुदाहरणमात्रानुसरणमनर्थकमेव एवमननुषङ्ग-पक्षे केवलनिगमनाद्धूमाद्वह्निरित्येवं शाब्दबोधः। मतुप्सार्थक्यसम्प्रदायानुसारेण तथाप्युपनयार्थधर्मिक-स्वार्थबोधव्यक्तिमादाय निगमनेऽतिव्याप्तिः। यद्यप्युपनयविषयज्ञानस्यैव हेतुता तथापि उपनय-ज्ञानान्तरनिगमनज्ञानमादायातिव्याप्तिर्भवत्येवेति चिन्ताबीजं बोध्यम्। साधारणं रूपं साकल्यं तच्च तत्समानाधिकरणीभूतयावद्धर्माश्रयत्वं हेतुमत्त्वं वा यथामतं बोध्यम्। *उपनयेति* व्याप्यः पक्षे नवेत्याकाङ्क्षा विरहात्। *अनाकाङ्क्षितत्वादिति* को वह्निमानित्याकाङ्क्षाया असम्भवात्। शब्दजनकतामते पक्षतावच्छेदकप्रवेशवैयर्थ्यं शङ्कते। *अत्रेति* न च जनकतायाः प्रत्येकपर्यवसायितया तादृशजनकताश्रयवर्णत्वव्यापकसमुदायत्वं विवक्षणीयं तथाचोदाहरणातिव्याप्तिर्दुर्वारैव स्वनिष्ठन्यूनवृत्तित्वा-

In Public domain. Digitization Muthulakshmi Research Academy



विशेष्यकसाध्यतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नजनकत्वमुदाहरणैकदेशे स वह्निमानित्यादिवाक्य एव, न तु तस्य न्यायावयवत्वं, तच्च समुदाय एव, न तत्र तादृश-जनकत्वमिति विशिष्य पक्षतावच्छेदकानन्तर्भावेऽपि नोदाहरणातिप्रसङ्ग इति नाशङ्कनीयम्। जनकत्वस्य जनकयत्किञ्चिज्ज्ञानविषयवर्णसमुदायत्वरूपस्य विवक्षितत्वात्। उदाहरण-समुदायविषयकज्ञानमादायोदाहरणसमुदाय एवातिप्रसक्तेः।

---

निरूपकत्वनिवेशेन तद्वारणे तु उभयघटकेत्यादिविशेषणवैयर्थ्यापातादिति वाच्यम्। उभयघटकेत्यादि-विशेषणस्य त्याज्यत्वात्। अत एव समाधाने तन्निवेशयिष्यति। एतन्मते यत्किञ्चित्त्वाद्य निवेश एवेत्यसम्भवो न वाच्यः। ज्ञायमानशब्दस्य हेतुत्वादतस्तदप्रामाणिकत्वाभिप्रायेण समाधत्ते। *जनकत्वस्येति* तादृशवर्णवृत्तिसमुदायत्वमर्थः। न तु तादृशवर्णत्वसमनियतसमुदायत्वमुभय-घटकेत्यादिविशेषणेन प्रतिज्ञाहेत्वादिसमुदायस्यैकदेशस्य प्रतिज्ञात्वघटकत्वेन च वारणात्। यत्किञ्चित्त्वञ्च प्रत्येकं प्रतिज्ञाव्यवहारसिद्धये अन्यथा समानानुपूर्वीकसकलप्रतिज्ञासु एकजनकताश्रय-ज्ञानविषयतयैकप्रतिज्ञाव्यवहारापत्तेः। *अतिप्रसक्तेरिति* तद्वारणाय च पक्षतावच्छेदकावच्छिन्नत्व-निवेश आवश्यक इति शेषः। अथैतत्कल्पे उभयघटकभागद्वयाघटितत्वं व्यर्थं समानानुपूर्वीकप्रतिज्ञा-द्वयगतसमुदायत्वावच्छिन्नेति प्रसङ्गवारणाय तादृशयत्किञ्चिच्छाब्दत्वावच्छिन्नकार्यतानिरूपितकारण-ताश्रयीभूतयत्किञ्चिज्ज्ञानविषयितानिरूपकवर्णसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वस्यावश्यकतया तेनैव प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिवारणसम्भवात्। प्रतिज्ञामात्रजन्यबोधीय कारणताश्रयीभूत-यत्किञ्चिज्ज्ञानविषयितानिरूपकवर्णसमुदायत्वनिष्ठन्यूनवृत्तिनिरूपकत्वस्यैव प्रतिज्ञाहेतुसमुदायत्वे सत्त्वात्। न च तर्ह्युभयघटकभागद्वयाघटितत्वं न दीयतामिति वाच्यम्। तथा सति पक्षतावच्छेदक-निवेशवैयर्थ्यात्। किञ्चिद्धर्मानवच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकशाब्दबोधत्वावच्छिन्न-कार्यतानिरूपितकारणताश्रयीभूतयत्किञ्चिज्ज्ञानीयविषयितानिरूपकवर्णसमुदायत्वस्य स वह्निमानिति समुदायनिष्ठन्यूनवृत्तित्वनिरूपकताया उदाहरणगतसमुदायत्वे सत्त्वात्। इत्थञ्च जनकत्वस्येत्याद्यति-प्रसक्तेरित्यन्तसन्दर्भासङ्गतिः। न च निरुक्तावयवत्वरूपं यत्तादृशशाब्दत्वावच्छिन्नजन्यतानिरूपित-जनकताश्रयीभूतयत्किञ्चज्ज्ञानविषयितानिरूपकवर्णसमुदायत्वं तन्निष्ठन्यूनवृत्तित्वानिरूपकत्वनिवेशा-न्नासङ्गतिः। स वह्निमानिति समुदायत्वे निरुक्तावयवत्वरूपत्वाभावेन तथाविधसमुदायत्वनिष्ठन्यून-वृत्तित्वानिरूपकत्वस्योदाहरणे सत्त्वेन पक्षतावच्छेदकनिवेशावश्यकत्वादिति वाच्यम्। न्यायावयव-त्वात्मकं तादृशसमुदायत्वविशेषणं प्रवेश्य तन्निष्ठन्यूनवृत्तित्वानिरूपकत्वेनातिव्याप्तिं सम्पाद्य पुनस्त-

In Public domain. Digitization Muthulakshmi Research Academy

द्वारणाय पक्षतावच्छेदकनिवेशस्य प्रक्षालनाद्धीति[13] न्यायपराहतत्वात्। तथाविधैकदेशत्वनिष्ठन्यूनवृत्तितानिरूपकतयाऽसम्भवस्य वर्णत्वव्यापकत्वविवक्षयैव वारणाच्च। प्रतिज्ञामात्रघटकतानवच्छेदकं यत्तादृशसमुदायत्वं तन्निष्ठन्यूनवृत्तित्वानिरूपकत्वं वाच्यम्। न च पक्षतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्नप्रकारकयत्किञ्चिच्छाब्दबुद्धित्वावच्छिन्नकार्यतानिरूपितकारणताश्रयीभूतयत्किञ्चज्ज्ञानीयविषयितानिरूपकवर्णसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वमेव न्यायावयवत्वं तथा च न सन्दर्भा-सङ्गतिरिति वाच्यम्। दीधितिकृतैव प्रतिज्ञाहेतू इत्यादिना स्वयमुभयपदार्थस्य दर्शितत्वात्। वस्तुतस्तूभयघटकेत्यादिविशेषणं नैव प्रवेश्यते किन्तु किञ्चिद्धर्मावच्छिन्ने साध्यतावच्छेदकावच्छिन्नप्रकारकयत्किञ्चिच्छाब्दबुद्धित्वावच्छिन्नकार्यतानिरूपितकारणताश्रयीभूतयत्किञ्चिज्ज्ञानीयविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वरूपलघुतरविशेषणमेव, तेनैव सकलदूषणवारणात्। एतेन प्रतिज्ञाद्वयात्मकसमुदाये प्रतिज्ञात्वव्यवहारेण तस्यापि लक्ष्यतया तद्वारणाय तादृशविशेषणं न देयमिति समाधानं परास्तम्। अत्रेदं समाधानम्। तथा सति वह्निमन्महानसकालीनपर्वतो वह्निमानिति प्रतिज्ञायामव्याप्तिः यत्किञ्चद्धर्मावच्छिन्नविशेष्यकवह्नित्वावच्छिन्नप्रकारकशाब्दत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयीभूतयत्किञ्चज्ज्ञानीय विषयतानिरूपकवर्णसमुदायत्वव्यापकं वह्निमन्महानसमिति समुदायत्वं तन्निष्ठन्यूनवृत्तितानिरूपकत्वस्य तादृशप्रतिज्ञात्वे सत्त्वात्। तद्घटकीभूतशाब्दबोधे पक्षतावच्छेदकावच्छिन्नविशेष्यकत्वनिवेशेऽपि वह्निमत्पर्वतकालीनपर्वतो वह्निमानिति प्रतिज्ञायामव्याप्तिरतोऽनिरूपकत्वान्तं परित्यज्य उभयघटकेत्यादिविशेषणघटितन्यायावयवत्वनिवेशे उदाहरणे अतिव्याप्तेः पक्षतावच्छेदकानुसरणसङ्गतिरिति। (यद्वा उक्तातिव्याप्तिवारणाय निरूपकत्वान्तघटकशाब्दबोधे पक्षतावच्छेदकावच्छिन्नविशेष्यकत्वोपादानात्सवह्निमानिति भागवृत्तिसमुदायत्ववारणादुदाहरणातिव्याप्तिसङ्गतिरनिरूपकत्वान्तप्रवेशाच्च प्रतिज्ञाद्वयव्युदास इति)। नन्वत्र भट्टाचार्यैर्जनकताश्रययत्किञ्चज्ज्ञानमेवोक्तं तथा च तेषां विषयितायां तादृशजनकतावच्छेदकतापर्यन्तं न विवक्षिणीयं प्रयोजनाभावादित्यभिप्रायो लक्ष्यते। इदन्तु चिन्त्यते। प्रतिज्ञासहकारेणावयवान्तरस्यापि तादृशशाब्द-बोधत्वावच्छिन्नजन्यतानिरूपितजनकताश्रयीभूतसमूहालम्बनज्ञानविषयतया हेत्ववयवेऽतिव्याप्तिरतो विषयितायां जनकतावच्छेदकत्वमावश्यकं तादृशजन्यतानिरूपितजनकतावच्छेदकविषयिता च प्रतिज्ञानिरूपिता न हेत्ववयवनिरूपितेति न तत्रातिप्रसङ्गः। इत्थञ्च पक्षतावच्छेदकानिवेशेऽपि नोदाहरणेऽतिव्याप्तिः। किञ्चद्धर्मावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकशाब्दत्वावच्छि-

13. प्रक्षल्नाद्धि पङ्कस्य दूरादस्पर्शनं वरम्।

In Public domain. Digitization Muthulakshmi Research Academy



न्नजन्यतानिरूपितोदाहरणज्ञाननिष्ठजनकतायां स वह्निमानित्येकदेशविषयितैवावच्छेदिका न तूदाहरण-विषयतेति तादृशविषयितानिरूपकवर्णत्वे सति समुदायत्वस्य तत्राभावात्, एवं सत्युभयघटकेत्यादि-विशेषणं त्यज्यतां, यद्वा तादृशविषयितानिरूपकवर्णसमुदायत्वप्रवेशे उदाहरणत्वस्य तादृशवर्णवृत्तित्वे नातिव्याप्तिरिति साध्यसाधनविशिष्टधर्मिबोधकवाक्यद्वयघटकभागाघटितत्वमपि विशेषणं तथा सति जनकतावच्छेदकत्वपर्यन्ताविवक्षणेऽप्युदाहरणवारणादिति चेत्। अत्र केचित्। जनकतावच्छेदकत्वं विषयितायां न देयमेव किन्तु यत्किञ्चज्ज्ञानत्वेनावयवान्तराविषयकज्ञानमेव ग्राह्यं तेन हेत्ववयवे नातिव्याप्तिरित्याहुः। तत्तुच्छम्। तथा सत्युदाहरणज्ञानस्याप्यवयवान्तरविषयकत्वाद्यत्किञ्चिज्ज्ञान-शब्देनाग्रहणादेवातिव्याप्तिवारणे पक्षतावच्छेदकवैयर्थ्यस्य वज्रलेपत्वात्। अवयवान्तरशब्देन हेतुरेव गृह्यते नोदाहरणमित्येकशेषस्य कर्तुमशक्यत्वात्। उभयघटकेत्यादिविशेषणवैयर्थ्यापाताच्च वस्तुतस्तु प्रतिज्ञाभेदोदाहरणभेदद्वयानुयोगितावच्छेदकान्यत्वमेव प्रतिज्ञाद्यघटकत्वमिति न दोषः। अन्ये तु जनकतावच्छेदकत्वं न प्रवेश्यमेव। किन्तु हेत्ववयववारणाय तादृशजनकताश्रययत्किञ्चिज्ज्ञानीय-संसर्गतान्यविषयतापर्याप्त्यधिकरणपर्याप्तसमुदायत्वमेव विवक्षणीयम्। प्रतिज्ञाद्यघटकत्वन्तु प्रतिज्ञाद्य-घटकतानवच्छेदकतानवच्छेदकतत्तत्समुदायत्वभिन्नधर्मवत्त्वं मतङ्गजो नील इति प्रतिज्ञाघटकगजो नील इति भागप्रतिज्ञैकदेशप्रतिज्ञोभयसमुदायवारणायोभयघटकेत्यादिविशेषणसाफल्यमुदाहरणाति-व्याप्तिश्च यथास्थितैवेति उदाहरणघटकभागद्वयाघटितत्वमुपेक्ष्य लाघवात्पक्षतावच्छेदकनिवेश इत्याहुः। जनकतावच्छेदकत्वं विषयितायां हेतुवारणाय निवेश्यम्। तादृशविषयितानिरूपकवर्णवृत्ति-समुदायत्वपक्षे उभयेत्यादिविशेषणसार्थक्यमित्यपि केचित्। अत्रोपाध्यायाः। प्रतिज्ञासहकारेणावयवा-न्तरस्यापि तादृशबोधजनकत्वात्तत्रातिव्याप्तिवारणाय पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छे-दकावच्छिन्नप्रकारकशाब्दबोधत्वावच्छिन्नकार्यतानिरूपितकारणता यादृशानुपूर्वीप्रकारकज्ञानत्वेनाव-च्छिद्यते अवयवतावच्छेदकतादृशानुपूर्वीमत्त्वं प्रतिज्ञात्वमित्येव सूत्रार्थोऽभ्युपेयः। अत्रावच्छेदकत्व-मनतिरिक्तवृत्तित्वम्। पर्वतो वह्निमान् पर्वतो दहनवानित्यादिवाक्यज्ञानानां विभिन्नकारणतापक्षे एकैका-नुपूर्वीप्रकारकज्ञानत्वस्याव्यापकतयाऽसम्भव इत्यत एक कारणतापक्षोऽवलम्बनीयः। तथा च निगम-नानुपूर्वीसाधारणान्यतमप्रकारकज्ञानत्वस्य प्रकृतपक्षे प्रकृतसाध्यप्रकारकशाब्दबोधजनकताव्यापक-तयानिगमनेऽतिव्याप्तिरतो नातिरिक्तवृत्तित्वनिवेशः। तथा च प्रतिज्ञामात्रवृत्तिसकलानुपूर्व्यन्यतम-प्रकारकज्ञानत्वस्य तत्समनियततया तादृशान्यतमवत्त्वमादाय लक्षणसमन्वयः। पक्षतावच्छेदका-निवेशे निगमने यत्किञ्चिद्धर्मावच्छिन्ने साध्यतावच्छेदकावच्छिन्नप्रकारकशाब्दबोधत्वावच्छिन्नकारण-तायास्सत्त्वेन प्रतिज्ञाज्ञानत्वासत्त्वेन वाऽसम्भव इत्यतः पक्षतावच्छेदकप्रवेशः। एवं साध्यतावच्छेदका

In Public domain. Digitization Muthulakshmi Research Academy

-नुसरणस्यापि कृत्यं बोध्यम्। अनुषङ्गपक्षे तु शुद्धसाध्यतावच्छेदकावच्छिन्नप्रकारकत्वमावश्यकं तेन निगमनज्ञानमादाय नासम्भवः। अथवा अवच्छेदकत्वं स्वरूपसम्बन्धविशेष एव परन्त्वन्यूनानतिरिक्त -वृत्तिधर्म एव स्वीक्रियते एवञ्च पक्षतावच्छेदकाद्यननुसरणे प्रतिज्ञानुपूर्वीप्रकारकज्ञानत्वापेक्षया तादृश-कारणताया अतिप्रसक्तत्वेन तत्र स्वरूपसम्बन्धरूपावच्छेदकत्वं न सम्भवतीत्यसम्भववारणाय तदनु-सरणमित्याहुः। अत्रेदं द्रष्टव्यम्। न्यायावयववत्त्वमत्रन्यायान्तर्गतत्वे सति प्रतिज्ञाद्यघटकत्वमात्रं न तूभयघटकभागद्वयाघटितत्वं प्रयोजनाभावात्प्रतिज्ञाहेतुसमुदायनिष्ठानुपूर्वीप्रकारकज्ञानत्वस्य तादृश-कारणतान्यूनवृत्तित्वे नानवच्छेदकतयाऽतिव्याप्तेरभावात् तादृशकारणतायाः प्रतिज्ञामात्रज्ञानेऽपि सत्त्वात् प्रतिज्ञाऽघटकत्वमपि मतङ्गजो नील इति प्रतिज्ञैकदेशवारणाय (वाच्यं तदतिक्लिष्टमन्यतमत्व-प्रकारकज्ञानत्वनिवेशाद्गजो नील इत्यानुपूर्व्या अन्यतमान्तर्गततयातद्भेदविरहात्। केचित्तु दर्शित-रीत्या निष्कर्षे अवच्छेदकत्वमन्यूनवृत्तित्वमात्रं विभिन्नकारणतापक्षे एकैककारणता एकैकानुपूर्वी-प्रकारकज्ञानत्वव्याप्त्यैव मतङ्गजो नील इति प्रतिज्ञायां गजो नील इति भागज्ञानेऽपि तादृशकारणता-यास्सत्त्वेन तत्र मतङ्गजो नील इति प्रतिज्ञामात्रवृत्त्यानुपूर्वीप्रकारकज्ञानत्वस्यासत्त्वादव्याप्तिरिति तद्वारणं प्रबलसाध्यमिव भातीत्याहुरिति दिक्।) एवमपि मतङ्गजो नील इति प्रतिज्ञायामव्याप्तिवारणं प्रलयसाध्यमिव भाति। गजो नील इति भागज्ञानेऽपि तादृशकारणतायास्सत्त्वेन न तत्र मतङ्गजो नील इति प्रतिज्ञामात्रवृत्त्यानुपूर्वीप्रकारकज्ञानत्वस्य सत्त्वादिति दिक्।

अत्र हेत्ववयवादिवारणाय विषयितायां तादृशकारणतावच्छेदकत्वप्रवेशेऽपि न पक्षतावच्छेद -कानुसरणस्य वैयर्थ्यम्। तथा हि। अवच्छेदकत्वमनतिरिक्तवृत्तित्वं तथा च कारणतानतिरक्तवृत्ति-विषयितानिरूपकवर्णसमुदायत्वं तत्त्वमिति फलितम्। प्रतिज्ञाहेतुसमुदायनिष्ठानुपूर्वीविषयितायास्ता-दृशशाब्दत्वावच्छिन्नकार्यतानिरूपितकारणतानतिरिक्तवृत्तित्वात्तत्रातिव्याप्तिवारणायोभयघटकेत्यादि-विशेषणमावश्यकम्। उदाहरणविषयतायाश्च किञ्चिद्धर्मावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्न-प्रकारकशाब्दबुद्धित्वावच्छिन्नकार्यतानिरूपितकारणतानतिप्रसक्तत्वात्तत्रातिव्याप्तिरतः पक्षतावच्छेदका -नुसरणमावश्यकम्। मतङ्गजो नील इति प्रतिज्ञायामपि नाव्याप्तिः। तद्विषयितायास्तादृश-कारणतानतिप्रसक्तत्वात्। तदेकदेशे गजो नील इत्यत्रातिव्याप्तिस्तु प्रतिज्ञामात्राघटकत्वं प्रवेश्य वारणीयेति भट्टाचार्याणामाशय इति सूक्ष्मदर्शिनो विदाङ्कुर्वन्तु। नन्वेवमपि प्रतिज्ञाद्यघटकत्वं व्यर्थं भागवारणाय लाघवेन तादृशवर्णत्वसमव्यापकसमुदायत्वस्य वाच्यत्वात्। एवं पर्वतो वह्निमानित्य-नन्तवाक्यघटितसमुदायस्यैव तादृशसमुदायत्वं न प्रतिज्ञामात्रस्येत्यसम्भवोऽतो ज्ञाने यत्किञ्चित्त्व-निवेशः। एवञ्च यादृशप्रतिज्ञाज्ञानं हेत्वादिविषयकमेव तज्ज्ञानविषयिताया उभयत्रापि सत्त्वान्न केवल-

In Public domain. Digitization Muthulakshmi Research Academy



एवमेतल्लक्षणप्रविष्टन्यायावयवत्वशरीरे प्रतिज्ञाहेत्वादिसमुदायेऽतिप्रसङ्गवारणायोभयघटकभागद्वयाघटितत्वमेव निवेशनीयम्। न तु प्रतिज्ञाद्यघटकत्वमपि प्रयोजनान्तर-

---

प्रतिज्ञामात्रवृत्तिसमुदायत्वस्य तद्व्यापकतासम्भवतीत्यनायत्याजनकतावच्छेदकयत्किञ्चज्ज्ञानीयविषयितायाः अवश्यनिवेश्यतया नोदाहरणातिव्याप्तिः प्रसज्यत इत्यत उदाहरणादित्यस्य तदेकदेशादित्यर्थमभिप्रेत्य स वह्निमानित्येकदेशे तादृशविषयितानिरूपकत्वसत्त्वादतिव्याप्तिं प्रदर्शयति। *एवमिति* *उभयेति* यत्तु पूर्वकल्पे एतत्कल्पे चोभयेत्यादिविशेषणमननुषङ्गपक्ष एव, अनुषङ्गपक्षे तु साध्यतावच्छेदकावच्छिन्ने शुद्धत्वोपादानादेव वारणादिति। तन्न। अनिरूपकत्वान्तनिवेशस्य दूषितत्वात्पक्षतावच्छेदकनिवेशोत्तरं प्रयोजनाभावेन व्यापकत्वमात्रस्य हेयत्वात्केवलप्रतिज्ञाजन्यबोधमादाय कल्पद्वयेऽपि प्रतिज्ञाहेतुसमुदायवारणायानुषङ्गपक्षेऽप्युभयेत्यादिविशेषणस्यावश्यकत्वात्। अननुषङ्गपक्षे तु अयमादिनिगमनान्तभागवारणाय शुद्धत्वनिवेश आवश्यकः। विशेष्यवाचकपदान्योभयघटकभागद्वयाघटितत्वादिति। वस्तुतस्त्वेतल्लक्षणे पक्षविशेष्यकसाध्यप्रकारकशाब्दबुद्धित्वपर्याप्तजन्यतावच्छेदकतानिवेशः तत्पक्षे विशेष्य वाचकपदान्यत्वस्य वैयर्थ्यात्परित्यागो वेति न तादृशभागे अतिव्याप्तिरिति दिक्। ननु प्रतिज्ञाद्यघटकत्वनिवेशेऽपि सवह्निमानिति भागो वार्यत इति पक्षतावच्छेदकं व्यर्थमित्यत आह। *नत्विति* एवञ्च गुरुतरप्रतिज्ञाघटकत्वनिवेशोऽन्याय्य इति भावः। अथ न्यायावयवशब्देन न्यायान्तर्गतत्वे सत्युभयघटकभागद्वयाघटितत्वमात्रनिवेशे, रमाधवः पूज्यः, सदाशिवो वन्द्य इति प्रज्ञैकदेशे माधवः पूज्यः शिवो वन्द्य इति भागेऽतिव्याप्तिः। रमाधवादिप्रतिज्ञापाद्यस्यैव माधवादिप्रतिपाद्यत्वात्तादृशशाब्दत्वावच्छिन्नजनकतावच्छेदकविषयिताकत्वस्य तादृशभागे सत्त्वात्। न चैतल्लक्ष्यमेव पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकशाब्दत्वावच्छिन्नजन्यतानिरूपितजनकताश्रयसमुदाय एव प्रतिज्ञात्वव्यवहारेण तादृशसमुदायेऽपि नियामक -सत्त्वेन तद्व्यवहारस्येष्टत्वादिति वाच्यम्। तस्य लक्ष्यत्वे तत्रावयवलक्षणलक्ष्यताया आवश्यकतया अवयवलक्षणाव्याप्तिः। रमाधवः पूज्य इत्यादिसमुदायत्वावच्छिन्नभेदस्य माधवः पूज्य इति भागे सत्त्वेन स्वस्मिन् स्वभेदसत्त्वेन प्रतिज्ञाद्यन्यतमत्वरूपावयवत्वाभावात्। प्रतिज्ञाद्यघटकत्वघटितावयवत्वाभावाच्च। नहि सभागस्तन्न्यायानन्तर्गतप्रतिज्ञाद्यन्यतमन्यायावयव इति सङ्गच्छते। तस्माद्यादृशानु -पूर्वीविशिष्टवाक्ये न्यायावयवत्वस्य व्यवहारस्तादृशन्यायावयवविशेष एव प्रतिज्ञेति वक्तव्यम्। एवञ्च रमाधवः पूज्य इत्यानुपूर्वीविशिष्ट एव वाक्ये न्यायावयवत्वव्यवहारेण तस्यैव तदवयवत्वं न तु तदेकदेशस्य तादृशानुपूर्वीविशिष्टवाक्ये एव च प्रतिज्ञात्वमिति वक्तव्यमिति तदैकदेशस्य प्रतिज्ञालक्षणालक्ष्यतया तत्रातिव्याप्तिर्वज्रलेपायितैव। अत एव ननु मतङ्गजो नील इति न्यायान्तर्गतस्य गजो नील

In Public domain. Digitization Muthulakshmi Research Academy

विरहात्। उदाहरणैकदेशे तादृशवाक्येऽतिप्रसङ्गस्य लघुतरप्रकृतपक्षतावच्छेदकवैशिष्ट्य-निवेशेनैव वारयितुमुचितत्वात्।

यद्यप्येवं नीलपर्वतो वह्निमानित्यादिप्रतिज्ञैकदेशे पर्वतो वह्निमानित्यादिभागेऽपि व्यावृत्तिस्सम्भवति। तथापि सकलप्रतिज्ञैकदेशे न तथेति विशेषोपादाने प्रयासाधिक्येनो-दाहरणानुधावनमिति ध्येयम्। साध्यतावच्छेदकावच्छिन्नप्रकारकत्वनिवेशप्रयोजनमाह **※※उपनयाच्चेति※※**। साध्यवैशिष्ट्यमात्रनिवेशेऽपि पर्वतो द्रव्यवान् धूमादित्यादिन्यायान्तर्गते

---

इति भागस्य न्यायान्तर्गतप्रतिज्ञाव्यवहारानिमित्तत्वेन तत्रातिव्याप्तिरतोलक्षणान्तरमाह प्रतिज्ञाद्य-घटकत्व इति गोपालनाथानां द्वितीयावयलक्षणावतरणमपि सङ्गच्छते। अन्यथा प्रतिज्ञैकदेशस्य प्रतिज्ञालक्षणस्यैवावयवलक्षणस्यापि लक्ष्यत्वेन तत्रातिव्याप्तिकथनमसङ्गतमेवस्यादिति। न चात्र प्रतिज्ञाद्यघटकत्वनिवेशान्नातिव्याप्तिरिति वाच्यं न तु प्रतिज्ञाद्यघटकत्वमपीति सन्दर्भ विरोधात्। एवं सवह्निमानित्युदाहरणैकदेशस्य तत एव वारणे पक्षतावच्छेदकानुसरणवैयर्थ्याच्चेति चेन्न। ईदृशैक-देशवारणाय प्रतिज्ञामात्राघटकत्वमेव निवेश्यं न तूदाहरणाघटकत्वमपि प्रयोजनाभावादुदाहरणैक-देशस्य लघुतरपक्षतावच्छेदकनिवेशेनैव वारणादिति भट्टाचार्याणामाशयादिति। ननु यदि प्रतिज्ञाद्यघटकत्वं न निवेश्यते तदा नीलपर्वतो वह्निमानित्यादिस्थलीयप्रतिज्ञालक्षणस्य पर्वतो वह्निमानिति तदेकदेशेऽतिव्याप्तिः। न च प्रतिज्ञामात्राघटकत्वमुक्तमेवेति वाच्यम्। यत्र भागतद्वतो-स्समानार्थतया पक्षतावच्छेदकनिवेशेऽपि नातिव्याप्तिर्वारयतुं शक्यते तत्रत्यप्रतिज्ञाविशेष एव तदुपादानं न सर्वत्रेत्याशयेन शङ्कते। **※यद्यपीति※** नन्वनुषङ्गपक्षे निगमनैकदेशेऽयं वह्निमानिति-भागेऽतिव्याप्तेस्सर्वत्रापि प्रतिज्ञाद्यघटकत्वं निवेशनमावश्यकमिति चेन्न। पक्षविशेष्यकसाध्यप्रकारक-बोधेऽयं वह्निमानित्यानुपूर्वीप्रकारकज्ञानस्यैव हेतुतया निगमने तादृशानुपूर्व्या एवाभावेनानतिप्रसङ्गाद्य-थाश्रुताभिप्रायेण वेदम्। **※सकलेति※** पर्वतो वह्निमानित्यादिस्थलीयप्रतिज्ञालक्षणस्य तदेकदेशे गीर्वाण -गुरुणाप्युपपादयितुमशक्यत्वादिति भावः। इदन्तु बोध्यम्। तादृशजनकतावच्छेदकविषयितानिरूपक -वर्णत्वव्यापकसमुदायत्वनिवेशेऽपि प्रतिज्ञोदासीनसमुदायेऽतिव्याप्तिः। न्यायान्तर्गतत्वेन तद्वारणेऽपि प्रतिज्ञाहेतुघटकसमुदयेऽतिव्याप्तिः। तद्वारणाय तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वं न निवेश -यितुं शक्यते प्राग्दूषितत्वात् किन्तूभयघटकेत्येव। एवं सति प्रतिज्ञाद्वयेऽतिव्याप्तिरवशिष्यते सापि यत्किञ्चित्प्रतिज्ञात्वाश्रयतदनाश्रयोभयघटकभागद्वयाघटितत्वं प्रवेश्य वारणीयेति। **※उपनय इति※** द्रव्यव्याप्यधूमस्यापि द्रव्यत्वेन साध्यत्वादिति भावः। विषयितासमवायाभ्यां साध्यसाधनभावस्थले

In Public domain. Digitization Muthulakshmi Research Academy


उपनये तत्स्थलीयप्रतिज्ञालक्षणातिव्याप्तिरिति साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्व-निवेश इत्यवधेयम्।

इति सूत्रकारीयप्रतिज्ञालक्षणम्

यथाश्रुतसत्यन्तार्थस्योदासीनवाक्यसाधारण्यमक्षतमेव न्यायान्तर्गतवाक्यजन्यस्येव तदनन्तर्गततादृशवाक्यजन्यस्यापि शाब्दबोधस्योपनायकज्ञानादिविधया परामर्शप्रयोजकत्वा-दतस्तदर्थमाह। **प्रकृतेति** वह्निव्याप्यधूमसाध्यकानुमितेरपि कदाचिदुद्देश्यतया वक्ष्य-माणातिप्रसङ्गवारणासम्भवादुद्देश्यपदं प्रकृतार्थकतया व्याचष्टे। **उद्देश्येतीति।** **वह्नि-साध्यकोपनयस्य** तत्साध्यकन्यायान्तर्गतोपनयस्य। एतेन सत्यन्तदलसत्त्वमाविष्कृतम्।

---

ज्ञानव्याप्यज्ञानवानित्युपनयैकदेशेऽतिव्याप्तिरतस्साध्यतावच्छेदकरूपवैशिष्ट्यमेव निवेश्यम्। इदमत्राव-धातव्यम्। पर्वतो वह्निमानिति प्रतिज्ञेत्यादावन्वयितावच्छेदकमेव तथाविधविषयितानिरूपकवर्णत्व-व्यापकसमुदायत्वत्वेन प्रतीयते। तद्धर्मं धर्मितावच्छेदकीकृत्य प्रतिज्ञापदस्य तादृशसमुदायत्वत्वेन तद्धर्मबोधकत्वात्। प्रतिज्ञानैकदेश इति व्यवहारे तु प्रतिज्ञात्वे एकदेशत्वानवच्छेदकत्वमेकदेशत्वे प्रतिज्ञात्वाद्यनवच्छेद्यत्वं वा प्रतिज्ञात्वसामानाधिकरण्ये नैकदेशभेदो वा, पर्वतपदं प्रतिज्ञेति प्रयोग-स्तूद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिसम्बन्धेन विधेयान्वयादपि वार्यते पर्वतपदे प्रतिज्ञात्वमिति तु विधेयतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिसम्बन्धावच्छिन्नाधेयतासम्बन्धेन विधेयान्वयादिति, प्रतिज्ञा आरभ्यतेत्यादौ स्वसमानाधिकरणस्वविषयककृतिध्वंसासमानकालीनकृतेर्विषयत्वजन्यत्वाभ्यामन्वयः आद्यकृतेस्सकलवर्णानुकूलत्वात्। प्रतिज्ञा भविष्यतीत्यादौ प्रतिज्ञाप्रागभावप्रतियोग्युत्पत्तिकत्वं भविष्यत्वं तच्च प्रतियोगित्वस्वाधिकरणकालध्वंसप्रतियोगिप्रागभावप्रतियोगिवृत्तिवर्णाधीनशाब्द-बोधाननुकूलत्वोभयसम्बन्धेन प्रागभाववत्त्वं, प्रतिज्ञाध्वस्तेत्यादौ प्रतियोगित्वस्वप्रतियोगिवर्णाधिकरण-कालध्वंसाधिकरणकालोत्पन्नवर्णाधीनशाब्दबोधाननुकूलत्वोभयसम्बन्धेन ध्वंसवत्त्वमिति दिक्।

इति सूत्रकारीयप्रतिज्ञालक्षणम्

*तदर्थमिति* प्रयोजकान्तं प्रतिज्ञादिप्रतिपाद्यविशिष्टार्थबोधपरिचायकमात्रम्। वाक्यपदं चोभयघटकभागद्वयाघटितत्वे सत्युचितानुपूर्वीकावयवाघटकपरम्। यद्यपि वाक्यस्यार्थ इति विग्रह-स्तथापि फलतो वाक्यभेदस्य जनके लाभात्तल्लाभस्तत्र विशेष्यभागस्य वैयर्थ्यात्परित्यागः।

वह्निव्याप्यधूमसाध्यकेत्यादिनाऽन्यसाधकानुमितिमादाय विशेष्यदलसत्त्वं स्फुटीकृतम्। **वारणाय** प्रतिज्ञाव्यवहारविषयतावारणाय। **प्रकृतद्वयम्** प्रकृतप्रतिज्ञापदार्थघटकन्यायानुमित्योः एकसाध्यादिकत्वप्रतिपादकं प्रकृतपदद्वयं (साध्यपक्षविशेषनियन्त्रितार्थकं प्रकृतपदद्वयं) प्रकृतन्यायावयवत्वपर्यन्तानिवेशे वह्निव्याप्यधूमसाध्यकप्रतिज्ञानुरोधेन तत्साध्यकानुमितेरपि प्रकृतपदेन विवक्षणीयतया तामादाय दर्शितोपनये, प्रकृतानुमितिपर्यन्तानिवेशे वह्निसाध्यकन्यायस्यापि प्रकृतन्यायेत्यनेन विवक्षणीयतया तदवयवत्वमादाय तत्र प्रतिज्ञाव्यवहारस्य दुर्वारत्वादुभयत्र प्रकृतत्वनिवेशः। (तथा च सति तत्पक्षसाध्यकन्यायान्तर्गतत्वघटितप्रतिज्ञापदार्थगर्भे तत्साध्यपक्षकानुमितेरेवान्तर्भावान्नातिप्रसङ्गः एतदेव) तथा च सति अभिन्नसाध्यपक्षकन्यायानुमित्यन्तर्भावे यादृशो लक्षणार्थस्तं स्फुटयति। **तथा चेति** यत्तु तादृशोपनये वह्निव्याप्यधूमसाध्यकप्रतिज्ञाव्यवहारवारणाय न्याये, वह्निसाध्यकप्रतिज्ञाव्यवहारवारणायानुमितौ प्रकृतत्वनिवेशनमिति प्रकृतद्वयमित्यर्थ इति। **तच्चिन्त्यम्**। तत्साध्यपक्षकप्रतिज्ञाव्यवहारविषयस्यात्र निर्वाच्यत्वे प्रतिज्ञापदार्थघटकन्याया-

---

***अन्येति*** उद्देश्यत्वमिच्छाविषयत्वं तथा च पर्वते वह्निव्याप्यधूमसाध्यकानुमितिमुद्दिश्य तद्विरोधिव्यापकाभाववत्ताग्रहनिवृत्त्यर्थं कथञ्चिद्वा यत्र पर्वतपक्षकवह्निसाध्यकधूमहेतुकन्यायप्रयोगस्तत्रत्योपनये वह्निव्याप्यधूमसाध्यकप्रतिज्ञावाक्यतो भिन्नत्वेन सामान्यतोऽपि प्रतिज्ञाव्यवहाराभावादतिव्याप्तिरित्यर्थः। ***प्रतिज्ञाव्यवहारेति*** पक्षसाध्यविशेषानियन्त्रितसामान्यप्रतिज्ञाव्यवहारेत्यर्थः। दीधितिकारेणैकदैव प्रकृतपदद्वयप्रयोजनं दर्शितं न तु प्रत्येकं पृथगेकत्र यादृशेत्यस्य निष्कासनेऽन्यत्र तादृशेत्यस्यापि निष्कासनात्। अतस्स्वयं पृथक्प्रकृतपदयोः प्रयोजनमभिधायैकदैवैकत्र यादृशेत्यस्यान्यत्र तादृशेत्यस्य च प्रेवशपर्यवसानमाह। ***प्रकृतन्यायेत्यादिना*** ***प्रतिज्ञाद्यनुरोधेन*** प्रतिज्ञायां लक्षणगमनानुरोधेन। अत्र भट्टाचार्यैः प्रतिज्ञासामान्यलक्षणाभिप्रायकतया दीधितिर्लापिता ये तु प्रतिज्ञाविशेषलक्षणाभिप्रायकतया दीधितिं लापयन्ति तन्मतमुत्थापयति। ***यत्त्विति*** भट्टाचार्यमते प्रकृतपद-योरुपादानेऽप्यभिन्नपक्षसाध्यकार्थकतया एकत्र तन्निष्कासनेऽन्यत्र तन्नास्ति एतन्मते च तत्साध्यपक्षकानुमितौ न्याये च द्विधानिवेश इत्येकत्र प्रकृतेत्यस्य निष्कासनेऽप्यन्यत्र तत्सत्त्वमेवेति रीत्या प्रथमदीधितिफक्किकालापने दूषणमाह। ***तत्साध्येत्यादिना*** ***प्रतिज्ञेति*** तथा च पर्वते पक्षे वह्नौ साध्ये पर्वतो वह्निमानिति वाक्यं प्रतिज्ञेति भवत्सम्मते व्यवहारेऽनुमित्यन्यूनानतिरक्तविषयकज्ञानजनकत्वे सति न्यायावयवत्वघटकयोर्न्यायानुमित्योः पर्वतपक्षकत्ववह्निसाध्यकत्वयोरन्वयान्न

In Public domain. Digitization Muthulakshmi Research Academy


नुमित्योरुभयत्र समभिव्याहृतसाध्यपक्षान्वयनिवेशसूचनाय प्रकृतद्वयं तत्साध्यपक्षार्थकमित्यस्यैवाभिधातुमुचिततया तदुपेक्ष्य प्रतिज्ञाव्यवहारविषयतावच्छेदकीभूतैकधर्मशरीरे द्विधा निविष्टयोस्साध्यपक्षयोरभेदमात्रलाभाय तथाचेत्यभिधाने सन्दर्भविरोधात्। यादृशेत्यादेः स्वस्येत्यादिः। तादृशेत्यादेः स्वनिष्टमित्यादिः। **पर्यवसितोऽर्थः** प्रतिज्ञापदप्रतिपाद्यतावच्छेदकतया मूलाभिप्रायविषयः।

एवञ्च सति प्रतिज्ञादिपदस्य नानार्थत्वं न दोषाय, **गत्यन्तरविरहादिति** प्रागेवोक्तं ग्रन्थकृतैव। तत्साध्यतावच्छेदकावच्छिन्नतत्साध्यकत्वस्य न्यायाद्यंशेऽनिवेशने उक्तोपनय एव वातिप्रसङ्गः[14]। यत्पक्षकानुमितिसमानविषयकत्वं तत्पक्षकन्यायान्तर्गतत्वस्याक्षतत्वादिति तन्निवेशनम्। द्रव्यव्याप्यधूमवानयमित्याकारकद्रव्यत्वावच्छिन्नसाध्यकोपनयवारणाय साध्यतावच्छेदकनिवेशनम्। एतल्लक्षणघटकन्यायावयवत्वशरीरे उदाहरणाद्यघटकत्वनिवेशस्य

---

पर्वते पक्षे वह्नौ वह्निव्याप्यधूमे वा साध्ये वह्निव्याप्यधूमवानयमिति प्रतिज्ञान्यव्यवहार इति भावः। ***समभिव्याहृतेति*** समभिव्याहृतस्वोपस्थाप्येत्यर्थः। स्वं प्रकृतपदद्वयम्। ***अभिधातुमिति*** तथा चानुमितौ न्याये च प्रकृतपदयोस्तत्साध्यपक्षकत्वनिवेशार्थकत्वे तत एवोपनये तत्तत्स्थलीयप्रतिज्ञाव्यवहारवारणसम्भवात्। यादृशपक्षकेत्यादिना सामान्यरूपेणानुमितिन्यायघटकशाब्दबोधविषयसाध्यादीनामैक्यविवक्षाया निर्बीजत्वापत्तेरिति भावः। नन्वेवं कथमुपनयवारणं सति सप्तम्यभावेन पूर्वदलस्य यत्रकुत्रचित्सत्त्वे तत्रोत्तरदलसत्त्वात्। यत्रकुत्रचिदुत्तरदलसत्त्वे तत्र पूर्वदलसत्त्वं चेत्यतस्स्वस्येति स्वनिष्ठमिति च पूरितम्। स्वं प्रतिज्ञात्वेनाभिमतम्। इदानीं पृथक्यादृशसाध्यकेत्यस्य व्यावृत्तिमाह। ***यत्साध्यकत्वस्येति*** यादृशसाध्यकत्वस्य न्यायांशेऽनिवेशेऽनुमितावपि तादृशसाध्यकत्वं नास्त्येव एकदैव तस्य निवेशनीयत्वात्। तथा च यादृशं लक्षणमवशिष्टं तादृशलक्षणमुपनयवाक्ये उपपादयति। ***यत्पक्षकेति*** ननु यत्पक्षकानुमितिसमानविषयकत्वं शाब्दबोध एव कथमुक्तोपनयेऽतिव्याप्तिरिति चेन्न, व्यापारानुबन्धिविषयतया तद्विषयकत्वोक्तेः। यद्वा समानविषयकत्वमित्यस्य समानविषयकशाब्दबोधजनकज्ञानविषयत्वमित्यर्थः। ***द्रव्येति*** द्रव्यव्याप्यधूमोऽपि द्रव्यत्वेन साध्य इति भावः। एकधर्मावच्छिन्नपक्षकत्वनिवेशस्य व्यावृत्तिं वक्तुं भूमिकामारचयति। ***एतदिति*** सिषाधयिषया न्यायप्रयोगाङ्गीकारे यो यो धूमवान् स वह्निमान् यथा पर्वत इत्युदाहरणसम्भवेन स वह्निमानिति भागस्यापि पक्षतावच्छेदकावच्छिन्ने प्रकृतसाध्यप्रकारकबोधजनकत्वसत्त्वेनैकधर्मावच्छिन्नपक्षकत्व-

---

14. एवातिप्रसङ्गः इति पाठान्तरम्।

In Public domain. Digitization Muthulakshmi Research Academy

सिषाधयिषाधीनन्यायप्रयोगानङ्गीकारपक्षे प्रयोजनान्तरविरहात्प्रतिज्ञाऽघटकत्वमात्रस्य तदेक-देशसाधारणस्य निवेशनीयतया वह्न्यादिसांध्यकन्यायान्तर्गतस्य यत्किञ्चिद्धर्मिकवह्न्यादि-साध्यकानुमित्यन्यूनानतिरिक्तविषयकबोधजनकस्य स वह्निमानित्युदाहरणैकदेशस्य वारणायैकधर्मावच्छिन्नपक्षकत्वनिवेशनम्। वस्तुतो अनुमित्यन्यूनातिरिक्तविषयकत्वं प्रकृत-पक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वे सति तादृशवैशिष्ट्यविषयताविलक्षणविषयताशून्यत्वरूपम् अनुमितिमनन्तर्भाव्यैवाग्रे निर्वचनीयम्। तत्र प्रकृतपक्षादिनिवेशव्यावृत्तिरग्रे दर्शनीयेति किं व्यावर्त्त्यस्थलान्तरानुसरणेन। यत्तु। पक्षविशेषमनन्तर्भाव्यानतिप्रसक्तस्य न्यायत्वस्य दुर्वच-तया पक्षप्रवेशनमिति तदसत्। तथा सति हेतुविशेषमनन्तर्भाव्यापि तस्य दुर्वचतया यादृश-हेतुकेत्यस्यापि वक्तुमुचितत्वात्। यदि च न्यायपदेऽपादानादेव तद्धेतुनियन्त्रितन्यायलाभ इति न तदभिहितमित्युच्यते तदा पक्षप्रवेशस्यावश्यकत्वेऽपि न्यायपदादेव पक्षविशेषनियन्त्रित-न्यायलाभ इति यादृशपक्षक इत्यभिधानस्यानुपयुक्ततेति। **※※हेतोर्वारणायेति※※**

---

निवेशेऽप्यतिव्याप्तिरत उदाहरणाघटकत्वस्यावश्यकत्वे तेनैवैकधर्मावच्छिन्नपक्षकत्वनिवेशव्यावृत्तिर्न सम्भवत्येवेत्यतस्तदनङ्गीकारपक्षानुसरणम्। एवञ्च तत्पक्षे प्रयोजनाभावेन तदनिवेशादुदाहरणैकदेशे अतिव्याप्तिवारणायैकधर्मावच्छिन्नपक्षकत्वनिवेशनमिति भावः। **※न्यायघटकत्वमात्रस्येति※** न च रमाधवः पूज्यो माधवत्वादित्यादौ माधवः पूज्य इति भागेऽतिव्याप्तिः। अग्रे समाधास्यमानत्वात्। प्रतिज्ञाघटकमात्रेति पाठे मात्रपदं न्यूनातिरक्तबोधजनकहेतूपनयनिगमनाघटकत्वस्य वैयर्थ्यं वक्तुम्। **※तदेकदेशेति※** प्रतिज्ञाघटकतानवच्छेदकधर्मवत्त्वमिति यावत्। घटकतावच्छेदकत्वं च प्रतिज्ञात्व-न्यूनवृत्तित्वे सति प्रतिज्ञावृत्तित्वं तेन प्रतिज्ञाभेदानुयोगितानवच्छेदकत्वोक्तौ प्रकृतपक्षकत्ववैयर्थ्येऽपि न क्षतिः। स वह्निमान् यथा पाषाणमय इत्युदाहरणैकदेशवारणायैकधर्मेति। अग्रेऽन्यथैव लक्षणं परिष्कृत्यपक्षतावच्छेदकादिनिवेशप्रयोजनस्य प्रदर्शनीयत्वात्, मास्त्विदानीं तद्व्यावृत्तिरित्याशयेनाह। **※वस्तुत इति※ ※पक्षेति※** किञ्चिद्धर्मावच्छिन्नविशेष्यकानुमित्यादिघटितस्य न न्यायत्वघटकप्रतिज्ञात्व-घटकान्यूनानतिरिक्तविषयकत्वनिर्वाहः। निर्धर्मितावच्छेदकस्मृत्यन्यपरोक्षज्ञानाभावात्। अनति-प्रसक्तस्य महानसं वह्निमदित्यादिन्यायावृत्तेस्तथा च पर्वतो वह्निमान् धूमात् यो यो धूमवान् स वह्निमान् वह्निव्याप्यधूमवानयमिति महानसादिपरेदं पदघटितपञ्चकस्य न्यायत्वापत्त्या तदाद्यवाक्ये प्रकृतलक्षणातिव्याप्तिर्बोध्या। तस्यालोकात् यो यो धूमवान् स वह्निमानित्यादिवाक्यचतुष्टय-घटकवाक्यव्यावृत्तस्य यत्किञ्चिद्धर्मविशिष्टहेतुत्वप्रतिपादकत्वादिरूपयत्किञ्चिद्धर्मविशिष्टघटितहेतूदाह-

In Public domain. Digitization Muthulakshmi Research Academy


अनतिरिक्तविषयकत्वं पक्षतावच्छेदकविशिष्टे यत्साध्यतावच्छेदकविशिष्टवैशिष्ट्य-विषयकत्वं तद्विलक्षणविषयिताशून्यत्वं, न तु प्रकृतानुमित्यविषयाविषयकत्वं, स्वयमेवाग्रे दूषणीयत्वात्। तादृशविषयताविलक्षणत्वञ्च, तादृशविषयताशालिनिश्चयत्वावच्छिन्नानिवर्त्य-संशयनिवर्तकतावच्छेदकत्वरूपं निर्वक्ष्यते। एवञ्चोक्तहेत्ववयवजन्यवोधस्यानुमित्यविषयवह्नि-निष्ठधूमज्ञानज्ञाप्यत्वविषयकत्वेऽपि तादृशविषयताविलक्षणविषयताशून्यत्वमक्षतमेवेत्यति-प्रसक्तेरिति भावः। **निगमनवारणायेति** निगमनजन्यवोधस्यापि पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वेनान्यूनविषयकतयाऽतिव्याप्तिप्रसक्तेरिति भावः। **निगमने** तस्माद्वह्निमानित्यादिवाक्यसन्निधाने। **साक्षादिति** अवयवान्तर-वहिर्भावेनेत्यर्थः। **न श्रूयत इति** तथा च कथं तज्जन्यवोधस्यान्यूनविषयकत्वमिति भावः। **न्यूनताभङ्गाय** आकाङ्क्षापूरणाय। पक्षतावच्छेदकविशिष्टपक्षे तादृशसाध्यवत्ता-वोधने कस्तादृशवह्निमानिति जिज्ञासा निवर्तते। वह्निमानित्यभिधानेन तादृशाकाङ्क्षोत्सर्गतो जायत इत्यनुभवसिद्धमेवेति भावः। **अनुषङ्गादिति** निगमनसमभिव्याहृतत्वेनानुसन्धा-नोपगमादित्यर्थः।

---

रणादिलक्षणसत्त्वात्। तथा च पर्वतो वह्निमान् धूमात् यो य आलोकवान् स वह्निमानित्यादि-वाक्यघटकाद्यवाक्येऽतिव्याप्तिः। अनतिरिक्तविषयकत्वे नान्यथासिद्धिं निरस्यति। *अनतिरिक्तेति* प्रकारान्तरेण तन्निवेशने वक्ष्यमाणरीत्याऽतिव्याप्त्यलग्नतापत्तिरतस्तं निषेधति। *नत्विति* अनतिरिक्तविषयकत्वमित्यनुषज्यते। *उक्तेति* प्रकृतानुमित्यविषयाविषयत्वकल्पे प्रकृतानुमिता-वालोकनिष्ठं ज्ञानज्ञाप्यत्वं भासते न वह्निनिष्ठमिति हेतुजन्यवोधस्य तद्विषयकत्वाभावो नास्तीत्य-व्याप्त्यलग्नकतापत्तावपीत्यर्थः। *तादृशेति* हेतौ धूमज्ञानज्ञाप्यत्वे वह्निनिष्ठत्वाभानेन वह्नौ तादृश-धूमज्ञानज्ञाप्यत्वसंशयनिवर्तकतावच्छेदकविषयताशून्यत्वादिति भावः। अयं पदान्तर्भावेणैव निगमन-त्वस्य वक्तव्यतया व्याचष्टे। *तस्मादिति* अवयवान्तरवहिर्भावः। स्वभिन्नावयवाघटकत्वम्। एतच्च वह्निव्याप्यधूमवानयमयं तस्माद्वह्निमानितिवह्निव्याप्यधूमवानयं तस्माद्वह्निमानिति वा न कथकसम्प्रदाय इति सूचनाय। *क इति* एतादृशप्रश्नप्रतिपाद्याकिञ्चिद्धर्मावच्छिन्नपक्षोद्देश्यकतादृशवह्निविधेयक-ज्ञानेच्छापक्षतावच्छेदकावच्छिन्नोद्देश्यकधूमज्ञानज्ञाप्यवह्निविधेयकवोधविषयिणीति तादृशवोध-जनकादेव निवर्तते नान्यथेति भावः। ननु वह्निव्याप्यालोकवान्पर्वतो वह्निमानित्यादौ विशिष्टपर्वते वह्निज्ञापकं किमित्याकाङ्क्षाप्रसङ्ग इत्यत उत्सर्गत इति। तत्र तादृशाकाङ्क्षा न जायते प्रतिज्ञात

In Public domain. Digitization Muthulakshmi Research Academy

तथा च तदन्तर्भाव्यैव निगमनावयवत्वं पर्यवस्यतीत्यन्यूनविषयकबोधजनक-न्यायावयवत्वमादाय तादृशसमुदायातिव्याप्तिप्रसक्तिरिति भावः। निगमनञ्च न परामर्श-हेतुरिति यथाश्रुताग्रिममूलग्रन्थस्य सत्यन्तदलविरहेण निगमने नातिव्याप्तिरित्यर्थपरत्वं प्रतीयते, तच्च न घटते सत्यन्तस्य न्यायावयवत्वरूपत्वात्तस्य च निगमनसाधारणत्वात् यथाश्रुतस्यापि सत्यन्तार्थस्य प्रतिज्ञायामिव तत्राप्यक्षतत्वात्। अनतिरिक्तविषयकत्वविशेषणे-नैव तद्वारणाच्चेत्यनतिरिक्तविषयकत्वविशेषणस्य निगमनातिव्याप्तिवारकतापरत्वेन तादृश-ग्रन्थमत्रैव व्याख्यातुं भूमिकामारचयति। ****इत्थमेव चेति**** ****अन्यूनानतिरिक्तेति**** तथा च न्यायावयवत्वपर्यवसितनिरुक्तपरामर्शप्रयोजकशाब्दज्ञानजनकत्वसत्वेऽप्यन्यूनानति-रिक्तविषयकज्ञानजनकत्वं नास्तीति पर्यवसितार्थः। अबाधितत्वादिपरतया उदीच्यतद्बोधेनापि निर्वाहान्निगमनजन्यशाब्दबोधे तद्भानार्थं लक्षणादरो न युक्त इति मूलोक्तं तद्विषयकतयाति-रिक्तविषयकत्वं न विचारसहम्, एवं पञ्चम्यन्तभागार्थस्यातिरिक्तस्य विषयतया तथात्वाप्रति-

---

आलोकोपस्थितौ तदुत्तरमानसज्ञानेनापि तद्विषयसिद्धेरिति भावः। कस्तादृशवह्निमानित्याकाङ्क्षाया-नियतत्वात्। सामान्यत आकाङ्क्षोत्थापकताव्यभिचारो दर्शितः। यद्वा तत्र सामग्रीवशेन प्रतिज्ञा-हेत्वर्थयोर्विशिष्टवैशिष्ट्यावगाहिबोधस्तत्र उपनयार्थबोधे व्याप्त्यादिविशिष्टहेतुज्ञाप्यवह्निमान् पर्वत इति मानसं तत्र न तादृशाकाङ्क्षेति। उत्सर्गपदोपादानम्। (धर्मितावच्छेदकविषयकसाध्यप्रकारकमानस-सामग्र्यसत्त्वं वा। तेन निगमनघटविषयकसाध्यवत्ताबोधेऽपि तथाविधमानसस्यैव तादृशाकाङ्क्षानिवर्त-कत्वेऽपि न क्षतिः)। नन्वेवं को रक्तदण्डवानिति समवायेन रक्तत्वविशेषितदण्डविशिष्टजिज्ञासया रक्ताभिन्नदण्डबोधकप्रतिज्ञानिवृत्त्यनुपपत्तिरिति चेन्न। तत्रानायत्योदीच्य मानसबोधस्यैव निवर्तक-त्वात्। प्रतिज्ञायाश्च मानसज्ञानौपयिकपदार्थोपस्थापकत्वादिति। मणिकारस्याप्ययं पदानुषङ्ग-स्वरसोऽस्तीत्यभिप्रायकमित्थञ्चेति दीधितिमवतारयति। ***निगमनं चेति*** सत्यन्तस्य निगमनाति-व्याप्तिवारकत्वासम्भवे कथं तद्वारणमित्याशङ्कायां पूरितविशेषणादित्याह। ***अनतीति*** एतद्विशेषण-मेवातिव्याप्तिवारणक्षममिति। ***अबाधितत्वादीति।*** अबाधितत्वादीति मणिसन्दर्भलभ्यं विशेषणैव इत्येवकारेणान्यूनविषयकत्वदलेन वारणं नास्तीति लभ्यते तच्चायं पदानुषङ्गमावेदयतीतिरीत्या मणिकारस्वरसलाभः। ननु मूलकृता निगमनस्यावाधितत्वादिबोधजनकत्वं प्रदर्श्यातिव्याप्तिर्वारिता इदञ्च न युक्तं निगमने तद्बोधकपदाभावात्। न चाबाधितत्वप्रतीतीच्छयोच्चरितत्त्वनिर्वाहाय साध्य-पदलक्षणया तद्बोध इति वाच्यम्। वह्निप्रतीतीच्छया धूमपदोच्चारितत्वस्यैवोदीच्य मानसादिबोधेनैव

In Public domain, Digitization Muthulakshmi Research Academy


पादनेन न्यूनत्वं चेत्यतः पूरयति। **तद्बोधौपयिकेति** अवाधितत्वादिवोधौपयिकेत्यर्थः। **विशिष्टहेतुसम्बन्धस्य।** व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानज्ञाप्यत्वस्य। तस्य चावाधितत्वा-दिव्याप्यतया तद्बोधौपयिकत्वं वोध्यम्।

मिश्रमतमुपन्यस्यति। **यत्त्विति** पृथिवीतरेभ्यो भिद्यत इत्यसमस्तं इतरपदं पृथिवीतरपरम्। इतरादिससम्बन्धिकार्थवोधकपदानां समभिव्याहृततत्तत्पदोपस्थाप्यतत्तदर्थे-तरत्वादिना निरूढलक्षणा, अतो वादिवाक्ये स्वारसिकलक्षणाविरहेऽपि न क्षतिः। प्रतिज्ञादौ सर्वत्रैकेनैव पदेन साध्यादिनिर्देश इति न नियमः। तेनाग्रे यन्नपृथिवीतरेभ्यो भिद्यत

---

तन्निर्वाहे लक्षणास्वीकारस्यायुक्तत्वादित्याह। *अबाधितेति* *लक्षणादरः* लक्षणावृत्तेरादरः। न तु लक्षणस्यादर इत्यर्थः। सन्दर्भविरोधात्। अवाधितत्वं साध्यनिष्ठपक्षनिष्ठाभावाप्रतियोगित्वपक्षावृत्ति-साध्याभावव्यापकत्वरूपासत्प्रतिपक्षितत्त्वमादिपदग्राह्यम्। *व्याप्यतयेति* सम्वन्धोपदर्शनमवाधित-त्वादिस्मृतिद्वारा तन्मानसजननाय। वस्तुतस्तु सामानाधिकरण्यादिमात्रस्यैव स्मारकसम्वन्धेनासम्भ-वाद्व्याप्यत्वपर्यन्तानुधावनम्। तदनुमानलाभाय एवञ्च ह्रदो वह्निमान् जलाद्धूमाद्वेत्यादाववाधितत्वादि-व्यभिचारात् व्याप्तिपक्षधर्मतयोर्निवेशसङ्गतिरिति वोध्यम्। केचित्तु। निगमनघटकतत्पदस्यावाधि-तत्वादिविशिष्टहेतौ लक्षणा, तथा चावाधितत्वादिहेतुज्ञानज्ञाप्यवह्निप्रकारकस्ततो वोधः, यद्वा निगमनाद्व्याप्तिविशिष्टहेतुज्ञानज्ञाप्यत्वेन वह्न्यादेर्वोधस्तत एकवाक्यतया प्रतिज्ञाहेतुभ्यां वोधितस्य वह्नौ धूमज्ञानज्ञाप्यत्वस्य वोधने किम्प्रयोजनमित्याकाङ्क्षायामवाधितत्वादिवोधस्य तत्प्रयोजकत्वं कल्प्यते, तथा च निगमनस्यावाधितत्वादिवोधौपयिकविशिष्टहेतुसम्वन्धवोधजनकत्वादिति मूलार्थः। अत्र नैगमनवोधस्यावाधितत्वादिवोधौपयिकत्वं कथमिति न शङ्क्यम्। हेतुरवाधितत्वादिमान् साध्यनिष्ठ-हेतुज्ञानज्ञाप्यत्ववोधकवाक्यानन्तरोत्पन्नवाक्यबाधितसाध्यनिष्ठहेतुज्ञानज्ञाप्यत्वघटकहेतुत्वादित्यनुमान-सम्भवादित्याहुः। इतरत्वस्य केवलान्वयितया वाधमाशङ्क्याह। *इतरादीति* पूर्वकल्पे उपस्थितेऽपि वाधितत्वे मानसस्य निश्चयत्वसम्पादकं व्याप्यत्वमिति)। *निरूढेति* नीलपर्वतो वह्निमानित्यादि-प्रतिज्ञाद्यनुरोधेन वादिवाक्ये निरूढलक्षणा स्वीक्रियते। ननु पृथिवीतरेभ्य इत्यस्यासमस्तत्वे प्रतिज्ञादि-घटकसाध्यवाचकपदसमानानुपूर्वीकसाध्यवाचकपदेनैवोदाहरणादिप्रयोग इति नियमाद्यन्नेतरेभ्यो भिद्यत इत्याकारकप्रदर्शनस्य युक्ततया तथानभिधाय यन्न पृथिवीतरेभ्यो भिद्यते इत्यन्यानुपूर्वीप्रकारेण साध्यनिर्देशो सङ्गत इत्यत आह। *प्रतिज्ञादाविति* एकेनैव समानानुपूर्वीकपदेनैव साध्यादिनिर्देश एवेति नियमो न सर्वत्रेत्यर्थः। सर्वत्रेत्युक्तेः क्वचित्स्थले सम्भवेऽपि नव्यतिरेक्युदाहरणे तथा प्रकृते

In Public domain. Digitization Muthulakshmi Research Academy


इत्युदाहरणप्रयोगविरोधः। विशेष्यवाचकं पृथिवीतिपदान्तरं पूरणीयं श्रुतपदं समस्तमित्येव वा। **उदाहरणवारणायेति** तज्जन्यबोधेऽपि पक्षसाध्याश्रयत्वात्मकतत्सम्बन्धरूपानुमितिविषयसकलपदार्थभानेनान्यूनविषयकत्वसत्त्वादित्यभिमानः। **तत** अनतिरिक्तेति पदम्। अन्यूनविषयकत्वं हि न प्रकृतानुमितिविषयताव्यापकविषयताकत्वं सर्वस्मात्कालत्ववानयं कालपरिमाणवान् सर्वस्मादित्यत्र हेत्ववयवेऽतिव्याप्तेः।

नापि पक्षतावच्छेदकविशिष्टपक्षविषयकत्वं हेतुत्वं प्रमेयाद्वाच्यत्ववत्प्रमेयादित्यादौ हेत्ववयवेऽतिव्याप्तेः। नापि पक्षतावच्छेदकविशिष्टपक्षविषयकत्वे सति साध्यतावच्छेदकविशिष्टसाध्यविषयकत्वं तद्वैशिष्ट्यविषयकत्वं वा, प्रमेयनिष्ठहेतुत्वं, प्रमेयं प्रमेयादित्यत्र हेतावतिव्याप्तेः। तज्जन्यबोधे प्रमेयत्वत्वरूपसाध्यतावच्छेदकविशिष्टस्य प्रमेयपदार्थतावच्छेदकस्य धर्मिणि वैशिष्ट्याभानादिति पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वं तद्वाच्यम्। तथा च नोक्तोदाहरणेऽतिव्याप्तिरित्याशयेन दूषयति। **तत्तुच्छमिति**

---

यदितरत् तत् न पृथिवी पृथिवीतरेभ्यो भिद्यत इत्यादौ यन्नेतरभिन्नं तन्न पृथिवीत्याद्युदाहरणादेरपि कथकसम्प्रदायसिद्धत्वात्। अन्वय्युदाहरणे तु पदभेदप्रयुक्तार्थभेदभ्रमव्युदासायैकेनेत्यादिनियमः। तेनोक्तनियमानङ्गीकारेण। अत्त्वैकेनैव पदेन न तु पदद्वयेनेत्यर्थः। तेन प्रतिज्ञावाक्ये इतरेभ्यो भिद्यत इति पदद्वयेन साध्यनिर्देशेऽपि न क्षतिः। तेनेतरपदस्य पृथिवीतरार्थकत्वेनेति व्याख्यानमशुद्धं तथा सति तेनेत्यादितः प्राक्प्रतिज्ञादाविति पङ्क्त्यसङ्गतिप्रसङ्गात्। पदद्वयेन साध्याद्यनिर्देशनियमनिराकरणे अपि यन्न पृथिवीतरेभ्य इत्यादिपृथिवीपदघटितोदाहरणकथन्ताया अनिवृत्तेः। साध्यवाचकपदद्वयस्य प्राथमिकत्वेन तत्कथन्ताया अनुदयात्तन्निराकरणस्यानुपयुक्तत्वाच्च। ननु लक्षणाया निरूढत्वं न वादिवाक्ये तदुपगमवीजं किन्तु स्वायत्ते शब्दप्रयोगे इति न्याय एव, नहि निरूढलाक्षणिकनीलादिपदेतरपदेन नीलपर्वतादिपक्षकप्रतिज्ञा सुकरा, इह तु तथाविधेतरपदान्यपृथिवीतरपदघटिता सुकरेति विशेषं मनसिकृत्याह। *विशिष्येति* प्रकृतानुमित्यनिवर्त्यसंशयानिवर्तकत्वरूपस्यानतिरिक्तविषयकत्वस्य सत्त्वदशायां कीदृशमन्यूनविषयकत्वं निवेश्यत इति पृच्छति। *अन्यूनविषयकत्वं हीति* *सर्वस्मादिति* पक्षतावच्छेदककोटौ सर्वस्मादित्यस्यानिवेशे हेत्ववयवे नातिव्याप्तिः सम्भवति। तज्जन्यबोधे सर्वज्ञानज्ञाप्यत्वस्यातिरिक्तस्याभानात्। अतस्तत्र सर्वस्मादिति निर्देशः। एवञ्च प्रकृतानुमितावपि सर्वज्ञानज्ञाप्यत्वभानाद्धेतुजन्यबोधेऽपि तद्भानेऽप्यनतिरिक्तविषयकत्वमक्षतमिति भावः। एवमग्रेऽपि। पञ्चम्यन्तस्य पक्षतावच्छेदककोटिनिवेशस्येदमेव प्रयोजनं द्रष्टव्यम्।

In Public domain. Digitization Muthulakshmi Research Academy


ननु भ्रान्तः पृथिवीपदस्य विशेष्यपरत्वं इतरपदस्य पृथिवीतरपरत्वमवगत्य तादृशोदाहरणात्पृथिवीत्वविशिष्टे साध्यवत्त्वं प्रत्येतीति तत्रातिव्याप्तिरित्यत आह। **तात्पर्यभ्रमेणेति** **तादृशेति** अन्यूनविषयकेत्यर्थः। **अतिप्रसक्तत्वात्** तथा चायमित्याकारकसाध्यवत्त्वतात्पर्यभ्रमविषयसर्वनामपदघटितोपनयेऽतिव्याप्तत्वात्। तात्पर्यभ्रमदशायामपि नातिव्याप्तिप्रसक्तिरित्याह। **न च तावतापीति** **उदाहरणस्य** उदाहरणत्वपर्याप्त्यधिकरणस्य। **यन्नेत्यादेः** यन्नेत्यादिभागार्थस्य। **अनन्वयात्** पृथिवीतरेभ्यो भिद्यत इत्येतादृशबोधेऽप्रवेशात्। तथा चान्यूनविषयकतादृशबोधजनकत्वमेकदेशस्यैव। न तु यन्नेत्यादिघटितसमुदायस्य, एकदेशस्य तु न्यायावयवत्वाभावादेव नातिप्रसङ्गशङ्का, न्यायान्तर्गतत्वस्यैकदेशसाधारणस्य निवेशे चानतिरिक्तविषयकत्वनिवेशेऽपि तादृशोदाहरणैकदेश एवातिव्याप्तिरिति भावः। तात्पर्यभ्रमेण यन्नेत्यादिकमन्तर्भाव्य यद्भिन्ना पृथिवी इतरेभ्यो भिद्यत इत्यन्वयबोधस्सम्भवतीति नाशङ्कनीयम्। जलं न द्रव्यं गन्धवदित्यादौ जलभिन्नद्रव्यं गन्धवदित्यन्वयबोधस्यानुभवविरुद्धतया नञर्थोद्देश्यतावच्छेदकबोधस्याव्युत्पन्नत्वात्। यदितरभिन्नपृथिव्यन्यदित्याकारको यदर्थविशेष्यकबोधोऽपि न सम्भवति। 'अयं न पचति पुरुष' इत्यत्र इदं पदार्थे पाककर्तृपुरुषभेदबोधस्यानुभवविरुद्धतया अभावप्रतियोगितावच्छेदकत्वेनाख्यातार्थभानस्य, 'पचति चैत्र इवायमि'त्यादितः पाककर्तृचैत्रादिसादृश्यबोधस्याननुभवेनेतरविशेषणविशेषणतया तद्भानस्यैव वाऽव्युत्पन्नत्वात्।

---

कालिकसम्बन्धेन हेतुतया विभक्त्यर्थे हेतुत्वान्वयाय कालत्वेति। प्रमेयहेतुत्वे प्रमेयं तादात्म्येन पक्षतावच्छेदकं बोध्यम्। प्रमेयनिष्ठहेतुत्वमिति पाठान्तरं प्रमेयादित्यत्र ज्ञापकत्वं पञ्चम्यर्थ इति मते तस्य विशेष्यत्वेनैव भानात्। प्रमेयनिष्ठहेतुत्वं तदर्थो बोध्यः। तथा पदं साध्यं बोधयत्विति तात्पर्यभ्रमसम्भवार्थं सर्वनामेति। साध्यव्याप्यबोधजनकत्वेन तात्पर्यविषयश्चेदं तथापदमिति तथाभ्रमसम्भवः। ये तु तात्पर्यभ्रमं प्रकारेण कल्पयित्वोक्तोदाहरणेऽनतिरिक्तवृत्तित्वविषयकत्वपदानिवेशेऽतिव्याप्तिं सङ्गमयन्ति तन्मतान्यनुक्रमेण दर्शयति। *तात्पर्यभ्रमणेति* नञ्पदं यत्पदार्थजलादिविशेषितस्वार्थं बोधयत्विति तात्पर्यभ्रमेणेत्यर्थः। भूतलं यद्भिन्नं तमानयेत्यादौ तात्पर्यं प्रसिद्धम्। *इतरेति* नन्वेवं पश्य मृगो धावतीत्यादौ दर्शनविशेषणमृगविशेषणतयाऽख्यातार्थभानस्यानुभवसिद्धस्य विलोपप्रसङ्गः। धावति मृगस्तम्पश्येत्यादिशाब्दबोधोपक्रमे वाक्यभेदो दुर्वारः। अथ मृगकर्तृकं यद्धावनं

In Public domain. Digitization Muthulakshmi Research Academy

अत्र केचित्। अन्यूनविषयकत्वं पक्षतावच्छेदकविशिष्टविषयकत्वे सति साध्यतावच्छेदकविशिष्टविषयकत्वमेव, न तु पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वम्। एवञ्च दर्शितव्यतिरेक्युदाहरणजन्यबोधस्यापि तादृशान्यूनविषयकत्वादतिव्याप्तिः प्रसज्यते। न चैवमपि साध्यतावच्छेदकविशिष्टसाध्यपक्षतावच्छेदकविशिष्टपक्षघटितैकवाक्यार्थबोधकत्वमुदाहरणैकदेशस्यैव न तु तन्न पृथिवीत्यादिभागघटितसमुदायस्येत्यवयवत्व-

---

तत्पश्येति बोधो व्युत्पत्तिवैचित्र्यात्। नीलो घटो भवतीत्यादौ नीलकर्तृकं यदसाधारणधर्मात्मकं भवनं तदाश्रयो घट इति शाब्दबोधस्यान्यत्र स्वयं स्वीकारदिति चेन्न। आमन्त्रय शिष्यो धावति अस्ति तण्डुलः पचतीत्यादौ तथाप्यगतिरेवेति चेन्न। धात्वर्थेतरविशेषणतावच्छेदकतयाऽख्यातार्थभानस्य अनभ्युपगमात्। प्रकृते च धावनाश्रयमृगादेः स्वकर्मकत्वसम्बन्धेन दर्शनाद्यन्वयः। एतत्प्रयोगस्यो (पप)त्पत्तये तण्डुलः पचतीति प्रयोगवारणाय चाख्यातार्थाविशेषितनामार्थक्रिययोः साक्षादन्वयबोधानङ्गीकारात्। क्रमादमुं नारद इत्यबोधि स इत्यादौ धात्वर्थज्ञाने नारदस्य कर्मतासम्बन्धेन न साक्षादन्वयः किन्तु तादात्म्यसम्बन्धावच्छिन्नप्रकारितारूपे इति पदार्थे स्वान्वयिनस्तस्यान्येनाभिधानान्नारदपदात्प्रथमाप्रातिपदिकार्थमात्रे तदनुशासनात्। तादृशप्रकारितायामेवाकृतिज्ञानपरयोज्यत्वं क्रमात्पदार्थोऽन्वेतीति न कोऽपि दोषः। अत एव चैत्रो धावति मृगः पश्यतीत्यादिका प्रतिज्ञा। न च पुष्पञ्जिघ्रति चैत्र इत्यादावात्मनश्चैत्रपदार्थत्वेऽपि पश्य चैत्रः पुष्पञ्जिघ्रतीत्यादौ शरीरविशेष एव तदर्थो वाच्यः। आत्मनस्तदर्थत्वे अस्ति सौरभं पश्येति प्रयोगवारणाय लौकिकविषयिताया एव सम्बन्धत्वादयोग्यतापत्तेः। तथा च समवायेन तत्र धात्वर्थाश्रयत्वान्वयो दुर्घट इति वाच्यम्। अवच्छेदकतासम्बन्धावच्छिन्नाश्रयत्वादेराख्यातार्थतस्य गन्धलौकिकसाक्षात्कारानुकूलघ्राणसमीपपुष्पनयनादेर्वा जिघ्रत्यर्थत्वस्योपगमेनादोषात्। अथैवम् इदं गुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे। वन्देमहिवतां वाचममृतामात्मनः कलामित्यादौ नैयायिकानां का गतिः। शाब्दिकानां वाणीप्राप्तिरूपेदं पदार्थविषयकाशायाः स्वसमानकर्तृका या नमः पदघटितवाक्यप्रयोगोत्तरकालीनतया बोधसम्भ-वादिति चेन्न। वाक्यान्तरार्थघटकतया तत्क्रियापदस्येदं पदस्य तत्रोपसन्धानवैयर्थ्यस्याशाविशेषणेनेदं पदार्थप्रकारकतत्क्रियाविशेष्यकबोधप्रसङ्गस्य च वारणाय तत्र शाब्दिकानां वाक्यभेदस्येष्टतया नैयायिकानामदोषात्। पचति भवतीत्यादौ च पाकः कृतिभावनाश्रयतेति न बोधः। पचतिपदे आख्यातार्थानर्थक्यप्रसङ्गात्। नापि पाककर्ताभावनाश्रय इति बोधः। आख्यातार्थस्योद्देश्यत्वाभावात्। किन्तु पाककृतिरुत्पत्त्याश्रयतेत्याकारः। ननु पाककृतिरुत्पत्त्याश्रय इत्येव बोधोस्त्विति चेन्न। प्रत्ययार्थयो-

In Public domain. Digitization Muthulakshmi Research Academy


विशेषणप्रवेशादेवनातिव्याप्तिशङ्केति वाच्यम्। तादृशान्यूनविषयकत्वघटितधर्मावच्छिन्ननिरूपितजनकतापर्यन्तानिवेशात्। वाक्यार्थद्वयविषयकसमूहालम्बनबोधजनकतामादायातिव्याप्तेः प्रसञ्जनात्, न हि तादृशसमूहालम्बनबोधजनकत्वमेकदेशे पर्यवस्यति। अपि तु

रन्वयस्याव्युत्पन्नत्वात्। अथैककर्तृकपाककर्तृकं भवनमित्येव बोधोस्त्विति चेन्न। सङ्ख्याकालान्यप्रत्ययार्थस्य विशेष्यत्वेनैव प्रकृत्यर्थेऽन्वयात्। न पचति भावतीत्यादिस्तु आधेयतारूपवृत्त्यनियामकसम्बन्धावच्छिन्नाभावासत्त्वादेव न प्रयोगः। चैत्रः पचति भवति त्वं पचसि भवसीत्यादिप्रयोगानां प्रामाणिकत्वे स्वकर्तृकत्वसम्बन्धेनैव चैत्रसम्बोध्यादीनां पाकादावन्वय इति दिक्। *अनिवेशादिति* पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिशाब्दत्वस्य कदाचित्कार्यतावच्छेदकत्वे अपि निरुक्तान्यूनविषयकशाब्दत्वस्यातथात्वेन वा निवेशासम्भवादित्यर्थः। ननु प्रमेयनिष्ठहेतुत्वं प्रमेयं प्रमेयादित्यादौ हेत्ववयवेऽतिव्याप्त्याऽयं कल्पः पूर्वमेव दूषितः तदिदानीं तत्कल्पमनुसृत्यातिव्याप्तिलापने सन्दर्भासङ्गतिरित्यत आह। *अथवेति* अथात्र प्रथमकल्पपरिष्कारप्रकारः। किमनतिरिक्तविषयकत्वं न तावत्प्रकृतपक्षे साध्यतावच्छेदकसम्बन्धेन प्रकृतसाध्यनिश्चयानिवर्त्त्यसंशयानिवर्तकत्वं प्रमेयनिष्ठहेतुत्वं प्रमेयं प्रमेयादित्यादौ हेतावतिव्याप्तेः। पक्षसाध्यविषयतान्यविषयताशून्यत्वोक्तौ संसर्गतामादायासम्भव इति चेन्न। पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यप्रकारताशून्यत्वस्योक्तत्वात्। धूमाद्वह्निमतस्सधर्मेत्यादिप्रतिज्ञायामव्याप्तेर्वारणाय प्रकृतपक्षाघटकत्वेन प्रकृतसाध्यप्रकारतानिवेश्या विशिष्टहेतुसम्बन्धघटकसाध्यप्रकारतायां तादृशविशेष्यतानिरूपकत्वान्ननिगमनेऽतिव्याप्तिः। पर्वतः प्रमेयकालीनवह्निमानितिप्रतिज्ञासङ्ग्रहाय साध्यतावच्छेदकावच्छिन्नप्रकारताप्रवेश्या हेतुत्वं प्रमेयवद्धेतुत्वाज्ज्ञेयत्वाद्येत्यादौ हेत्ववयववारणाय न्यूनदले साध्यतावच्छेदकनिवेशः। हेतुत्वं प्रमेयं वाप्रमेयं प्रमेयमेयादित्यादौ धर्मितावच्छेदकाप्रवेशेन तादृशविशेष्यतानिरूपितसाध्यप्रकारतासत्त्वान्नातिव्याप्तिप्रसङ्गः। पर्वतो वह्निमान् वह्निमत्पर्वतावृत्तिधर्मशून्यत्वादित्यादौ हेत्ववयवे धर्मितावच्छेदकप्रवेशे तु प्रकृतपक्षमुख्यविशेष्यकत्वं वाच्यम्। तच्च स्वनिरूपकत्वस्वान्यसाध्याघटकपक्षतावच्छेदकावच्छिन्नविषयत्वानिरूपकत्वोभयसम्बन्धेन तादृशमुख्यविशेष्यतावत्त्वं तेन हेतुत्वं प्रमेयं प्रमेयत्वत्ववद्धेतुत्वावृत्तिधर्मशून्यत्वादित्यादिहेतौ नातिव्याप्तिः। साध्याघटकत्वनिवेशात्पर्वतः पर्वतकालीनवह्निमानित्यादौ नाव्याप्तिः (प्रकृतपक्षघटकव्यतिरेकव्याप्तिघटकप्रकृतसाध्याभावव्यापकत्वानवगाहित्वं प्रवेश्यं, तेन साध्याघटितव्यतिरेकव्याप्तिबोधकनिगमनव्युदासः)। न्यायावयवत्वोपादानात्तदेकदेशव्युदासः। अथवा प्रकृतपक्षे प्रकृतसाध्यविषयकत्वं यद्बहिर्भूतविषयिताशून्यत्वं तत्। तादृशविषयताशालिनिश्चयत्वव्यापकप्रतिबन्धकतानवच्छेदकत्वं बहिर्भूतत्वान्तार्थः। वह्निसामग्रीत

In Public domain. Digitization Muthulakshmi Research Academy


समुदाय एव। अथवा न्यायान्तर्गतत्वमेव सत्यन्तार्थः। अत एव **मिश्राणां** "घटशब्दो गुणः, द्रव्यकर्मान्यत्वे सति सत्त्वा"दित्यत्रोदाहरणे यदि प्रतिज्ञारूपशब्द एव दृष्टान्तत्वेन उपादीयते तदा **तत्राऽतिव्याप्तिवारणार्थत्वादित्यादिना** शब्दज्ञानपदस्य व्यवृत्तिदानसङ्गतिः। तददाने

आलोकवान्पर्वतो वह्निमान् वह्निसामग्र्या इत्यादौ तादृशानतिरिक्तविषयकप्रकृतसाध्यशाब्दबोधजनकस्य हेतुत्वं प्रमेयं प्रमेयाद्वाच्यत्ववत्प्रमेयादित्यादौ तथाविधप्रकृतपक्षशाब्दबोधजनकस्य हेतोर्वारणायान्यूनविषयकत्वघटकदलद्वयनिवेशः। न च प्रमेयनिष्ठं हेतुत्वं प्रमेयं प्रमेयादित्यादौ हेतावतिव्याप्तिः। पक्षसमानार्थका ये हेतवस्तदन्यत्वस्य वाच्यत्वात्। उत्तरकल्पे सिद्धान्तकल्पे च हेतुत्वे आधेयतासम्बन्धेन प्रमेयस्य साध्यत्वे स्वरूपादिसम्बन्धेन प्रमेयादितिहेतावतिव्याप्तेस्तदन्यत्वं विनाऽवारणाच्च। गगनेऽपि सर्वत्वेनाधेयतासत्त्वात्कालिकसम्बन्धेन वा हेतुत्वान्न दोषः। स्वस्य स्वधर्मितावच्छेदकत्ववारणाय निरवच्छिन्नविशेष्यतान्तरोपगमे च तादृशविषयितानवच्छिन्नजन्यतानिरूपितजनकत्वं निवेश्यम्। यद्यपि तादृशबहिर्भूतलिङ्गविषयिताशून्यत्वमग्रे वक्तव्यं पूर्वोक्तवह्निसामग्र्या इति हेतोः इदं जलं निस्स्नेहत्वप्रकारकप्रमाविषयत्वशून्यत्वादित्यादौ यन्न जलं तन्निस्स्नेहत्वप्रकारकप्रमाविषय इत्युदाहरणस्य हेतुत्वं प्रमेयाज्ज्ञेयत्ववत्प्रमेयादित्यादौ च हेतोर्वारणाय निरुक्तान्यून -विषयकत्वनिवेश इति सुवचम्। तथाप्यन्यूनावतिरिक्तपदं विहायेतिमूलानुरोधात्तत्त्याग इति परैःपरिशीलितःपन्थाः। *अत एवेत्यादि* घटशब्द इत्यारभ्य वारणार्थत्वादित्यन्तो मिश्रग्रन्थः। घटशब्द इति शब्दपदं घोत्तराकारोत्तरटकारोत्तराकारत्वरूपानुपूर्व्यवच्छिन्नस्य पक्षत्वस्फोरकं न तु निविष्टं वैयर्थ्यात्। *प्रतिज्ञारूपशब्दः* तदाकारकशब्दः। प्रतिज्ञारूप्यतेऽनेनेतिव्युत्पत्तेः। तेन प्रतिज्ञाशब्दस्योदाहरणैकदेशत्वाभावेऽपि न क्षतिः। तदाकारकशब्दत्वेन तदुपादानमिति यावत्। घटशब्दो गुण इति प्रतिज्ञा -बोधस्य घटशब्दो गुण इति शब्दशब्दस्येत्यर्थः। अत्र चानुमित्यन्यूनानतिरिक्तविषयकशाब्दबोधजनकत्वमित्यत्र शाब्दपदं व्यर्थम्। अनुमित्यन्यूनानतिरिक्तविषयकज्ञानजनकत्वस्यैव सम्यक्त्वादिति यद्युच्येत तदाघटशब्दो गुण इति प्रतिज्ञाघटितन्यायघटकोदाहरणैकदेशे यो यो द्रव्यकर्मान्यत्वे सति सत्तावान् स गुणो यथा घटशब्दो गुण इति शब्दरूपदृष्टान्तघटकीभूतघटशब्देऽतिव्याप्तिस्तद्विशेष्यकगुणत्वोपनीतभानरूपश्रावणप्रत्यक्षे घटशब्दो गुण इत्याकारके तादृशशब्दस्य विषयविधया जनकत्वात्। दृष्टान्तघटकशब्दस्यापि प्रतिज्ञाघटकशब्दसमानानुपूर्वीकतया श्रावणस्य तादृशानुपूर्वीरूपपक्षतावच्छेदकप्रकारकत्वेन गुणत्वरूपसाध्यप्रकारकत्वेन च प्रकृतानुमित्यन्यूनानतिरिक्तविषयकत्वाच्च सत्तादिभानविरोधिसामग्रीवशाद्वा सत्ताद्यभानादनुमित्यन्यूनानतिरिक्तविषयकत्वम्। अत्र प्रतिज्ञाप्रत्यक्षमादाय तद्घटकयावद्वर्णेषु नातिव्याप्तिरभिहिता तस्याग्रिमवर्णद्वयावगाहित्वेनाति-

In Public domain. Digitization Muthulakshmi Research Academy


तत्रातिव्याप्तिप्रसक्तिः। विषयविधया श्रावणप्रत्यक्षजनकत्वात्तादृशदृष्टान्तरूपशब्दस्येति। पक्षतावच्छेदकविशिष्टविषयकत्वमेवान्यूनविषयकत्वम्, एवञ्च तादृशोदाहरणैकदेशातिव्याप्तिवारणायैव साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकमात्रविशिष्टसाध्यप्रकारकत्वार्थकमनतिरिक्तविषयकत्वमिति तज्जन्यवोधस्य साध्यतावच्छेदकसम्बन्धेन साध्याप्रकारकत्वात्। मात्रपदान्तर्भावान्निगमनव्युदासः तज्जन्यवोधे विशिष्टहेतुसम्बन्धस्याधिकस्य साध्यांशे भानेन शुद्ध-साध्यतावच्छेदकावच्छिन्नसाध्याप्रकारकत्वात्। एवं वह्निव्याप्यधूमवानयमित्याद्युपनयजन्य-

---

रिक्तविषयकत्वात्। नन्वेवमपि प्रतिज्ञाघटकीभूतघटशब्द एवातिव्याप्तिः कुतो नाभिहिता तस्यापि गुणत्वेन रूपेण स्वविषयकप्रत्यक्षजनकत्वादित्युदाहरणाभिधानं निर्वीजमिति चेन्न। गुणत्वेन प्रतिज्ञाघटशब्दप्रत्यक्षं नोत्पत्तुमर्हति प्रतिज्ञाश्रवणात्पूर्वं गुणत्वरूपविशेषणोपस्थितेरभावात् विशिष्टवुद्धौ विशेषणज्ञानस्य कारणत्वात्। उदाहरणघटकस्य च घटशब्दस्य गुणत्वेन प्रत्यक्षं सम्भवति। तत्पूर्वं प्रतिज्ञयैव गुणत्वोपस्थितेरिति तावत्पर्यन्तानुसरणम्। न च को गुण इति जिज्ञासयैव गुणत्वोपस्थिते तेन रूपेण प्रतिज्ञाघटकघटशब्दप्रत्यक्षं सम्भवतीति तावत्पर्यन्तानुसरणं किमर्थमिति वाच्यम्। प्रतिज्ञावाक्यात्पूर्वं नियमतो जिज्ञासायास्सर्वत्र सत्त्वे मानाभावात्। अत एव जिज्ञासावोधकवाक्यानि विहाय पञ्चवाक्यानामेव न्यायत्वमुररीकृतं नवीनैः। ननु घटत्वत्वादिना प्रतिज्ञाया कथं श्रवणं घटत्वादीनां पूर्वमनुपस्थितेरिति चेन्न। अनुपस्थितस्य गुणत्वस्य भावानङ्गीकारेऽप्यनुपस्थितानां घटत्वादीनां भानस्य सिद्धान्तसिद्धत्वात्। प्रत्यक्षभिन्नघटत्वादिना शब्दज्ञाने एव विशेषणज्ञानमुद्रया घटत्वादिज्ञानस्य हेतुत्वात्। इहापि घटत्वादिनिर्विकल्पकं स्वीकार्यमिति। इदन्तु वोध्यम्। उत्तरत्वं ध्वंस एव स चानुपस्थितोऽपि पूर्ववर्णस्य संसर्गः। उत्तरवर्णप्रत्यक्षं तत्संसर्गेण पूर्ववर्णोपनीतभानात्मकम्। एवं पूर्ववर्णविशिष्टोत्तरवर्णोपनीतभानात्मकं तृतीयवर्णप्रत्यक्षोत्तरमितिरीत्या चरमवर्णप्रत्यक्षमित्येकः पन्थाः। ध्वंसस्य संसर्गत्वे मानाभावात्पदप्रत्यक्षे आनुपूर्वी न भासते किन्तु ध्वंसं ज्ञात्वा ध्वंसरूपपूर्ववर्णोत्तरत्वप्रकारकं मानसमित्यपरः पन्था इति। ***दृष्टान्तरूपशब्दस्येति*** ननूदाहरणघटकस्य घटशब्दो गुण इति वाक्यस्य प्रतिज्ञावाक्यरूपदृष्टान्तवोधकत्वस्यैव सत्त्वेन कथं तद्रूपत्वमिति चेन्न। दृष्टान्तो रूप्यतेऽनेनेति व्युत्पत्त्या दृष्टान्तरूपेत्यस्य दृष्टान्तवोधकेत्यर्थात् शाब्दपदे दत्ते च शाब्दवोधस्य हेतुवैशिष्ट्यावगाहित्वान्नातिव्याप्तिरित्युपष्टम्भकनिगर्वः। ***साध्येति*** अभावे प्रतियोगितासम्वन्धेन भेदस्य भानात्। ***मात्रेत्यादि*** नन्वन्वयव्याप्तिविशिष्टसम्वन्धवोधस्थले हेतुव्यापकतावच्छेदकवह्नित्वभानात्साध्यतावच्छेदकेतरानवच्छिन्नप्रकारकत्वं निगमनेऽक्षतमिति चेन्न।

In Public domain. Digitization Muthulakshmi Research Academy

बोधस्य व्याप्तिघटकाधिकरणांशे साध्यतावच्छेदकावच्छिन्नप्रकारकत्वेऽपि साध्यांशे व्यापकत्वस्याधिकस्य भानेन तत्रापि नातिप्रसङ्गः।

न चैवमपि यन्न पृथिवीतरान्यादित्युदाहरणैकदेशेऽतिप्रसङ्गः तज्जन्यबोधे पक्षताव-च्छेदकविशिष्टपक्षविषयकत्वस्य शुद्धसाध्यतावच्छेदकविशिष्टप्रकारत्वस्य च सत्त्वादिति वाच्यम्। पक्षतावच्छेदकत्वावच्छिन्नविशेष्यत्वावच्छेदेन तादृशसाध्यप्रकारकत्वस्य दलद्वय-निष्कृष्टार्थत्वात् तादृशोदाहरणभागजन्यबोधस्येतरभेदांशे निर्धर्मितावच्छेदकतया तादृश-प्रकारकत्वविरहात्। साध्यतावच्छेदकसम्बन्धनिवेशनञ्च यत्र कालिकसम्बन्धेन कालपरिमाण-स्पन्दत्वादेस्साध्यता समवायेन च तस्यैव हेतुता तत्रत्योपनयीयव्याप्यान्तातिरिक्तभाग-वारणाय। सिषाधयिषया च न्यायप्रोयगो नाभ्युपेयत इति यत्र साध्यतावच्छेदकविशिष्ट-साध्यस्य साध्यतावच्छेदकसम्बन्धेन हेतुता तत्रत्योपनयीय तादृशभागेऽतिप्रसङ्ग इत्यस्य नावकाशः।

न चैवमपि निगमनीय तस्मादित्यंशातिरिक्तांशेऽतिव्याप्तिर्दुर्वारैवेति वाच्यम्। तस्मादित्यंशार्थमनन्तर्भाव्य व्यवहितयोः पक्षसाध्यवद्वाचकपदयोरन्वयबोधजनकत्वादि-तिरीत्या उक्तस्थलेऽपि व्यावृत्तिदानं सङ्गमयन्ति। अयं पदाननुषङ्गपक्षे निगमनेऽनतिरिक्त-विषयकत्वव्यावृत्तिर्न सङ्गच्छते इत्याशङ्कते। **यदि चेति** अयमादीत्यादिना इदमादि-

---

निरवच्छिन्नसाध्यतावच्छेदकापर्याप्तावच्छेदकतानिरूपकत्वस्य तदर्थत्वात्। साध्यतावच्छेदसम्बन्धाव-च्छिन्नप्रकारतानिवेशादेव व्यतिरेकव्याप्तेस्साध्याभाववदवृत्तित्वरूपव्याप्तेर्वा निगमनार्थघटकत्वे अदोषात्। यत्र च यादृशं साध्यतावच्छेदकं तत्पर्याप्तः साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकारताव-च्छेदकताकत्वं वा विवक्षितं प्रकृतपक्षविशेष्यकत्वावच्छिन्ने प्रकृतसाध्यप्रकारकत्वाभावादेव व्यतिरेकि-निगमनवारणम्। *पक्षतेति* अन्यूनविषयकं सदनतिरिक्तविषयकमित्युद्देश्यविधेयभावमहिम्ना अवच्छेद्यावच्छेद्यावच्छेदकभावलाभः। *तादृशेति* शुद्धसाध्यतावच्छेदकविशिष्टेत्यर्थः। शुद्धत्व-मनुषङ्गपक्षे निगमनवारणाय। नन्वेवं दर्शितसाध्यतावच्छेदकसम्बन्धोपादानफलं न सम्भवतीत्यत आह। *साध्यतेति* *तत्रत्येति* कालपरिमाणव्याप्यकालपरिमाणवानयमित्याद्युपनयाय शुद्धहेतु-मत्ताबोधकस्य कालपरिमाणवानयमिति भागस्य वारणायेत्यर्थः। *तस्मादिति* अयं तस्माद्वह्नि-मानिति निगमनस्यायं वह्निमानित्यंशे इत्यर्थः। पक्षपदार्थोपस्थित्यव्यवहितसाध्योपस्थापकत्व-

In Public domain. Digitization Muthulakshmi Research Academy


परिग्रहः। **वाक्यैकवाक्यतयेति** उपनयनिगमनवाक्ययोरेकवाक्यतयेत्यर्थः। **विशिष्टलाभात्** पक्षतावच्छेदकविशिष्टे साध्यवत्तालाभाद्विशेषाकाङ्क्षानिवृत्तेः। न च पक्षवाचकपदाननुषङ्गे तस्मान्नेतराणीत्यादिनिगमनविरोधः अनुयोग्यमिश्रितनञर्थशाब्दबोधस्याऽव्युत्पन्नतया तस्याबोधकत्वेन[15] वाक्यत्वाभावादिति वाच्यम्। एतन्मते तादृशनिगमनानभ्युपगमात्। यद्यप्यनतिरिक्तविषयकत्वानिवेशे अन्यूनविषयकबोधजनकत्वं तज्जनकज्ञानविषयत्वं वा न्यायावयवत्वविशेषितं प्रतिज्ञाहेत्वादिजन्यबोधमादाय हेत्वादावतिप्रसक्तम्। तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकयत्किञ्चिज्ज्ञानविषयतावद्वर्णसमुदायत्वनिवेशे नायं दोष इति स्थलान्तरे व्यावृत्तिमाह। **तदा इत्यादिना** **भाने** ज्ञाने **सामान्यतः** अधिकरणत्वरूपसामान्यधर्मावच्छिन्ने विशेषरूपानवच्छिन्ने इति वा। **साध्यवत्त्वभानात्** साध्यवत्त्वविषयकत्वात्, उपनयस्य

---

रूपासत्त्यभावेनेत्याशयः। इदमादीत्यादिना न च नात्र गन्ध इत्यादावत्रेत्यादिपरिग्रहः। *वाक्ययोः इति* यद्यप्यग्निहोत्रं जुहोति यवागूं पचतीत्यादौ अग्निहोत्रहोमसाधनीभूतयवागूपाकानुकूलकृतिमानिष्टसाधनाग्निहोत्रहोमक इति बोधस्स्वीकार्यः अन्यथा यवागूपाकस्य वैयर्थ्यप्रसङ्गात्। तत्रादृष्टानङ्गीकारात्। एवञ्च तत्तद्वाक्यार्थज्ञानसहितं योग्यताज्ञानम्, एकवाक्यार्थविशिष्टापरवाक्यार्थप्रतीतिघटिततात्पर्यज्ञानञ्च कारणम्। तत्तद्वाक्यार्थज्ञानौपयिकाकाङ्क्षावाक्यद्वयसन्निधानं चोपयुज्यते। न तु वाक्यद्वयाकाङ्क्षा। तथा चोक्तम् "स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया। वाक्यानामेकवाक्यत्वं पुनस्संहत्य जायते"* इति। तथाप्यत्त्रेव वादितात्पर्याद्वाक्यैकवाक्यतानामवयवान्तरेणेति बोध्यम्। एक -वाक्यता च यत्किञ्चिदेकविषयताप्रयोजकत्वं विषयतान्तरनिरूपितत्वस्य तद्विशेषणत्वात्। *विशिष्ट इति* शुद्धपर्वतत्वावच्छिन्ने तादृशवह्नित्वानवच्छिन्नबोधेच्छाया विशिष्टपर्वतत्वावच्छिन्नतद्बोधजनकेन निवृत्त्यसम्भवाद्दीधितौ यदि चेति। *तादृशेति* तस्मादितरेभ्यो भिद्यत इत्येव निगमनोपगमात्। इयं तस्मान्नेतराणीति तु न पक्षपदघटिततया सम्प्रदाय विरोधात्। न्यूनता शङ्कते। *यद्यपीति* भानं, विषयिता, तथा च भाने भानादित्यत्रानन्वयादाह। *ज्ञान इति* साध्यसामानाधिकरण्यघटकाधिकरणस्य साध्याधिकरणत्वेन निवेशेऽधिकरणत्वावच्छिन्ने साध्यभानं व्युत्पाद्य साध्येन रूपेण निवेशे निरवच्छिन्ने तद्भानमाह। *विशेषेति* *उपनयस्येति* निगमने च तस्मादिति तत्पदार्थव्याप्तिर्न

---

15. तन्मात्रस्याबोधकत्वेनेति पाठभेदः

* ..........................

वारणाय तदिति योजना। पक्षे साध्यवैशिष्ट्यावगाहित्वमेवान्यूनविषयकत्वं न तु पक्षतावच्छेदकवैशिष्ट्यान्तर्भाव इत्यभिप्रायेणेदम्। प्रमेयाद्वाच्यत्ववानयं प्रमेयः प्रमेयादित्यादि-वक्ष्यमाणहेतुवारणाय पक्षतावच्छेदकवैशिष्ट्यान्तर्भाव आवश्यक इति तदन्तर्भावाभिप्रायेण स्थलान्तरे व्यावृत्तिमाह। **यत्रेति** **पक्षेति** पक्षस्य ताद्रूप्येण पक्षतावच्छेदक-प्रकारेण दृष्टान्ततया यत्रोपन्यासः तत्रोदाहरणस्य, साध्यस्य ताद्रूप्येण साध्यतावच्छेदक-प्रकारेण हेतुतया यत्रोपन्यासः तत्रोपनयस्य च वारणाय तदित्यर्थः। रूपान्तरेण पक्षसाध्ययो-र्दृष्टान्तहेतुत्वेनोपन्यासे दर्शितान्यूनविषयकत्वासम्भव इति **ताद्रूप्येणेति**। ननु पक्षे साध्यनिश्चय -दशायामेव तादृशदृष्टान्तहेतुत्वसम्भव इति संशयाभावात् न्याय एव न सम्भवतीत्यत आह। **तादृशसिषाधयिषयेति** जल्पस्थले संशयस्यावश्यकत्वेऽपि वादस्थले न तथेति संशयमन्तरेणापि अनुमित्साधीनानुमितिनिर्वाहाय प्रयोगसम्भवादिति भावः।

---

भासत इत्याशयः। ***पक्ष इति*** अवच्छेदकावच्छेदेनोद्देश्यत्वेऽधिकरणकपक्षेऽपि व्यावृत्तिर्द्रष्टव्या। प्राचां पक्षैकदेशो न दृष्टान्त इत्यतोऽयमिति। हेतोस्साध्यतावच्छेदकावच्छिन्नघटितत्वलाभाय प्रमेयत्वस्य साध्यतानुसरणम्। ***वक्ष्यमाणेति*** साध्यतावच्छेदकनिवेशव्यावृत्तिदानाय पञ्चम्यर्थपक्षक -प्रतिज्ञास्थल इत्यादिना हेतुत्वं प्रमेयाद्वाच्यत्ववत्प्रमेयादिति यो हेतुर्वक्ष्यते तत्साध्यवतः पक्षत्वे तद्धेतावेव पक्षतावच्छेदकनिवेश व्यावृत्तिरित्यर्थः। यत्तु पक्षमुख्यविशेष्यकत्वनिवेशान्नायं दोष इति। तन्न। प्रमेयाद्वाच्यत्ववद्धेतुत्वं पक्षः तादात्म्येन स्वरूपसम्बन्धेन वा प्रमेयं साध्यं स्वरूपसम्बन्धेन तादात्म्यसम्बन्धेन वा प्रमेयं हेतुस्तत्र प्रमेयादिति हेत्ववयवेऽतिव्याप्तिः। साध्यतावच्छेदकसम्बन्धस्य एतद्दलेऽनिवेशस्य वक्ष्यमाणत्वात्। अस्मन्मते तु पक्षतावच्छेदकपर्याप्तविशेष्यतावच्छेदकताकत्व-निवेशान्नातिव्याप्तिः। किञ्च जन्यज्ञानविषयतात्वाद्वाच्यत्ववज्जन्यज्ञानविषयताजन्यज्ञानविषियतात्व-प्रमाजन्यज्ञानवृत्तीति निरूपितत्वसंसर्गकप्रतिज्ञायां जन्यज्ञानविषयतात्वादिति जन्यज्ञानविषियतात्व-प्रमाजन्यज्ञानविषयतेति पक्षमुख्यविशेष्यकबोधजनके हेतावतिव्याप्तिः। जन्यज्ञानविषयतात्वप्रमा-जन्यज्ञानविषयतेति बोधस्य साध्यतावच्छेदकसम्बन्धेन जन्यज्ञानविषयतात्वप्रमाजन्यज्ञानरूपसाध्य-प्रकारकत्वात्। पर्वतो धूमवान् वह्नेरित्यादिवारणाय भ्रमभिन्नज्ञानजन्यज्ञानविषयत्वस्य भ्रमभिन्नत्व-घटितस्य पञ्चम्यर्थत्वात्। यदि च ज्ञानज्ञाप्यत्वे एव प्रकृत्यर्थभानं तदा स्वविषयकप्रमाजन्यज्ञान-निरूपितत्वसम्बन्धेन जन्यज्ञानविषयतात्वसाध्यकोक्तहेतावतिव्याप्तिरिति मुख्यत्वसाध्यतावच्छेदक-सम्बन्धयोर्निवेशेऽपि पर्याप्तिनिवेशश्चावश्यक इति पक्षतावच्छेदकनिवेशो दुर्वारः। ***संशयेति*** संशये

In Public domain. Digitization Muthulakshmi Research Academy


ननु सिषाधयिषया न्यायप्रयोगोपगमे पञ्चम्यर्थहेतुत्वे यादृशसम्बन्धेन प्रकृत्यर्थस्यान्वयस्तत्सम्बन्धेन वह्निसाध्यकहेतुत्वपक्षकवह्निहेतुकन्यायान्तर्गतहेत्ववयवेऽतिव्याप्तिर्दुर्वारैव इति सिषाधयिषया न्यायप्रयोगो नाङ्गीकर्तव्य इत्यत उक्तव्यावृत्तिर्न सङ्गच्छत इत्यत स्थलान्तरमनुसरति। **यत्र चेति** पर्वतत्वसामानाधिकरण्येन साध्यसिद्धेर्यत्रोद्देश्यता तत्र एतत्पर्वतत्वेनापि दृष्टान्तता न सम्भवति। एतत्पर्वतत्वेन साध्यवत्तानिश्चयस्यापि तादृशानुमितिविरोधित्वात्, अतः **पर्वतत्वावच्छेदेनेति**। **तत्रोदाहरणस्येति**

यद्यपि पर्वतत्वावच्छेदेन वह्निमत्तावगाहिन्यामनुमितौ पर्वतत्वव्यापकत्वस्याधिकस्य वह्न्यंशे भानात्तादृशदृष्टान्तघटितोदाहरणजन्यबोधे च तदभानादस्यानुमितिन्यूनविषयकत्वम् एव। तथापि पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपं निर्वाच्यमुद्देश्यानुमित्यन्यूनविषयकत्वमव्याहतमेवेति भावः।

यद्यपि पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयतानिवेशे उदाहरणैकदेश एव तादृशः विषयता न तु समुदाये इति न्यायावयवत्वनिवेशान्नातिव्याप्तिप्रसङ्गः। तथापि प्रतिज्ञामात्राघट-

---

सत्येव जिज्ञासोदयात्। सन्दिग्धेऽर्थे न्यायः प्रवर्तत इति सिद्धान्तात्। विपरीतोद्भावकपरविजिगीषया न्यायप्रयोगो जल्पः। *वादेति* प्रथमतः संशयनिवर्तकसाध्यनिश्चयसत्त्वेऽपि अनुमित्सैवानुमितिचरमकारणपरामर्शप्रयोजकन्यायसम्पादिकेति भावः। जगदीशेन तु न्यायलक्षणे साध्यसंशयकालीनत्वं विशेषणमुपात्तं तच्च सिषाधयिषास्थले प्रतिज्ञादिवाक्यपञ्चकस्यालक्ष्यत्वमभिप्रेत्य। परे तु तस्य लक्ष्यत्वमभिप्रेत्य सिषाधयिषासाध्यसांशयिकविप्रतिपत्त्यन्यतरकालीनत्वं तदर्थ इत्याहुः। एवं सिद्धिसत्त्वे सिषाधयिषाविरहे प्रतिज्ञादिपञ्चवाक्येऽतिव्याप्तिवारणाय सिषाधयिषाकालीनत्वं देयमिति तेनोक्तं तत्र सिद्ध्यसत्त्वे न्यायेऽव्याप्तिरतः पक्षताकालीनत्वं तदर्थ इति तदुभयमपि वृथेत्युपेक्षितम्। *यादृशेति* हेतुत्वं वह्निमद्वह्नेरित्यादौ निरूपितत्वं सम्बन्धः। *पर्वतत्वावच्छेदेनेति* अवच्छेदकावच्छेदेन हेतुमत्ताबोधकोत्तरोपनयः, उदाहरणे यत्पदन्यपक्षतावच्छेदकावच्छिन्नेतरत्वग्राहकोदृष्टान्तप्रयोग एव, प्रतिज्ञया यादृशबोधो जन्यते सदृष्टान्तेनेतरेण वोदाहरणेन तादृशबोधो न जन्यते अनाकाङ्क्षितत्वात्। तेन न पूर्वग्रन्थविरोधः। तत्र सामानाधिकरण्येन प्रतिज्ञायामुदाहरणे तादृशबोधानुत्पत्तेरुक्तत्वादिति। *निर्वाच्यमिति* अन्यूनविषयकत्वशरीरे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्यानिवेशादिति भावः। *जन्यतेति* उदाहरणवारणाय जन्यताविषयितयोर्निवेशः। *प्रतिज्ञा-

मात्रेति* प्रतिज्ञात्वसमानाधिकरणत्वे सति प्रतिज्ञात्वावच्छिन्नभेदानुयोगितानवच्छेदकधर्मवत्त्वमर्थः। हेत्वाद्यघटकत्वं तु न निवेश्यते प्रयोजनाभावदिति भावः। अत्र चानतिरिक्तविषयकत्वनिवेशपक्षे साध्यतावच्छेदकसम्वन्धविषयकतादृशनिश्चयानिवर्त्यसंशयानिवर्तकत्वं तदग्रे विवक्षणीयम्। तावतैव च सामानाधिकरण्येन तत्साध्यकप्रतिज्ञायां स्वार्थमात्रवोधमादाय दर्शितोदाहरणैकदेशे च नावच्छेदकावच्छेदेन तत्साध्यकप्रतिज्ञालक्षणातिव्याप्तिः।

अथावच्छेदकावच्छेदेन साध्याभावसंशयस्यापि तादृशशाब्दवोधनिवर्त्यतया कथं नातिव्याप्तिः। न च तादृशनिश्चयनिवर्त्यतावच्छेदकतानवच्छेदकं यत्संशयवृत्तिविषयितावृत्तिरूपं तद्विशिष्टा-वच्छिन्ननिरूपितप्रतिबन्धकतावच्छेदकविषयिताशून्यत्वं तदर्थः। तादृशञ्च पक्षतावच्छेदकव्यापकताविशिष्टसाध्याभावप्रकारितात्वमिति न दोष इति वाच्यम्। एवमप्यवच्छेदकावच्छेदेन साध्याभाव संशय प्रतिवन्धकताया अपि तथाविधनिश्चयत्वव्यापकतयोक्तरूपस्य तन्निवर्त्यतावच्छेदकतानवच्छेदकत्वासम्भवादिति चेन्न। तादृशनिश्चयत्वव्यापिकासाध्यसामानाधिकरण्येन साध्यवत्तानिश्चयत्वाव्यापिका या प्रतिबन्धकता तदनिरूपकसंशयः अवच्छेदकावच्छेदेन साध्याभावसंशयस्तमादाय अनतिप्रसङ्गात्। अत्रापि तन्निरूपितनिवर्त्यतावच्छेदकानवच्छेदकेत्यादिप्रागुक्तविवक्षणमावश्यकमन्यथोक्तसंशयस्य सामानाधिकरण्येन साध्याभावसंशयत्वेन तन्निवर्त्यतयाऽसङ्ग्रहापत्तेः। तादृशनिश्चयत्वव्यापकप्रतिवन्धकताकत्वसामानाधिकरण्येन साध्यावगाहित्वावच्छिन्नप्रतिबध्यत्वोभयशून्यसंशय एव वा निवेश्यः। अवच्छिन्नत्वं स्वरूपसम्वन्धविशेषः। न चैवमप्यसम्भव इति वाच्यम्। अवच्छेदकावच्छेदेन साध्यावगाहिताविरहविशिष्टतत्प्रतिबन्धकतावच्छेदकविषयिताशून्यत्वस्य वाच्यत्वात् सामानाधिकरण्येन प्रतिज्ञायां तज्जन्यबोधस्य दैवादवच्छेदकावच्छेदेन साध्यावगाहित्वेऽतिव्याप्तिर्दुर्वारेति चेत्तर्हि तादृशावगाहिताबहिर्भूततादृशविषयिताशून्यत्वस्य वाच्यत्वात्। उक्तसमूहालम्वनवोधे च तादृशवहिर्भूतसामानाधिकरण्येन साध्यावगाहितायास्सत्त्वेन न दोषः। तद्वहिर्भूतत्वञ्च पक्ष तादृशसाध्यावगाहित्वानवच्छिन्नप्रतिबन्धकतावच्छेदकत्वं तदवच्छिन्नप्रतिबन्धकतानवच्छेदकत्वं वा यथामनीषमुपादेयम्। न चैतादृशप्रयासः कमर्थ इति वाच्यम्। साध्यतावच्छेदकसम्वन्धश्चान्यूनविषयकत्वदलेन प्रविष्टः प्रयोजनाभावादित्यग्रिमग्रन्थदर्शने नैतादृशरीतेरेवाभिप्रेतत्वात्। न च स ग्रन्थः सामानाधिकरण्येन प्रतिज्ञापर इत्यवच्छेदकावच्छेदेन प्रतिज्ञालक्षणे तद्दले तन्निवेशे न वाधकमिति वाच्यम्। साध्यतावच्छेदकसम्वन्धनिवेशस्य प्रयोजनसत्त्वेन तदभावकथनासङ्गतेः। तद्दले साध्यातावच्छेदकसम्वन्धविवक्षाया अवच्छेदकावच्छेदेन प्रतिज्ञालक्षणेऽत्यावश्यकत्वे तां विस्मृत्यदीधितिकृदुक्तपूर्वप्रयोजनं लापयित्वा तत्स्मरणमात्रेण तन्निरस्य दीधितिकृतां प्रयोजनान्तराभिधानस्य

In Public domain. Digitization Muthulakshmi Research Academy


कत्वगर्भन्यायावयवत्वं प्रकृतलक्षणे प्रविष्टं, तच्च यथायं पर्वत इत्युदाहरणैकदेशेऽपीत्याशयः। अवच्छेदकावच्छेदेन साध्यसाधनकन्यायनिविष्टप्रतिज्ञालक्षणे अवच्छेदकावच्छेदेन साध्यवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वनिवेशे नैतद्व्यावृत्तिसङ्गतिरित्यपरितोषेण व्यावृत्यन्तरम् आह। **सत्यन्तस्य वेति।** अत्रायमाशयः। एतल्लक्षणघटकन्यायावयवत्वशरीरे उभयघटकभागद्वयाघटितत्वं न निवेशनीयम्, अनतिरिक्तविषयकत्वविशेषणेनैव तादृशभागद्वयघटितसमुदायातिप्रसङ्गवारणात्।

न च शब्दज्ञानस्यैव शाब्दबोधजनकतया जनकत्वमत्र जनकज्ञानविषयत्वमेव वाच्यम्, एवञ्च तादृशसमुदायविषयकज्ञानमप्येकदेशप्रतिज्ञाविषयकत्वेन तथाविधबोधजनकमिति समुदायेऽतिप्रसङ्ग इति वाच्यम्। तादृशबोधजनकतावच्छेदकीभूतयत्किञ्चिदेकज्ञानविषयतानिरूपकवर्णसमुदायत्वस्यैव विवक्षणीयत्वात्।

---

प्रामादिकत्वापत्तेश्च। यद्यपि साध्यतावच्छेदकसम्बन्धविषयकतादृशनिश्चयानिवर्त्य संशयानिवर्तकबोध-सामानाधिकरण्येन साध्यानवगाहित्वेन विशिष्योक्तप्रयासमन्तरेणैवावच्छेदकावच्छेदेन तत्साध्यकप्रतिज्ञालक्षणं सुवचम्। तथापि विशेषणान्तरपूरणमपेक्ष्यावच्छेदकावच्छेदेन साध्यावगाहित्वघटितान्यूनविषयकत्वदलप्रवेश एव स्यादिति तदुपेक्षेति। सामानाधिकरण्येन तत्साध्यकप्रतिज्ञालक्षणस्य अवच्छेदकावच्छेदेन तत्साध्यकप्रतिज्ञायान्तु नातिव्याप्तिः। शुद्धसाध्यतावच्छेदकसम्बन्धविषयकप्रतिज्ञार्थनिश्चये सामानाधिकरण्यमात्रेण साध्याभावसंशयविरोधिताया असत्त्वेनैवादोषात्। एवञ्च इदानीमन्यूनविषयकत्वदल एवानायत्यासाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं साध्यप्रकारतायां निवेश्यम्। तथा च पक्षतावच्छेदकावच्छेदेन तत्साध्यकप्रतिज्ञावारणाय अनवच्छिन्नसाध्यतावच्छेदक-सम्बन्धावच्छिन्नसाध्यावगाहित्वं निवेश्य सामानाधिकरण्येन तत्साध्यकप्रतिज्ञायास्सामानाधिकरण्येन प्रतिज्ञायामतिव्याप्तिवारणाय पक्षतावच्छेदकावच्छिन्नसाध्यावगाहित्वं निवेश्यावच्छेदकावच्छेदेन तत्साध्यप्रतिज्ञायाश्च लक्षणं फलितं न्यायत्वघटकप्रतिज्ञायामेतन्निवेशे उदाहरणैकदेशो न वार्यत इति विशेष्यदले तन्निवेश्यमित्याशयेनाह। *अवच्छेदकावच्छेदेनेति* यद्वेति क्वचित्पाठः। अन्यूनविषयकत्वदले आपाततस्साध्यतावच्छेदकसम्बन्धं निवेश्य दर्शितव्यावृत्तिनिराकरणमयुक्तमित्याशङ्क्य उभयघटकेत्यादिविशेषणसत्त्वे पूर्वव्यावृत्तिस्तत्परित्यागे चाग्रिमापीत्याशयवानाह यद्वेत्यवतारणीयम्। ननु हेत्वर्थविशिष्टसाध्यवैशिष्ट्यबोधमादाय प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिरत आह। *अनतीति* समुदायः प्रतिज्ञाहेतुसमुदायः। तथाविधबोधः प्रतिज्ञामात्रार्थबोधः। स च प्रतिबन्धक-

न च तादृशवर्णसमुदायत्वं तादृशवर्णत्वव्यापकसमुदायत्वं, तादृशञ्च प्रतिज्ञाहेतुसमुदायत्वमपीति तत्समुदायातिप्रसङ्ग एवेति तादृशभागद्वयाघटितत्वमवश्यमेव निवेश्यमिति वाच्यम्। अनतिरिक्तपदसार्थक्याय तादृशयत्किञ्चिदेकज्ञानविषयिताशालिवर्णत्वसमनैयत्यमेव निवेश्य प्रतिज्ञाहेत्वादिसमुदायत्वस्य वारणीयत्वात्। समानार्थकप्रतिज्ञाद्वयादिविषयक-

---

वशाद्धेत्वर्थाविषयको बोध्यः। *तादृशबोधेति* प्रतिज्ञामात्रविषयिताया एवावच्छेदकत्वेन तादृशसमुदायविषयिताया अनवच्छेदकतयाऽतिव्याप्त्यभावादिति भावः। *तादृशेति* प्रतिज्ञामात्राघटकत्वनिवेशकल्पे हेत्वर्थबोधकभागघटितप्रतिज्ञामात्रार्थबोधवृत्त्यैकदेशार्थबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतामादाय हेत्ववयवैकदेशेऽतिव्याप्तिरतो व्यापकत्वनिवेशः। *तादृशेति* प्रतिज्ञाहेतुविषयकज्ञानजन्यप्रतिज्ञामात्रार्थविषयकशाब्दबोधनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयिताप्रतिज्ञामात्रनिरूपितैव तन्निरूपकवर्णत्वसमनैयत्यस्य तादृशसमुदायत्वेऽसत्त्वान्नातिव्याप्तिः प्रतिज्ञाहेतुजन्यप्रतिज्ञाहेत्वर्थशाब्दबोधनिष्ठजन्यतानिरूपितजनकतावच्छेदिका प्रतिज्ञाहेतुनिरूपितविषयितापि भवति इति तन्निरूपकवर्णत्वसमनियतत्वस्य तत्समुदायत्वे सत्त्वादतिव्याप्तिरतोऽनतिरिक्तेति पदसार्थक्यं एवञ्च तादृशबोधस्यातिरिक्तविषयकत्वान्नातिव्याप्तिरिति। न च प्रतिज्ञाहेत्वन्तरजन्यशाब्दबोधनिष्टहेतुविशेषितहेतुत्वविषयकशाब्दबोधत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितानिरूपकवर्णत्व -समनियतसमुदायत्वस्य हेत्ववयवे सत्त्वात्तत्रातिव्याप्तिवारणायानतिरिक्तपदसार्थक्यसम्भवाद्यथाश्रुतन्यायावयवत्वपरित्यागो व्यर्थ इति वाच्यम्। अनतिरिक्तपदानुपादाने निरुक्तान्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतायाः हेतुज्ञानेऽसत्त्वेनातिव्याप्त्यभावात्। हेत्वन्तसमुदायस्य प्रकृतपक्षविशेष्यकहेतुज्ञानज्ञाप्यप्रकृतसाध्यप्रकारकशाब्दबोधत्वस्यैव जन्यतावच्छेदकतया तद्घटकान्यूनविषकत्वस्य अपि तथात्वेन तदवच्छिन्नजन्यतानिरूपितजनकतावच्छेदिकासमुदायनिरूपितविषयितापि भवतीति तत्रातिव्याप्तिवारणायानतिरिक्तपदसार्थक्यादिति। *निवेश्येति* अन्यथा प्रतिज्ञाहेतुसमुदायस्योक्तरीत्यैव वारणे तन्निवेशनमनर्थकं स्यादित्यर्थः। अत्रेदं बोध्यम्। एतत्कल्पे उभयघटकभागद्वयाघटितत्वचतुष्टयन्तु न निवेशार्हं प्रयोजनाभावात्। किन्तु प्रतिज्ञाहेतूभयघटकभागद्वयाघटितत्वमात्रं तथा च यद्यपि तदुपादानेऽप्ययमादिनिगमनान्तवारकतयाऽनतिरिक्तविषयकत्वसार्थक्यसम्भवाद्धेत्वन्तावारणे अपि न क्षतेरिति तत्त्यागप्रदर्शनं व्यर्थम्। तथापि तेनैव हेत्वन्तवारणात्पश्चात्तद्वैयर्थ्यमभिप्रेत्यप्रथमत एव तत्त्यागो दर्शितः। यद्यप्ययमादिनिगमनान्तेऽनतिरिक्तविषयको बोधो नास्त्येवायं वह्निमानिति भगस्याबोधकत्वात्। प्रतिज्ञायान्तु सोस्तीति तमादाय तज्जनकतावच्छेदकविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वमात्रोक्तौ प्रतिज्ञाहेतूभयघटकभगद्वयाघटितत्वमावश्यकम्। प्रतिज्ञोदाहरणसमुदाय-

In Public domain. Digitization Muthulakshmi Research Academy


यत्किञ्चिज्ज्ञानविषयताश्रयवर्णत्वसमनैयत्यस्य तादृशप्रतिज्ञाद्वयादिपर्याप्तसमुदायत्वे सत्वेऽपि न क्षतिः तदुभयादपि[16] प्रतिज्ञाव्यवहारात्। अपि तु प्रतिज्ञैकदेशस्यापि तादृशबोधनिष्टवह्नि-सम्बन्धिबुद्धित्वाद्यवच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतयत्किञ्चिदेकज्ञानविषयताश्रय-वर्णसमुदायत्वमादायैव प्रतिज्ञात्वप्रसङ्ग इति प्रतिज्ञाद्यघटकत्वं प्रतिज्ञामात्राघटकत्वमेव वा निवेशनीयम्। अन्यूनानतिरिक्तविषयकशाब्दबुद्धित्वस्य किञ्चिज्जन्यतानवच्छेदकतया तदव-च्छिन्नजन्यतानिरूपितजनकतानिवेशासम्भवात्। इत्थञ्चाननुषङ्गपक्षेऽप्ययं तस्माद्वह्निमानिति

---

त्वादिवारणाय प्रतिज्ञात्वाश्रयतदनाश्रयेत्याद्यर्थश्च। तथापि यथाश्रुतदीधितेस्तथालाभात्प्रकारान्तर-स्यादूषकत्वाद्वा समनैयत्यमेव निवेशितमिति। नन्वेवं समानार्थकप्रतिज्ञाद्वयादिविषयकज्ञानस्य निर्वक्त-व्यान्यूनानतिरिक्तविषयकयत्किञ्चिच्छाब्दबोधजनकतया तत्रातिव्याप्तिरित्याशङ्कामिष्टापत्त्या निराकुरुते। *समानार्थकेति* उभयघटकेत्यादिविशेषणनिवेशनकल्पेऽपि तस्य लक्ष्यताया एव स्वीकार्यत्वात्। तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वरूपविशेषणन्तु अनतिरिक्तपदवैयर्थ्य-भिया न मणिकृत्सम्मतमिति भावः। *तादृशबोधनिष्ठेति* प्रकृतानुमित्यन्यूनानतिरिक्तविषयकप्रतिज्ञा-प्रतिपाद्यसम्पाद्य सम्पूर्णार्थविषयकबोधनिष्ठेत्यर्थः। *प्रतिज्ञामात्राघटकत्वमेवेति* प्रतिज्ञात्वसमानाधि-करणत्वे सति प्रतिज्ञात्वावच्छिन्नभेदानुयोगितावच्छेदको यो यस्तद्भिन्नवत्त्वमेवेत्यर्थः। न चैतत्कल्पे उदाहरणादिघटको स वह्निमानित्यादिभागवारणमशक्यमिति वाच्यम्। पूर्वकल्पे स्वरूपयोग्यतारूप-जनकतानिवेशोऽप्येतत्कल्पे फलोपधानरूपजनकतायानिवेशनीयत्वात्। नन्वन्यूनानतिरिक्तविषयक-त्वावच्छिन्नजन्यतानिवेशेनैवैकदेशातिव्याप्तिवारणसम्भवे प्रतिज्ञामात्राघटकत्वमपि न निवेश्यते प्रयोजनाभावादित्याशङ्कां निरस्यति। *अन्यूनेति* ननु प्रतिज्ञामात्राघटकत्वे सति अन्यूनातिरिक्त-विषयकशाब्दबोधवृत्तिजन्यतानिरूपितजनकतावच्छेदकविषयितानिरूपकवर्णत्वसमनियतसमुदायत्वं पर्यवसितं तत्र व्यापकत्वं व्यर्थं हेत्वर्थबोधकभागघटितप्रतिज्ञास्थले हेतुज्ञानस्य तादृशबोधानु-पधायकत्वादिति चेन्न। अतिसान्निध्येन तद्विषयकप्रतिज्ञाविषयकसमूहालम्बने फलोपधानं सम्भवतीति हेत्वेकदेशेऽतिव्याप्तिर्नतूदाहरणादिघटकवह्निमन्महानसादिविषयकप्रतिज्ञाविषयकज्ञान इत्यभिप्रायात्। अत्र च हेत्वर्थबोधकभागघटितप्रतिज्ञायामपि प्रतिज्ञामात्रार्थबोध एवाभिसन्धिस्तेन तत्र प्रतिज्ञाहेत्वर्थ-बोधमादाय हेतौ सम्पूर्णलक्षणोपरि अतिव्याप्तेरग्रेऽभिधानेऽपि नसन्दर्भासङ्गतिः। अन्यूनविषयकत्वाव-च्छिन्नजन्यतानिवेशेन तद्वारणात्तत्पक्षे अवयवाघटकेत्यस्य वैयर्थ्यम्। तत्र च स्वरूपयोग्यतारूप-

---

16. उभयस्मादिति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy


भागे प्रतिज्ञादिहेत्वन्तभागेऽपि व्यावृत्तिस्सम्भवतीति। **अवयवाघटकेति** न च तदुपादानेऽपि धूमादालोकवान्पर्वतो वह्निमानित्यादिप्रतिज्ञार्थमात्रविषयकबोधनिष्ठधूमविशेषितहेतुत्वविषयकशाब्दत्वावच्छिन्नकारणधूमादित्यादिहेतुविषयकज्ञानविषयतामादायावयवाघटके तादृशहेतावतिव्याप्तिवारणायानतिरिक्तविषयकबोधनिष्ठपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकयत्किञ्चिज्ज्ञानविषयतानिरूपकवर्णसमुदायत्वनिवेशस्यावश्यकतया अवयवाघटकत्वनिवेशनं निष्प्रयोजनमिति वाच्यम्। तादृशहेतुवारणाय अवयवाघटकेत्यनेन अवयवैकदेशमात्रविषयकज्ञाननिष्ठजनकताव्यावृत्तावयवत्वपर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मव्यापकविषयताकान्यज्ञानवृत्तित्वावच्छिन्नभेदस्यैवान्यूनानतिरिक्तविषयकबोधजनकतायां विवक्षणीयत्वात्।

---

जनकताया एव प्रवेशात्प्रतिज्ञैकदेशवारणाय व्यापकत्वं हेत्वन्तरवारणाय व्याप्यत्वमनतिरिक्तविषयकत्वञ्च निवेशनीयमिति भावः। अवयवाघटकत्वं प्रतिज्ञाद्यघटकत्वं प्रतिज्ञामात्राघटकत्वं वा, अत्रानतिरिक्तविषयकत्वोपादानेऽप्यन्यूनविषयकत्वावच्छिन्नजन्यतानिवेशावश्यकतां प्रदर्श्यावयवाघटकत्वनिवेशवैयर्थ्यमाशङ्कते। *न चेति* अन्यूनविषयकत्वनिष्ठावच्छेदकताकत्वमेव जन्यतायां निवेश्यं नत्ववच्छेदकतापर्याप्तिरिति वक्ष्यते। अन्यथा प्रतिज्ञा हेतुसमुदायेऽतिव्याप्त्यप्रसक्तेः। तादृशसमुदायजनितो यो विशिष्टवैशिष्ट्यावगाहिबोधस्तन्निष्ठविशिष्टवैशिष्ट्यावच्छिन्नजन्यताया निरुक्तान्यूनविषयकत्वपर्याप्तजन्यतावच्छेदकताकत्वाभावात्। व्यावृत्तान्तं चोपलक्षणं न तु लक्षणघटकम्। एकदेशवारणाय पर्याप्तिनिवेशः। अत्र प्रतिज्ञात्वहेतुत्वादीनां पञ्चानामेवावयवत्वपर्याप्तावच्छेदकतया तादृशपञ्चधर्मव्यापकं न्यायत्वमेयत्वाद्यवच्छिन्नविषयत्वमेवेति तादृशविषयताकान्यत्वस्य केवलं प्रतिज्ञादिविषयकज्ञानेऽपि सत्त्वेनासम्भव इत्यतो यत्किञ्चिद्धर्मेति। तादृशविषयताकं यज्ज्ञानं तदन्येत्यर्थः। एवञ्च प्रतिज्ञात्वावच्छिन्नविषयताया अवयवत्वपर्याप्त्यवच्छेदकीभूतप्रतिज्ञात्वरूपयत्किञ्चिद्धर्मव्यापकतया प्रतिज्ञाज्ञाने तादृशविषयताकत्वसत्त्वेन न तादृशविषयताकान्यत्वमस्तीति भावः। हेत्वादिनिष्ठसमुदायत्वव्यापकविषयताकभेदकूटनिवेशान्नासम्भवः। न च पूर्वोक्तप्रतिज्ञामात्राघटकत्वशरीरे प्रतिज्ञात्वसामानाधिकरण्याप्रवेशान्नातिव्याप्तिप्रसक्तिरिति किन्तथाविवक्षणेनेति वाच्यम्। एवम् अपि तथा विवक्षणे प्रतिज्ञामात्राघटकत्वं सम्पूर्णमेव निवेश्यमित्यभिप्रायात्। निष्प्रयोजनमिति प्रतिज्ञैकदेशस्य तावतापि वारणात् प्रतिज्ञात्वपर्याप्त्यवच्छेदकत्वनिवेशे प्रतिज्ञात्वमात्रनिवेशेनैव निर्वाहे

In Public domain. Digitization Muthulakshmi Research Academy


शेषवैयर्थ्यं स्यादतो विषयत्वपर्याप्त्युपादानम्। तेनायमादिनिगमनान्तभागेऽप्यतिव्याप्तिसङ्गतिः। असम्भववारणाय व्यापकत्वनिवेशः आनुपूर्व्यवच्छिन्नविषयताया व्यापकत्वानवच्छिन्नविषयकान्यत्व-निवृत्तिः। ननु तथापि धूमादालोकवान्पर्वत इत्यादौ धूमादिति हेत्ववयवेऽतिव्याप्तिः। धूमज्ञानज्ञाप्यत्व-विषयकशाब्दबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकताया अपि तत्र हेतुत्वरूपयत्किञ्चिद्धर्मव्यापक-विषयिताकान्यज्ञानवृत्तित्वावच्छिन्नभिन्नत्वात्। मैवम्। हेत्ववयवसमानाकारप्रतिज्ञाघटकधूमादिति भागस्य विवक्षितहेतुत्वानाक्रान्तत्वेन तद्विषयज्ञानस्य हेतुत्वव्यापकविषयताकान्यत्वात्। प्रतिज्ञाघटक-धूमादिति भागज्ञानवृत्तिजनकतामपेक्ष्य धूमादिति हेत्ववयवविषयकज्ञानवृत्तिजनकत्वस्याभिन्नत्वात्। तथाचोक्तं तादृशधर्मश्च हेत्ववयवादिवृत्तिसमुदायत्वं तत्र च न प्रतिज्ञाद्येकदेशमात्रविषयकज्ञान-विषयत्वमानुपूर्वीसाम्येऽपि समुदायत्वस्य भिन्नत्वादिति। अत्रेदं चिन्त्यते दीधितिकृतां नैतादृशो अभिप्रायः। अन्यूनपदवैयर्थ्यात्। तत्पदं विनापि तत्स्थलीयहेत्ववयवेऽतिव्याप्तिवारणसम्भवात्। हेत्ववयवज्ञाननिष्ठजनकत्वस्य प्रतिज्ञाघटकधूमादिति भागज्ञानवृत्तिजनकताजन्यत्वादिति। केचित्तु पर्वतत्वावच्छेदेन वह्नेस्साध्यत्वे उदाहरणघटके स वह्निमान् यथापर्वत इति भागेऽतिव्याप्तिः। उदाहरणाघटकत्वमनिवेश्यावयवत्वपर्याप्त्यवच्छेदकं निरुच्य तादृशावच्छेदकं यत्तादृशभागत्वं तदुपादाय तादृशज्ञाने उक्तविशेषणस्योपपादनात्। सामानाधिकरण्येन वह्निशाब्दबोधजनकताया अन्यूनपदेन वारणाच्चेत्याहुः। वस्तुतस्तु कारणत्वं कारणतावच्छेदकधर्मभेदेन भिद्यते। तादृशधर्मश्च आनुपूर्वीविशेष एव। एवञ्चावयवाघटकेत्यस्यावयवत्वपर्याप्त्यवच्छेदकेत्याद्यर्थकरणेऽपि नान्यूनपद-वैयर्थ्यं वह्नेस्संयोगवत्सधर्मापर्वतस्संयोगी दहनादित्यादौ हेत्ववयववारणाय तत्सार्थक्यसम्भवात् अन्यथा हेतुमात्राजन्यानतिरिक्तविषयकहेतुविशेषितहेतुत्वविषयकशाब्दबुद्धित्वावच्छिन्नजन्यता-निरूपितजनकतावच्छेदकविषयतानिरूपकवर्णसमुदायत्वस्य हेतौ सत्त्वादतिव्याप्तेः। अन्यूनपददाने च तादृशशाब्दबोधस्य निरुक्तान्यूनविषयकत्वाभावान्नातिव्याप्तिः। तादृशान्यूनविषयकशाब्दबोधकजनक-तावच्छेदकत्वस्य प्रतिज्ञाद्यघटकभागविषयितायामेव सत्त्वेन हेत्ववयवविषयतायामसत्वात्तत्र तादृश-भागहेत्ववयवयोरानुपूर्वीभेदेन तदवच्छिन्नविषयितयोर्भेदात् एवं प्रतिज्ञाघटकभागज्ञाननिष्ठा या निरुक्तानतिरिक्तविषयकशाब्दबोधनिष्ठजन्यतानिरूपितजनकताया अवयवत्वपर्याप्त्यवच्छेदकयत्किञ्चि-द्धर्मव्यापकविषयिताकान्यवृत्तित्वेऽपि हेत्ववयवज्ञाननिष्ठजनकता तद्भिन्नैव दहनादिति हेत्ववयवज्ञान-निष्ठजनकतायां दहनपदोत्तरपञ्चमीपदत्वरूपानुपूर्व्या एवावच्छेदकतया वह्निपदोत्तरपञ्चमीपदत्वरूप-वह्नेरिति भागवृत्त्यानुपूर्वीरूपावच्छेदकस्य ततोऽन्यतया कारणतावच्छेदभेदेन कारणताभेदादिति नान्यूनपदवैयर्थ्यम्। न चैत्स्थलीयहेतुवारणायान्यूनपदनिवेशे धूमादालोकवानिति दीधितिविरोध इति

In Public domain. Digitization Muthulakshmi Research Academy

वाच्यम्। तत्रेत्यादिपदेनैतद्ग्रहणे तद्विरोधाभावात्। न च तथाप्यत्रैव प्रतिज्ञाहेत्वर्थोभयविषयकसमूहालम्बनबोधस्यान्यूनातिरिक्तवृत्तेर्जनकतया हेतावतिव्याप्तिर्दुर्वारैवेति वाच्यम्। मुख्यविशेष्यताद्वयानिरूपकत्वेन बोधविशेषणात्। यत्रात्रैव प्रतिज्ञाहेतूभयविषयकज्ञानात्कथञ्चित्प्रतिज्ञार्थमात्रबोधस्तत्र प्रतिज्ञामात्रविषयितैव जनकतावच्छेदिकेति न प्रतिज्ञाहेतुसमुदाये हेतौ वाऽतिप्रसङ्गः। साम्प्रदायिकास्तु प्रतिज्ञाघटकभागसाधारणहेतुज्ञानकारणताया हेतुत्वव्यापकविषयतान्यज्ञानवृत्तित्वेनैव हेतुवारणात् अन्यूनपदवैयर्थ्यमिति न शङ्क्यम्। तद्दलविवक्षणीयैतादृशार्थेऽवयवाघटकपदस्य स्वरसतः सम्पादकत्वात्। तादृशानवच्छिन्नजन्यताघटितस्य लक्षणान्तरत्वात् एतदस्वरसेनैव वा कल्पान्तरानुसरणादित्याहुः। यत्तु कैश्चिच्छङ्कितं तादृशान्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकताभिधाने हेतुमुपेक्ष्य प्रतिज्ञाहेतुसमुदायेऽनतिरिक्तविषयकत्वदलव्यावृत्तिदाने सन्दर्भविरोधः। हेत्वन्तार्थविषयकशाब्दबोधनिष्ठहेतुविशेषितहेतुत्वविषयकशाब्दबोधत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयि-तानिरूपकवर्णसमुदायत्वस्य हेतौ सत्त्वात्तत्रातिव्याप्तेः। अनतिरिक्तपदोपादाने च हेत्वन्तार्थविषयकशाब्दबोधस्यातिरिक्तविषयकतया तद्वारणासम्भवाच्च तस्मात्सन्दर्भविरोधपरिहारायान्यूनविषयकत्वावच्छिन्नजन्यताविवक्षणस्यावश्यकतयाऽवयवाघटकत्वं व्यर्थमिति। तदपेशलम्। अन्यूनविषयकत्वावच्छिन्नजन्यतानभिधाने कीदृशबोधमादाय हेतावतिव्याप्तिः प्रसज्यते, हेत्वर्थविषयकसमूहालम्वनबोधस्योक्तविशेषणेन वारणाद्धेत्वर्थविशिष्टवैशिष्ट्यावगाहिबोधमादायेति चेत्। उक्तविशेषणस्थाने पक्षमुख्यविशेष्यताभिन्नमुख्यविशेष्यतानवच्छिन्नत्वविशेषणं प्रवेश्यातिव्याप्तिवारणस्य सुकरत्वात्। एवञ्च अवयवाघटकत्वं वह्निमत्पदवारणायावश्यकम्। हेतुत्वं प्रमेयं प्रमेयादित्यादौ प्रतिज्ञाहेत्वर्थबोधमादाय हेतावतिव्याप्तावपि न हेतुसामान्येनेति। वस्तुतस्तूपेक्षाबीजविशेषणस्य नावश्यकताहेतुमात्रातिव्याप्तिरादार्ढ्यप्रकाशनार्थत्वादिति कथमवयवाघटकत्वं व्यर्थं स्यादिति वदन्ति। अत्रान्यूनपददाने लाघवेनान्यूनविषयकत्वावच्छिन्नजन्यतानिवेशादवयवाघटकत्वं व्यर्थमित्याशयेन वस्तुतस्त्विति ग्रन्था-वतारः। सम्प्रदायमते दीधितिकाराणां पक्षतावच्छेदकविशिष्ट इत्यादिनिर्वचनविरोधोऽप्यवतारत इति बोध्यम्। केचित्त्वन्यूनानतिरिक्तविषयकशाब्दबोधनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयितेत्यत्र अवच्छेदकत्वमनतिरिक्तवृत्तित्वं बोध्यम्। तेनानतिरिक्तपदानुपादानेऽन्यूनातिरिक्तविषयकहेत्वन्तार्थविषयकशाब्दबोधनिष्ठहेतुविशेषितहेतुत्वविषयकशाब्दत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकयत्किञ्चिज्ज्ञानविषयितानिरूपकवर्णसमुदायत्वस्य हेत्ववयवे सत्त्वात्तत्रैवातिव्याप्तिः कुतो नोक्तेति दूषणं समाहितम्। हेतुमात्रजन्यहेत्वर्थमात्रविषयकशाब्दबोधनिरूपितजनकतावति हेतुमात्रविषयकज्ञाने हेतु-विषयितायास्सत्त्वेऽप्यन्यूनविषयकशाब्दबोधजनकताया असत्त्वेन तस्यास्तदनवच्छेदकत्वात्। अत

In Public domain. Digitization Muthulakshmi Research Academy


एव दीधितिकाराणां हेतुमुपेक्ष्य प्रतिज्ञाहेतुसमुदायेऽनतिरिक्तपदोपादानव्यावृत्तिरपि साधुसङ्गच्छते। समुदायविषयकज्ञानमात्रेऽन्यूनविषयकशाब्दबोधजनकतायास्सत्त्वेन समुदायविषयतायास्तदवच्छेदक-तया तत्रातिव्याप्तिवारणायानतिरिक्तपदसार्थक्यसम्भवात्। जनकत्वं चात्र स्वरूपयोग्यत्वं विवक्षितं न तु फलोपहितम्। तेन प्रतिज्ञाज्ञानात्कदाचित्तादृशशाब्दबोधाजननेऽपि तद्विषयिताया जनकतानतिरिक्त-वृत्तित्वरूपावच्छेदकत्वक्षतिः। न चैकदेशमात्रविषयकज्ञानजनकताव्यावृत्तित्वं कुत उक्तमिति वाच्यम्। तथा सति धूमादालोकवानित्यादौ धूमादिति हेत्ववयवेऽतिव्याप्तेस्तादृशान्यूनानतिरिक्तशाब्द-बोधनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयितानिरूपकवर्णसमुदायत्वस्य तत्र सत्त्वात्। तत् विवक्षणे च प्रतिज्ञाघटकभागज्ञानवृत्तित्वावच्छिन्नभेदस्य हेत्ववयवज्ञाननिष्ठजनकतायामसत्त्वात् अतिव्याप्त्यभावात्। तत्र कारणतावच्छेदकधर्मभेदाभावेन कारणताया ऐक्यात् प्रतिज्ञाघटकधूम-प्रदोत्तरपञ्चमीत्वमपेक्ष्यहेत्ववयवनिष्ठधूमपदोत्तरपञ्चमीत्वरूपानुपूर्व्या अभिन्नत्वात्। न चान्यूनविषयक-त्वावच्छिन्नजन्यतानिवेशादेव हेतोर्वारणादवयवत्वपर्याप्तीत्यादिव्यर्थमिति वाच्यम्। अनतिरिक्त-विषयकशाब्दबोधनिष्ठनिरुक्तान्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयताश्रयव-र्णसमुदायत्वस्य वाच्यतया प्रकृते प्रतिज्ञाघटकहेतुसमानानुपूर्वीकभागवृत्त्यानुपूर्व्यवच्छिन्न-विषयिताया अपि घटकविषयतात्वेन तादृशान्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदक-तया तन्निरूपकवर्णसमुदायत्वस्य हेत्ववयवेऽपि सत्त्वे नातिप्रसङ्गसत्त्वात्। हेत्ववयवानुपूर्व्यपेक्षया प्रतिज्ञाघटकनिष्ठानुपूर्व्याः भेदाभावेन तद्विषयताया ऐक्यादतोऽवयवत्वपर्याप्त्यवच्छेदकेत्यस्यावश्यक-त्वात्। अत एव तदुपादानेऽपीत्यादिनाऽशङ्क्यैकदेशव्यावृत्तजनकतां निवेश्य भट्टाचार्यैस्समाहितं न तु निरुक्तान्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकता तत्र नास्तीति वदन्ति।

अथैतन्मते वह्निमान्धूमादित्यादौ हेत्ववयवोपेक्षाबीजमसङ्गतम्। हेतुमात्रविषयकज्ञानेऽपि हेत्वर्थावगाह्यन्यूनविषयकशाब्दबोधस्वरूपयोग्यतारूपजनकतासत्त्वादिति चेन्न। अन्यूनानतिरिक्त-विषयकशाब्दबोधजनकतानतिरिक्तवृत्तिविषयितानिरूपकवर्णत्वसमनियतसमुदायत्वं समुदायार्थः। तत्रानतिरिक्तपदानुपादानेऽन्यूनविषयको यो यो बोधस्तज्जनकता तादृशबोधजनकतासामान्यं वा यादृशानुपूर्व्यवच्छिन्नयत्किञ्चिद्विषयिताव्यापकं तादृशानुपूर्व्यवच्छिन्नविषयितानिरूपकवर्णत्वसमनिय-तेत्यात्यर्थाभिप्रायेण तदुक्तेः। अत एव चान्तेऽन्यूनविषयकत्वावच्छिन्ननिरूपितजनकताया हेतुप्रतिज्ञा-घटकभागसाधारणानुपूर्व्यवच्छिन्नविषयिताव्यापकत्वासम्भवेऽपि यत्किञ्चिद्विषयिताव्यापकत्वसम्भवात् तादृशविवक्षया हेत्ववयवो न वारयितुं शक्यते इत्यभिधानसङ्गतिः। न हि हेतुप्रतिज्ञाघटकभाग-विषयितयोरैक्यं सम्भवति। प्रथमविषयितायाः पदान्तरविषयित्वानिरूपितत्वात्। द्वितीयविषयितायाः

In Public domain. Digitization Muthulakshmi Research Academy

अवयवत्वं चेदं न्यायान्तर्गतत्वविशेषणशून्यम्। तेन प्रतिज्ञासमानाकारोदासीनवाक्यज्ञाने प्रतिज्ञाज्ञानीयकारणतायास्सत्त्वेऽपि तत्सङ्ग्रहः, तादृशोदासीनवाक्येऽपि तथाविधावयत्वपर्याप्तेः।

---

तु तन्निरूपितत्वादिति। एतच्चोपेक्षाबीजमुत्पादयितुमेव अनतिरिक्तपदोपादाने तु न विवक्षानिष्प्रयोजनत्वात्। नापि सामान्यपदार्थविवक्षा। तथा सति तथापि धूमादालोकवानित्यग्रिमग्रन्थासङ्गतेः। सामान्यान्तःपातिप्रतिज्ञाज्ञानत्वावच्छिन्नजनकताया हेत्ववयवविषयित्वाव्यापकत्वात्। अनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वमस्ति तदपि वा नास्ति स्वरूपसम्बन्धरूपमेव तन्निविष्टम्। एतदभिप्रेत्यै वा त एवेत्याद्युपष्टम्भकाभिधानम्। तत्राद्ये हेत्वर्थविशिष्टवैशिष्ट्यबोधजनकतायाः प्रतिज्ञाहेत्वानुपूर्व्यवच्छिन्नविषयिताव्यापकत्वेऽपि अन्यूनानतिरिक्तविषयकबोधजनकतायां प्रतिज्ञानुपूर्व्यवच्छिन्नविषयिताव्यापकत्वसद्भावेन तादृशविषयित्वासमनैयत्यान्नातिव्याप्तिः। यत्किञ्चिज्ज्ञानविषयतायां स्वसामानाधिकरण्यनिवेशाच्चालिनीन्यायेन तत्तत्प्रतिज्ञात्वस्य तत्तज्ज्ञानविषयताशून्यवृत्तित्वेऽपि न असम्भवः। द्वितीयपक्षे तु अन्तिमान्यूनविषयकत्वावच्छिन्नजन्यत्वानिवेशनिराकरणग्रन्थो हेयः। हेत्ववयवविषयितायास्तादृशजनकतावच्छेदकत्वात्। यद्वा हेतूपेक्षाबीजं प्राग्वत्। अनतिरिक्तपदोपादाने तु अन्यूनानतिरिक्तविषयकशाब्दबोधजनकतानतिरिक्तवृत्तिविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वमेवार्थः। अनतिरिक्तपदानुपादाने च प्रतिज्ञाहेतुजन्यबोधमादायैवातिव्याप्तिरतस्तन्निवेशः। यद्यपि तदुपादानेऽपि प्रतिज्ञामात्रजन्यशाब्दबोधजनकताप्रतिज्ञाहेतूभयविषयिताव्यापिकेति पुनरतिव्याप्तिस्तथापि एतदस्वरसादेवायमादिनिगमनान्तातिव्याप्तिवारणफलकत्वमनतिरिक्तपदस्य। हेत्वन्तरवारणन्तु तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकनिवेशादेव भट्टाचार्याणां समनैयत्याभिधानञ्च यथाश्रुताभिप्रायेणेति प्रतिभाति। नन्ववयवत्वं न्यायान्तर्गतत्वघटितं तत्पर्याप्त्यवच्छेदकं च न पर्वतो वह्निमानिति वाक्यत्वं तस्योदासीनसाधारण्यात्। किन्तु तत्तद्वाक्यत्वं तथा च तत्तत्प्रतिज्ञाविषयतानामेव तद्व्यापकत्वात्तन्निरूपकान्यज्ञानवृत्तित्वस्योदासीनज्ञानसाधारणकारणतायां सत्त्वादसम्भव इत्यत आह। *अवयवत्वञ्चेति* प्रतिज्ञाद्यघटकत्वदलसत्त्वेन धूमादित्येकदेशसमुदायत्वस्य अवयवत्वपर्याप्त्यवच्छेदकत्वेऽपि तद्व्यावृत्तिः। न चोदासीनवाक्यवृत्तिविषयताया अपि तादृशानुपूर्व्यवच्छिन्नविषयतात्वेन व्यापकत्वसम्भावन्न्यायान्तर्गतत्वोपादानेऽपि न क्षतिरिति वाच्यम्। एकदेशविषयिताया विषयतात्वेन प्रतिज्ञाघटकधूमादिति भागविषयताया वा तादृशानुपूर्व्यवच्छिन्नविषयतात्वेन व्यापकत्वादतिप्रसङ्ग इति। स्वविषयतात्वेन व्यापकत्वनिवेशाद्वा वाक्यभेदेन विषयताभेदात्। केचित्तु तादृशजनकतायामेवावयवाघटकत्वं तच्च तादृशबोधवृत्तियत्किञ्चिज्ज्ञानजन्यताशून्यज्ञानवृत्तिजन्यत्वा

In Public domain. Digitization Muthulakshmi Research Academy


वस्तुतस्तु अवयवत्वघटकविशेष्यदलपरित्यागमात्रेणैव व्यावृत्तिस्सङ्गच्छत इति तादृशजनकतापर्यन्तनिवेशने प्रतिज्ञाघटकत्वदलपरित्यागसम्भवेऽपि तत्परित्यागस्य प्रकृतानु-पयुक्तत्वमित्येतल्लाभायैव अवयवाघटकेत्यभिहितमिति।

केचित्तु यत्र प्रतिज्ञैकदेशस्यापि कथञ्चित्प्रतिज्ञासमानार्थकत्वं सम्भवति तत्रैकदेशे अतिप्रसङ्गवारणायावयवाघटकत्वनिवेशनमावश्यकमित्याहुः। तदसत्। प्रतिज्ञाप्रतिपाद्य-विशिष्टार्थबोधकताया एकदेशे सम्भवेऽपि तन्मात्रस्य तथाविधवोधपरत्वाभावात्, तथात्वे

---

-निरूपकत्वं प्रतिज्ञैकदेशधूमादिति पदज्ञानवृत्तिजनकतायां तादृशजन्यताशून्यधूमविशिष्टहेतुत्वमात्र-ज्ञानवृत्तिजन्यतानिरूपकत्वान्नातिप्रसङ्ग इति प्राहुः। नन्वेवमग्रे पक्षतावच्छेदकविशिष्टे साध्यतावच्छे-दकविशिष्टवैशिष्ट्यावगाहित्वमित्यन्यूनविषयकत्वनिर्वचनविरोध इत्यत आह।। *वस्तुतस्त्वति* *विशेष्यदलेति* उभयघटकेत्यादिदलेत्यर्थः। *प्रकृतानुपयुक्तत्वमिति* तथा चावयवाघटकेत्यपि व्यर्थमेव परन्त्विदानीमुभयघटकेत्यादिदलवैयर्थ्यकथनेन व्यावृत्तिस्सम्भवतीति अवयवाघटकत्ववैयर्थ्य-सम्भवेऽपि तत्कथनमिदानीमनुपयुक्तं तदकथनेऽपि व्यावृत्तिसम्भवादित्यर्थः। अदितिः पुत्रवतीत्यादौ दितिः पुत्रवतीत्याद्येकदेशवारणाय समानेति। रमेश्वरः पूज्यस्सौदामिनीद्रव्यमित्यादौ मेश्वरः पूज्यो दामिनीद्रव्यमित्यादितथाविधवोधजनकतावच्छेदकत्वेन तत्रेच्छाविषयविषयितां निवेश्य दूषयति। *प्रतिज्ञेति* (मतङ्गजो नील इति वाक्याद्गजे नीलत्वबोधो जायतामिति वक्तृतात्पर्यं वाच्यम्। तथा चाश्रयत्वस्वप्रकारकवक्रिच्छाविषयत्वोभयसम्बन्धेन पक्षतावच्छेदकावच्छिन्ने प्रकृतसाध्यप्रकारकत्वा-वच्छिन्नबोधजनकतावच्छेदकताविशिष्टाया यत्किञ्चिज्ज्ञानीयविषयतातन्निरूपकवर्णपर्याप्तसमुदायत्वम् अर्थः। मतङ्गजविषयतानिरूपितागजशब्दविषयितैवोभयसम्बन्धेनावच्छेदकताया आश्रयो न तु तत् अनिरूपितगकारादिविषयतेति, ननु गजो नील इति वाक्यादुक्तबोधो जायतामितीच्छया मतङ्गजो नील इति प्रयोगो भवत्येव विनापि वक्रिच्छां शुकादेः प्रयोगदर्शनाददत्र गजो नीलो मतङ्गजो नील इति वाक्ययोर्नाकाङ्क्षाभेदः, यतस्तस्यां मतं शब्दघटकचरमवर्णोत्तरत्वे गकारो न विशेषणीयः किन्तु तादृशवर्णोत्तरवर्णान्तरानुत्तरत्वेन जनकता, यद्वा नीलपदस्य गजपदविषयतानिरूपिततादृशविषयिता-निरूपितवर्णान्तरविषयत्वानिरूपितगकारविषयिताघटितविषयितात्वेन गजो नील इति वाक्यविषयता-साधारण्येनैव। यद्वा नीलपदस्य गजपदसमभिव्याहारो विशेषव्यापिकया गजो नील इत्यानुपूर्व्या मतङ्गजो नील इत्यादिसाधारणाकाङ्क्षात्वेन, एवञ्च दर्शिततात्पर्यज्ञानतादृशाकाङ्क्षाज्ञानयोरपि परस्पर-सहकारित्वसम्भवान्नात्र सार्थक्यमित्याशङ्कां निराकरोति। *कथञ्चिदिति* मतङ्गजो नील इति

In Public domain. Digitization Muthulakshmi Research Academy


समुदायप्रयोगानुपपत्तेः। कथञ्चित्प्रयोगेऽपि वैयर्थ्येन तत्र समुदायमन्तर्भाव्य न्यायत्वानङ्गीकारात्। अप्रकृतार्थपरवाक्यवारणाय वास्तवतथाविधतात्पर्यसत्ताया लक्षणे निवेशनीयतया एकदेशमात्रस्य तादृशार्थपरत्वाभावेनातिप्रसङ्गानवकाशादिति। **हेत्वन्तस्येति** कथितान्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतानिवेशेन तत्तद्भागप्रतिपाद्यविशिष्टार्थबोधजनकत्वमादाय केवलहेत्वादावतिव्याप्तिर्न सम्भवतीति निगमनमात्रं हेतुमात्रं चोपेक्षितम्।

अन्यूनातिरिक्तविषयकेत्यस्य प्रकृतानुमितिविषयस्यान्यूनविषयस्सन्ननतिरिक्तो विषयो यस्येति व्युत्पत्तेरनुमितिविषयनिष्ठभेदप्रतियोगितानवच्छेदकत्वे सत्यनुमितिविषयातिरिक्तावृत्तियद्विषयत्वं तत्त्वमिति यथाश्रुतार्थमाक्षिपति। **यद्यपीति**

यद्यपि प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकयत्किञ्चिदनुमित्यविषयविषयतकत्वं पर्वतो वह्निमानित्यादिप्रतिज्ञाजन्यनिखिलबोधानामेवेति तादृशानुमितिविषयत्वसामान्याभावो विवक्षणीयः, तथा च केवलाभिधेयत्वाद्यवच्छिन्नपक्षक-

---

वाक्याधीनशाब्दबोधौपयिकाकाङ्क्षाया फलतो सत्त्वव्यञ्जकम्)। यदि रमेश्वरः पूज्य इति वाक्यात्तादृशबोधो जायतामितीच्छायामपि रमेश्वरः पूज्य इति प्रतिज्ञा तत्र तत्सार्थक्यशङ्कां निराचष्टे। *कथञ्चिदिति* *न्यायत्वानङ्गीकारादिति* तथा चावयवाघटकत्वं व्यर्थमेवेति भावः। ननु तत्परत्वानिवेशे तत्पदसार्थक्यं स्यादित्यतस्तत्परत्वस्यावश्यकतामाह। *अप्रकृतार्थपरेति* तच्च नानार्थकहर्यादिपदघटितं लक्षणया जलाद्यर्थकवह्न्यादिपदघटितं च बोध्यम्। *तत्तद्भागेति* प्रतिज्ञाघटकहेतुसमानार्थकभागेत्यर्थः। तथाचान्यूनानतिरिक्तविषयकेत्यादिनिरुक्तौ तादृशविषयकत्वावच्छिन्नजन्यत्वोपादानस्यावश्यकतयानतिरिक्तविषयकत्वानुपादाने न कुत्रापि हेतावतिव्याप्तिरित्यर्थः। तत्तद्भागेत्यस्य तत्तद्धेत्विति वार्थः। एतच्च प्रतिज्ञाद्यघटकत्वकथनं निरुक्तान्यूनविषयकत्वावच्छिन्नजन्यतानिवेशलाभायैव। तत्र पर्याप्त्यनिवेशान्नानतिरिक्तपदवैयर्थ्यमिति भावेनान्यूनविषयकबोधवृत्तिजनकतानिवेशे च तादृशप्रतिज्ञार्थबोधवृत्तिहेतुविशिष्टहेतुत्वबोधत्वावच्छिन्नजनकतामादाय हेत्ववयवे हेतुविशिष्टसाध्यमात्रबोधत्वावच्छिन्नजनकतामादाय निगमने चातिव्याप्तिस्स्यादित्यर्थः। एतच्चावतारिकायामुक्तम्। सर्वमभिधेयं प्रमेयमिति दीधितिकृदुक्तसर्वपदवैयर्थ्यं शङ्कते। *यद्यपीति* अनुमितिविषयातिरिक्ताविषयकत्वस्य यत्किञ्चिदनुमितेर्विषयत्वाभाववन्निष्ठविषयताकत्वस्यानुमितेर्विषयत्वं यत् यत्किञ्चित्तदभाववन्निष्ठविषयताकत्वस्य वाऽभावरूपत्वे विषयतायाः स्वरूपसम्बन्धरूपत्वेनासम्भव इति तत्सामान्याभावनिवेशो सर्वपदवैयर्थ्यमित्यर्थः। *केवलेति* अभिधेयत्वसामानाधिकरण्येन तत्तद

In Public domain. Digitization Muthulakshmi Research Academy


स्थलेऽप्यतिरिक्ताप्रसिद्धिः अस्त्यैव। तथाप्यप्रसिद्धिं स्फुटीकर्तुमभिधेयत्वाद्यवच्छिन्नपक्षक-प्रमेयत्वादिसाध्यकस्थले विश्वमेवानुमितिविषय इत्येतल्लाभाय सर्वमित्युक्तम्। सर्वेभ्यो दर्श-पूर्णमासावित्यत्रैव प्रक्रान्तकतिपयपदार्थमात्रवृत्तिसर्वत्वावच्छिन्नतात्पर्येणापि विशेष्यवाचक-पदान्तरासमभिव्याहृतसर्वपदप्रयोगसम्भवात्सर्वं प्रमेयमित्युक्तावनुमितिविषयतायाः केवला-न्वयित्वालाभादभिधेयमित्युक्तम्।

एवञ्च किञ्चिद्धर्मावच्छिन्नांशेऽभेदेन स्वार्थविशेषणकबोधपरसर्वशब्दस्य तद्धर्मव्यापक -विधेयव्याप्यसर्वत्वबोधकताव्युत्पत्तेरभिधेयत्वव्यापकसर्वत्वलाभान्नानुमितेः कतिपयवस्तुमात्र -विषयकत्वशङ्केति भावः। **अतिरिक्ताप्रसिद्धिः** प्रकृतानुमितिविषयातिरिक्ताप्रसिद्धिः।

---

-भिधेये नानुमितिसम्भवेऽपि तादृशानुमितिविषयत्वसामान्याभावस्याप्रसिद्धिरित्यर्थः। *स्फुटीकर्तुम्* समान्याभावपर्यन्तादिवक्षमाणेऽपि शिष्येण ग्राहयितुम्। सर्वमभिधेयमित्यत्राभिधेयपदप्रयोजनमाह। *सर्वेभ्य इति* पुत्रपौत्रादिस्वर्गपश्वादिसर्वफलोद्देशेनेत्यर्थः। कर्तव्याविति शेषः। *प्रक्रान्तेति* पूर्ववाक्यजन्यशाब्दबोधविषयत्वं पूर्वोपस्थितत्वं वा प्रक्रान्तत्वम्। यद्यपि मिलितानां तावत्फलानां न दर्शपौर्णमासकर्तव्यताप्रयोजककामनाविषयकत्वं सर्वपदेन मिलितत्वेन फलानुपस्थानात्। तथापि यावद्धर्मावच्छिन्नाः प्रक्रान्ताः प्रत्येकं तावद्धर्मावच्छिन्नानामेवोपस्थितौ वाक्यभेदप्रसङ्ग इति तावत् समुदायत्वरूपसर्वत्वेनोपस्थितिमात्रं फलता तु प्रातिस्विकेति बोध्यम्। उद्देश्यतावच्छेदकव्यापक-सर्वत्वतात्पर्यासम्भवसूचनाय कतिपयेति। विधेयव्याप्यत्वं व्यभिचारितासम्बन्धेन विधेयशून्यत्वम् उद्देश्यतावच्छेदकव्यापकसर्वत्वमात्रबोधकत्वे सर्वोऽपि घटस्सुन्दर इति प्रयोगप्रसङ्गः निखिलघटवृत्ति-सर्वत्वस्य घटत्वव्यापकत्वादिति विधेयव्याप्यत्वमुक्तम्। तथा च तत्र सौन्दर्यव्याप्यत्वाभावात् न तत्प्रयोगः। एवं व्याप्यत्वमात्रोक्तौ घटचतुष्टयमात्रवृत्तिसर्वत्वमादाय दर्शितप्रयोगप्रसङ्गतादवस्थ्यमिति उद्देश्यतावच्छेदकव्यापकत्वनिवेशः। तादृशसर्वत्वस्य चोद्देश्यतावच्छेदकघटत्वाव्यापकत्वान्नोक्ता-पत्तिः। प्रकृते चाभिधेयपदसमभिव्याहृतसर्वपदस्याभिधेयत्वव्यापकसर्वत्वबोधकत्वमुक्तव्युत्पत्तेरिति जगन्मात्रवृत्तिसर्वत्वमेवाभिधेयत्वव्यापकं न कतिपयमात्रवृत्तिसर्वत्वमिति तादृशसर्वपदस्य न कतिपय-वृत्तिसर्वत्वबोधकत्वमति भावः। यद्यपि सर्वं गगनं शब्दवदिति व्यवहारवारणाय तद्धर्मसमानाधिकरण-भेदप्रतियोगित्वमपि प्रवृत्तिनिमित्तशरीरे प्रवेश्यं भेदश्च सामानाधिकरण्य निरूपकत्वोभयसम्बन्धेन प्रतियोगिताविशिष्टान्यो ग्राह्यः। तेन द्वित्वाद्यवच्छिन्नभेदसत्त्वेऽपि न क्षतिः एकधर्मं परित्यज्य च नापर -धर्मावच्छिन्नतात्पर्येण तादृशप्रयोगः। तथापि तद्धर्मव्यापकविधेयव्याप्यपर्याप्तिकधर्मत्वेन प्रवृत्ति-

In Public domain. Digitization Muthulakshmi Research Academy



प्रमेयत्वं पक्षनिष्ठाभावप्रतियोगि न वेति संशयसम्भव इत्यतस्तत्सङ्ग्रहायान्यूनानतिरिक्त-विषयकत्वमन्यथा निर्वक्ति। ❋❋प्रकृतेति❋❋ स्वविषयताव्यापकप्रकृतानुमितिविषयताव्यापक-विषयिताकत्वमित्यर्थः। स्वविषयोऽनुमितिविषयान्यूनत्वस्य स्वविषयत्वे तद्विषयताव्यापकत्व-पर्यवसितत्वात् स्वविषयेऽनुमितिविषयानतिरिक्तत्वस्य च तद्विषयत्वे स्वविषयताव्यापकत्व-पर्यवसितत्वादिति भावः।

यद्यपि समूहालम्बनात्मकप्रकृतपक्षकवह्निविधेयकानुमितिविषयतायाः विश्ववृत्तितया पर्वतो वह्निमानिति प्रतिज्ञाजन्यवोधो न तादृशानुमितिविषयतासमनियतविषयताकः वाक्यान्तरसहिततज्जन्यसमूहालम्बनवोधजनकयत्किञ्चिज्ज्ञानविषयवर्णसमुदायत्वं न तन्मात्र-पर्याप्तं यत्किञ्चित्प्रकृतानुमितिव्यक्तिविषयतासमनैयत्यस्य विवक्षणेऽपि च निगमनाद्यति-व्याप्तिर्दुर्वारैव तज्जन्यवोधस्यापि पर्वतो वह्निमान्धूमज्ञानज्ञाप्यवह्निमांश्चेत्याकारकसमूहालम्बन अनुमितिविषयतासमनियतविषयताकत्वात्। तथापि प्रकृतपक्षकप्रकृतसाध्यव्याप्यवत्ता-परामर्शत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकविषयताकत्वेन यद्विषयतासमनैयत्यं तत्त्वस्य विवक्षितत्वान्न दोषः।

---

निमित्तत्वपक्ष एव तत्प्रवेशः न त्वेतत्पक्ष इत्याशयः। द्वेधानुमितिविषयतानिवेशे गौरवादाह। ❋स्वेति❋ स्वं शाब्दबोधः अनुमितिविषयताव्यापकत्वसम्पत्तये प्रकृतेति। ❋समूहेति❋ पर्वतो वह्निमान् सर्वं प्रमेयमित्याकारिकेत्यर्थः। समूहालम्वनशाब्दबोधविषयतायास्तत्समनैयत्येऽप्याह। ❋वाक्यान्तर-सहिततदिति❋ ❋यत्किञ्चिदिति❋ असमूहालम्वनप्रकृतानुमितिः। ❋यदिति❋ प्रतिज्ञाजन्यशाब्दवोध-सामान्यपरम्। तेन तत्तच्छाब्दवोधविषयतायाः परामर्शजन्यतावच्छेदकविषयतात्वाव्यापकत्वेऽपि न क्षतिः। तादृशपरामर्शजन्यतावच्छेदकविषयताव्यापकतावच्छेदकस्वनिरूपकवृत्तिविषयतात्वकत्वोक्तौ वा एकैकशाब्दवोधपरम्। इदन्तु चिन्त्यते। परामर्शवैशिष्ट्यस्यैव कार्यतावच्छेदकत्वं न तु विषयविषयकत्वस्यापि तत्र प्रवेशः। यत्तु पक्षताकार्यतावच्छेदकविषयतात्वेन समनैयत्यमिति। तन्न। धूमलिङ्गकेच्छाविरहविशिष्टसिद्धिविशिष्टान्यानुमित्त्वस्यैव तत्कार्यतावच्छेदकत्वात्तत्रापि तदप्रवेशात्। बाधाभावजन्यतावच्छेदकविषयतात्वेन समनैयत्यमिति केचित्। वस्तुतस्तु व्याप्यवत्तापरामर्शत्वेति लेखनस्वरसात् व्यापकसामानाधिकरण्यस्य व्याप्तित्वे हेतुतावच्छेदधर्मसम्वन्धभेदेऽपि स्वावच्छिन्न-व्यापकसामानाधिकरण्य स्वाश्रयत्वोभयसम्वन्धेन धर्मवत्त्वं व्याप्यत्वमनुगतम्। साध्याभाववदवृ-त्तित्वस्य व्याप्तित्वे च हेतुतावच्छेदकसम्वन्धान्यहेतुप्रतियोगिकसम्वन्धानवच्छिन्नत्वस्य परिचायकतया

In Public domain. Digitization Muthulakshmi Research Academy



नन्वेवं सत्युक्तस्थलीयोपनयेऽतिव्याप्तिः तज्जन्यबोधस्यापि विश्वविषयकत्वेन तथाविधानुमितिविषयितासमनियतविषयताकत्वादित्यतो विषयतापदस्य प्रकारत्वाभिप्रायेण अन्यथा तदर्थं निर्वक्ति। **प्रकृतेति** तादृशोपनयजन्यबोधे प्रकारीभवतोऽभावत्वादेः तादृशानुमितावप्रकारत्वान्न तत्प्रकारतायास्समनैयत्यमिति नातिव्याप्तिरिति भावः। **सकलेति** सकलाभिधेयवृत्तिधर्मवदिदं द्रव्यमिति योजना। तादृशानुमिताविव तत्स्थलीयोपनयजन्यबोधे विश्वस्यैवाभिधेयत्वेन प्रकारतया तत्प्रकारतायास्समनैयत्यमक्षतमेवेति भवत्यतिव्याप्तिरिति भावः।

ननु विशेषणानवच्छिन्नप्रकारतानां समनैयत्यं विवक्षणीयमतो नातिव्याप्तिः। उपनय-जन्यबोधेऽभावत्वादौ तादृशप्रकारतासत्त्वादुक्तानुमितेस्तादृशप्रकारतायाश्च तत्रासत्त्वादित्यतोऽनुमितावपि तेषां तथाविधप्रकारताघटनाय स्थलान्तरेऽतिव्याप्तिमाह। **सकलाभिधेयेति** अत्राभावत्वप्रतियोगित्वत्वादीनां स्वरूपतः पक्षतावच्छेदकत्वाद्भवति तथात्वमिति भावः। द्रव्यमिति विपरीतकोटिप्रसिध्द्यर्थम्। **विशिष्टपक्षबोधक इति** उपनयस्थेदं पदेन विशेष्यमात्रपरामर्शेऽन्यूनविषयकत्वं न सम्भवतीति भ्रमनिराकरणाय व्याप्तिशरीरे

---

हेतुतावच्छेदकसम्बन्धविषयतायाः कारणतावच्छेदककोटिनिवेशे प्रयोजनाभावान्न कोऽपि दोषः। एवं लिङ्गभेदानियन्त्रितपक्षताकल्पे पक्षताकार्यतावच्छेदकत्वमपि सम्भवतीति। सकलाभिधेयोत्यनेन गगन-स्यापि सङ्ग्रहः। *विश्वस्यैवेति* व्याप्तिघटकीभूताभावत्वादीनामपि अभिधेयत्वेनानुमितौ प्रकारत्वम् इति सूचनाय दृष्टान्तकथनं केवलान्वय्यनुरोधेन चेत्सर्वत्रापि साध्ये पक्षनिष्ठाभावप्रतियोगित्वधीरिव बाधस्तदाविशेषणानवच्छिन्नेति विशेषणपदमवच्छिन्नत्वसामान्याभावलाभाय। *तेषाम्* अभावत्वादीनाम्। ननु निरवच्छिन्नप्रकारतासमनैयत्यनिवेशे पक्षेऽत्यन्ताभावाप्रतियोग्याकाशाभाववत्त्वेन पक्षत्वे अपि उपनयातिव्याप्तिसम्भवात्सकलाभिधेयनिष्ठेति व्यर्थम्। मैवम्। केवलविषयतानां समनैयत्यपक्षे अप्युपनयातिव्याप्तिं वक्तुं तदुपादानम्। प्रमेयत्वानुषङ्गत्यागबीजमाह। *द्रव्यमिति* *अन्यूनविषयकत्वम्* अनुमितिविषयताव्यापकविषयताकत्वं समनैयत्यघटकम्। ननु निरवच्छिन्नप्रकारतानां समनैयत्यनिवेशपक्षे कथमुक्तोपनयेऽतिव्याप्तिः। तस्य व्याप्तिबोधकत्वेन तद्घटकहेतुसामानाधिकरण्य साध्यसामानाधिकरण्य घटकाधिकरणानां हेत्वधिकरणत्वेन साध्याधिकरणत्वेनैव निवेशे तादृशाधिकरणत्वस्याधिकवर्णतात्वस्य वा स्वरूपतोपनयजन्यबोधे भाने नानुमितौ त्वभानेन निरवच्छिन्नप्रकारतासमनैयत्याभावादित्याशङ्क्याधिसाध्येन साधनेनैव चाधिकरणप्रवेशं स्वीकृत्य निरस्यति। *व्याप्तीति*

In Public domain. Digitization Muthulakshmi Research Academy



साधनसाध्यप्रकारेणैव तदधिकरणान्तर्भावः नत्वधिकरणत्वेनापीत्यनुमितौ तस्य तत्त्वस्य वा स्वरूपतः प्रकारत्वविरहेऽपि नासङ्गतिः। हेतुरप्यत्रेदन्त्वं समवायेन द्रव्यमेव वा बोध्यः। गुणादेस्तथात्वे हेतुतावच्छेदकगुणत्वादेः स्वरूपतः उपनयजन्यबोधे भाने कथितप्रकारता-समनैयत्यानुपपत्तेः।

न चाभेदेन विषयतासमनैयत्योक्तावनुमितिविषयतात्वसमनियतस्वविषयतात्वक-त्वोक्तौ नायं दोष इति वाच्यम्। हेत्वर्थघटितार्थकप्रतिज्ञाघटकन्यायान्तर्गतहेतुजन्यबोध-विषयतायामनुमितिनिरूपितविषयतात्वाभावादनुमितिविषयतात्वव्याप्य स्वविषयतात्वकत्वा-भावादेव तादृशबोधवारणसम्भवेनान्यूनविषयकत्वांशवैयर्थ्यापत्तेः।

न हि साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टप्रकृतपक्षतावच्छेदकावच्छिन्नविषयता-वहिर्भूतविषयता अनुमितिनिरूपिता। समूहालम्बनानुमितिनिरूपितत्वमादाय नातिप्रसङ्गा-वकाशः प्रकृतपरामर्शजन्यतावच्छेदकविषयतात्वस्यैव निवेशनीयत्वादन्यथाऽसम्भवापातात्

---

अत्र सकलाभिधेयनिष्ठात्यन्ताभावाप्रतियोग्याकाशाभाववदिदं द्रव्यमित्यत्रानुमितौ द्रव्यत्वं स्वरूपतो न प्रकारः साध्यतावच्छेदकरूपेणैव प्रकारत्वादित्याशयेनेदं त्वमुक्तमिदन्त्वस्य स्वरूपत एव पक्षतावच्छेदकत्वे उद्देश्यविधेयभावस्फोरकत्वेन घटकत्वे वा तस्य हेतुत्वे वा तस्य हेतुत्वस्वरूपत इदं त्वस्य वानुमितावभावात् साध्यतावच्छेदकीभूतद्रव्येतरावृत्तित्वघटकतया स्वरूपतो द्रव्यत्वं भासत इति द्रव्यं हेतुकृतम्। द्रव्यत्वं न हेतुः। सिषाधयिषया न्यायप्रयोगापत्तेः। ***कथितेति*** अनुमितौ स्व-रूपतो गुणत्वाद्यभाने नोपनयबोधे च तथा तद्भाने नातिव्याप्तेरलक्ष्यकतापत्तिरिति भावः। उक्तोपनयेति व्याप्तिं निरसितुं शङ्कते। ***न चेति*** एवं चानुमितिविषयत्वोपनयजन्यबोधविषयत्वयोर्निरूप्यनिरूपक-भावभेदेन महान् भेद इति न समनैयत्यमिति नातिव्याप्तिरिति भावः। ***हेत्वर्थेति*** धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादिन्यायस्थलीयहेतुजन्येत्यर्थः। ***अन्यूनेति*** निगमनार्थबोधस्य सर्वस्याप्य-नुमितिविषयताशालित्वे बाधकाभावादन्यूनविषयकत्वमात्रोपादाने निगमनवारणासम्भवात् अनति-रिक्तविषयकत्वमावश्यकमित्याशयेनान्यूनविषयकत्वमात्रवैयर्थ्याभिधानं बोध्यम्। प्रतिज्ञार्थहेत्वर्थ-समूहालम्वनमादाय हेत्वन्तवारणाय वा नतिरिक्तविषयकत्वसार्थक्यं बोध्यम्। ***समूहेति*** हेतुजन्य-बोधमादाय दीधितिरीत्याऽतिप्रसङ्गं दर्शयितुं समूहालम्वनानुधावनम्। अनतिरिक्तविषयकत्वो-पादानेऽपि प्रतिज्ञाजन्यबोधकत्वावच्छिन्नजन्यताकमादाय दोषोऽस्तीति तत्त्यागः। ***प्रकृतेति*** यद्यपि यत्किञ्चिदनुमितिविषयतात्वसमव्यापकस्वविषयितात्वकत्वनिवेशान्नान्यूनविषयकत्ववैयर्थ्यं हेतुप्रतिज्ञा-

In Public domain. Digitization Muthulakshmi Research Academy


इति। उपनयविशेषातिव्याप्त्यभिधानं चोपलक्षणपरम्। अन्यूनविषयकेत्यस्य निरुक्तार्थकत्वे सर्वस्मात्कालत्ववानयं कालपरिमाणवान् सर्वस्मादित्यत्र हेत्ववयवेऽप्यतिव्याप्तिर्वोध्या। तज्जन्यवोधविषयतायाः विश्ववृत्तित्वेनानुमितिविषयताव्यापकत्वात्।

एवं तादृशान्यूनातिरिक्तविषयकत्वस्य किञ्चिज्जन्यतानवच्छेदकत्वेन तदवच्छिन्न-जन्यताविवक्षणासम्भवेन प्रतिज्ञाहेतुजन्यसमूहालम्बनवोधमादाय तन्निष्ठहेत्वर्थविषयकत्वा-वच्छिन्नजन्यतानिरूपितजनकताश्रये धूमादालोकवान्पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवे अतिव्याप्तिदुर्वारा। तस्यानवच्छिन्नप्रकारताव्यापकप्रकारताकत्वविवक्षयापि वारणासम्भवात् इत्यपि वोध्यम्। एतद्दोषवारणाय प्रथमतोऽनुमित्यन्यूनविषयकत्वमन्यथानिर्वक्ति। **तथापि प्रकृतेति** एतच्च पक्षतावच्छेदकविशिष्टार्थकम्। तदनुपादाने प्रमेयाद्वाच्यत्ववानयं प्रमेयः प्रमेयादित्यादौ हेत्ववयवे, यत्किञ्चिद्धर्मावच्छिन्नत्वोपादानेऽपि घटान्यत्ववद्रूपघटान्यतरस्मात् घटान्यत्ववत्सधर्मा घटो घटान्यत्ववानित्याकारिका, या सामानाधिकरण्यसम्बन्धेन घटान्यत्व

---

र्थसमूहालम्वनमादाय हेत्वन्तवारणायानतिरिक्तविषयकत्वस्यावश्यकत्वादित्येतदारम्भो व्यर्थस्तथापि समूहालम्वनानुमितिशाब्दवोधावादाय भूमादालोकवानित्यादौ हेतावतिव्याप्तेस्तदुपेक्षितम्। असम्भवः पूर्वोक्तसमूहालम्वनानुमितिमादाय न्यूनताभङ्गाय अन्यूनविषयकत्वव्याख्यावीजं पूरयति। ***उपनय इति*** दोषद्वयमपि यथाश्रुतनिष्कृष्टानतिरिक्तविषयकत्वकल्पयोर्वोध्यम्। हेत्ववयवजन्यवोधविषयताया आलोकाद्यवृत्तित्वाद्धूमादालोकवानित्यादिप्रसिद्धहेत्ववयवोपेक्षा। पूर्वोक्तसमूहालम्वनमादाय दूषणान्तरमाह। ***एवमिति*** प्रमेयादित्याकारकहेतुवाक्यघटकप्रमेय इत्येकदेशे इत्यर्थः। ***प्रमेयादि-त्यादाविति*** हेत्ववयव इत्यनेनान्वयः। प्रतिज्ञार्थवोधमादाय दोषस्तु फलोपधाननिवेशेऽपि सुवार इति समूहालम्वनानुधावनं प्रतिज्ञाजन्यवोधहेत्वर्थविषकत्वावच्छिन्नजन्यता वर्तते इति द्योतनायेत्यन्ये। तज्जन्यबोधे च पञ्चम्यर्थे प्रमेयभावे प्रमेयत्वस्यापि भानेन साध्यतावच्छेदकीभूतप्रमेयत्वत्वविशिष्ट-प्रमेयत्वरूपसाध्यस्य प्रमेयरूपपक्षे वैशिष्ट्यावगाहिजनकत्वस्य प्रमेयादिति वाक्यघटके प्रमेयेति भागे सत्त्वाद्भवत्यतिव्याप्तिरिति भावः। वस्तुतस्तु तादात्म्येन प्रमेयस्य साध्यत्वे प्रमेयादिति हेतावति-व्याप्तिः। अन्यूनविषयकत्वदले सम्बन्धानिवेशस्य वक्ष्यमाणत्वात्। ननु हेतुजन्यबोधस्य प्रमेयांशे निर्धर्मितावच्छेदकतया किञ्चिद्धर्मावच्छिन्नविशेष्यकत्वं निवेश्यापि हेतावतिव्याप्तिश्शक्यते वारयितु-मित्यतः स्थलान्तरे व्यावृत्तिमाह। ***यत्किञ्चिदिति*** घटान्यत्वं कपाले वर्तते तत्र कपालरूपं घटश्च वर्तते एवञ्च स्वरूपसमवायोभयघटितसामानाधिकरण्यसम्बन्धेन घटान्यत्वविशिष्टं घटरूपान्यन्तरत्

In Public domain. Digitization Muthulakshmi Research Academy



-साध्यकप्रतिज्ञातद्घटितन्यायान्तर्गते रूपघटान्यतरत्वावच्छिन्नांशे सामानाधिकरण्यसम्बन्धेन विशेषणतापन्नघटान्यत्वघटिततादृशसम्बन्धावच्छिन्नहेतुताके विशिष्टान्यतररूपहेतुप्रतिपादके हेत्ववयवेऽतिव्याप्तिः। घटत्वादौ सामानाधिकरण्यसम्बन्धेन रूपवति व्यभिचारवारकतया घटान्यत्वात्मकविशेषणस्य धर्मिभेदेन विशेष्यस्य घटान्यत्वसमानाधिकरणसत्तासमानाधिकरणे घटरूपादौ व्यभिचारवारकतया च विशेष्यतावच्छेदकस्य सार्थक्यमित्यवधेयम्।

---

कपालीयरूपघटान्यतरदेव तादृशान्यतरत्वावच्छिन्नज्ञानज्ञाप्यघटान्यत्वस्य सामानाधिकरण्यसम्वन्धेन पक्षतावच्छेदकघटकत्वं बाधवारणाय समवायस्वरूपघटितसामानाधिकरण्यस्य साध्यताघटकसम्वन्धत्वम्। साध्यतावच्छेदकसम्वन्धेन प्रकृतसाध्यावगाहित्वपर्यन्तसत्त्वेऽपि व्यावृत्तिदानाय वक्ष्यमाणानतिरिक्तविषयकत्वरक्षणाय च तस्य हेतुघटकसम्वन्धकत्वं स्वरूपासिद्ध्यादिवारणाय तस्यैव हेतुताघटकसम्वन्धत्वं चोक्तम्। तादृशहेतुमेवदर्शयति। ***रूपघटान्यतरत्वावच्छिन्नांशे इति*** हेत्ववयवे घटान्यत्ववद्रूपघटान्यतरस्मादित्यादौ। ननु केवलंरूपघटान्यतरस्यैव सामानाधिकरण्यसम्वन्धेन हेतुत्वमस्त्वित्याशङ्क्य घटादिरूपस्याप्यन्यतरान्तर्गततयासामानाधिकरण्येन तस्य घटत्वादौ सत्वेन व्यभिचारमाह। ***घटत्वादाविति*** घटान्यत्वरूपविशेषणप्रवेशे च तद्वैशिष्ट्यं कपालरूपस्यैव तस्य सामानाधिकरण्यसम्वन्धेन घटत्वादावसत्त्वान्नव्यभिचारः। ननु घटान्यत्वस्यैव घटान्यत्व विशिष्ट-रूपस्यैव वा स्वरूपसमवायोभयघटितसामानाधिकरण्यसम्वन्धेन हेतुताऽस्तु किं विशेषदलप्रवेशेनेत्यत आह। ***धर्मिभेदेनेति*** रूपभिन्नस्य घटस्यापि प्रवेशेनेत्यर्थः। ***विशेष्यस्य*** रूपघटान्यतरस्य। घटमात्रविशेष्यत्वे घटान्यत्वं व्यर्थं रूपमात्रविशेष्यत्वे पक्षविशेष्यकत्वनिवेशेनापि वारणं सम्भवतीत्यन्यतरदुपात्तम्। तथा च व्यभिचारावारकत्वेऽपि वह्निमान् वह्निमदन्यावृत्तेरितिवद्धर्मिभेदान्न वैयर्थ्यमित्यर्थः। घटान्यत्वन्तु न हेतुः। सिषाधयिषाया अनुसरणापत्तेः।

ननु सामानाधिकरण्ये घटान्यत्वविशिष्टस्यैव हेतुत्वमस्तु एवञ्च रूपघटान्यतरस्यैव घटान्यत्ववैशिष्ट्येन रूपेण हेतुत्वसम्भवे किमन्यतरत्वेन रूपेण हेतुत्वे नेत्याशङ्कां तथा सति सत्ताया अपि कपालन्तर्भावेण घटान्यत्वविशिष्टतया तस्य घटत्वघटरूपादौ सत्त्वेन व्यभिचारस्स्यादिति मनसि-कृत्य परिहरति। ***घटान्यत्वेति*** घटान्यत्वविशिष्टस्यैव हेतुत्वे तु सामानाधिकरण्यसम्बन्धेनापि न घटरूपादौ व्यभिचार इत्युपलक्षितस्य हेतुत्वं बोध्यम्। विशिष्टहेतुके च नप्रयोजनमिति तत्त्यागः। ***विशेष्यतावच्छेदकस्य*** रूपघटान्यतरत्वरूपस्य। ***वृत्तीति*** सामानाधिकरण्यसम्बन्धेन साध्यत्वे व्याप्तिरेव न सम्भवति तस्य वृत्त्यनियामकतया हेतुसमानाधिकरणाभावीय तत्सम्बन्धावच्छिन्नप्रति-

In Public domain. Digitization: Mahalakshmi Research Academy


सामानाधिकरण्यसम्बन्धस्य वृत्त्यनियामकतया व्यापकत्वाघटकत्वेऽपि नित्यद्रव्यावृत्तिधर्मशून्यत्वान्निरवयवं गगनं नित्यं नित्यद्रव्यावृत्तिधर्मशून्यत्वात्, वह्निमत्पर्वतावृत्तिधर्मशून्यत्वादालोकवान्पर्वतो वह्निमान्वह्निविशिष्टपर्वतावृत्तिधर्मशून्यत्वादित्यादौ हेत्ववयवेऽतिव्याप्तिवारणाय पक्षतावच्छेदकवैशिष्ट्यनिवेशनमावश्यकम्। अखण्डाभावघटकतया हेतुघटकद्रव्यत्वपर्वतत्वादीनामवैयर्थ्यम्।

साध्यतावच्छेदकविशिष्टसाध्यनिवेशनप्रयोजनमाह। **पञ्चम्यर्थेति** हेतुत्वं प्रमेयाद्वाच्यत्ववत्प्रमेयादित्यादौ हेतुजन्यबोधस्य विभक्त्यर्थहेतुत्वे प्रमेयाद्यात्मकप्रकृत्यर्थवैशिष्ट्यावगाहित्वेऽपि प्रकृतसाध्यतावच्छेदकविशिष्टवैशिष्ट्यानवगाहित्वान्नातिव्याप्तिरिति भावः। पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्वमेव पर्यव-

---

योगित्वाप्रसिद्धेरित्युदाहरणाभावान्न न्याय इत्याशयः। साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यघटितायाव्याप्तेर्निष्कृष्टतया तत्कल्पे उदाहरणं सम्भवतीत्याशयेनाह। *व्यापकत्वाघटकत्व इति* विशेष्यतावच्छेदकता पर्याप्तिपर्यन्तव्यावृत्तिदानायाह। *वह्निमदिति* पक्षमुख्यविशेष्यता न निविष्टेत्याशयः। *हेत्ववयवे* हेत्ववयवैकदेशे।

ननु नित्यावृत्तिधर्मशूयत्वादित्यस्यैव सम्यक्त्वे द्रव्यपदमनर्थकम्। एवं वह्निमदवृत्तिधर्मशून्यत्वादित्यस्यैव सम्यक्त्वे पर्वतपदमनर्थकमित्यत आह। *अखण्डेति* *प्रमेयाद्वाच्यत्ववदिति* अत्र वाच्यस्यैव साध्यत्वं न तु वाच्यत्वस्य तथा सति जन्यत्वपक्षकोक्तसाध्यहेतुकस्थले इत्यनेन वाच्यत्वसाध्यकस्थलस्यैव परामर्शे तत्स्थलीयहेतौ व्यावृत्तिदानासङ्गतिस्स्यात्। प्रमेयादित्यस्य प्रमेयपदस्य लक्षणयाप्रमेयज्ञानबोधकतया वाच्यत्वबोधकत्वासम्भवात्। वाच्यस्य साध्यत्वे तु प्रमेयज्ञानस्यापि वाच्यतया साध्यबोधकत्वं सम्भवतीतिभावः। अत्र प्रमेयाद्वाच्यत्वसमानाधिकरणधर्मः साध्यः। अन्यथा हेत्वेकवाक्यत्वाभावेन न्यायानवतारात्। प्रमेयाद्वाच्यत्ववदित्यत्र पाठे वाच्यत्वे प्रमेयादित्यस्यान्वयेऽपि तद्वत्। तादात्म्यसम्बन्धेन साध्यन्तत्रैव च हेतुवाक्यार्थान्वय इति तादृशधर्मस्य साध्यत्वानुपगमेऽपि न क्षतिरित्यपि सम्भवति। *पक्षतेति* प्रमेयनिष्ठहेतुत्वं प्रमेयं प्रमेयादित्यादौ हेतुस्वरूपवारणाय निरूप्यनिरूपकभावनिवेशः। नन्वत्र साध्यतावच्छेदकवैशिष्ट्यनिवेशो व्यर्थः। स्वरूपसम्बन्धेन वाच्यसाध्यकस्थले हेतावतिव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धेन साध्यप्रकारताया एव निवेश्यत्वात्। न चोक्तसम्बन्धानिवेशेऽपि पञ्चम्यर्थे प्रकृत्यर्थस्य निरूपितत्वसम्बन्धेनैवान्वयात्तेन सम्बन्धेन प्रमेयाद्वाच्यसाध्यके प्रमेयादिति हेतावतिव्याप्तिः। तस्य प्रकृतपक्षे साध्यतावच्छेदकीभूत-

In Public domain. Digitization Muthulakshmi Research Academy



सितोऽर्थः। सम्बन्धविशेषश्चेतद्दले न प्रवेश्यः प्रयोजनविरहात्, अतः पञ्चम्यर्थे प्रकृत्यर्थस्य यादृशसम्बन्धेनान्वयस्तस्य वृत्त्यनियामकतया व्यापकत्वाघटकत्वेऽपि नैतद्व्यावृत्त्यसङ्गतिः।

यदि च जन्यग्रहविषयत्वरूपपञ्चम्यर्थैकदेशजन्यत्वे प्रकृत्यर्थस्य हेतुज्ञानस्यान्वयः, न तु परम्परासम्बन्धेन तादृशविषयत्वे। तदा जन्यत्वपक्षकोक्तसाध्यहेतुकस्थले व्यावृत्तिर्बोध्या। पक्षमुख्यविशेष्यकत्वपर्यन्तानिवेशात्, न तु तादृशविषयत्वत्वावच्छिन्नपक्षकस्थले हेतु-जन्यबोधस्य तादृशविशिष्टपक्षे इतरवैशिष्ट्यानवगाहित्वात्।

****तादृशविषयताविलक्षणेति**** साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताविलक्षणेत्यर्थकम्। तद्विलक्षणत्वं न तद्भिन्नत्वं, प्रतिज्ञाजन्यबोधीयसाध्यादिविषयतायास्तद्भिन्नत्वेनासम्भवापातात्। तादृश-

---

निरूपितत्वसम्बन्धेन साध्यवत्त्वबोधकत्वादिति साध्यतावच्छेदकनिवेश आवश्यक इति वाच्यम्। तत्सम्बन्धस्य वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्यान्यायस्यैवाभावादित्याशङ्कां निरस्यति। ***सम्बन्धविशेषश्चेति*** प्रकृत्यर्थस्साध्यः। ननु ज्ञाप्यत्वं प्रमेयं प्रमेयत्वादित्यादौ स्वरूपसम्बन्धकालिकविशेषणताभ्यां साध्यसाधनभावे हेतावतिव्याप्तिः। न च स्वरूपासिद्धिः। विषयताया अनियतत्वात्। समानकालीनत्वस्य साधनताघटकसम्बन्धत्वाद्वेति तत्साध्यतावच्छेदकसम्बन्धनिवेश आवश्यक इति चेन्न। उत्तरदलासत्त्वात्। ननूक्तस्थलीयहेतौ साध्यतावच्छेदकवैशिष्ट्यनिवेशव्यावृत्तिः न सङ्गच्छते यतः प्रमेयादित्यत्र प्रमेयपदं लक्षणया प्रमेयज्ञानपरं जन्यज्ञानविषयत्वं पञ्चम्यर्थस्तदेकदेशजन्यत्वे प्रमेयज्ञानरूपसाध्यवैशिष्ट्यबोधकत्वेऽपि पक्षतावच्छेदकीभूतविषयतात्वावच्छिन्ने साध्यवत्त्वाबोधकत्वादित्याशङ्कते। ***यदिचेति*** ***परम्परासम्बन्धेन स्वजन्यज्ञाननिरूपितत्वसम्बन्धेन*** ***व्यावृत्तिरिति*** केचित्तु पूर्वं प्रमेयाद्वाच्यत्वमेव साध्यम्प्रमेयादित्येव हेतुस्तत्र प्रमेयपदस्य प्रमेयज्ञानपरत्वेऽपि धर्मिपारतन्त्र्येण प्रमेयस्य जन्यत्वेऽप्यन्वय इत्यभिप्रेत्यमित्याहुः। पक्षमुख्यविशेष्यत्वोपादाने अपि व्यावृत्तिरित्यभिमानं निराकरोति। ***नत्विति*** ***इतरेति*** साध्येत्वर्थः। पक्षतावच्छेदके विशेष्यतावच्छेदकतापर्याप्तिस्सत्वेनेदम्। वस्तुतस्तु केवलविषयतात्वानवच्छिन्नपक्षकोक्तस्थलेऽपि नैक-प्रकारताभङ्गापत्त्या तत्र जन्यज्ञानात्मकसाध्यवैशिष्ट्यस्याभानादिति सूचनायेतरपदं, एवञ्च तादृशविशिष्टपक्ष इति विशिष्टपदमनतिप्रयोजनं वैशिष्ट्यानवगाहित्व एव निर्भरात्। ***तद्भिन्नत्वेन*** पक्षनिष्ठविशेष्यताभिन्नत्वेन। प्रकारतायाविशेष्यतान्यत्वनियमात्। ***तादृशेति*** पक्षतावच्छेदकप्रकारतानिरूपितविशेष्यताया अतिरिक्तत्वमते तद्भेदोऽपि निवेश्यः। अन्यूनविषयकत्वावच्छिन्न-

In Public domain. Digitization Muthulakshmi Research Academy



विषयताभिन्नमुख्यविशेष्यताशून्यत्वनिवेशेनासम्भवोद्धारे निगमनातिव्याप्तितादवस्थ्यात्। अन्यूनविषयकत्वदलवैयर्थ्याच्च। धूमादालोकवान्पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवजन्यबोधीयहेतुत्वनिष्ठमुख्यवेशेष्यतायास्तादृशविषयताभिन्नत्वात्। एतेन तादृशविषयतानन्तःपातित्वं प्रकृतपरामर्शजन्यतावच्छेदकत्वं वा तदित्यपि निरस्तम्। उक्तस्थले आलोकाद्यंशे हेतुत्वप्रकारताया एव तादृशविषयतान्तःपातित्वात्। प्रकृतपरामर्शजन्यतावच्छेदकत्वाच्च हेतुजन्यबोधीय तद्विषयताया अतथात्वात्।

न च तथाविधविषयतावच्छेदककोट्यप्रविष्टधर्मावच्छिन्नविषयताशून्यत्वनिवेशान्न दोष इत्यपि साधु, यत्र प्रमेयसामान्यस्य पक्षतावच्छेदकादिघटकता तत्र तादृशविषयतावच्छेदककोट्यप्रविष्टाप्रसिद्धेः। विलक्षणावच्छेदकतानिवेशेऽपि द्रव्यव्याप्यधूमादालोकवान्

---

जन्यतायां तादृशमुख्यविशेष्यकत्वानवच्छिन्नत्वं वा निवेश्यं पूर्वमनतिरिक्तविषयकत्वानुपादानेऽचं पदानुषङ्गपक्षे निगमने व्यावृत्तेरुक्तत्वादिदानीं तन्निवेशेऽपि तद्दोषतादवस्थ्यमेवेत्याह। *तादवस्थ्यादिति* ननु प्रकारतवच्छेदकतापर्याप्तिनिवेशान्निगमनव्यावृत्तिरित्यत आह *अन्यूनेति* निगमनवारकं प्रकारान्तरमपि निरस्यति *एतेनेति* केचित्तु तादृशविषयताशालिनिश्चयत्वापरकारणतानवच्छेदकत्वमनन्तःपातित्वमेवञ्च नान्यूनविषयकत्वदलवैयर्थ्यं न वा निगमनादिष्वतिव्याप्तिरित्याहुः। तदसत्। वह्निव्याप्यधूमादालोकवत्सधर्मा पर्वतो वह्निमान्धूमादित्यादौ निगमनेऽतिव्याप्तेः। न च ज्ञाप्यत्वविषयतानिरूपितनिरुक्तवह्निविषयितैव सेति वाच्यम्। वह्निविषयताया अपि वह्निमान् पर्वत इति विशिष्टबुद्धिनिरूपितकारणतावच्छेदकत्वात् तादृशकारणतायाश्च तथात्वात्। अतः कारणतायां तत्समनियतत्वं देयं तथाचान्यूनदलवैयर्थ्यम्। अनन्तः पातित्वमघटकत्वम्। स्वविषयिताशून्यप्रतीतिवृत्तितद्विषयताकत्वमव्यापकत्वमिति यावत्। *तद्विषयिताया अतथात्वात्* अनन्तःपातित्वाज्जन्यतानवच्छेदकत्वाच्च। न च तादृशविषयताशून्यत्वस्य तादृशप्रतिज्ञाजन्यबोधस्यैव स्वरूप -योग्यतामादाय हेतावतिव्याप्तिरितितादृशावगाहित्वात्मकान्यूनविषयकत्वावच्छिन्नजन्यतानिवेश आवश्यक इति वाच्यम्। जन्यतायां गुरुतरतादृशावच्छिन्नत्वनिवेशमपेक्ष्य लाघवेन तादृशविषयत्वानवच्छिन्नत्वनिवेशेनैव विषयतात्वेन मुख्यविशेष्यत्वावच्छिन्नजन्यताकहेतुवारणसम्भवात्। यथासन्निवेशेऽवैयर्थ्येऽपि तद्दलस्यानतिप्रयोजकतया न्यूनतानुद्धारादिति। *यत्र* सकलाभिधेयवृत्तिधर्मवदित्यादौ। *विलक्षणेति* वैलक्षण्यं निरवच्छिन्नं तथा च तादृशविषयतानिरूपितनिरवच्छिन्नावच्छेदकत्वशून्यधर्मनिष्ठनिरवच्छिन्नावच्छेदकताकविषयताशून्यत्वमर्थः। प्रमेयावच्छिन्नविषयता-

In Public domain. Digitization Muthulakshmi Research Academy


पर्वतो वह्निमान्धूमादित्यादौ न्यायान्तर्गतनिगमनादावतिव्याप्तिः, तज्जन्यबोधविषयतावच्छेदक-धूमत्वादेस्तादृशविषयतावच्छेदककोटिप्रविष्टत्वनियमात्। अपि तु तादृशविषयताशालिनिश्चयत्वावच्छिन्नानिवर्त्यसंशयनिवर्तकतावच्छेदकत्वमेव तत्। निगमनादिजन्यबोधीयज्ञानज्ञाप्यत्वादिविषयतायास्तादृशनिश्चयत्वावच्छिन्नानिवर्त्यज्ञानज्ञाप्यत्वादिसंशयप्रतिबन्धकतावच्छेदकतया तद्वारणम्। उक्तहेत्ववयवजन्यबोधनिवर्त्यस्य हेतुत्वं धूमीयं न वेत्यादिसंशयस्य धूमादिज्ञानज्ञाप्यत्वघटितपक्षतावच्छेदकावच्छिन्नपक्षकसाध्यताच्छेदकावच्छिन्नप्रकारकनिश्चयनिवर्त्यतया तादृशबोधविषयताया न तथाविधविषयताविलक्षणतेत्यन्यूनपदस्य व्यावृत्तिसङ्गतिः। सर्वेषामेव संशयानां स्वविरोधिविषयकतथाविधविषयताशालिसमूहालम्बननिश्चयनिवर्तनीयतया तादृशनिश्चयानिवर्त्यसंशयाप्रसिद्धिः, अतः **तादृशनिश्चयत्वावच्छिन्नेति**। इत्थं चाधिकमवगाहमानेऽपि निगमनजन्यबोधे साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षविषयकत्वस्याक्षततया धूमज्ञानज्ञाप्यत्वादिसंशयस्य तादृशविषयताशालिनिश्चयानिवर्त्यत्वानुपपत्तिरित्यपि समाहितम्। अवच्छिन्नत्वं चान्यूनवृत्तित्वं व्यापकत्वपर्यवसितम्, अतो ज्ञानज्ञाप्यत्वं धूमीयं न वेति संशयनिरूपितप्रतिबन्धकतायां धूमज्ञानज्ञाप्यत्वातिरिक्तप्रतिज्ञाप्रतिपाद्यभागविषयताघटितधर्मस्य, स्वरूपसम्बन्धरूपावच्छेदकत्वविरहेऽपि नान्यूनपदव्यावृत्त्यसङ्गतिः। अप्रामाण्यज्ञानास्कन्दितस्य निगमनादिजन्यबोधस्य

---

वारणाय द्वितीयवैलक्षण्यनिवेशः। न च तादृशधर्मनिष्ठनिरवच्छिन्नविषयताशून्यत्वमेवास्तु। पर्वतत्वप्रकारतानिरूपितविशेष्यतामादायासम्भवात्। धूमादालोकवानित्यादिस्थलीयनिगमने व्याप्त्यादिविषयतासत्त्वात्सकलाभिधेयनिष्ठाभावप्रतियोग्याकाशाभाववदिति निगमने च ज्ञाप्यत्वादिविषयतासत्त्वादाह। *द्रव्येति* नैगमने बोधेऽबाधितत्वादिभानं नास्तीत्याशये नेदम्। न च निगमनवारणाय तथाविधविषयतावच्छेदकतान्यावच्छेदकताकविषयताशून्यत्वमेवास्तु। धूमव्यापकतावच्छेदकत्वावच्छिन्नवह्नित्वविषयतायास्तादृशद्रव्यत्वविषयतान्यत्वादिति वाच्यम्। अन्यूनविषयकत्ववैयर्थ्यात्। *उक्तेति* धूमादालोकवानित्यादिस्थलीयेत्यर्थः। यदि विषयविशेषे प्रतिज्ञाजन्यबोधानां न सर्वसंशयविरोधिविषयता तदा तादृशनिश्चयानिवर्त्य संशयप्रसिद्धेराह। *इत्थञ्चेति* *नान्यूनपदव्यावृत्त्यसङ्गतिरिति* अत्रेदं बोध्यम्। पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकताकप्रतिबन्धकतानिवेशने धूमादालोकवान् पर्वतो वह्निमानिति प्रतिज्ञायाम्

In Public domain. Digitization: Muthulakshmi Research Academy


संशयाप्रतिवन्धकतया तज्जनकत्वमादायातिप्रसङ्गस्य वारणाय तादृशसंशयानिवर्तकत्वमुपेक्ष्य तन्निवर्तकतावच्छेदकविषयताशून्यत्वेन बोधो विशेषितः। पक्षतावच्छेदकाद्यनिवेशे तदनवच्छिन्नपक्षादिविषयताशालिनिश्चयसमुदायस्य कमपि संशयं प्रत्यप्रतिवन्धकतया तादृश-

---

अव्याप्तिः। हेतुत्वं धूमीयं नवेत्यादिसंशयस्य तन्निरूपितप्रतिवध्यताशून्यत्वात्। उत्तरकल्पे च वह्निमानित्यादिप्रतिज्ञायामपि पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निसम्वन्धावच्छिन्नप्रकारतानिष्ठावच्छेदकताकप्रतिबन्धकताया एव लक्षणघटकतया सम्वन्धीवह्निमान्नवेति संशयस्य तन्निरूपितप्रतिबध्यताशून्यत्वात्। एवं साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यत्वा-वच्छिन्नप्रतिबन्धकत्वाद्युपादानेऽप्यूह्यम्। एतादृशदोषवारणायैव व्यापकत्वरूपमवच्छिन्नत्वं निवेश्यं नत्वन्यूनपदव्यावृत्त्यसङ्गतिपरिहारायेति। अथ दीधितिकारोक्तान्यूनपदव्यावृत्त्यसङ्गतावपि न क्षतिः। धूमादालोकवानित्यादौ प्रतिज्ञाहेतूभयार्थबोधनिष्ठहेत्वर्थविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितानिरूपकवर्णसमुदायत्वमादाय हेतुमात्रेऽतिव्याप्तेर्वारणाय स्वयमन्यूनविषयकत्वावच्छिन्नजन्यतानिवेशलाभार्थतया तत्पदोपादानस्य वक्तव्यत्वादिति चेन्न। एवमपि स्वरूपसम्वन्धरूपप्रतिबन्धकतावच्छेदकतानिवेशने धूमादालोकवान्पर्वतो वह्निमानित्यादिप्रतिज्ञायामव्याप्तेर्दुर्वारत्वात्। निरुक्तावच्छेदकनिवेशे केवलप्रतिज्ञार्थबोधवत्प्रतिज्ञाहेतूभयार्थबोधस्यापि तद्घटितानतिरिक्तविषयकत्वा-भावेन दर्शितातिव्याप्तेरसत्त्वाच्च। ननु तथापि तादृशविषयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशून्यसंशयप्रतिवन्धकतावच्छेदकविषयिताशून्यत्वमेव कुतो न कृतम्। अवच्छिन्नत्वं स्वरूपसम्वन्धविशेषः। तथासत्यनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयत्वानिवेशेन च लाघवात्। धूमादालो-कवानित्यादिप्रतिज्ञायाश्चसङ्ग्रहार्थं विषयितायां स्वाश्रयत्वस्वानाश्रयविषयित्वानिरूपकत्वो-भय-सम्वन्धेन प्रतिबन्धकतावच्छेदकत्ववत्त्वस्यैव निवेश्यत्वादित्यन्यूनविषयकत्वं व्यर्थमिति चेन्न। तथा सति निगमनेऽतिव्याप्तेः वह्निज्ञानज्ञाप्यो न वेति संशयस्य तादृशाप्रतिबध्यत्वेऽप्युक्तसम्वन्धेन तत्प्रतिबन्धकतावच्छेदकत्ववत्त्याविषयिताया अभावात्। धूमज्ञानज्ञाप्यवह्निमान्नवेति संशयप्रतिबन्धकतायाश्च तादृशविषयत्वावच्छिन्नत्वात्। यदि च प्रतिबन्धकतायां तादृशविषयित्वानन्तःपातिविषयित्वावच्छिन्नत्वं विशेषमुच्यते। तदा सिद्धमन्नमिति न्यायापाताद्ग्रन्थकारो व्यापकत्वरूपमवच्छिन्नत्वमन्यूनविषयकत्वावच्छिन्नजन्यताञ्च व्याचकारैवेति न किञ्चिदेतत् तन्निवर्तकतानवच्छेदकविषयित्वोक्तौ न निगमनवारणमिति तदवच्छेदकविषयिताशून्यत्वमुक्तम्। *व्यापकत्वेति* तादृशनिश्चयत्वव्यापकप्रतिबन्धकत्वशून्येत्यर्थः। *समुदायस्येति* केवलपक्षविषयकत्वस्य द्रव्यत्वपृथिवीत्वमेयत्वादिना पक्ष-

In Public domain. Digitization Muthulakshmi Research Academy


निश्चयत्वावच्छिन्नानिवर्त्यसंशयाप्रसिद्धिः, **अतस्तन्नवेश** इति, इत्थं चानतिरिक्तविषयत्वघटक-साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नविषयतायां स्वनिष्टत्वनिवेशे-नैव न्यूनविषयकदर्शितहेतुजन्यबोधवारणसम्भवे पृथगन्यूनविषयकत्वविशेषणमनर्थकमित्यपि समाहितम्। तादृशविषयतायां स्वनिष्ठत्वविशेषणे निगमनादिजन्यबोधस्य ज्ञानज्ञाप्यत्व-विशेषितसाध्यविशिष्टपक्षविषयताशालित्वनियमात् स्वनिष्ठनिरुक्तविषयताशालिनिश्चयत्व-व्यापकप्रतिवन्धकताकज्ञानज्ञाप्यत्वादिसंशयान्यसंशयाप्रतिवन्धकतयाऽनतिरिक्तविषयताक-त्वापत्तेर्दुर्वारत्वात्। सत्यन्तस्य न्यायावयवत्वमर्थः निगमने च पक्षवाचकपदमनुषज्यते इति तद्वारणमनतिरिक्तविशेषणप्रयोजनमिति मतमनुसृत्य लघुशरीरमनतिरिक्तविषयकत्वं निर्वक्ति। ✻✻**प्रकृतेति**✻✻ प्रकृतहेतुका या प्रकृतसाध्यसिध्यौपयिका व्याप्तिस्तदविषयकत्व-मित्यर्थः, यद्रूपावच्छिन्नविशेषितप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टप्रकृतपक्षतावच्छेद-कावच्छिन्नविषयनिश्चयत्वं प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृतसाध्यतावच्छेदकावच्छिन्न-साध्यकानुमितिजनकतानतिरिक्तवृत्ति, तद्रूपावच्छिन्नाविषयकत्वमिति तु पर्यवसितम्। तादृशञ्च रूपं तद्धेतुतावच्छेदकावच्छिन्नतद्धेतुव्यापकप्रकृतसाध्यसामानाधिकरण्यत्वं तत्तत् साध्यतावच्छेदकावच्छिन्नसाध्याभावव्यापकाभावप्रतियोगितात्वं च। निगमनस्थतत्पदस्य च व्याप्तिपक्षधर्मताविशिष्टहेतुपरतया तज्जन्यबोधस्य तादृशरूपावच्छिन्नविषयकत्वान्नातिव्याप्तिः अन्वयव्यतिरेकव्याप्त्योर्विशिष्यैकतरनिवेशे अन्वयिनि व्यतिरेकिणि वा निगमनेऽतिव्याप्तिरिति निरुक्तरूपावच्छिन्नत्वेन द्वयोरनुगमः। यदि च यत्त्वतत्त्वयोर्निवेशान्नानुगमश्शक्य इति

---

विषयकज्ञानसाधारणतया तादृशपक्षविषयकनिश्चयत्वव्यापकप्रतिवन्धकत्वाप्रसिद्धिरित्यर्थः। ✻**इत्थञ्च**✻ ग्रन्थदूषणस्याभिधानीयत्वे च। स्वपदं यादृशशाब्दबोधमादाय लक्षणं सङ्गमनीयं तादृशशाब्दबोधपरं निगमनजन्यबोधवृत्तित्वविशिष्टतादृशप्रकारतामादाय दूषयति। ✻**तादृशेति**✻ ✻**निगमनादीति**✻ निगमनजन्यबोधीयसाध्यादिविषयताया अन्यत्राभावात्। व्याप्त्यविषयकत्वकल्पे हेत्वन्तेऽतिव्याप्ति-शङ्कां परिहर्तुं तं कल्पमवतारयति। ✻**सत्यन्तस्येति**✻ ✻**निगमने चेति**✻ तथाचान्यूनविषयकत्व-निर्वाहः। ✻**यद्रूपेति**✻ न च यद्रूपावच्छिन्नप्रकारतानिरूपितप्रकृतहेतुप्रकारतानिरूपितप्रकृतपक्ष-विशेष्यत्वं तादृशजनकतायाः स्वरूपसम्वन्धरूपावच्छेदकत्ववदित्येवोचितं निश्चयत्वाद्यनिवेशे न लाघवादिति वाच्यम्। वह्निसमानाधिकरणधूमकालीनपर्वतो वह्निमान् धूमादित्यादौ तथाविधां साध्य-

In Public domain, Digitization Muthulakshmi Research Academy


भाव्यते। तदा अभावद्वयमेव वोधे निवेशनीयम्, एतल्लाभायैव चैपयिकान्तमिति ध्येयम्। यद्यप्युदाहरणजन्यवोधस्य न निरुक्तरूपावच्छिन्नविषयकत्वम्। तथापि सिषाधयिषाधीन-न्यायप्रयोगानुपगमेन तत्र पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्व-रूपान्यूनविषयकत्वविरहादेव नातिप्रसङ्गः, हेत्वन्तभागे च सत्यन्ताभावान्नातिव्याप्तिरित्य-वधेयम्। वह्निव्याप्तिविशिष्टस्यालोकस्य पर्वतत्वावच्छिन्नविशेषणत्वे (सिषाधयिषया न्याय-प्रयोगानुपगमे) तद्विशिष्टेऽपि पर्वते तद्वृत्तेरर्थतो लाभेनार्थतस्तत्र प्रकृतपक्षे प्रकृतसाध्य-गमकतालाभान्न हेत्ववयवाभिधानप्रयोजकाकाङ्क्षावसर इत्यतस्सधर्मेति। **तस्याः**

---

सामानाधिकरण्यत्वावच्छिन्न-हेतुप्रकारतानिरूपितपक्षविशेष्यतामादायातिव्याप्तेः। *अभावद्वयम्* अन्वयव्याप्त्यविषयकत्वव्यतिरेकव्याप्त्यविषयकत्वोभयमेतत्कल्पे औपयिकान्तवैयर्थ्यमाशङ्क्याह। *एतदिति* केचित्तु प्रकृतपक्षविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नधर्मितानिरूपितयत्किञ्चित्प्र-कारताशून्यत्वमनतिरिक्तविषयकत्वम्। न च पर्वतो धूमाद्धूमप्रागभावाद्वा वह्निमान् धूमादित्यादौ अव्याप्तिस्तज्जन्यबोधस्य तादृशज्ञाप्यत्वप्रकारताकत्वादिति वाच्यम्। साध्यतावच्छेदकपर्याप्तधर्मिताव-च्छेदकतानिवेशात्। एवञ्च तादृशधर्मितात्वेन तन्निरूपितप्रकारतानिवेशान्नाव्याप्तिः। यद्यपि निगमने ज्ञाप्यत्वप्रकारतानिरूपकत्वं साध्यधर्मितात्वेनैव न तु पक्षविशेष्यतानिरूपितसाध्यधर्मितात्वेन किञ्च पक्षविशेष्यतानिरूपितसाध्यधर्मिताकत्वमप्रसिद्धं तथापि पक्षविशेष्यतानिरूपितनिष्ठसाध्यधर्मितात्व-निवेशान्नदोषः। निगमने चैकत्र द्वयमितिरीत्या न वह्नित्वज्ञाप्यत्वयोर्भानसम्भव इति वदन्ति। हेत्व-जंन्यत्वघटितनिरुक्तौ तेनोदाहरणादिव्युदास इति मूलानुरोधादगत्या व्यापकत्वमेवानुगमनीयम्। अत्र तु व्याप्त्यनुगमेऽपि तन्मूलसङ्गतिं स्फुटयति। *यद्यपीत्यादिना नातिप्रसङ्ग इत्यन्तेन* तथाचैतत्कल्पे यो यो धूमवान् स वह्निमान् यथा पर्वत इत्युदाहरणं न स्वीकार्यमन्यथा तस्य निरुक्तान्यूनविषयकत्वेन व्याप्तिबोधने तात्पर्याभावादतिव्याप्तेर्दुर्वारत्वापातादिति। अत एवानुपदं सिषाधयिषाधीनन्यायप्रयोगानु-पगम इति वक्ष्यति। *सिषाधयिषेति* तदुपगमे तु अनायत्या उदाहरणाघटकत्वमनुगतव्यापकत्वा-विषयकत्वे सत्यन्यूनविषयकत्वं वा निवेश्यमिति भावः। न्यायन्तर्गतत्वोपेक्षावीजमाह। *हेत्वन्तेति* तस्य शुद्धपर्वतवृत्तित्वलाभेऽपि न प्रकृतपक्षवृत्तित्वलाभ इत्यतो विशिष्टेति। तद्वृत्तिर्विशिष्टालोकवृत्तिर्न तु शुद्धालोकवृत्तिः। शाब्दवोधे तुल्यवित्तिवेद्यत्वाप्रसरेऽपि मानसस्तद्बोध इत्यावेदनार्थमर्थत इत्युक्तम्। *अर्थत इति* प्रकृतसाध्यव्याप्तिविशिष्टप्रकृतपक्षवृत्तित्वञ्च तादृशगमकत्वाभावव्यावर्तक-तया तथाविधगमकतामानसेऽप्युपयुज्यते। इदमुपलक्षणम्। तादृशस्थले सन्देहाभावान्न्यायासम्भवो

In Public domain. Digitization Muthulakshmi Research Academy



प्रतिज्ञायाः। नन्वेवमपि यत्र प्रकृतहेतुकप्रकृतसाध्यकव्याप्तिरेवान्तर्भवति पक्षगर्भे, तत्रत्य-प्रतिज्ञायामसङ्ग्रह इत्याशङ्कां परिहरति। **वह्नीति** **विशिष्टेति** पक्षतावच्छेदक-विशिष्टपक्षेत्यर्थः। **तादृशव्याप्तीति** प्रकृतहेतुकप्रकृतसाध्यसिद्धौपयिकव्याप्तीत्यर्थः। **उदाहरणेति** यद्यपि दर्शितस्थले विशिष्टपक्षोपस्थापकपदात्प्रकृतहेतौ विशिष्टपक्षवृत्ति-त्वस्याप्यर्थतः प्रतीत्या उपनयादिप्रयोजकाकाङ्क्षाया अप्यनवकाशः। तथापि धूमवत्त्वस्थाने धूमवत्साधर्म्यनिवेशने तस्यास्सम्भव इति उदाहरणमात्रोपादानम्। **अन्यथा** आकाङ्क्षा-दिविरहेऽप्यभिधाने। **अतिप्रसङ्गात्** हेतुद्वयादेरप्यभिधानप्रसङ्गात्। **अत एव** अनाकाङ्क्षितानभिधानादेव। **एकदा** एकन्यायप्रयोगदशायाम्। **उभयव्याप्तीति** अन्वयव्याप्तिव्यतिरेकव्याप्तिद्वयेत्यर्थः। व्याप्तिद्वयस्य क्रमेणैवाभिधातुं शक्यतया प्रथमोपन्यस्त-व्याप्तिप्रतीत्यैव समीहितनिर्वाहेण व्याप्त्यन्तराकाङ्क्षानुदयादिति भावः। एतेन अन्वयव्यतिरे-कोदाहरणाकाङ्क्षाघटितान्वयव्यतिरेकिहेतुलक्षणानन्तरमपरतल्लक्षणमभिधास्यितो मणिकृतः प्रथमलक्षणानिर्भरबीजमाविष्कृतम्, अत एवैतादृशातिप्रसङ्गस्य पृथगभिधानम्।

वह्न्यादिसाध्यकप्रतिज्ञायामव्याप्त्या यथोपवर्णितलक्षणमाक्षिपति। **यदि चेति** अत्र चासम्भवासम्भवमाविष्कर्तुं कतिपयप्रतिज्ञाजन्यबोधस्य यथोपवर्णितानुमित्यन्यूनानति-रिक्तविषयकत्वं व्यवस्थापयति। **मैत्र इत्यादिना** अयं गौरित्यत्र गोत्वस्य साध्यत्वे पक्षे साध्यतावच्छेदकगोत्वत्वविशिष्टप्रकारकज्ञानजनकत्वासम्भवादाह। **तदात्म्येनेति**

ननु भवतु गोसाध्यकप्रतिज्ञा तादृशी, तथापि यदि समवायेन गोत्वस्य साध्यत्वेऽपि तथाविधप्रतिज्ञा सम्प्रदायानुमता तदा तत्साध्यकतादृशप्रतिज्ञाया दर्शितबोधजनकत्वा-

---

अपि द्रष्टव्यः। *सधर्मेति* एतेन व्याप्तिविशिष्टस्यालोकादेर्विशिष्टपक्षावृत्तित्वशङ्कानुच्छेदाद्धेत्वाकाङ्क्षेति सूचितम्। *तस्याः प्रतिज्ञाया इति* प्रकृतहेतुसाध्यकशाब्दज्ञानजनकत्वानुमित्यैपयिकत्वघटकतया तत्र प्रयोजनतात्पर्यन्तस्याः आकाङ्क्षायाः उक्तरीत्योपनयाकाङ्क्षासत्वादाह। *उदाहरणमात्रेति* अतिव्याप्तिभानस्यैव तत्प्रयोज्यत्वात्। *एतेन* एकदानव्याप्तिद्वयाभिधानमिति दीधितिकारोक्तेन *अन्वयेति* अन्वयव्यतिरेकोदाहरणाकाङ्क्षाजनकशाब्दज्ञानजनकावयवत्वरूपम्। *तल्लक्षणम* हेतु-लक्षणम्। पक्षसपक्षसतो विपक्षासतो हेतोर्वचनमित्येवं रूपम्। अन्यथेत्यादिना दोषकथने नात एवेत्यादिना दोषान्तरकथनमसङ्गतमित्याशङ्कां वारयति। *अत एवेति* *नन्विति* अयं गौरिति

In Public domain. Digitization by Muthulakshmi Research Academy



सम्भवात् सामान्यतस्तथाकारप्रतिज्ञायास्तथात्वाभिधानमसङ्गतमित्याशङ्कायां तस्याः गोत्वादिसाध्यकत्वं निराकरोति। **गोत्वत्वाद्यनुपस्थित्येति** तादृशप्रतिज्ञावाक्यादित्यादिः। तत्रेति शेषः। **अनुपपत्तेरिति** प्रतिज्ञायाः साध्यतावच्छेदकोपस्थापकत्वनियमात्। अन्यथा सुन्दरवह्नित्वावच्छिन्नसाध्यकस्थलेऽपि वह्निमानित्याकारकप्रतिज्ञाप्रसङ्गादिति भावः। यद्यपि समवायेन रक्तत्वविशिष्टदण्डावच्छिन्नसाध्यकरक्तदण्डिमानित्यादिप्रतिज्ञाया न समवायेन रक्तत्वविशिष्टसाध्यतावच्छेदकबोधकतासम्भवः। तथापि तत्र साध्यता-वच्छेदकघटकपदार्थानामेव विशकलितानां तादृशप्रतिज्ञावाक्यादुपस्थितेः तदधीनसाध्यतावच्छेदकविशिष्टसाध्यविषयकमानसबोधेनापि तत्र विशिष्टसाध्यसंशयप्रयोज्यजिज्ञासाविषयसिद्धिसम्भवः प्रकृते तु विशकलितानामपि गोत्वत्वादिघटकपदार्थानां नोपस्थितिरिति विशेषः। गोत्वादेस्साध्यत्वे दोषान्तरमाह। **पदार्थेति** जातेः पदार्थतावच्छेकत्वं पदार्थान्तरान्वयित्वासम्भवप्रयोजकत्वेनाभिहितम्। इदमुपलक्षणम्। अन्वयितावच्छेदकरूपेणानुपस्थितत्वमपि तथा बोध्यम्।

---

प्रतिज्ञाया गोसाध्यकत्वं यदुक्तं तदेव दीधितिकारस्स्वयमेव दृढयतीतिनन्वित्यवतारणतात्पर्यं यादृशप्रतिज्ञावाक्याद्गोत्वत्वोपस्थितिस्तत्तद्गोत्वस्य साध्यत्वसम्भवाद्गोत्वादेरित्यसङ्गतमित्याशङ्कां निरस्यति। *तत्रेति* ननु प्रतिज्ञायाः साध्यतावच्छेदकरूपेण साध्यबोधकत्वनियमोऽसङ्गतः। यत्र समवायेन रक्तरूपविशिष्टदण्डादेः साध्यतावच्छेदकत्वं तत्स्थलीयायाः प्रतिज्ञाया रक्तरूपसम्बन्ध्यभिन्नदण्डबोधकत्वात्। अन्यथा नामार्थयोरिति व्युत्पत्तिभङ्गापत्तेः तादृशदण्डस्तु न साध्यतावच्छेदक इत्याशयेन शङ्कते। *यद्यपीति* *प्रतिज्ञाया इति* रक्ताभेदावगाहिशाब्दबोधजनकत्वे इति शेषः। अनुमाने विलम्बान्मानसानुधावनम्। ईदृशस्थले तात्पर्यविषयीभूतसाध्यतावच्छेदकोपस्थितिमादाय तत्प्रयोजकस्यापि जिज्ञासानिवर्तकत्वमुपेयम्। अनन्यगतिकत्वात्। पदार्थान्तरं ज्ञानज्ञाप्यत्वमितरपदार्थप्रकारकशाब्दबोधं प्रतिस्वातन्त्र्येणोपस्थितेः कारणत्वेऽपि ससम्बन्धिकस्थलवदनुभवानुरोधेन एतादृशस्थलेऽपि कथञ्चिदुपस्थितेरुपयोग इत्युक्तावप्याह। *इदमिति* तथापदार्थान्तरान्वयित्वासम्भवप्रयोजकम्। अन्यथा बाधाप्रतिबध्यतापत्तिः। तथा च गोत्वस्य जातिरूपत्वेन स्वरूपतो भाने स्वरूपतो भासमानपदार्थे पदार्थान्तरस्य ज्ञानज्ञाप्यत्वस्यान्वयो न सम्भवतीत्यर्थः। इदन्तु बोध्यम्। पदार्थतावच्छेदकजातौ इति जातिपदमुपाददता दीधितिकृतैव स्वरूपतो भासमानतया इतरपदार्थान्वयो दुर्वच इत्युक्तमिति भट्टाचार्याणां पुनस्तत्कथनमनुचितमिति। न हि जातेः किञ्चिद्रूपेण

ननु पर्वतो वह्निमानित्याद्याकारकप्रतिज्ञा न वह्निसाधिका, अपि त्वभेदेन वह्निमत्साधिकैव, तथा च तज्जन्यवोधविषयतायाः अभेदेन वह्निमत्साध्यकानुमितिविषयतातो न वैलक्षण्यम्, अतो न तत्राव्याप्त्यवकाशः इत्यात आह। **तथैवेति** तादृशप्रतिज्ञाया वह्निसाध्यकत्वेनैवेत्यर्थः। **इत्युपनयसङ्गमात्।** इत्याकारकस्योपनयस्य तादृशप्रतिज्ञाघटित-न्यायान्तर्गतत्वोपपत्तेः, वह्निमतस्साध्यत्वे वह्निमद्व्याप्यवानित्याकारकस्यैवोपनयस्य सम्भवादिति भावः। **शाब्दज्ञाने** वह्निमानित्येतादृशप्रतिज्ञावाक्यजन्यज्ञाने। **अभेद इति** भासत इत्यनुषज्यते न तु वह्नेस्संयोग इति शेषः। नामार्थयोर्भेदान्वयवोधस्याव्युत्पन्नत्वादिति हृदयम्।

तथा च तादृशप्रतिज्ञाजन्यवोधे निरुक्तमन्यूनविषयकत्वमनतिरिक्तविषयकत्वं च न सम्भवतीति भावः। **भेदे** शुद्धे प्रतियोगिविशेषिते वा। **इत्यादौ** इत्यादिप्रतिज्ञायामादिपदादितरेभ्यो भिद्यते इतरभिन्नमित्यादिपरिग्रहः। **वैलक्षण्यम्** अनुमितिविलक्षणवोधजनकत्वम्। शुद्धभेदसाध्यकानुमितौ भेदस्यानुयोगितया, इतरावच्छिन्नभेदसाध्यकानुमितौ अनुयोगितया तद्विशेषितस्य तस्य विशेषणताविशेषेण, भिद्यत इति प्रतिज्ञाजन्यवोधे च आख्यातान्तोपस्थाप्यभेदाश्रयत्वस्य, इतरेभ्यो भिद्यत इत्यादिजन्ये पञ्चम्यन्तार्थेतरप्रतियोगिकत्वविशेषितभेदाश्रयत्वस्य तेन सम्बन्धेन, भिन्नमित्यादिजन्ये च निष्ठान्तोपस्थाप्य भेदाश्रयत्वावच्छिन्नस्य, इतरोभ्यो भिन्नमित्यादिजन्ये चेतरप्रतियोगिकत्वविशेषितभेदाश्रयात्वावच्छिन्नस्य, इतरभिन्नमित्यादिजन्ये चाभेदेन इतरप्रतियोगिकविशेषितभेदाश्रयत्वावच्छिन्नस्य, इतरेभ्योऽन्यदित्यादिजन्ये च इतरप्रतियोगिकत्वविशेषितभेदावच्छिन्नस्य, इतरान्यदित्यादिजन्ये च अभेदेनेतरप्रतियोगिकविशेषितभेदावच्छिन्नस्य, अभेदेन पक्षांशे विशेषणत्वादिति अनुमितेस्तादृशवोधवैलक्षण्यादिति भावः। इदमुपलक्षणम्। ईदृशदिशा प्रकृते विधेयांशे भान इव उद्देश्यतावच्छेदकांशे भानेऽपि वैलक्ष्यण्यमवसेयम्। गन्धाद्यवच्छिन्न-पक्षकानुमितौ गन्धादेस्साक्षाद्विधेयधर्मितावच्छेदकत्वात् गन्धवती इतरेभ्यो भिद्यते इत्याद्याकारकतादृशप्रतिज्ञाजन्यवोधे च गन्धादिसम्बधस्यैव तथात्वादिति।

---

भानमप्रसिद्धं येन जातावित्युक्तिमात्रेण स्वरूपतो भासमानत्वं लभ्यत इति भट्टाचार्याणां न तत्कथनासङ्गतिः। एकवाक्यताज्ञानहीनं प्रत्येव व्याख्यानादेरुपयोगादित्यन्ये। *वह्निमत इति* प्रतिज्ञोपनययो-

In Public domain. Digitization: Muthulakshmi Research Academy



उद्देश्यानुमितिपदस्य यादृशविशिष्टार्थवोधः प्रतिज्ञया जन्यते। तादृशविशिष्टार्थवोध-परतेत्यभिप्रेत्य समाधत्ते। **यादृशेति** यादृशरूपावच्छिन्नपक्षकयादृशरूपावच्छिन्न-साध्यकसम्प्रदायसिद्धप्रतिज्ञाः यादृशरूपावच्छिन्नपक्षे यादृशरूपावच्छिन्नप्रकारकवोध-जनिकाः तादृशरूपावच्छिन्ने तादृशरूपावच्छिन्नप्रकारकवोधानिवर्त्यसंशयानिवर्तकतादृश-वोधान्यतमवोधजनकत्वे सति तादृशरूपावच्छिन्नपक्षकतादृशरूपावच्छिन्नसाध्यकन्यायान्त-र्गतत्वं प्रतिज्ञात्वमित्यर्थः, अत्र च जनिका इत्यन्तं वोधविशेषस्य परिचायकमात्रं न तु तदर्थस्य लक्षणे निवेशः। बोधाश्च विषयविशेषान् निवेश्य विशिष्यैवोपादेयाः, अतो नात्माश्रय

---

रेकरूपावच्छिन्नसाध्यवोधत्वानियमात्। हृदयमित्यस्वरससूचनाय स च "तदस्यास्त्यस्मिन्निति मतुप्"[17] इति सूत्रेऽस्यास्मिन्नित्यनेन नार्थो विकल्प्यते। पौनरुक्त्यप्रसङ्गात्। न च सम्वन्धवान् सम्वन्धा-वच्छिन्नाधिकरणत्ववांश्च पृथगर्थौ तादृशाधिकरणतायाः सम्वन्धरूपत्वात्। तस्मान्मतुपो अभेद-सम्वन्धेनान्वयप्रयोजकाकाङ्क्षाघटितमात्रस्यापि लाभायास्मिन्निति तत्रोक्तम्। तदर्थश्च समभिव्याहृत-पदोपस्थाप्याधिकरणे भेदसम्वन्धेनान्वय्यर्थवोधकान्मतुप्स्यादिति। चैत्रो धनीत्यादावस्येत्यर्थे मतुप् नास्मिन्नित्यर्थे इति प्रवादश्च सम्वन्धसंसर्गकशाब्दभानानुपगमपरः। अन्यथा चैत्रो न धनीत्यादौ वृत्त्य-नियामकसम्वन्धावच्छिन्नाभावप्रत्ययापत्तेः। प्रतियोग्यन्वयसत्वात्। यद्यपि सम्वन्धपारतन्त्र्येण तत्सम्वन्धेन वह्निभानमभिप्रेत्यैव मणिकृतानिरुक्तान्यूनानतिरिक्तविषयकत्वनिवेशो नैतादृशपूर्व-पक्षानवतार एवेति। तथापि पर्वतो वह्निसम्वन्धी न वेति संशयस्य पक्षे साध्यतावच्छेदकसम्वन्धेन साध्यवत्तानिर्णयानिर्वर्त्यस्य निवर्तकत्वादव्याप्तेः। यत्र विषयविशेषे नियमतः संयोगसम्वन्धावच्छिन्न-तदङ्कुराभावरूपवाधग्रहोत्तर एव पक्षे तदङ्कुरसम्वन्ध्यभेद वोधस्तत्र प्रतिज्ञायामन्यूनविषयकवोध-जनकत्वासत्वेनाव्याप्तेश्च एतेन व्याप्त्यविषयकत्वरूपानतिरिक्तविषयकत्वनिवेशोऽपि न शङ्क्यः। एवं पाककृतिमानित्यादौ भावकृतां निरर्थकत्वमूह्यम्। भेदस्य विशेषणताविशेषेण पक्षांशे विशेषणत्वादि-त्यन्वयः एवं तस्येत्यादावपि शाब्दवोधस्य भेदाश्रयत्वप्रकारकतयानुमित्यपेक्षया एकं वैलक्षण्यमपरञ्च पञ्चम्यर्थभूतेतरप्रतियोगिकत्वप्रकारकतयेत्यादिकमूह्यम्। एवमन्याभेदवती इतरेभ्यो भेदवतीत्यादि-प्रतिज्ञार्थवेधः अनुषङ्गपक्षे नेतराणीति प्रतिज्ञार्थवोधश्च द्रष्टव्यः। यादृशपक्षोपादानप्रयोजनं पूरयति। *इदमिति* प्रतिज्ञाजन्यवोधजनकत्वस्य प्रतिज्ञात्वे आत्माश्रयादाह। *अत्र चेति* *बोधेति* प्रतिज्ञाजन्यत्वेन तादृशबोधपरिचयस्तज्जनकत्वं प्रतिज्ञात्वं तथा च दीधितिस्थं यादृशपक्षकेत्यारभ्य-

---

17. तदस्य अस्त्यस्मिन्निति मतुप् ।अष्टाध्यायी- ५.२.९४ ।

In Public domain. Digitization Muthulakshmi Research Academy



-शङ्कावकाशः। एवञ्च प्रतिज्ञाप्रतिपाद्य विशिष्टार्थानामननुगमेन एकधर्मावच्छिन्नपक्षसाध्यक-निखिलप्रतिज्ञासाधारणमपि प्रतिज्ञात्वं नैकं सम्भवतीति बोधानामन्यतमत्वेनानुगमः। तेन रूपेण जनकतांश एव बोधानां विशेषणता न तु निवर्त्यत्वांशेऽपि। बोधानामननुगमेऽपि तादृशतादृशबोधनिवर्त्यत्वाभावकूटघटितधर्मस्यानुगतत्वात् तादृशतादृशभेदकूटवद्भिन्नत्व-रूपाद्यन्यतमत्ववन्निवर्त्यत्वसामान्याभावस्थले तादृशतादृशबोधनिवर्त्यत्वाभावकूटस्य लाघवेन निवेशयितुमुचितत्वात्। एवञ्च तादृशाभावकूटनिवेशसूचनायैवान्यतमेनापीत्युक्तम्।

---

सम्प्रदायसिद्धा इत्यन्तं परिचायकमिति भावः। ※एवञ्चेति※ भिद्यते भिन्नमित्यादौ प्रतिज्ञार्थबोधानां विशिष्योपादाने चेत्यर्थः। अन्यतमत्वेनानुगमः स फलो भवतीति शेषः। अन्यथा प्रतिज्ञार्थत्वेन अनुगमय्य तादृशार्थविषयकशाब्दबोधानिवर्त्यसंशयानिवर्तकप्रतिज्ञार्थबोधजनकत्वमित्यस्यैव सम्यक्त्वे अन्यतमत्वनिवेशो व्यर्थ एव स्यादिति भावः। ※एकेति※ विभिन्नसाध्यादिस्थलीय प्रतिज्ञासाधारण-मनुगतं लक्षणन्तु नास्त्यैव इदानीमेकधर्मावच्छिन्नसाध्यकनिखिलप्रतिज्ञासाधारणलक्षणमप्यनुगतं निर्वक्तुमशक्यमेव स्यादतोऽन्यतमत्वनिवेशनमित्यर्थः। ※कूटघटितधर्मस्येति※ तादृशकूटवत्संशय-प्रतिबन्धकत्वसामान्याभावविशिष्टबोधनिष्टस्य तादृशबोधनिष्ठवक्ष्यमाणजन्यतानिष्ठस्य वान्यतमत्वस्य इत्यर्थः। ※तादृशेति※ न चोक्तरीत्या तादृशान्यतमबोधनिष्टनिवर्तकताकत्वसामान्याभाववत्संशयस्य अप्रसिद्धिः। एवं तादृशान्यतमत्वव्यापकप्रतिबन्धकतानिवेशोऽपि न सम्भवतीति वाच्यम्। तादृश-तादृशविशिष्टार्थनिश्चयत्वव्यापकतान्यतमव्यापकताश्रयप्रतिबन्धकताकत्वसामान्याभावस्य पर्यवसित-व्यापकताभेदकूटवद्भिन्नत्वघटितस्य किं वा तादृशनिश्चयत्वव्यापकप्रतिबन्धकतान्यतमनिवर्तकताकत्व-सामान्याभावस्य प्रतिबन्धकताभेदकूटवद्भिन्नत्वघटितस्याभिप्रेतत्वात्। न चैवमपि तादृशतादृशबोध-भेदकूटवद्भिन्नत्वरूपेति ग्रन्थासङ्गतिरिति वाच्यम्। अन्यतमत्वस्य प्रतियोगितावच्छेदकभेदप्रति-योगितावच्छेदकरूपत्वात्। निवर्त्यत्वसामान्याभावस्य निवर्त्यत्वनिष्ठान्यतमत्वावच्छिन्नाभावरूप-त्वादित्यसङ्गत्यभावात्। वस्तुतस्तु तादृशतादृशबोधः प्रतिज्ञार्थमात्रबोधस्तद्व्यक्तित्वेनैवान्यतमत्व-घटक इति अन्यतमनिरूपितनिवर्त्यत्वसामान्याभाव इति यथाश्रुतमेव सम्यक् न च स्वनिवर्तकता-न्यूनवृत्तितादृशतादृशनिश्चयान्यतमत्वकत्वं निवर्तत्वसामान्याभावान्तार्थः। संशयविशेषणं एवञ्च तत्त-द्व्यक्तित्वेन संशयादीनामुपादानात्तत्तदनिवर्तकत्वकूटनिवेशान्नाननुगम इति वाच्यम्। तथापि सम्बन्धी वह्निमान्नवेति संशयस्य स्वपदेनोपादानसम्भवादव्याप्तेः। ※तादृशेति※ तादृशतादृशनिश्चयत्वव्यापक-प्रतिबन्धकतानिरूपितप्रतिबध्यत्वाभावकूटस्यैवेत्यर्थः। ※अन्यतमेनापीति※ अन्यतममध्ये केनापीत्य-

In Public domain. Digitization Muthulakshmi Research Academy



एतेन सामान्याभावनिवेशसूचनायापिकार इति कस्यचिद्व्याख्यानमनादेयम्। विशेष्यदले अन्यतमत्वनिवेशनमपि यत्र प्रतिज्ञार्थानां नानात्वं तत्रैव, पर्वतादिपक्षके वह्न्यादिसाध्यकस्थले पर्वतादौ वह्न्यादिमदभेदरूपेणैकविधवोधस्यैव प्रतिज्ञया जननान्न तत्र तन्निवेशः। एतेनैकविध-वोधमादायान्यतमत्वस्यासम्भवेऽपि न क्षतिः। शब्दाभेदस्याप्रयोजकत्वात्। वह्नित्वावच्छिन्न-साध्यकप्रतिज्ञया घटवद्भूतलादिघटितधर्मावच्छिन्नविशेष्यकः पर्वतत्वावच्छिन्नपक्षकप्रतिज्ञया च तादृशधर्मावच्छिन्नप्रकारकोऽपि वोधो जन्यते। तन्निवर्त्यश्च भूतलं घटवन्नवेत्यादि-संशयोऽपीति प्रतिज्ञायां प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकत्वस्य प्रकृतसाध्यतावच्छेदका-वच्छिन्नसाध्यकत्वस्य वानुपादाने तावद्वोधानिवर्त्य संशयाप्रसिद्धिरतस्तदुपादानम्। यत्किञ्चिद्रू-पावच्छिन्नपक्षसाध्यकप्रतिज्ञादिप्रतिपाद्यविशिष्टार्थवोधजनकत्वस्य यत्किञ्चिद्रूपावच्छिन्नपक्ष-

---

र्थात्तादृशकूटलाभः। एतेन तादृशवोधनिवर्त्यत्वे सति तादृशशाब्दवोधनिवर्त्यत्वं यद्यन्यतमवोध-निवर्त्यत्वं तदा सकलसंशयासङ्ग्रहेणासम्भव इत्यपास्तम्। *एतेनेति* व्युत्पत्तिवलादेव सामान्याभाववलादपि कारणवैयर्थ्यं चेत्यपि वोध्यम्। अन्यतमत्वघटितलक्षणन्तु भेदादिसाध्यकस्थल एवादरणीयं न तु वह्न्यादिसाध्यकस्थलेऽपि तत्र तादृशशाब्दवोधानिवर्तसंशयानिवर्तकत्ववोध-जनकत्वस्यैव सम्यक्त्वात्। अन्यथा तादृशशाब्दवोधान्यतमत्वाप्रसिद्ध्याऽव्याप्तिरित्याह। *विशेष्यदले इति* अन्यतमवोधदले इत्यर्थः। धूमादालोकवानित्यादौ प्रतिज्ञार्थविषयकनिश्चयत्वव्यापक-प्रतिवन्धकताकत्वाभाव एव निवेश्यं न तु तत्कूटमेवञ्च पर्वतो वह्निमान् धूमादित्यादावग्रे निरूप्य-निरूपकभावापन्नविषयकत्वनिवेशनं तदुभयत्र तत्प्रयोजनाभिप्रायेण निरूप्यनिरूपकभावपर्यन्त-निवेशप्रयोजनस्य धूमादालोकवानित्यादावपि सम्भवादिति वोध्यम्। पर्वतो वह्निमान् धूमादित्यादौ न्यूनविषयकत्वमपिहेयमिति वोध्यम्। अत्र यादृशपदसाध्यका इत्यादिपरिचायकघटकस्य प्रकृतपक्ष-साध्यकार्थकत्वे एव तत्र यादृशरूपावच्छिन्नपक्षे यादृशरूपावच्छिन्नप्रकारकवोधलाभान्निवर्तकत्वा-न्वयिनां जनकतान्वयिनाञ्च वोधानां यादृशरूपावच्छिन्नसाध्यपक्षविषयकत्वस्य लाभ इति प्रथमतः परिचायकप्रविष्टयोः प्रकृतपक्षसाध्ययोः प्रत्येकप्रयोजनमाह। *वह्नित्वेति* पक्षतावच्छेदकावच्छिन्नत्वा -निवेशे घटवद्भूतलसमानकालीनः पर्वतो वह्निमानिति साध्यतावच्छेदकावच्छिन्नत्वानिवेशे पर्वतो घटवद्भूतलकालीनवह्निमानिति च वोधे इत्यर्थः। *संशयोपीति* संशयाप्रसिद्धौ हेतुः। ननु प्रकृत-पक्षसाध्ययोरेकतरस्य निवेशे तादृशशाब्दत्वावच्छिन्ननिवर्तकतानिवेशेऽवच्छिन्नत्वं व्यापकत्वमेव वाच्यम्। एवञ्च तादृशबोधत्वव्यापकनिवर्तकताया अप्रसिद्धिरेवाभिधानीया न तु संशयाप्रसिद्धिरिति

In Public domain. Digitization Muthulakshmi Research Academy



साध्यकन्यायान्तर्गतत्वस्य निवेशनेऽतिप्रसङ्गः प्रागुपदर्शित एवेति यादृशरूपावच्छिन्नपक्ष-साध्यकप्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधानिवर्त्यसंशयानिवर्तकबोधजनकत्वं तादृशरूपावच्छिन्न-पक्षसाध्यकन्यायान्तर्गतत्वं निवेशितम्।

अधिकं त्विति न्यायेन साध्यांशे हेतुज्ञानज्ञाप्यत्वमवगाहमानेऽपि निगमनादि-जन्यबोधे प्रतिज्ञाप्रतिपाद्यविशिष्टार्थविषयकत्वस्याक्षततया निगमनाद्यतिव्याप्तिवारणाय तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नप्रकारकबोधानिवर्त्यसंशयानिवर्तकत्वरूपतादृशबोधान-तिरिक्तविषयकत्वं बोधविशेषणम्। इत्थञ्च प्रतिज्ञाजन्यबोधानिवर्त्यस्य वह्निर्धूमज्ञानज्ञाप्यो न वेत्यादिसंशयस्य निवर्तकतया तादृशबोधवारणम्। न च प्रतिज्ञाजन्यबोधस्य पर्वतत्वाद्य-वच्छिन्नविशेष्यकवह्निमत्वाद्यवच्छिन्नप्रकारकबोधत्वेनैवोपादेयतया निगमनादिजन्यबोधस्यापि तथात्वात्तन्निवर्त्यत्वमुक्तसंशयस्याक्षतमेवेति वाच्यम्। अप्रामाण्यज्ञानानास्कन्दिततादृश-विशिष्टार्थविषयकनिश्चयत्वानवच्छिन्नानिवर्त्यत्वस्यैव[18] निवेशनीयत्वात् उक्तसंशयस्य धूमज्ञान-ज्ञाप्यत्वाविषयकवह्निमत्पर्वतनिश्चयानिवर्त्यत्वेन तथाविधनिश्चयत्वावच्छिन्नानिवर्त्यत्वाक्षतेः।

एतेन सर्वेषामेव संशयानां वह्निमत्पर्वतादिविषयकसमूहालम्बनात्मकस्वविरोधि-निश्चयनिवर्तनीयतया तादृशबोधानिवर्त्यसंशयाप्रसिद्धिरित्यपि निरस्तम्। तादृशनिश्चयत्वनिष्ठं

---

चेन्न। निवर्तकतायां स्वरूपसम्बन्धरूपावच्छिन्नत्वं निविष्टमित्यभिप्रायात्। *प्रागुपदर्शित एवातिप्रसङ्ग इति योजना* वह्निसाध्यकोपनयस्य वह्निव्याप्यधूमसाध्यकप्रतिज्ञार्थबोधजनकत्वाद्वह्निसाध्यक-न्यायान्तर्गतत्वाच्च प्रतिज्ञात्वापत्तिरूपोऽतिप्रसङ्ग इत्यर्थः। ननु तादृशान्यतमबोधजनकत्वमेवास्तु इत्यत आह। *अधिकन्त्विति* *अक्षततयेति* पर्याप्त्यनिवेशादिति भावः। निगमनादीत्यादिना अनतिरिक्तविषयकत्वघटकसाध्यतावच्छेदकसम्बन्धनिवेशाव्यावृत्तिस्थलस्य हेतुत्वं प्रमेयं प्रमेयादि-त्यादौ हेत्ववयवस्य परिग्रहः। *संशयाप्रसिद्धिरिति* न चैवं निगमनातिव्याप्तिशङ्कायाः अनवकाश इति वाच्यम्। दत्तोत्तरत्वात्। यत्तु, पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितसम्बन्धप्रकारतानिरूपित-वह्नित्वावच्छिन्नप्रकारत्वावच्छिन्ननिवर्तकताया उपादाने निगमनजन्यबोधीयतादृशवह्नित्वावच्छिन्न-प्रकारताया अपि वह्नित्वावच्छिन्नविशेष्यतात्वेन स्वरूपसम्बन्धरूपनिवर्तकतावच्छेदकत्वमिति, तन्न, निगमनार्थघटकव्याप्त्यादिघटकैकपदार्थे तथाविधापरपदार्थाभावसंशयस्य वह्निसम्बन्धी वह्निमान्नवेति संशयस्य च तादृशनिश्चयत्वावच्छिन्नानिवर्त्यत्वात्। विशेष्यदलं तादृशशाब्दबोधान्यतमदलम्।

---

18. निश्चयत्वावच्छिन्नानिवर्त्यत्वस्यैव इति पाठान्तरम्।

In Public domain. Digitization Muthulakshmi Research Academy


निवर्तकतावच्छेदकत्वञ्च न स्वरूपसम्बन्धरूपं किन्त्वनतिरिक्तत्वं, तेन सम्बन्धी वह्निमान्न-वेत्याद्याकारकैकदेशसंशयं प्रति वह्निसम्बन्ध्यभिन्नपर्वतादिनिश्चयत्वेना[19]प्रतिवन्धकत्वेऽपि तादृशसंशयनिवर्तकप्रतिज्ञाजन्यवोधस्य नासङ्ग्रहः। अत एव धूमादालोकवान्पर्वतो वह्निमान् इत्यादौ हेतुजन्यवोधनिवर्त्यं हेतुत्वं धूमीयं न वेति संशयं प्रति प्रतिज्ञाप्रतिपाद्य[20]विशिष्टार्थ-विषयकनिश्चयत्वेनाप्रतिवन्धकत्वेऽपि न विशेष्यदलवैयर्थ्यम्। वह्निमत्त्वाद्यवच्छिन्नप्रकारक-निश्चयत्वावच्छिन्ननिवर्त्यस्य पर्वतत्वाद्यवच्छिन्नविशेष्यकनिश्चयत्वावच्छिन्ननिवर्त्यस्य चाप्रसि-द्धिरतो विशिष्य विशेष्यप्रकारोभयनिवेशनम्।

यद्यप्यत्र प्रतिज्ञाप्रतिपाद्यस्य[21] विधेयविशिष्टधर्मिण एव यादृशविशिष्टार्थेत्युपादान-सम्भव इति यादृशविशिष्टार्थवोधिका इत्युपेक्ष्य विशेष्यप्रकारयोः खण्डश उपादानसूचनाय पक्षे यादृशविशिष्टार्थवोधिका इत्यभिधानमनुचितम्। तथापि धूमादालोकवान्पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञार्थहेत्वर्थविषयकसमूहालम्बनवोधजनकहेत्वन्ते हेतौ वा न्यायावयवत्वं परित्यज्य न्यायान्तर्गतत्वनिवेशनपक्षे प्रतिज्ञाजन्यवोधनिष्ठैकदेशविषयकबुद्धित्वावच्छिन्न-

*वह्निमत्त्वादीति* पूर्वमेकतरधर्मावच्छिन्नविषयताकत्वनिवेशे दोष उक्तः अयञ्च धर्मद्वयस्य प्रत्येकाव-च्छिन्नविषयतयोर्निवेश इति भेदः। यद्वा पूर्वमेकतरधर्मावच्छिन्नविषयताकत्वावच्छिन्ननिवर्तकताया इदानीञ्च तादृशविषयताकत्वव्यापकनिवर्तकताया निवेश इति भेदः। नन्वभेदसम्बन्धेन साध्यवद्विशिष्ट-पक्षविषयकत्वरूपविशिष्टविषयकत्वमेवानतिरिक्तविषयकत्वघटकवोधविशेषणमिति भ्रमसाधारण-निरूप्यनिरूपकभावापन्नविषयिताशालित्वेन बोध्यानां निवेशस्य पक्षे यादृशविशिष्टवत्त्ववोधिका इति ग्रन्थेन दीधितिकृतां प्रदर्शनवैयर्थ्यमित्याशङ्कते। *यद्यपीति* यादृशविशिष्टार्थवोधजनका इत्युक्तौ वास्तवविशिष्टविषयिताशालिवोधप्रदर्शने जनकतास्वपि बोधेऽपि वास्तवविशिष्टविषयिताशालित्व-लाभादसम्भवं वक्तुं भूमिकामारचयति। तथापीत्यादिना। हेत्वर्थमात्रविषयकवोधोपादाने तस्य वास्तव-प्रतिज्ञार्थाविषयकत्वे नान्यतमान्तर्गतत्वाभाव इत्यग्रिमरीत्या हेत्वर्थविशिष्टसाध्यवैशिष्ट्यावगाहि-वोधस्य नानतिरिक्तविषयकत्वमिति समूहालम्वनानुसरणम्। न्यायावयवत्वमुभयघटकेत्यादि-विशेषणाघटितमित्याशयेन हेत्वन्ते तन्निवेशमभिप्रेत्य च हेतावित्युक्तम्। एकदेशेऽप्यतिव्याप्तिमाह। *प्रतिज्ञाजन्येति* *एकदेशे चेति* प्रतिज्ञाघटके धूमादिभागे आलोकवानिति भागे वह्निमानिति भागे

19. पर्वतादिनिश्चयत्वे प्रतिवन्धकत्वेऽपि इति पाठान्तरम्
20. प्रतिज्ञाप्रतिपादित इति पाठान्तरम् 21. प्रतिज्ञाप्रतिपादितस्य इति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

जन्यतानिरूपितजनकतामादायैकदेशे चाऽतिप्रसङ्गवारणाय विशिष्टार्थविषयकबोधत्वावच्छिन्न-जन्यताप्रतियोगिकजनकत्वनिवेशे पर्वतो वह्निमानित्यादिप्रतिज्ञाया असङ्ग्रहः वह्न्यादिशून्य-पर्वतादौ वह्निमत्त्वाद्यवगाहिभ्रमात्मकशाब्दबोधसाधारण्यानुरोधेन तत्तत्पदार्थानां परस्परमुप-श्लेषावगाहित्वस्यैव तादृशप्रतिज्ञाजन्यतावच्छेदकत्वोपगमात् तत्तद्विशिष्टार्थविषयकत्वस्या-तथात्वादिति। अनतिरिक्तविषयकबोधनिष्ठतादृशपरस्परोपश्लेषावगाहित्वावच्छिन्नजन्यताप्रति-योगिजनकताया निवेशसूचनाय तथाभिधानम्। तादृशपरस्परोपश्लेषावगाहिशाब्दत्वे जन्यता-वच्छेदकतापर्याप्त्यनिवेशान्नानतिरिक्तविषयकत्वदलवैयर्थ्यमित्यवधेयम्। भेदादिसाध्यकस्थले पृथिवीतरेभ्यो भिद्यते इत्यादिप्रतिज्ञाप्रतिपाद्यभेदाश्रयत्वादिरूपयत्किञ्चिदेकार्थविषयकनिश्चया-प्रतिबध्यभेदादिकोटिकसंशयं प्रति पृथिवी नेतराणीत्यादिप्रतिज्ञाजन्यभेदादिप्रकारकनिश्चयस्य प्रतिबन्धकतया न कस्याश्चिदपि प्रतिज्ञायास्तादृशसंशयानिवर्तकबोधजनकत्वमतस्तद्विशिष्टार्थ-निश्चयनिवर्त्यत्वाभावकूटनिवेशनम्। प्रतिज्ञाजन्यबोधस्य स्वसमानाकारानुमितौ सिद्धि-विधया प्रतिबन्धकत्वात् तादृशानुमितेश्च सिषाधयिषाकालीन तादृशबोधाप्रतिबध्यतया तादृशाप्रामाण्यज्ञानानास्कन्दितप्रतिज्ञाप्रतिपाद्यविशिष्टार्थनिश्चयत्वावच्छिन्नप्रतिबन्धकतान्य-त्वादसम्भव इत्यतो ज्ञानसामान्यमुपेक्ष्य संशयपर्यन्तानुधावनम्। न चानुमितेस्तादृश-निश्चयत्वावच्छिन्नप्रतिबन्धकताकान्यत्वेऽपि तदप्रतिबन्धकसिषाधयिषाकालीनबोधजनकत्वम् आदाय प्रतिज्ञायां लक्षणसमन्वयः सम्भवतीति संशयपदमनर्थकं, स्वरूपयोग्यतारूप-

---

चेत्यर्थः। *अत धात्वादिति* येन रूपेण विषयिताया अवच्छेदकत्वं तस्यास्तेनैव रूपेण स्वरूप-सम्बन्धरूपावच्छेदकतया निवेशः। अन्यथा विशिष्टविषयतानिवेशे कथं तस्यास्तन्निवेशेऽप्यग्रिमा या योग्यता या निर्वह्निपर्वतपरपर्वतो वह्निमानिति वाक्यवारणायावश्यकत्वादिति बोध्यम्।। *वैयर्थ्यम् इति* पर्याप्त्युपादाने च निगमनजन्यबोधस्याधिकावगाहित्वात्तद्वैयर्थ्यं स्यादिति भावः। ननु पर्याप्त्य-निवेशे धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिर्दुर्वारैव तादृशवाक्य-द्वयजन्यविशिष्टवैशिष्ट्यावगाहिबोधनिष्ठहेत्वर्थविशिष्टप्रतिज्ञार्थविषयकत्वावच्छिन्नजन्यतायाः प्रतिज्ञार्थ-विषयकत्वावच्छिन्नतया तन्निरूपितजनकताशालित्वात्। न च तादृशविशिष्टवैशिष्ट्यबोधो नानतिरिक्त-विषयकः। वह्निर्धूमज्ञानज्ञाप्यो न वेति संशयस्यैव प्रतिज्ञाद्यर्थबोधानिवर्त्यतया तन्निवर्तकत्वादिति वाच्यम्। एवमपि धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमान् धूमादित्यादौ हेत्वन्तेऽतिव्याप्तेः। विशिष्ट-वैशिष्ट्यावगाहिबोधनिवर्त्यत्वस्य वह्निर्धूमज्ञानज्ञाप्यो न वेति संशये सत्वेन तदनिवर्त्यसंशयानिवर्तक-

In Public domain. Digitization: Muthulakshmi Research Academy

जनकताया एव निवेशनीयतयाऽव्याप्तेर्प्यनवकाशादिति वाच्यम्। अनिवर्तकत्वं हि प्रतिवन्धकतावच्छेदकीभूतविषयताशून्यत्वं न तु प्रतिवन्धकत्वाभावः। तथा सति अप्रामाण्यज्ञानास्कन्दितबोधमादाय निगमनातिव्याप्तितादवस्थ्यात्। तथा च सिषाधयिषाकालीन[22]सिद्धेरप्रतिवन्धकत्वेऽपि प्रतिवन्धकतावच्छेदकीभूतविषयिताशालित्वेनानुमित्यनिवर्तकत्वासम्भवात्। न च सिद्धेः पूर्वं परतो वा सिषाधयिषाया उत्पादस्थले द्वितीयक्षणे प्रथमक्षणे वा सिषाधयिषाविरहविशिष्टत्वमक्षतमेवेति सिषाधयिषायामपि सिद्धौ अनुमितिप्रतिवन्धकत्वमक्षतमेवेति कथं तस्याप्रामाण्यज्ञानानास्कन्दित[23]तादृशविशिष्टार्थनिश्चयत्वावच्छिन्नप्रतिवन्धकताकान्यत्वमिति वाच्यम्। यादृशसिद्धेः पूर्वं परतश्च सिषाधयिषोत्पादः तादृशसिद्धेरेवाप्रतिवन्धकत्वात्। प्रत्यक्ष-निश्चयेऽपि विशेषदर्शनकालीनविपरीतनिश्चयस्याप्रतिवन्धकतामते तस्यापि प्रतिज्ञार्थनिश्चयत्वावच्छिन्नाप्रतिवध्यतया उक्तदिशासम्भव इति प्रत्यक्षसामान्यमुपेक्ष्य संशयपर्यन्तानु-

त्वस्याक्षतत्वादिति चेन्न। एवमपि तादृशप्रतिज्ञार्थविषयकनिश्चयत्वव्यापकनिवर्तकतान्यस्य पर्वतो धूमज्ञानज्ञाप्यवह्निमान्नवेति संशयस्य निवर्तकतयैवादोषादिति न पर्याप्तिनिवेश आवश्यक इति। ननु धूमाद्वह्निमत्पर्वतसधर्मा पर्वतो वह्निमान् धूमादित्यादौ हेत्वन्तेऽतिव्याप्तिः। तत्र विशिष्टवैशिष्ट्यावगाहिबोधनिवर्त्यताया उक्तसंशयेऽक्षतत्वादिति चेन्न। उपनयानुत्थानेन तादृशप्रतिज्ञाया एवासत्वात्। ननु पर्वतो वह्निमान् धूमादित्यादौ हेत्वर्थविशिष्टप्रतिज्ञार्थविषयकबोधजनकहेत्वन्तेऽतिव्याप्तिरेव नास्ति साध्यतावच्छेदके प्रकारतावच्छेदकतापर्याप्तिनिवेशादिति चेन्न। अनतिरिक्तविषयकत्वदले नैव वारणा तत्तत्पर्याप्तिरपि न निवेश्यत इत्यभिप्रायात्। *अव्याप्तेरपीति* सिषाधयिषाविरहकालीनबोधजनके इत्यादिः। ***सिद्धेः*** प्रतिज्ञाजन्यबोधस्य। ***अप्रतिबन्धकत्वेऽपि*** अनुमित्यप्रतिवन्धकत्वेऽपि। पुनः संशयत्वनिवेशवैयर्थ्यं शङ्कते। ***न चेति*** ***तस्याः*** अनुमितेः। ***तस्यापि*** प्रत्यक्षस्यापि। प्रतिज्ञार्थ-निश्चयसत्वेऽपि तद्भेदव्याप्यवत्तानिश्चयादिना जनिते तद्भेदप्रत्यक्षे तादृशप्रतिवन्धकताकान्यत्वं बोध्यम्। ननु प्रतिवन्धकत्वाभावस्यैव निवेशः सम्यक्। प्रतिवन्धकतावच्छेदकविषयितापर्यन्तनिवेशे असम्भवात्। वह्निमत्वाद्यवच्छेदेन घटाभावावगाहिग्रहेण वह्निमत्त्वादौ घटव्याप्यवगाहिग्रहेण वा सहितस्य प्रतिज्ञार्थबोधस्य पर्वतो घटवान्नवेति संशयनिवर्तकत्वात्। ग्राह्यत्वस्य केवलान्वयितया ग्राह्याभावावगाहित्वेनाननुगमेन च तत्तदभावावगाहित्वेन प्रतिवन्धकत्वनिवेशासम्भवात्। प्रतिवन्धकत्वाभावनिवेशे त्ववच्छेदकधर्मदर्शनशून्यकालीनप्रतिज्ञाजन्यबोधमादाय लक्षणसमन्वयसम्भवादिति।

22. सिषाधयिषाकालिक इति पाठान्तरम् 23. प्रामाण्यज्ञानास्कन्दित इति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

धावनम्। अत्र च तत्तद्विशिष्टार्थविषयकनिश्चयत्वानवच्छिन्न[24]संशयप्रतिवन्धकत्वशून्यत्वस्य ज्ञानविशेषणत्वोपगमेनैवातिरिक्तविषयकस्य हेत्वन्तादिभागजन्यबोधस्य तथाविधधूमज्ञान-ज्ञाप्यत्वादिसंशयप्रतिवन्धकताश्रयस्य वारणसम्भवात्तादृशप्रतिवन्धकतात्वेनैव[25] तथाविध-निश्चयत्वावच्छिन्नप्रतिवन्धकताकान्यसंशयप्रतिवन्धकतानिवेशः न तु तथाविधनिश्चयत्वा-वच्छिन्नप्रतिवन्धकताकान्यसंशयप्रतिवन्धकतात्वेनैव गौरवादित्यवधेयम्। उक्तहेतुवारणाय **ताद्दशबोधान्यतमेति।** प्रकृतप्रतिज्ञाजन्यतावच्छेदकीभूतं यादृशयादृशबुद्धित्वं तादृश-

---

मैवम्। ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिवन्धकताया एवोपादानात्। परे तु तादृशसंशयप्रतिबन्धकत्वाभाव-विशिष्टाप्रामाण्यग्रहाभावविशिष्टबोधजनकत्वमर्थः।अप्रामाण्यग्रहाभावनिवेशात्तादृशनिगमनव्युदासः। न चैवं प्रत्यक्षसामान्योपादनेऽपि तादृशवोधानिवर्त्यस्य विशेषदर्शनकालीनविपरीतनिश्चयस्या-प्रतिवन्धकं यद्विशेषदर्शनकालीनज्ञानं तत्स्वरूपयोग्यत्वसत्वेन लक्षणसमन्वयसम्भवात्संशयपर्यन्ता-नुधावनवैयर्थ्यमिति वाच्यम्। विशेषदर्शनकालीनस्वार्थवोधजनकत्वमादाय निगमनातिव्याप्तेरतस्तादृ-शप्रतिवन्धकाप्रामाण्यग्रहाभावविशिष्टविशेषदर्शनाभावविशिष्टवोधजनकत्वस्य वाच्यतया संशयपद-सार्थक्यादिति प्रतिवन्धकत्वाभावनिवेशपक्षं रोचयन्तोऽत्र संशयांशे विशिष्टभेदकूटनिवेशमपेक्ष्य प्रतिवन्धकतायां तादृशनिश्चयत्वानवच्छिन्नत्वनिवेशे लाघवमादर्शयन्ति। *अत्र चेत्यादिना* अनवच्छिन्नत्वमव्यापकत्वं तादृशतादृशनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वकूटं कूटोपादानप्रयोजनं स्फुटमेव। स्वरूपसम्वन्धावच्छिन्नत्वाभावनिवेशे विशेष्यदलवैयर्थ्यापत्तेः। सम्वन्धी वह्निमान्नवेत्यादि-संशयप्रतिवन्धकतामादायाव्याप्तेश्च, ज्ञानं बोधः। *हेत्वन्तादीति* निगमनघटकहेतुभागे इति तु नार्थः। तत्रान्यूनविषयकत्वाभावात्। केचित्तु, अप्रामाण्यग्रहाभावविशिष्टतादृशतादृशशाब्दत्वव्यापक-प्रतिबन्धकताकान्यसंशयाप्रतिबन्धकत्वं निरुक्तशाब्दत्वाव्यापकसंशयप्रतिबन्धकत्वाभावो वा युक्तः। अनाहार्यनिश्चयत्वयोरनिवेशेन लाघवादिति परिष्कुर्वन्ति तेषामनुपश्चान्मितिर्ज्ञानमिति व्युत्पत्ति-विरोधः। मितिपदस्य शाब्दत्वेनावाचकत्वात्। शाब्दबोधादेरपि नव्यमते संशयादिरूपतया यथास्थित-स्यैव ज्यायस्त्वाच्च। *उक्तेति* धूमादालोकवानित्यादिस्थलीयेत्यर्थः। ननु बोधान्यतमत्वनिवेशे हेत्वर्थ -वोधकभागघटितप्रतिज्ञास्थलीय हेतावतिव्याप्तिरतस्तत्परित्यज्य जन्यतान्यतमत्वं निवेशयति। *प्रकृतेति* पक्षे साध्यवैशिष्ट्यावगाहित्वं नान्यूनविषयकत्वं किन्तु तादृशतादृशबुद्धित्वमिति भावः। *उक्तेति* धूमादालोकवान् पर्वतो वह्निमान् हेतुत्वञ्च धूमीयमित्युक्तेत्यर्थः जन्यतायां तादृश-

---

24. विषयकनिश्चयत्वावच्छिन्न इति पाठान्तरम्

25. प्रतिवन्धकतात्वे इति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

तादृशबुद्धित्वावच्छिन्नान्यतमजन्यतानिरूपितजनकतापर्यन्तस्य विवक्षणीयतयोक्तसमूहालम्बनवोधमादाय न तत्रातिप्रसङ्ग इत्युक्तप्रायम्।

**गवाभेदस्येत्यादि** सकलषष्ठ्यन्तैस्समं वोधा विशिष्याधर्तव्या[26] इत्यग्रिमस्यान्वयः। यद्यपि तादात्म्यसम्बन्धेन गोसाध्यकस्थले अनुमित्यन्यूनानतिरिक्तविषयकवोधजनकत्वं प्रतिज्ञायास्सम्भवतीति प्रागभिहितं, तावतैव गवाभेदः प्रतिज्ञा प्रतिपाद्य इत्यस्य लाभात्तत्र तादृशवोधमादाय लक्षणं कर्तव्यमिति स्फुटमेव। तथापि तत्र तादृश एव वोधो लक्षणघटकः नत्वन्यविधो वोध इति स्फुटीकर्तुं तदुपादानम्। तादात्म्येन वह्नौ साध्येऽयं वह्निरित्येव प्रतिज्ञा जयते तत्र च न वह्निमदभेदवोधो लक्षणघटकः इत्यतस्संयोगेन समवायेन वेति। तादात्म्यातिरिक्तसम्बन्धेनेत्यर्थः। वह्न्यावित्यादिसप्तम्यन्तत्रयं साध्य इति प्राक्तनेनान्वितम्। **वह्निमदभेदस्येति** अत्राप्येतादृशवोधस्य तादृशप्रतिज्ञाजन्यतायाः प्रागुपदर्शितत्वेऽपि अन्यविधवोधासम्भवमाविष्कर्तुमेतदुपादानम्। **पाककृतिमत्त्वस्येति** पाककृतिसमवायस्येत्यर्थः। पचतीति प्रतिज्ञातस्तद्वोधादिति भावः। **पाककर्त्रभेदस्येति** पाककृत्यवच्छिन्नाभेदस्य पाककृतिमत्त्वावच्छिन्नाभेदस्य चेत्यर्थः। पक्ता पाककृतिमानित्यादिप्रतिज्ञातः तद्वोधादिति भावः। **इतरभेदवत्त्ववत्त्वस्येति** इतरभेदाश्रयतासम्बन्धस्य इत्यर्थः। इतरेभ्यो भिद्यते इत्यादितः तादृशवोधोदयादिति भावः। **इतरान्याभेदस्येति**

---

विषयत्वावच्छिन्नत्वं निवेश्यमिति पूर्वाभिधानेनैव जन्यतास्वन्यतमत्वं लब्धमिति प्राचपदम्। नत्वन्यविध इति स्पुटीकरणायैतादृशस्थलेऽन्यतमत्वं न लक्षणघटकमिति दीधितिकृतैव व्यञ्जितम्। तादात्म्येति कालिकादिसम्वन्धसङ्ग्रहाय। **पक्तेति** पचतीत्यादौ कालो न भासते। अतीतत्वाद्यविवक्षायामेव वर्तमाने लडि[27]त्यनुशासनप्रवृत्तेः। अत एवापाक्षीत् पक्ष्यतीति तत्र न प्रतिज्ञा। एवं त्वम्पचसीत्यादिका सा भविष्यति न तु पचतीति युष्मदर्थकृत्योर्मध्यमाद्युपस्थापितत्वेऽपि उद्देश्यविधेयभावेन उद्देश्यवाचकपदस्य विधेयवाचकपदपूर्ववृत्तित्वावश्यकत्वात्। अन्यथा शालादिपदाद्येकस्माद्वृक्षादौ शालादिवोधापत्तेः। कथञ्चिदेकत्रापरवोधेऽपि विविक्तपक्षानुपस्थानात्। एवमेकविभक्त्यन्तपदरूपोऽपि विभक्त्यन्तं पक्षीकृत्यक्रियानामार्थसाध्यिका पचति राज्ञ इत्यादिका न सेति वोध्यम्। **इतरेति** इतरेभ्योऽन्या इतरेभ्यो भिन्ना इतरभेदवतीतिरेभ्यो भेदवती नेतराणीति च द्रष्टव्यम्। *भिद्य

---

26. विशिष्यधर्तव्या इति पाठान्तरम्    27. वर्तमाने लट् । अष्टाध्यायी- ३.२.१२३ ।

In Public domain. Digitization Muthulakshmi Research Academy

इतरभेदावच्छिन्नाभेदस्येत्यर्थः। इतरान्येति प्रतिज्ञातस्तद्बोधादिति भावः। **इतरभेदवत्त्वस्येति** इतरभेदसंसर्गस्येत्यर्थः नेतराणीत्यतः तद्बोधादिति भावः। **इतरभिन्नाभेदस्य इति** इतरभेदाश्रयत्वावच्छिन्नाभेदस्येत्यर्थः। इतरभिन्नेत्यादिप्रतिज्ञातस्तद्बोधादिति भावः।

अनतिरिक्तविषयकत्वदलार्थः पूर्ववदेव। अन्यूनविषयकत्वं तावद्बोधनिवर्त्ययावत्संशयनिवर्तकत्वं दर्शितहेतुजन्यबोधस्य ज्ञानज्ञाप्यत्वं धूमीयं नवेत्यादिप्रतिज्ञाजन्यबोधनिवर्तनीयसंशयप्रतिबन्धकत्वेऽपि तादृशयावत्संशयान्तर्गतपर्वतो वह्निमान्न वेत्यादिसंशयानिवर्तकत्वेन[28] वारणसम्भवादिति वदतो मतमाह। **तावदिति** तत्तद्विशिष्टार्थविषयकेत्यर्थः। **तावद्बोधनिवर्त्ययावत्संशयेति** तत्तद्विशिष्टार्थबोधान्यतमयत्किञ्चिद्बोधनिवर्त्य

---

**इति** भिदधातोरकर्मकतया तदुत्तरभावाख्यातोऽनर्थक इति तु न शङ्क्यम्। भेत्स्यते अभेदि वा कुसूल इति प्रयोगवशात्तस्य सकर्मकत्वात्। एवं भेदप्रयोजको व्यापार एव धात्वर्थः। भेदस्त्ववयवविभागः। अत एव भिद्यते कुसूलः स्वयमेवेति कर्मकर्तृप्रयोग इत्यपि न शङ्क्यम्। व्यावर्त्यव्यावर्तकयोर्भेद्यभेदकव्यवहारदर्शनेन अन्योऽन्याभावप्रयोजकव्यापारेऽपि तच्छक्तिसिद्धेः। अत एव भिद्यते हृदयग्रन्थिरिति वचने चिज्जडतादात्म्याभिमाननिवर्तकं ज्ञायमानभेदमपि व्यापारविशेषप्रयोज्यं धात्वर्थं मेनिरे साङ्ख्याः। व्यापारप्रयोज्यत्वाद्यंशस्तु प्रतिज्ञाजन्यबोधेन भासते तात्पर्यागोचरत्वात्। न च फलमात्रतात्पर्येण गम्यते ग्राम इति प्रयोगप्रसङ्गः। भिद्यत इत्यादौ व्याप्त्यादिविशिष्टहेतुमत्वरूपव्यापारस्य विषयितया भेदावच्छिन्नजन्यताप्रयोजकत्वेन तत्प्रयोजकस्योपनयान्तनिर्वाह्यतया भाक्त-दर्शनेऽपि गम्यत इत्यादौ तदभावस्य निर्बीजत्वात्। व्यापाराविशेष्यफलबोधने कर्मप्रत्ययोदुर्घट इत्यपि न फलव्यापारयोः पृथग्धात्वर्थतामते फलविषयकव्यापारविषयकबोधं जनयत्विति शक्तिं निवेश्य फलवाचकात्कर्मप्रत्ययमुपगम्य फलमात्रतात्पर्यघटितसामग्र्यां धातुकर्मप्रत्यययोरानुपूर्वीज्ञानस्य प्रवेश्यत्वादिति दिक्। मतान्तरमवतारयति। **अनतीति** **पूर्ववदेवेति** तावद्बोधानिवर्त्ययावत्संशयानिवर्तकेति। यावत्पदघटितपाठे सामान्याभावनिवेश एव लाघवेनोचितः इति बोध्यम्। **दर्शित हेत्विति** धूमादालोकवानित्यादिनेत्यादिः। ननु तावद्भिर्बोधैर्निवर्त्यासंशयायावन्तः इत्यर्थे वक्ष्यमाणदोषादाह। **तत्तद्विशिष्टार्थेति** घटवद्भूतलादिसंशयानामपि घटवद्भूतलादिविषयकप्रतिज्ञार्थबोधनिष्ठनिवर्तकताकत्वेन तत्संशयनिवर्तकबोधानां नातिरिक्तविषयकत्वं निवर्तकतायाश्चान्यतमबोधत्व-व्यापकत्वं निवेशयितुमशक्यमेव अतो यत्किञ्चित्त्वमुक्तम्। न च यत्किञ्चिद्बोधत्वव्यापकत्वनिवेशेऽपि

---

28. संशयनिवर्तकत्वेनेति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

यावत्संशयेत्यर्थः। तेन भेदादिसाध्यकस्थले भेदतदाश्रयत्वादिकोटिकनानाविधसंशयानामेव प्रकृतसाध्यपक्षकप्रतिज्ञार्थवोधनिवर्त्ययावत्संशयान्तर्गततया (तावत्संशयनिवर्तकतायाः पृथिवी नेतराणि पृथिवीतरेभ्यो भिद्यत इत्यादिप्रत्येकप्रतिज्ञाजन्यवोधेऽसत्वेऽपि न क्षतिः। तादृशसकलवाक्यजन्यसमूहालम्बनवोधस्य तावत्संशयनिवर्तकत्वात्।) तावत्संशयनिवर्तकत्वं न कस्यापीति निरस्तम्। तावत्संशयनिवर्तकतायाः पृथिवी नेतराणि पृथिवीतरेभ्यो भिद्यत इत्यादिप्रत्येकप्रतिज्ञाजन्यवोधेऽसत्वेऽप्येतादृशसकलवाक्यजन्यसमूहालम्बनवोधस्य तावत्संशयनिवर्तकत्वात्। तत्र च निरुक्तानतिरिक्तविषयकत्वस्यापि सत्त्वात्। तज्जनकत्वमादायैव प्रत्येकप्रतिज्ञासु लक्षणसमन्वयो (वा) वोध्यः। अत्र च स्वमतापेक्षया गौरवमेवास्वरसवीजं वोध्यम्।

---

भेदसाध्यकयावत्प्रतिज्ञासु न लक्षणसमन्वयसम्भवः पृथिवीतरभिन्नेतिप्रतिज्ञाजन्यवोधस्य पृथिवी इतरोभ्यो भिद्यत इति प्रतिज्ञादिप्रतिपाद्यार्थवोधनिवर्त्यसंशयानिवर्तकत्वादिति वाच्यम्। यत्किञ्चित्पदेनान्यतमवोधघटकीभूतयावद्वोधानामपि प्रत्येकं सङ्ग्रहसम्भवेन सकलप्रतिज्ञासङ्ग्रहासम्भवात्। यत्तु निरुक्तान्यूनानतिरिक्तविषयकस्य सकलप्रतिज्ञार्थावगाहिसमूहालम्वनवोधस्य तादृशत्वाल्लक्षणसमन्वय इति। तत्तुच्छम्। तथा सति तावत्प्रतिज्ञार्थविषयकवोधत्वव्यापकनिवर्तकताकयावत्संशयनिवर्तकत्वेन एव घटवद्भूतलादिसंशयमादाय दोषवारणादन्यतमयत्किञ्चित्त्वयोर्वैयर्थ्यात्।

अथ समूहालम्वनवोधाप्रसिद्धिस्थले लक्षणसमन्वयार्थं तथाकृतम्। एवं तत्तद्वोधनिवर्त्यताकूटवद्यावत्संशयनिवर्तकत्वमपि समूहालम्वनसंशयाप्रसिद्धिस्थलग्रस्तत्वान्नकृतमिति चेदुक्तरीत्या तत्र कथं लक्षणसङ्गतिरिति। धूमादालोकवान्पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयववारणाय संशये यावत्व -निवेशः। *नानाविधेति* घटवद्भूतलादिविषयकनानाविधोदासीनसंशयानामित्यर्थ इति केचित्। तदसत्। उदासीनविषयकत्वेऽप्यव्याप्तिवारणसम्भवात्। *गौरवमेवेति* अत्र धूमादालोकवान्पर्वतो वह्निमानित्यादौ प्रतिज्ञाहेत्वर्थसमूहालम्वनवोधस्य निरुक्तान्यूनानतिरिक्तविषयकतया तज्जनके हेत्ववयवेऽतिव्याप्तिः। तस्य धूमीय हेतुतावोधकतया हेत्ववयवस्यापि तज्जनकत्वात्। तत्तद्विशिष्टार्थवुद्धित्वावच्छिन्नत्वस्य जन्यतायां निवेशेऽननुगमात्। अतोऽन्यतमत्वेन तादृशजन्यतानुगमस्यावश्यकत्वे निरुक्तान्यूनविषयकत्वरूपवोधविशेषणं व्यर्थमिति वोध्यम्। अत्र निष्कर्षानुसारिणः। तेन भेदतदाश्रयत्वादिकोटिकनानाविधसंशयानामेव प्रकृतपक्षसाध्यकप्रतिज्ञार्थवोधनित्यतया तावत्संशयनिवर्तकतायाः प्रत्येकं प्रतिज्ञादिजन्यवोधेऽसत्त्वेऽपि सकलवाक्यजन्यस्य समूहालम्वनवोधस्य

In Public domain. Digitization Muthulakshmi Research Academy


ननु विषयतासम्बन्धेन पाकाद्यवच्छिन्नकृत्यादेर्यत्र साध्यता तत्र कीदृशोपनयः? न तावत्पाककृतिव्याप्यवानित्याकारकः तत्र तत्पुरुषघटकपाकादिपदस्य पाकादिविषयकादि-लाक्षणिकतया पाकविषयताभिन्नकृतित्वाद्यवच्छिन्ननिरूपितव्याप्तेरेव लाभात् प्रकृतसाध्यताव-च्छेदकावच्छिन्ननिरूपिताया व्याप्तेरलाभेनार्थान्तरप्रसङ्गादित्यत आह। **चैत्र इति** **साध्ये** विशिष्टसाध्यशरीरे। **विषयित्वानुयोगित्वयोरिति** कृतिभेदांश इत्यादिः।

---

तावत्संशयनिवर्तकत्वात् तत्र च निरुक्तानतिरिक्तविषयकत्वसत्त्वात्तज्जनकत्वमादायैव प्रत्येकं प्रतिज्ञा-नुलक्षणसमन्वयो बोध्य इति पाठः। नन्वेवमपि धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादौ हेत्वन्ते हेतौ वातिव्याप्तिदुर्वारैव तस्यापि निरुक्तान्यूनानतिरिक्तविषयकप्रकृतप्रतिज्ञार्थहेत्वर्थोभयविषयकसमूहा-लम्बनबोधजनकत्वात्। न चान्यूनानतिरिक्तविषयकबोधस्य प्रकृतप्रतिज्ञाप्रतिपाद्यार्थविषयकत्वावच्छि-न्नजन्यतानवच्छेदकविषयिताशून्यत्वेन विशेषणान्नदोष इति वाच्यम्। तथा सति भेदसाध्यकप्रतिज्ञासु तत्स्थलीय निखिलप्रतिज्ञार्थविषयकसमूहालम्बनबोधमादायैव लक्षणसमन्वयस्य वाच्यतया तादृश-समूहालम्बनबोधस्य निखिलजन्यतामादाय परस्परानवच्छेदकविषयिताशून्यत्वेनाव्याप्तेरिति चेन्न। उक्तभेदादिसाध्यकस्थल एवान्यतमत्वघटितं लक्षणं तत्रैव च तादृशविषयिताशून्यत्वनिवेशो न सम्भवति। धूमादालोकवानित्यादौ तु बोधे तादृशविषयिताशून्यत्वमावश्यकं लक्षणस्यान्यतमत्वा-घटितत्वात्। गन्धाद्रसवतीपृथिवी इतरेभ्यो भिद्यते इत्यादौ तु तत्तत्प्रतिज्ञाप्रतिपाद्यार्थविषयकत्वान्यत-मावच्छिन्नजन्यतानवच्छेदकविषयिताशून्यत्वं निवेश्यम्। नतूक्तभेदादिसाध्यके तन्निवेशः वैयर्थ्यात्, नापि धूमादालोकवानित्यादौ, अन्यतमविषयत्वाप्रसिद्धेः उभयत्रापि विषयिताशून्यत्वं विषयित्वा-नवच्छिन्नत्वरूपं जन्यताविशेषणं कार्यं तेन प्रतिज्ञार्थमात्रबोधमादाय धूमादालोकवानित्यादौ हेतौ नातिव्याप्तिः। लक्ष्यभेदेन लक्षणभेदस्येष्टत्वात्। नन्वेवं विशेषणदाने निरुक्तान्यूनविषयकत्वनिवेश-वैयर्थ्यमिति चेदम्यानविषयकत्वदले नास्त्येव विवक्षणात्। स्वरूपसम्बन्धरूपप्रतिज्ञार्थविषयकत्वाव-च्छिन्नत्वनिवेशान्निगमनेऽतिव्याप्तिरतः निरुक्तानतिरिक्तविषयकत्वनिवेश इत्याहुः। वस्तुतस्तु, निरुक्ता-न्यूनानतिरिक्तविषयकबोधत्वव्यापकमुख्यविशेष्यत्वावच्छिन्नजन्यतानिरूपितजनकताशालिवाक्यत्व-मेव लक्षणमिदञ्च सर्वानुगतम्। धूमादालोकवान्पर्वतो वह्निमानित्यादिस्थलीय प्रतिज्ञाहेत्वर्थविषयक-समूहालम्बनबोधीयहेत्वर्थमुख्यविशेष्यता तु न तादृशबोधत्वव्यापिका केवलप्रतिज्ञार्थबोधे तदभावात्। इति तादृशसमूहालम्बननिष्ठहेत्वर्थविषयकत्वावच्छिन्नजन्यताया लक्षणाघटकत्वान्नहेतावतिव्याप्तिः। न चैवमन्यूनविषयकत्वं व्यर्थम्। तस्य हेयत्वादिति (तस्य लक्षणान्तरत्वादिति) ननु चैत्रः पचतीत्यादेरु-पनयस्य दुर्वचत्वेन न्यायाभावात्प्रतिज्ञात्वमेव न सम्भवतीति दीधितिकृतां तत्र लक्षणोपवर्णन-

In Public domain. Digitization Muthulakshmi Research Academy

सम्बन्धविधयैवेत्येवकारेण विशेषणविधया व्यवच्छेदः। विषयत्वाद्युपस्थापकपदाभावेन तयोर्विशेषणत्वासम्भवादिति भावः। निपातार्थेन नामार्थस्य भेदान्वयधियोव्युत्पत्त्यविरुद्धतया नेतराणीत्यादौ प्रथमाया अनुयोगितार्थकत्वमसिद्धमिति हृदयम्। **यथोपदर्शितेति** प्रतिज्ञोपस्थापितेत्यर्थः। **उपनेयत्वात** उपनयेन वोधनीयत्वात् तादृशव्याप्तेरेवाकाङ्क्षित-त्वेन यः पाककृतिसामग्रीमान् स पचतीत्युदाहरणेन प्रतिपादनात्तादृशव्याप्तिविशिष्टस्य पक्षधर्मताकाङ्क्षायैवोपनयप्रयोग इति भावः। **सुवच एवेति** तथाशब्देन तादृशव्याप्ति-विशिष्टहेतुमत एवोपस्थपनादिति भावः।

ननु मणिकृता थाल्प्रत्यययोर्थं वितर्क्य तस्मात्तथेति निगमनस्य निराकरणीयतया तथापदघटितोपनयेऽपि तद्दोषग्रास इत्यस्याननुमतस्तादृशोपनय इत्यत एतन्मतमनुसृत्याह। **नव्यानामिति** ननु तत्पदेन यथोपदर्शितसाध्यस्येव तादृशसाध्यव्याप्तिविशिष्टहेतोरपि परामर्शसम्भव इति व्याप्त्यादिपदप्रयोगवैयर्थ्यमित्याशयेनाह। **तद्वान्वेति** ननु पक्षादेः अपि प्रक्रान्तत्वात्तस्यैव कथं नोपनयस्थतच्छब्देन परामर्श इत्यत आह। **योग्यतेति**

---

मसङ्गतमित्यभिप्रायेणाशङ्कते। *नन्विति* *अर्थान्तरेति* यद्रूपावच्छिन्नसाध्यवोधिका प्रतिज्ञा तद्रूपावच्छिन्नसाध्यव्याप्यस्यैव पक्षे उपनेयत्वादिति भावः। *निपातार्थेनेति* निपातातिरिक्तनामार्थस्य तादृशनामार्थे भेदसम्वन्धेनान्वयोऽव्युत्पन्नमिति नञो निपातत्वेन तदर्थाभावे नेतरपदार्थान्वये वाधकाभावात्। हृदयमित्यस्वरसः। सचानुयोगितायास्संसर्गतावादिना आनुयोगिता नेतरीचेति भेदानु-योगीत्वाभाववानिति द्विविधवोधं प्रतितत्संसर्गकशाब्दसामग्र्याः प्रतिवन्धकत्वं कल्प्यमिति गौरवम्। तत्प्रकारतावादिना तु भेदोऽनुयोगितासम्वन्धावच्छिन्नेतराभाववानित्येकविधवोधं प्रत्येवेति लाघवमिति। यः पाककृतिसामग्रीमान् सः पाककृतिमानित्युदाहरणोपदर्शतपाकविषयकाभिन्नकृति-व्याप्यत्वविशिष्टे पक्षधर्मत्वोपदर्शकः पाककृतिव्याप्यवानित्युपनयः सुवच इत्याशङ्कां वारयितुमस्य तत्रानुदाहरणत्वं सूचयन्नाह। *प्रतिज्ञोपस्थापितेति* अन्यसाध्येऽन्वयः। रक्तदण्डादिसाध्यकोपन-यादि-सङ्ग्रहाय प्रकृतसाध्योपेक्षा। *वितर्क्येति* यदि तथा शब्दस्य प्रक्रान्तं यद्विशेष्यं न एवार्थस्तदो-पनयजन्यवुद्धौ हेतुमत एव विशेष्यत्वात्तस्माद्धेतुमानित्यर्थः स्यात्। हेतुमति च हेतौ वा हेतुमद्ज्ञान-ज्ञाप्यत्वान्वयो न सम्भवति। अननुभवात्। यदि प्रक्रान्तप्रकारोऽर्थस्तदोपनयजन्यवोधविशेष्यस्य पक्षस्य सामान्यतोऽन्वयव्याप्तौ प्रवेशेन प्रकारतयोक्त एव दोषः। यदि प्रक्रान्तसादृश्यम्। तदा केवलान्वयिनि प्रक्रान्तो य उपनयजन्यबोधविशेष्यस्तत्सादृश्याप्रसिद्धिरिति निगमननिराकरणेन

तात्पर्यवशादित्यर्थः। व्याप्तिविशिष्टहेतुमत्त्वस्यैवाकाङ्क्षितत्वेन तत्परताया एव तत्र ग्रहादिति भावः। **तदा** तच्छब्देन। **साध्यस्येति** **प्रथमकल्पम्** तद्व्याप्यस्येति द्वितीय -कल्पमभिप्रेत्य।

पर्वतो वह्निमानित्यादेर्न्यायस्य वह्निसाध्यकत्वं निराकृत्य वह्निव्याप्यधूमवांश्चाय-मित्याद्याकरकोपनयं निराकुर्वतां मतमाह। **केचित्त्विति** विप्रतिपत्तौ कोटित्वं तज्जन्य-स्मृतिविषयत्वं तज्जन्यप्रत्येकशाब्दबोधप्रकारत्वं वा न तु तदधीनसंशयप्रकारत्वम्। अतो न संशये चेत्यस्य वैयर्थ्यम्। तत्प्रदर्शनञ्च संशये कोटितानिर्वाहकत्वेन तस्य स्वतो जिज्ञासायाम् अतन्त्रत्वादित्यवधेयम्। यद्यपि वह्निमत उपस्थिति दशायां वह्नेरप्युपस्थिततया तादृशविप्रति-पत्तिवाक्याद्वह्निकोटिकसंशयो भवितुमर्हति। तथापि स्वातन्त्र्येण कोट्युपस्थितिस्संशये प्रयोज-केत्यभिप्रायेणेदमित्यवधेयम्। अथवा विप्रतिपत्तिवक्याच्छाब्द एव संशय इति मतानुसारेण इदम्। वस्तुतो वह्न्यभावस्य कोटितायामेव वह्निकोटिकसंशय उपपद्यते। न तु वह्निमद्भेदस्य

---

प्रक्रान्तं दृष्टान्तरूपं विशेष्यं तदभेदस्य वाधात्। केवलान्वयिनि तत्सादृश्याप्रसिद्धेश्चोपनयनिराकरण-सिद्धेरिति। *प्रक्रान्तत्वादिति* व्याप्तिविशिष्टहेतुमत्पक्षवोधकः स इत्येवोपनयः कुतो नेति तु न शङ्क्यम्। तथा प्रक्रमाभावात्। एवं तादात्म्यसम्वन्धेन हेतौ तद्वानित्येवोपनयः न तु सचायमित्यनुमितौ व्यक्तीकृतम्। योग्यताया एकतरार्थवोधकत्वासम्भवादाह। *तात्पर्येति* शाब्दवोधे तु वह्निमतोऽभेद इति मतेऽन्यूनातिरिक्तविषयकत्वं यथाश्रुतमस्तीति स्वरसतैव दीधितिकृता केचित्त्वित्युक्तं तत् अवतारयति। *पर्वत इति* तत्तद्विशिष्टार्थवोधगर्भलक्षणं तु प्रतिज्ञार्थानां नानात्व एवेत्याशयः। *वह्नीति* वह्निमतः सिद्धौ अर्थत एव वह्निसिद्धेर्वह्न्याभावावसंशय निवृत्यादिसम्भवात्। न च यद्रूपावच्छिन्नप्रकारप्रदर्शिका प्रतिज्ञा तद्रूपावच्छिन्नप्रकारघटितार्थतात्पर्यक एवोपनय इति नियमात् प्रतिज्ञाया वह्निसाध्यकत्वानिराकरणेऽपि उपनयस्य तथाकारत्वं निराकृतमेवेति वाच्यम्। मतुपो निरर्थकत्ववादिनं प्रति उक्तनियमानङ्गीकर्तृतत्सार्थक्यवादिनं प्रति च प्रतिज्ञायास्तथात्वनिराकरणात्। वाक्यद्वयाभिप्रायेणाह। *तज्जन्येति* यथाश्रुतार्थं निरस्यति। *नन्विति* ननु विप्रतिपत्तौ कोटिप्रदर्शनं किमर्थमित्यत आह। *तत्प्रदर्शनं चेति* तथा च साधारणधर्माद्यसत्वेऽपि न क्षतिः। *तस्य* विप्रतिपत्तिकोटित्वस्य। *स्वातन्त्र्येणेति* तद्विशिष्टवुद्धौ तन्मुख्यविशेष्यकज्ञानत्वेन हेतुत्वादिति भावः। ननु शाब्दवोधजनकवह्निपदार्थोपस्थितेरेव स्वातन्त्र्येण कोट्युपस्थितिरूपायास्सत्वात्कुतो न वह्निकोटिकसंशय इत्यत आह। *अथवेति* विप्रतिपत्तिकोटित्वञ्च तद्घटकपदजन्यस्मृतिकोटित्वम्।

In Public domain. Digitization Muthulakshmi Research Academy



स्वस्वाभावप्रकारकज्ञानस्यैव स्वसंशयत्वात् प्रकृते च वह्न्यभावो नोपस्थितः अपि तु तद्वद्भेद एवेति वह्न्यभावस्य कोटित्वासम्भवात् वह्निसंशयो न सम्भवतीत्यभिप्रायः। एतत्सूचनायैव च वह्निमद्भेदस्य कोटित्वमभिहितम्। तदभिधानस्य प्रयोजनान्तराभावात्। यद्वा धर्मिणि तत् प्रकारकबोधौपयिकाकाङ्क्षावत्पदजन्यतदुपस्थितिरेव धर्मिणि तत्कोटिकसंशयाजनिका। पर्वतो वह्निरभाव इत्यादितो वाक्याद्वह्न्याद्युपस्थितौ पर्वतादौ वह्न्यादिसंशयानुदयात्। तथा च पर्वतो वह्निमानित्यादिवाक्यस्थवह्न्यादिपदमपि न पर्वतादौ वह्न्यादेर्भेदान्वयौपयिकाकाङ्क्षावदिति न तादृशविप्रतिपत्तिवाक्याद्वह्न्यादिकोटिकसंशय इति परमार्थः। नवीनमतमनुसृत्याह। **वह्निमद्व्याप्येति** **प्राहुरिति** प्रशब्देनात्रास्वरसाभावस्सूचितः।

फलोपधायकतारूपजनकतानिवेशशङ्कया प्रसक्तां तादृशशाब्दबोधानुपधायक-प्रतिज्ञायामव्याप्तिं योग्यताविवक्षया निराकरोति। **यत्र चेति** **अन्तरेति** हत्वर्थादि-विषयकशाब्दबोधसामग्र्यनुत्तरमित्यर्थः। एतेन फलोपधानविवक्षणे अवयनान्तरार्थविषयक-शाब्दबोधमात्रोपधायकप्रतिज्ञायामप्यव्याप्तिः प्रसज्यते। अनतिरिक्तविषयकशाब्दबोधानुपधा-यकत्वादिति सूचितम्। **तादृशेति** तादृशशाब्दबोधजनकज्ञानविषयेत्यर्थः। आकाङ्क्षा-निवेशात् पर्वतो वह्निस्सम्बन्धीत्यादिनिराकाङ्क्षवाक्यव्युदासः। न च पर्वतो वह्निमानित्यादि-शाब्दं प्रति निराकाङ्क्षतादृशवाक्यविषयकज्ञानत्वेनाजनकत्वात्तादृशशाब्दबोधजनकतावच्छेदक-विषयताकत्वनिवेशनेनैवोपपत्तावाकाङ्क्षानिवेशनमफलमिति वाच्यम्। पर्वतो वह्निमानित्यादि-वाक्यानुपूर्वीप्रकारकभ्रमात्मकतादृशनिराकाङ्क्षविषयकज्ञानस्यापि तथाविधशाब्दधीजनकतया तदीयविषयताया अपि जनकतावच्छेदकत्वेन तज्जनकतावच्छेदकप्रकारताश्रयानुपूर्वीरूपाका-

---

परोक्षज्ञानं निश्चयात्मकमेवेति सिद्धान्तमनुरुध्याह। *वस्तुत इति* ननु तथापि वह्निमद्भेदं कोटिं कृत्वा वह्निकोटिकसंशयो नानुपपन्नो बाधकाभावाद्वह्न्यभावमहानसीयवह्निकोटिकसंशय वदत आह। *यद्वेति* ननु यया प्रतिज्ञयाऽवयवान्तरसहकारेणैव बोधो जनितः तादृशप्रतिज्ञायामतिरिक्तविषयक-बोधजनकत्वात्तत्राव्याप्तेर्दीधितावकथनान्न्यूनतेत्याशङ्क्य तत्सङ्ग्रहार्थमन्तरापदस्यार्थमाह। *हेत्वर्थेति* एवञ्च विशेषाभाववतां मध्ये सामान्याभाववतोऽपि प्रविष्टत्वमिति अजनितान्वयबोधकप्रतिज्ञाया असङ्ग्रहः। न्यूनतां स्फुटीकरोति। *एतेनेत्यादिना* *निराकाङ्क्षेति* ननु निराकाङ्क्षवाक्यस्य कथं न्यायान्तर्गतत्वमिति चेत् उपनयघटकवह्निपदसम्बन्धिपदायं पदानामेव न्यायान्तर्गततया तेष्वेवानु-

In Public domain. Digitization Muthulakshmi Research Academy


ङ्क्षाशालित्वनिवेशस्यावश्यकत्वात्। तच्छालित्वञ्च तद्घटितवर्णसमुदायत्वम्। तज्जनकतावच्छेदकीभूतभ्रमान्ययत्किञ्चिज्ज्ञानवृत्तिविषयतानिरूपकवर्णसमुदायत्वमिति तु पर्यवसितोऽर्थः। ह्रदो वह्निमानित्यादिभ्रमानुमितिसमानविषयकतादृशबोधजनकवाक्यस्य वारणाय योग्यता निवेशनीया। योग्यत्वं चाबाधितार्थकत्वं प्रकृतसाध्यविशिष्टप्रकृतपक्षबोधकत्वमिति यावत्। वैशिष्ट्यं च वास्तवं न तु वैज्ञानिकम्। यद्यपि स्वातन्त्र्येण योग्यतानिवेशो निरर्थकः अन्यूनविषयकत्वावच्छिन्नजन्यताप्रतियोगिकजनकताया अवश्यं विवक्षणीयतया वास्तववैशिष्ट्यघटितसाध्यविशिष्टपक्षविषयकत्वरूपान्यूनविषयकत्वनिवेशासम्भवेऽपि अयोग्यवाक्यप्रतिपाद्य-विशिष्टार्थाप्रसिद्ध्या सम्प्रदायसिद्धप्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधानिवर्त्यसंशयानिवर्तकत्वरूपा-नतिरिक्तविषयकत्वघटितलक्षणस्य तत्रातिव्याप्त्यप्रसक्तेः। तथापि वास्तववैशिष्ट्यघटितानतिरिक्तविषयकत्वनिवेशसूचनाय योग्यतोपादानम्। आदिपदात्तात्पर्यविशेषपरिग्रहः तेन निस्तात्पर्यकस्य शुकाद्युच्चरितप्रतिज्ञासमानाकारकवाक्यस्यार्थान्तरपरतादृशवाक्यस्य च व्युदासः। नन्वाकाङ्क्षादिनिवेशो शाब्दवाक्यपदयोर्वैयर्थ्यमाकाङ्क्षादेर्ज्ञानान्तरौपयिकत्वविरहात् वाक्यातिरिक्तेऽसत्त्वाच्च आनुमितिजनकपरामर्शादौ शाब्दधीजनकयोग्यताज्ञानादावतिप्रसङ्गानवकाशात् इत्यत आकाङ्क्षादिमत्त्वलाभार्थकतया तादृशपदोपादानं सार्थकयति। **तल्लाभश्चेति**

---

पूर्वीभ्रमस्याभिप्रेतत्वात्। एतेन प्रतिज्ञाविषयकनिराकाङ्क्षविषयकभ्रमपरत्वं न सम्भवतीति निराकाङ्क्षविषयताया जनकतानवच्छेदकत्वादिति प्रत्युक्तम्। तच्छालित्वस्यान्त्यवर्ण एव विश्रान्तेराह। *तच्छालित्वञ्चेति* आनुपूर्वीघटकवर्णत्वव्यापकसमुदायत्वञ्च न प्रत्येकं प्रतिज्ञासु तथा सति यत्किञ्चिद्ज्ञानविषयवर्णत्वव्यापकत्वमेकदेशेऽपीत्यतः प्रतिज्ञाघटकवर्णे तद्घटकवर्णत्वभ्रमात्मकाकाङ्क्षावारणाय भ्रमान्यत्वं प्रागुक्तरीत्या यत्किञ्चित्प्रकारतास्थाने विषयताञ्च निवेशयन् गुरुतरमाकाङ्क्षाघटकत्वं परित्यजति। *तज्जनकेति* भ्रमावृत्तित्वनिवेशो विशिष्टप्रतिज्ञाविषयताया अपि भ्रमवृत्तित्वादसम्भव इति भ्रमान्येति। यत्किञ्चित्त्वनिवेशव्यावृत्तिः पूर्ववत्। अन्यूनविषयकत्वदले वास्तववैशिष्ट्यनिवेशे भ्रम-साधारणजन्यताकप्रतिज्ञायामसम्भवमाह। *अन्यूनेति* यद्यपि वास्तववैशिष्ट्यघटितान्यूनविषयकत्वे अपि यादृशविशिष्टार्थविषयितानिरूपितयादृशविशिष्टार्थविषयितात्वेन स्वरूपसम्बन्धरूपावच्छेदकत्वं सम्भवति। तथापि तद्विवक्षाया न व्युत्पत्तिबललभ्यता अन्यूनविषयकबोधजनकतापदात् तदप्रतीतेः किन्तु स्वारसिकलक्षणादिलभ्येति तत्परित्यागः। विशिष्टार्थबोधश्च प्रमात्मक एव। *तादृशवाक्यम्* प्रतिज्ञासमानाकारकवाक्यम्। वाक्यपदेनाकाङ्क्षादिमत्वलाभे शाब्दपदापेक्षादीधितिकृतैवोपवर्णिता तां

In Public domain. Digitization Muthulakshmi Research Academy


तल्लाभः शाब्दबोधं प्रति आकाङ्क्षादिमत एव वाक्यस्य जनकतया आकाङ्क्षादिमत्त्वलाभः। तादृशपदद्वयोपादानादिति भावः। शाब्दपदस्य योगेन शब्दजन्यार्थकत्वे, न तल्लाभः आकाङ्क्षादिरहितस्यापि शब्दस्य शब्दजन्यस्मृतिहेतुत्वादतो जातिविशेषोपस्थापकेति। रूढ्यानुभवनिष्ठशाब्दत्वरूपजात्यवच्छिन्नोपस्थापकार्थकम्। शाब्दबोधं प्रति आकाङ्क्षादिरहितस्यापि योग्यताज्ञानादेर्हेतुतया वाक्यपदानुपादाने केवलशाब्दपदान्न तल्लाभ इति वाक्यपदोपादानापेक्षेति भावः। यत्तु तल्लाभाश्चेति अन्यून (नातिरिक्त) विषयकशाब्दत्वावच्छिन्नौपयिकाकाङ्क्षादिमत्त्वलाभश्चेत्यर्थः। शाब्दपदस्यावयवशक्त्या शब्दजन्यज्ञानत्वावच्छिन्नार्थकत्वे शब्दजन्यतावच्छेदकजातिविशेषानुपस्थित्या तदवच्छिन्नजन्यताप्रतियोगिकजनकतालाभो न भवतीत्युक्तं जातिविशेषोपस्थापकेति। तथा च कार्यदिशि शाब्दपदेन शाब्दत्वजातेः कारणदिशि च वाक्यपदेनाकाङ्क्षादिमत्त्वस्य लाभात्तादृशशाब्दत्वावच्छिन्नौपयिकाकाङ्क्षादिमत्त्वलाभ इति भाव इति व्याख्यानम्। तदसत्। अवच्छेदकतापर्याप्त्य निवेशान्निरुक्तान्यूनविषयकत्वावच्छिन्नजन्यतानिवेशमात्रेणैवोपपत्त्याशाब्दत्वनेवेशने प्रयोजनाभावात्तदुपस्थितेरप्रयोजकत्वात्। न च तत्तदर्थविषयकत्वस्य शाब्दत्वनिष्ठजन्यतावच्छेदकतायामेवावच्छेदकतया जन्यतायां तदवच्छिन्नत्वविरहात् अन्यूनविषयकशाब्दत्वावच्छिन्नत्वेनैव जन्यता निवेशनीयेति वाच्यम्। विनिगमनाविरहेण शाब्दत्वविशिष्टतत्तदर्थविषयकत्वस्यापि जन्यतावच्छेदकत्वात्।

---

स्फुटीकरोति। *शाब्देति* स्वयंशाब्दपदस्य तल्लाभे वाक्ये पदापेक्षां व्युत्पादयति। *शाब्दबोधं प्रतीति* *ज्ञानादेः* येग्यताज्ञानादेः। एवञ्च भट्टाचार्यव्याख्यायां शाब्दवाक्यपदयोरुभयोरेवाकाङ्क्षादिमत्त्वदलार्थकत्वं यत्त्विति मते च वाक्यपदादाकाङ्क्षादिलाभः। शाब्दपदाद्विजातीय शाब्दलाभ इत्येव मतयोर्भेद इति बोध्यम्। जात्युपस्थापकेति वक्तव्ये विशेषपदोपादानफलं दर्शयति। *शाब्दपदस्येति* आकाङ्क्षादिकं चोचितानुपूर्वीकत्वघटकप्रतिज्ञायां वा विशेष्यदले वा निवेश्यम्। इदन्तु बोध्यम्। प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वावच्छिन्नभेदप्रतियोगितावच्छेदकत्वं नोचितानुपूर्वीकत्वं किन्तु निगमनपूर्वोपनयपूर्वोदाहरणपूर्वहेतुपूर्वत्वावच्छिन्नप्रतियोगिताकभेदप्रतियोगितावच्छेदकत्वं हेतुपूर्वत्वान्तं वा प्रतिज्ञात्वानिवेशनलाघवात्। एवञ्च पर्वतो वह्निः सम्बन्धीति निराकाङ्क्षवाक्यव्युदास इति पङ्क्तिर्यथाश्रुतैव सङ्गच्छते। न्यायान्तर्गततादृशवाक्येऽप्युचितानुपूर्वीकत्वसम्भवात्। न च प्रागभावानुपदमेतत्पूर्वत्वं तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वमुत्पत्तिघटिततया गुर्वीति वाच्यम्।

नन्वन्यूनानतिरिक्तपदपरित्यागे अनुमितिविषयकशाब्दधीजनकमित्यवशिष्यते। तथा च पर्वतो वह्निमानित्यादिप्रतिज्ञावाक्यस्यानुमित्यबोधकतया अव्याप्तिरित्याशङ्कां परिजिहीर्षुरनुमितिविषयो विषयो यस्येति मध्यमपदलोपिसमासाभिप्रयेण समुदितलक्षणपर्यवसितार्थं व्याचष्टे। **तथाचेति** **दृष्टान्तवत इति** अस्याग्रिमेणोदाहरणस्येत्यादिनाऽन्वयः। अन्वय्युदाहरणस्य लिङ्गबोधकत्वाद्व्यतिरेकिपर्यन्तानुधावनम्। यो यो धूमवान् स वह्निमानिति व्यतिरेक्युदाहरणस्य वह्न्यभावादिरूपलिङ्गाबोधकत्वात् पक्षविषयकत्वमात्रनिवेशेनैव तादृशोदाहरणवारणसम्भवेन पक्षमुख्यविशेष्यकत्वपर्यन्तस्य विवक्षणीयस्य व्यावृत्तिदानाय यथा ह्रदभिन्नमित्यादिदृष्टान्तघटिततदनुसरणम्। दृष्टान्ताघटितोदाहरणे व्यावृत्तिमाह। **ह्रदावृत्तीति** **उपनयवारणायेति** पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकत्वनिवेशस्य प्रयोजनान्तरविरहेप्येतदर्थमेव तन्निवेशोऽननुषङ्गपक्षे निगमनातिव्याप्तिर्न सम्भवतीत्यभिप्रायेण निगमनोपेक्षा। तस्मात् इतरेभ्यो भिद्यत इत्यादिनिगमनस्य पक्षविशेष्यकबोधजनकत्वाभावान्निगमनसामान्ये, नातिव्याप्तेस्सम्भव इत्यभिप्रायेण वा। वस्तुतः पक्षमुख्यविशेष्यकत्वनिवेशेऽपि गोत्वं सास्नाभाववत् गोत्वाभावादित्यत्र यत्र सास्ना तत्र गोत्वमित्युदाहरणे पक्षमुख्यविशेष्यबोधजनकेऽतिव्याप्तिदुर्वावारैव। पक्षमात्रमुख्यविशेष्यकत्वनिवेशे च विश्वपक्षकसंसर्गतया तन्निवेशेन लक्षणग्रहस्य तद्ग्रहं विनापि भावात्। सामान्यलक्षणायामुत्पत्त्यनुगमप्रकारस्य दर्शितत्वाच्च। तस्माद्विशेष्यदल एव निवेशः।

श्रीः। उक्तरीत्याकारणानन्तर्यस्य जन्यतावच्छेदककोटिप्रवेशमते न्यूनविषयकत्वस्यापि न जन्यतावच्छेदकत्वमित्यनुशयेनान्यूनानतिरिक्तपदं विहायेति मूलम्। *अव्याप्तिरिति* अनुमितिर्ज्ञानमित्यादिप्रतिज्ञायां लक्षणगमनात्। *प्रयोजनान्तरेति* लिङ्गविषयकत्वनिवेशात्पश्चादिति शेषः। पक्षतावच्छेदकनिवेशेऽपि लिङ्गविषयकोक्तोदाहरणेऽतिव्याप्तेर्मुख्यत्वनिवेशे तद्वैयर्थ्यात्। *एतदर्थम् एव* निगमनातिव्याप्तिवारणार्थमेव निगमने मतुबर्थसम्बन्धित्वेन पक्षभानमभिप्रेत्येदम्। उपनयातिव्याप्तेरेतद्विवक्षया दुर्वारतासूचनायैवकारः। *पक्षेति* इतरभेदाश्रयतेत्येव बोधः। आख्यातार्थाश्रयताया एव मुख्यविशेष्यत्वात्। न तु धर्मिणो निवेशः। उपनयसामान्ये त्वतिव्याप्तिर्भवत्येवेति भावः। पूर्वं निगमनेऽतिव्याप्तिर्नास्तीति वक्तुं प्रयोजनान्तराभावेऽपि एतद्वारणार्थमेव पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यत्वं देयमित्युक्तम्। इदानीं पक्षतावच्छेदकवैशिष्ट्यनिवेशस्य प्रयोजनान्तरं दर्शयन्नेव निगमनातिव्याप्तिर्नास्तीत्याह। *वस्तुत इति* एवञ्च निगमनविशेषेऽपि नातिव्याप्तिरिति

In Public domain. Digitization Muthulakshmi Research Academy


स्थले मात्रार्थाप्रसिद्ध्याऽव्याप्तिरिति पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यत्वानिरूपकत्वमेव विवक्षणीयम्। तथा च निगमनेऽननुषङ्गपक्षेऽतिव्याप्तिर्न सम्भवत्येवेत्यवधेयम्।

---

भावः। *पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यत्वानिरूपकत्वमेवेति* मुख्यत्वनिवेशफलं सुगमम्। अत्रेदं बोध्यम्। यत्र समवायसम्वन्धावच्छिन्नगोत्वाभावस्साध्यः कालिकसम्वन्धावच्छिन्नगोत्वाभावो हेतुस्तत्र यत्र गोत्वं तत्र गोत्वमित्युदाहरणेऽतिव्याप्तिः। तत्रत्यमुख्यविशेष्यताद्वयस्य पक्षतावच्छेदकीभूतगोत्वत्वानवच्छिन्नत्वासम्भवात्। ननु समवायावच्छिन्नगोत्वाभावस्य साध्यत्वे कालिकसम्वन्धावच्छिन्नगोत्वाभावो व्यभिचारीति व्यतिरेक्युदाहरणाभावात् क्वातिव्याप्तिः। न च कालिकसम्वन्धावच्छिन्न -गोत्वाभाव एव साध्यः समवायावच्छिन्नगोत्वाभावो हेतुस्तत्र न व्यभिचार इति वाच्यम्। तादृशसाध्यस्य केवलान्वयितया साध्यवद्भेदाप्रसिद्ध्या प्रतियोगिवैय्यधिकरण्यविशिष्टसाध्याभावघटितव्यतिरेकव्याप्त्यप्रसिद्धेः। तद्घटितसाध्याभावघटिततत्तद्व्याप्त्यप्रसिद्धेश्च। घटादेरपि कालिकसम्वन्धेन गोत्वमत्तया तत्र समवायेन तदसत्त्वात्। मैवम्। समवायतादात्म्यघटितसामानाधिकरण्यसम्वन्धेन गोत्वाभावस्य हेतुत्वात्। यद्वा शुद्धसमवायसम्वन्धावच्छिन्नगोत्वाभाव एकः गोत्वत्वविशिष्टगोत्वनिरूपितसमवायसम्वन्धावच्छिन्नगोत्वाभावोऽपरः। न च विशेषरूपेण संसर्गतास्वीकारापत्तिरिति वाच्यम्। विशिष्टवैशिष्ट्यबोधस्थलानुरोधेन तादृशविशिष्टसमवायस्य संसर्गतायास्सर्वैरुपगमात्। अथवा समवायावच्छिन्नाधारतासम्वन्धावच्छिन्नगोत्वाभावोऽपरस्तत्रैकस्य साध्यत्वेऽन्यस्य हेतुत्वं द्रष्टव्यम्। यद्वा गोभेदस्साध्यः समवायावच्छिन्नगोत्वाभावो हेतुस्तत्रोक्तोदाहरणेऽतिव्याप्तिः। यदि च गोत्ववद्भेदो नास्ति गुरुधर्मावच्छिन्नप्रतियोगिताकत्वात्। यद्रूपावच्छिन्नप्रतियोगिताकभेदस्साध्यः किञ्चद्रूपावच्छिन्नतद्रूपबोधकञ्च नोदाहरणमिति मन्यते तदा परममहद्भेदस्साध्यः परममहत्वाभावो हेतुः परममहत्वं पक्षः तत्र यत्र परममहत्त्वं तत्र परममहत्त्वमित्युदाहरणेऽतिव्याप्तिर्दुर्वारैव। परममहत्त्वत्वस्य जातित्वान्नगुरुधर्मावच्छिन्नभेदस्वीकारप्रसङ्गः। अत्र केचित्समादधति। मुख्यविशेष्यताद्वयशून्यत्वं तद्दलार्थ इति। तदपरे न क्षमन्ते। तथा सति निगमनोपेक्षानिर्वीजा स्यादिति। तदपरेन मृष्यन्ति। न हि विशेष्यताद्वयशून्यत्वं द्वित्वावच्छिन्नतदभावः। किन्तु एकविशेष्यताशून्यत्वे सत्यपरविशेष्यताशून्यत्वं एकविशेष्यता च पक्षनिष्ठैकमुख्यविशेष्यतावच्छेदकावच्छिन्नापरमुख्यविशेष्यताशून्यत्वे सति पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यताशून्यो यो बोधस्तज्जनकत्वं पर्यवसितार्थः। अत्र यत्र गोत्वं तत्र गोत्वमित्युदाहरणवारणाय सत्यन्तम्। यत्र सास्ना तत्र गोत्वमित्युदाहरणवारणाय विशेष्यम्। अत्र नियतसमूहालम्वनं नास्त्येवेति हृदयम्। तेनोदासीनप्रतिज्ञाविषयकज्ञानजन्यशाब्द-

वोधस्योदासीनवाक्यार्थविषयतानियतप्रतिज्ञार्थविषयताकत्वेऽपि न क्षतिः। इत्थञ्च निगमनजन्य-वोधस्य तादृशविशेष्यताशून्यत्वाभावान्निगमनोपेक्षा सम्भवतीति न किञ्चिदनुपपन्नमिति। अपरे तु समादधति। स्वान्यमुख्यविशेष्यत्वानिरूपकत्वसम्वन्धेन पक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वम्। स्वान्यमुख्यविशेष्यतानिरूपकत्वसम्वन्धेन स्वीयपक्षतावच्छेदकावच्छिन्नविशेष्यतावदन्यत्वं स्वीय-पक्षतावच्छेदकावच्छिन्नयत्किञ्चिद्विशेष्यताभिन्नमुख्यविशेष्यत्वानिरूपकत्वं वा तद्दलार्थः। अतो न तादृशोंऽदाहरणेऽतिप्रसङ्गः। असम्भववारणाय भेदप्रतियोगिविषयतायां स्वीयत्वनिवेशः। एवञ्च निगमनोपेक्षापीति। न च यत्किञ्चित्पक्षविशेष्यताभिन्नमुख्यविशेष्यतानिरूपकत्वाभावनिवेशेनैव विश्व-पक्षकेऽप्रसिद्धिवारणसम्भवे पक्षतावच्छेदकनिवेशनं नावश्यकमिति वाच्यम्। अखण्डाभावघटकत्वेन सार्थक्यादिति। अत्र केचित्। यत्किञ्चित्पक्षविशेष्यताभिन्नमुख्यविशेष्यत्वानिरूपकत्वमेव सम्यक्। न तु पक्षतावच्छेदकस्याप्यवश्य निवेशः प्रयोजनाभावात्। यत्र गोत्वं तत्र गोत्वं यत्र गोत्वं तत्र सास्नेत्यु-दाहरणादेस्तेनैव वारणात्। विश्वपक्षकस्थले प्रतिज्ञाजन्यवोधस्य यत्किञ्चिद्विशेष्यताभिन्नघटत्वा-वच्छिन्नमुख्यविशेष्यत्वमादाय तदनिरूपकत्वसत्त्वे नानुपपत्त्यभावात्। निगमनवारणाय तन्निवेशे त्वसन्दर्भ इति वस्तुतस्त्वित्यादिना भट्टाचार्याणां निगमनोपेक्षावीजवर्णनं सन्धर्भविरुद्धमेवेत्याहुः। तदपरे न मृष्यन्ति। यत्किञ्चित्पक्षविशेष्यताभिन्नमुख्यविशेष्यकत्वानिरूपकत्वस्य तद्दलार्थत्वे वह्निमत्प -र्वतकालीनः पर्वतो वह्निमानितिप्रतिज्ञायामव्याप्तिः। पक्षतावच्छेदकघटकीभूतपर्वतस्य विशिष्टपर्वता-भिन्नत्वेन पक्षतया तन्निष्ठविशेष्यतान्यमुख्यविशेष्यताकत्वाभावस्य तज्जन्यवोधेऽसत्त्वात्। न च भेद-प्रतियोगिविशेष्यतायामपि मुख्यत्वं निवेश्यत इति न दोष इति वाच्यम्। दलद्वये मुख्यत्वमपेक्ष्य तस्यां पक्षतावच्छेदकावच्छिन्नत्वनिवेश एव लाघवात्। अस्तु वा मुख्यविशेष्यताद्वयनिवेशः तथापि स्वस्य स्वधर्मितावच्छेदकत्ववारणाय धर्मितावच्छेदकप्रकारतानिरूपितविशेष्यत्वान्तरमावश्यकं तथा च असम्भवः। पर्वतो वह्निमानिति बोधस्यापि विशेष्यताद्वयशालित्वात्। अतः पक्षतावच्छेदक-निवेशनमावश्यकम्। न च पक्षतावच्छेदकानवच्छिन्नविशेष्यतामादाय स एव दोष इति वाच्यम्। पक्षतावच्छेदकावच्छिन्नयत्किञ्चिद्विशेष्यताभिन्नकिञ्चिद्धर्मावच्छिन्नमुख्यविशेष्यत्वानिरूपकत्वस्यैव विव -क्षणीयतया अनुपपत्त्यभावात्। पक्षतावच्छेदकानिवेशे चासम्भवतादवस्थ्यादिति। धर्मितावच्छेदका-वच्छिन्नविशेष्यतातो धर्मितावच्छेदकप्रकारतानिरूपितविशेष्यताया अन्यत्वे विधेयकोटिप्रविष्टपदार्थीय -प्रकारता चेत्याद्यग्रिमभट्टाचार्यलेख एव प्रमाणमिति दिगिति। अन्ये तु समादधति। स्वनिरूपकत्व-स्वभिन्नपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नमुख्यविशेष्यतानिरूपकत्वोभयासम्बन्धेन पक्षता-वच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नमुख्यविशेष्यतावदन्यत्वमपि बोधविशेषणं देयम्। प्रतिज्ञा-

In Public domain. Digitization Muthulakshmi Research Academy



सामान्यसङ्ग्रहाय स्वनिरूपकत्वेति। धूमादालोकवान् पर्वतो वह्निमानित्यादावालोकप्रकारतानिरूपित-पर्वतत्वावच्छिन्नविशेष्यतां स्वपदेनोपादायाव्याप्तिरिति भेदप्रतियोगितावच्छेदककोटौ पर्याप्तिनिवेशः। तत्रैव विशिष्टपर्वतत्वावच्छिन्नविशेष्यतां स्वपदेनोपादाय तदन्यालोकप्रकारतानिरूपितकेवलपर्वतत्वा-वच्छिन्नविशेष्यतासत्त्वे नाव्याप्तिरितिद्वितीयसम्बन्धे पर्याप्तिनिवेशः। न च प्रमेयगोत्वत्वेन पक्षतायां पूर्ववद्धेत्वभावस्य साध्यताहेतुता च तत्र व्यतिरेक्युदाहरणे उभयसम्बन्धेन पक्षतावच्छेदकपर्याप्त्यधि-करणधर्मावच्छिन्नमुख्यविशेष्यतावदन्यत्वसत्त्वादतिव्याप्तिरिति वाच्यम्। भट्टाचार्योक्तपक्षतावच्छेदका-नवच्छिन्नेत्यादिदलस्य पक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविशेष्यत्वानवच्छिन्नताद्दशधर्मा-नवच्छिन्नविशेष्यत्वानिरूपकत्वमर्थः। एवञ्च निरुक्तोदाहरणजन्यबोधस्य पक्षतावच्छेदकैकदेशगोत्व-त्वावच्छिन्नविशेष्यताशालित्वेऽपि नातिव्याप्तिः। धूमादालोकवान्पर्वतो वह्निमानित्यादौ केवलपर्वतत्वा-वच्छिन्नविशेष्यतामादायाव्याप्तिरतः प्राथमिकानवच्छिन्नान्तनिवेशः। प्रकृतपक्षतावच्छेदकावच्छिन्न-विशेष्यतामादायासम्भवोऽतो द्वितीयानवच्छिन्नान्तनिवेशः। तत्र च प्रमेयगोत्वपक्षकव्यतिरेक्युदाहरण-वारणाय पर्याप्तिनिवेश इति। परन्तु सम्बन्धित्वावच्छिन्नपक्षकवह्निसाध्यकनिगमनवारणं लिङ्ग-विषयकत्वं विनाऽशक्यमेवेति बोध्यम्। अत्र विधेयकोटावधिकावगाहिशाब्दबोधानुपगमपक्षमुपगम्य सम्बन्धी वह्निमानिति प्रतिज्ञानुपगमसम्भवान्मतुपो निरर्थकत्वमते उपनयार्थनिगमनार्थयोर्द्वयोरेव बोधा-दननुषङ्गपक्षीय निगमनोपेक्षाबीजसङ्गतिरिति बोध्यम्। परे तु समादधति। पक्षतावच्छेदक-पर्याप्तावच्छेदकताकान्यमुख्यविशेष्यत्वानिरूपकत्वमेव तद्दलार्थः। यत्र गोत्वं तत्र गोत्वमित्यादौ व्यापकत्वभानस्वीकाराद्गोत्वव्यापकत्वविशिष्टगोत्वस्यैव विशेष्यतया तस्याः पक्षतावच्छेदकपर्याप्ताव-च्छेदकत्वाभावेनैव तद्व्युदास इति। यत्तु। एवं सति पक्षतावच्छेदकपर्याप्तावच्छेदकताकमुख्यविशेष्यता-कत्वनिवेशेनैव यत्र गोत्वं तत्र सास्नेत्याद्युदाहरणवारणसम्भवात्पक्षतावच्छेदकानवच्छिन्नमुख्य-विशेष्यत्वानिरूपकत्वपर्यन्तविवक्षावैयर्थ्यादिति। तन्न। यत्र गोत्वं तत्र गोत्वमित्यादौ तथाविधगोत्व-विशेष्यत्वान्तरमादायातिव्याप्तेः। गोत्वाभाववान् सास्नाभाववानित्यादौ यत्र गोत्वं तत्र सास्नेत्यादौ सास्नात्वव्यापकत्वाभावेऽपि गोत्वे सास्नाव्यापकत्वालाभेन अतिव्याप्तेश्चेति तत्र आलोकवान् पर्वतो वह्निमानित्यादावुक्तरीत्याऽव्याप्तेः। इदन्तु समाधानं भविष्यति। पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्य-त्वानिरूपकत्वदलस्य पक्षतावच्छेदकनिष्ठस्वीय यत्किञ्चिदवच्छेदकत्वाप्रयोजकप्रयोज्यमुख्यविशेष्य-त्वानिरूपकत्वमर्थः। यत्र गोत्वं तत्र गोत्वमित्युदाहरणे तत्पदसमभिव्याहृतगोत्वपदं यत्पदसमभि-व्याहृतगोत्वपदादिकं भिन्नभिन्नमेव भिन्नभिन्नगोत्वत्वनिष्ठावच्छेदकतानिरूपकविशेष्यताप्रयोजनकमिति नातिव्याप्तिः। विशिष्यपक्षतावच्छेदकनिष्ठावच्छेदकताप्रयोजकतायाः गोत्वपदयोः सत्त्वादतिव्याप्तिः

In Public domain. Digitization Muthulakshmi Research Academy


लिङ्गत्वस्य केवलान्वयितया सामान्यतो लिङ्गाविषयकत्वं ज्ञानेऽप्रसिद्धमिति प्रकृत-लिङ्गाविषयकत्वं विवक्षणीयम्, तथापि न निस्तार इत्याशयेनाह। **यद्यपि प्रकृतेति** लिङ्गतावच्छेदकावच्छिन्नाविषयत्वविवक्षणे पृथिवीतरेभ्यो भिद्यत इत्यादिप्रतिज्ञायाः नासङ्ग्रहः तज्जन्यवोधे स्वरूपत एव पृथिवीत्वादिरूपलिङ्गभानादित्याशयेन स्थलान्तरे दोषमाह। **गन्धवतीति** **तथेति** **तथा** इतरेभ्यो भिद्यते। **उपनयासम्भव इति** तथा च तादृशप्रतिज्ञादिघटितन्याय एव न सम्भवतीति काव्याप्तिशङ्केति भावः। **इदमा** इदं शब्देन **गन्धवत्वेनेति** उपनयस्थेदं शब्दस्य प्रतिज्ञोपदर्शितपक्षतावच्छेदकावच्छिन्न-परत्वादिति भावः। **गन्धवत्वान्वयेति।** गन्धवदभेदान्वयस्येत्यर्थः। **अयोगात् इति** उद्देश्यत्वविधेयत्वावच्छेदकयोरैक्ये अभेदान्वयवोधस्याव्युत्पन्नत्वात् अन्यथा घटो घट इत्यादावप्यन्वयवोधप्रसङ्गादिति भावः। **साध्याभावेति** साध्याभावव्यापको यो गन्धाभावः तदभावत्वेनेत्यर्थः। तथा च भिन्नरूपेण गन्धादेरुद्देश्यत्व विधेयत्वावच्छेदक-गर्भेऽन्तर्भावान्नान्वयवोधानुपपत्तिरिति भावः।

ननु हेत्वभावाभावत्वेन हेतूपस्थापकपदाभावात्कथमुपनयवाक्यात्तेन रूपेण पक्षे हेतु-भानमत आह। **अत एवेति।** साध्याभावव्यापकतावच्छेदकहेत्वभावत्वाद्यवच्छिन्ना-भावत्वेन हेत्वन्वयवोधादेवेत्यर्थः। **न च नेयं पृथिवीति** नञ्द्वयेनाभावाभावत्वेन हेतु-वोधनादिति भावः। यद्यपि पृथिवीत्वहेतुकस्थले तादृशोपनयप्रयोगो न युज्यते, पृथिवी-पदात्स्वरूपत एवोपस्थितस्य पृथिवीत्वरूपपदार्थतावच्छेदकस्य नञर्थाभावे अन्वयासम्भवेन

---

इति यत्किञ्चिदिति। तच्च प्रयोजकताविशेषणं तेन यत्र गोत्वं तत्र गोत्वमित्यादौ विशेष्यताद्यैक्येऽपि प्रयोजकताभेदान्न क्षतिरिति। मतुपस्सार्थक्यस्य व्यवस्थापनादाह। *गन्धवदभेदेति* *गन्धाभाव इति* साध्याभावव्यापकीभूतो यो हेतुतावच्छेदकावच्छिन्नाभावसत्प्रतियोगित्वं व्याप्तिः। अन्यथा धूमवान्वह्नेरित्यादौ धूमाभावव्यापको यो वह्निधूमोभयाभावस्तत्प्रतियोगित्वादतिव्याप्तेः। व्यापकत्वस्य उपनयवाक्यार्थाघटकत्वलाभाय व्यापकतावच्छेदकेति। *तादृशेति* न च नेयं पृथिवीत्याकारकेति अर्थः। *स्वरूपत एवेति* एतेनान्वयितावच्छेदकरूपेणानुपस्थितेस्तस्याभावांशेऽनुयोगिना संशोन्धेन नान्वय इति सूचितम्। *पदार्थतावच्छेदकस्येति* एतेनैकत्रान्वितस्यापरत्रान्वयो न सम्भवतीति सूचितम्। नन्वेवमपि यत्र नेतरभेदस्तत्र न पृथिवीत्वमित्युदाहरणे न पृथिवीत्वाभावे साध्याभाव-

In Public domain. Digitization Muthulakshmi Research Academy

हेत्वभावाभावत्वेन हेत्वलाभात्। न च हेतुमद्भेदाभावोऽपि हेतुरेवान्योन्याभावाभावस्य प्रतियोगितावच्छेदकरूपत्वात्। एवञ्च हेतुमद्भेद एव साध्याभावव्यापकता यत्र नेतरभेदस्तन्न पृथिवीत्युदाहरणेन वोध्या इति पृथिवीभेदाभावत्वेन पृथिवीत्ववोधकस्तादृशोपनयो युज्यत एवेति वाच्यम्। एवमपि पृथिवीत्वादिहेतुवाक्योपस्थितपृथिवीत्वत्वविशिष्टहेतुकानुमित्यौपयिक-तद्रूपविशिष्टवद्भेदत्वावच्छिन्ने साध्याभावव्यापकताया एवाकाङ्क्षिततया तस्या एव यत्रेतरभेदाभावस्तन्न पृथिवीत्युदाहरणेनोपदर्शनीयतया तद्रूपविशिष्टवद्भेदत्वावच्छिन्नाभावत्वेन हेतुमत्ताया एवोपनेयत्वात्तादृशोपनयासङ्गतेः अन्यथा पृथिवीतरेभ्यो भिद्यते गन्धसमवायिकारणतावच्छेदकरूपवत्वादित्यादावपि तथोपनयप्रयोगापत्तेरिति। तथापि तादात्म्येन पृथिवीहेतुकस्थलाभिप्रायेणेदम्। आदिपदान्न च नेयं गन्धवतीत्याकारकस्य न च नात्र गन्ध इत्याकारकस्योपनयस्य परिग्रहः। अत्र हेत्वभावादौ साध्याभावव्यापकत्वाभानेऽपि न क्षतिः। प्रचीनमते उदाहरणादेव व्याप्तिलाभेन पक्षधर्मतामात्रस्य उपनेयत्वादत एव प्राचामित्युक्तम्। साध्याभावव्यापकेत्यादौ च व्यापकान्तमुपलक्षणार्थकम्।

---

व्यापकतावोधात्तत्र तादृशोपनयासङ्गतिर्दुर्वारैवेत्याशङ्क्यान्यादृशोदाहरणस्थले तं सङ्गमयति। *एवमिति* यत्र नेतरभेदस्तन्नपृथिवीत्युदाहरणस्य निराकाङ्क्षत्वादन्यादृशसाकाङ्क्षोदाहरणे तदसङ्गतिमाह। *एवमपीति* *आकाङ्क्षिततयेति* तद्रूपावच्छिन्नहेतुकानुमितौ तद्रूपावच्छिन्नत्वविशेषिततदवच्छिन्नवद्भेदे साध्याभावव्यापकताविषयकपरामर्शस्यैव जनकत्वादिति भावः। *तादृशोपनयेति* पृथिवीत्वत्वानुपस्थापकोपनयेत्यर्थः। *अन्यथा* येन रूपेण यस्य हेतुवाक्याद्धेतूपस्थितिस्तद्रूपावच्छिन्नत्वाविशेषिततदवच्छिन्नभेदे साध्याभावव्यापकताया एवाकाङ्क्षितत्वोपगमे यत्र नेतरभेदस्तन्नपृथिवीति उदाहरण द्वारेति शेषः। *तादात्म्येनेति* न च पृथिव्या एव हेतुत्वेऽपि पृथिवीभेदाभावस्य प्रतियोगिता-वच्छेदकपृथिवीत्वरूपतया कथं पृथिवीभेदाभावत्वेन पृथिवीभानमिति वाच्यम्। भेदाभावस्य प्रतियोगितावच्छेदकरूपत्ववत्प्रतियोगिरूपत्वस्यापि स्वीकारात्। अत एव मधुरानाथेनापि अन्योऽन्या-भावाभावस्य प्रतियोगिरूपत्वं स्वीक्रियत इति नापसिद्धान्तः। गन्धवद्धेतुकोपनयं प्रदर्श्य गन्धहेतुकं तमाह। *न च नात्रेति* नन्वेवमपि न च नेयं पृथिवीत्युपनयोऽसङ्गतः। साध्याभावव्यापकतायाः वोधकशब्दाभावेनाभानादित्यत आह। *अत्रेति* *प्राचीनेति* यथान्वय्युपनेयं पक्षधर्मतामात्रं तथाव्यतिरेक्युपनेयमपि तदेवेति भावः। नव्यमते च व्याप्यः पक्षे वर्तते न वेति आकाङ्क्षानुरोधेन व्याप्तिविशिष्टवैशिष्ट्यबोधक एवोपनयः। इदन्तु बोध्यम्। स्वतन्त्रहेत्वभावधर्मिकसाध्याभावव्यापकताग्रह-

In Public domain. Digitization Muthulakshmi Research Academy

ननु न च नेयं पृथिवीत्यादिकः प्राचीनानुमतोपनयोऽसङ्गतः। नञर्थाभावस्य प्रतियोग्यनुयोग्युपरागेणैव शाब्दानुभवे भानादन्योन्याभावबोधे समानविभक्तिकप्रतियोग्यनुयोगिवाचकपदसमभिव्याहारस्य, संसर्गाभावबोधे च सप्तम्यन्तानुयोगिवाचकपदसमभिव्याहारस्यापेक्षितत्वात्। प्रकृते चानुयोगिवाचपदाभावेन पृथिवीभेदगन्धाभावादिबोधासम्भवादिति नवीनानुमत इतरत्वव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती तादृशगन्धवतीचेयमित्याद्याकारकोपनय एवादरणीयः। तत्र हेतोः पक्षतावच्छेदकत्वे दर्शितव्युत्पत्तिविरोधो दुष्परिहार एवेत्यालोच्य नव्यमते समाधानमाह। ✻✻यदि चेति✻✻ उच्यत इत्यग्रिमेणान्वयः। ✻✻तद्विशिष्ट इति✻✻ तद्धर्मं धर्मितावच्छेदकीकृत्य इतराविशेषिततद्धर्मावच्छिन्नाभेदान्वयबोधस्यैव[29] व्युत्पत्तिविरुद्धत्वादित्यर्थः। ✻✻नानुपपत्तीति✻✻ प्रकृते उद्देश्यतावच्छेदकाद्यघटकव्याप्तेर्विधेयतावच्छेदकघटकतया भानादिति भावः। तथा च गन्धवतीतरेभ्यो भिद्यते गन्धादित्यादिन्यायस्यापि निष्प्रत्यूहतया लिङ्गविषयकतादृशन्यायान्तर्गतप्रतिज्ञायामव्याप्तिर्दुर्वारैवेति भावः।

---

विशिष्टतदभाववत्ताग्रहद्वयसाधारणकारणतायाव्यवस्थापनाद्धेत्वभावाभावः पक्षे वर्तते न वेति आकाङ्क्षयैव नवीनानां दर्शितोपनयः सुवच इति। ननु दीधितौ साध्याभावव्यापकेत्यसङ्गतमत आह।। ✻साध्याभावेति✻ ✻उपलक्षणार्थकमिति✻ प्रतियोगितावच्छेदककोट्यप्रविष्टमुदाहरणार्थमात्रमित्यर्थः। ✻नञर्थेति✻ न च नेयं पृथिवीत्वादित्यादौ न च पृथिवीनेयमिति योजना तत्र न च पृथिवीत्यत्र न पृथिवीभेदोऽर्थः प्रथमान्तानुयोगिवाचकपदाभावात्। नेयमिति नञर्थो नात्यन्ताभावः। सप्तम्यन्तानुयोगिवाचकपदाभावादित्यर्थः। इदन्तु बोध्यम्। न च नेयं पृथिवीत्यादावन्वयबोधनिराकरणमसङ्गतम्। प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमाविति व्युत्पत्तेः। इयं न पृथिवीति प्रतियोग्यन्वयसत्त्वादभावान्वयरूपत्वाच्च अतो नञर्थान्तरविशेषणतानापन्नान्योऽन्याभावबोधे नञर्थान्तरविशेष्यतानापन्नसंसर्गाभावबोधे चोक्तव्युत्पत्ती।अन्योऽन्याभावात्यन्ताभावबोधे चान्योऽन्याभावप्रतियोगिवाचकपदतदत्यन्ताभावानुयोगिवाचकपदयोः समानविभक्तिकत्वम्। अत्यन्ताभावात्यन्ताभावबोधे चात्यन्ताभावप्रतियोगिवाचकस्य प्रथमान्तत्वं तदत्यन्ताभावानुयोगिवाचकस्य सप्तम्यन्तत्वञ्चावश्यकं तेन न च नेयं पृथिवी न च नात्र गन्ध इत्युभयोर्न कोऽपि व्युत्पत्तिभङ्गः। अन्यथा बहुतरनञ्द्वयप्रयोगव्यापकोपपत्तेरिति दिक्। ✻दर्शितव्युत्पत्तिः✻ उद्देश्यतावच्छेदकविधेययोरैक्येन शाब्दबोध इति व्युत्पत्तिः।

---

29. तद्धर्मावच्छिन्नभेदान्वयबोधस्यैवेति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

ननु पक्षाविशेषणतया यल्लिङ्गविषयकत्वं तच्छून्यत्वं विवक्षणीयमतो नोक्ताव्याप्तिरुक्त-स्थले पक्षविशेषणतयैव लिङ्गविषयतासत्वेन विशिष्टाभावसत्वादित्यत आह। **पक्षविशेषण-त्वेनेति** **अयं वह्निसामग्रीमान्वह्नेरित्यादाविति।** अव्यापकमित्यग्रिमेणान्वयः। अथ पक्षाविशेषणत्वं पक्षनिरूपितविशेषणताभिन्नत्वं तस्य लिङ्गविषयताविशेषणत्वे चायं वह्नि-सामग्रीमान्वह्नेरित्यादावव्याप्त्याशङ्कानवकाशः। तत्रापि पक्षविशेषणतापन्नसाध्यनिरूपित-विशेषणतात्मकलिङ्गविषयतायाः परम्परया पक्षनिरूपितत्वात्। गन्धवती पृथिवीतरेभ्यो भिद्यत इत्यादावपि मत्वर्थसम्बन्धांशे विशेषणीभूतगन्धविषयतायाः गन्धसमानकालीन-रूपवतीपृथिवी इतरेभ्यो भिद्यत इत्यादौ तद्विषयतायाः साक्षात्पक्षनिरूपितविशेषणत्वानात्म-कत्वेन साक्षात्परम्परासाधारणनिरूपितत्वस्यैव निवेशनीयत्वादिति चेन्न। पक्षाविशेषणत्वं यद्युक्तार्थकं तदा निगमनातिव्याप्तेः। न च निगमने अयं पदाननुषङ्गपक्षे उक्तयुक्त्या पक्षतावच्छेदकानवच्छिन्न[30]मुख्यविशेष्यताकान्यत्वपर्यन्तस्य एतदनुरोधेनैव वा पक्षतावच्छेद-कावच्छिन्नमुख्यविशेष्यकत्वस्य विषयकान्तार्थस्य विवक्षणीयतया नातिव्याप्तिरिति वाच्यम्।

---

*पक्षनिरूपितेत्यादि* यत्साक्षात्परम्परासाधारणपक्षविषयतानिरूपितत्ववद्विशेषणत्वं तद्भिन्नं यल्लिङ्ग-विषयत्वं तच्छून्यत्वमर्थः। मतुपो निरर्थकत्वपक्षेऽप्याह। *गन्धसमानेति* *तदा निगमनेति* अननुषङ्गपक्षेऽपि सम्बन्धित्वेन पक्षभानात्। उपनयनिगमनयोरेकवाक्यतयैव बोधाच्च।

अथात्र किमुपनयोपेक्षाबीजम्। नहि व्यापकत्वनिरूपकतया हेतुविषयकत्वं तस्यापि परम्परया पक्षविशेषणत्वात्। यदि निरूपितनिरूपितमात्रसाधारणमेव पक्षनिरूपितत्वं नत्वधिक-परम्परासाधारणमपि निवेश्यत इत्युच्यते। तदा निगमने विशिष्टहेतुसम्बन्धभाने वैशिष्ट्यघटक-व्यापकत्वनिरूपकतया पक्षाविशेषणलिङ्गविषयतासत्त्वेनातिव्याप्त्यसङ्गतेः। तादृशलिङ्गविषयताया व्यापकताघटकाधिकरणात्मकपक्षनिरूपितत्वात्तत्र तत्सङ्गतिरित्युक्तौ चोपनयोपेक्षादुर्घटा, एवमुक्तार्थक-पक्षतावच्छेदकावच्छिन्ना विशेषणत्वरूपपक्षाविशेषणत्वोक्तावपि अधिकानधिकपरम्परानिरूपितत्व-योरेकतरनिवेशेऽनुषङ्गपक्षे निगमनसङ्ग्रहः। उपनयपरिहारश्च न सम्भवति। वस्तुतस्तु गन्धव्यापक-सत्तासमानकालीनरूपवतीतरेभ्यो भिद्यते गन्धादित्यादिप्रतिज्ञासङ्ग्रहायातिपरम्परासाधारणनिरूपि-तत्वप्रवेशे तदुपेक्षादुर्घटैव एतेनान्वयव्याप्तिघटकहेतुसामानाधिकरण्यघटकहेतुविषयता तथाविध-विषयताभिन्नेत्युपनयोपेक्षेत्यपास्तमिति मैवम्। अतिव्यापकञ्चोपनयस्येति यथाश्रुतग्रन्थालोचनमेवेति।

---

30. पक्षतावच्छेदकावच्छिन्नेति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

एवमप्यनुषङ्गपक्षे तत्रातिव्याप्तेदुर्वारत्वात्। अतः पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारतान्यत्वमेव तदर्थो वाच्यः। पक्षतावच्छेदकप्रकारतान्तःपातिनी सर्वैव प्रकारता तादृशविशेष्यतानिरूपिता। इयास्तु विशेषः। क्वचित्साक्षात्क्वचित्परम्परया तथेति विधेयकोटि-प्रविष्टपदार्थप्रकारता च न धर्मितावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपिता। विधेयनिरूपितविशेष्यताया धर्मितावच्छेदकावच्छिन्नतया धर्मितावच्छेदकप्रकारतानिरूपितविशेष्यतायाश्च स्वस्य स्वधर्मितानवच्छेदकत्वेन तदनवच्छिन्नतया विधेयधर्मितावच्छेदकप्रकारतानिरूपकविशेष्यतयोर्भेदादिति निगमनादिजन्यबोधीय विधेयकोटिप्रविष्टलिङ्गविषयता न पक्षता-वच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितविशेषणतात्मिकेति न निगमनाद्यतिव्याप्तिः। एवञ्च वह्निसामग्रीमान्वह्नेरित्यादावव्याप्तिः प्रसज्यत एवेति। एतेन पर्वतो वह्निमान्धूमादित्यादिप्रसिद्धन्यायन्तर्गतोपनयेऽतिव्याप्तिप्रसञ्जकत्वेन नैतद्विवक्षणं शङ्कापथमारोहति। न चायं देषोऽतिव्यापकञ्चोपनयस्येत्यनेन स्वयमेव वक्ष्यत इति नानुपपत्तिरिति वाच्यम्। उपनयवारणार्थकतयैव लिङ्गविषयकत्वविशेषणस्य स्वयं प्राग्व्याख्याततया उपनयमात्र एव यादृशविवक्षायामतिव्याप्तिस्तादृशविवक्षायां सन्दर्भविरोधस्य जागरूकत्वादित्यपि समाहितं न चैवम्

---

*पक्षतावच्छेदकेति* पक्षतावच्छेदकविषयताद्विविधा विधेयधर्मितावच्छेदकतात्मिका तदन्या च। तत्र प्रकारतावच्छेदकताऽन्यैव अन्यथा निगमनातिव्याप्तेः। विधेयप्रकारतायाः पक्षतावच्छेदकनिष्ठावच्छेदकतारूपप्रकारतानिरूपकविशेष्यतानिरूपकविशेष्यतानिरूपितत्वात्। अत्र तदन्यलिङ्गविषयतावच्छेदकतान्यानिवेश्या अन्यथाऽवच्छेदकतामादाय प्रतिज्ञायामव्याप्तेः। तथा च पक्षतावच्छेदकनिष्ठप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारतान्यधर्मितावच्छेदकताभिन्नलिङ्गविषयताशून्यत्वं पर्यवसितार्थः। एवञ्च विशेष्यतावच्छेदकतावच्छेदकगन्धत्वादावपि विषयताद्वयमिति लिङ्गपदोपादानन्तु विधेय-प्रकारतामादायासम्भववारणाय विधेयप्रकारतायाञ्च न परम्परानिरूपितत्वमपीत्याह। *विधेयेति* *न धर्मितेति* किन्तु धर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितैवेति शेषः। *स्वस्येति* न च धर्मितावच्छेदकताप्रकारतावच्छेदकतयोरैक्येऽपि न क्षतिः तदवच्छिन्नविशेष्यतात्वेन तन्निष्ठप्रकारतानिरूपितत्वानुपगमेनादोषादिति वाच्यम। गौरवापत्तेः। पक्षविशेषणत्वं यथाश्रुतमित्यभिमानेन केषाञ्चि-दूषणमुद्धरति। *एतेनेति* एतेन निरवच्छिन्नविशेष्यतां व्यवस्थाप्यपक्षविशेषणत्वस्य निरुक्तार्थकत्वस्वीकारेणेत्यर्थः। *समाहितमिति* उक्तरीत्याप्रसिद्धोपनयवारणात्। ननु तादृशविशेष्यतास्वीकारेऽतिव्यापकं चेत्युपनयातिव्याप्तिप्रदर्शकदीधित्यसङ्गतिरित्याशङ्कते। *न चैवमिति* *पक्षता-

In Public domain. Digitization Muthulakshmi Research Academy


अतिव्यापकञ्चोपनयस्येति ग्रन्थासङ्गतिः। तादृशग्रन्थस्य धूमवान्वह्निमान् धूमादित्यादि-न्यायान्तर्गतोपनयविशेषपरत्वात्। तत्र हेतोरेव पक्षतावच्छेदकतया पक्षतावच्छेदकावच्छिन्नांशे यद्विशेषणत्वं तस्यापि पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितत्वात्। एवं व्यापकत्वनिरूपकतया हेतुविषयताया अपि स्वात्मकपक्षतावच्छेदकप्रकारतानिरूपकाधिकरणनिष्ठविशेष्यतानिरूपितप्रकारतात्मकतया अतिव्याप्तिसङ्गतेः। यत्तु पक्षतावच्छेदकहेतुकव्यतिरेक्युपनयपर्यन्तपरतया तादृशग्रन्थसङ्गमनमप्यन्वय्युपनयजन्यवोधे व्याप्तिघटकतया लिङ्गविषयत्वसत्वेनातिव्याप्तिर्न सम्भवतीत्यभिमानेन केषाञ्चिन्मतम्। तदेतेन न श्रद्धेयम्। ****पक्षाविशेषणत्वेन साध्याविशेषणत्वेन चेति**** पक्षतावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपितप्रकारताभिन्नत्वे सति साध्यतावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपितप्रकारताभिन्नं यल्लिङ्गविषयत्वं तच्छून्यत्वमित्यर्थः। साध्याविशेषणतयेत्यस्य यथाश्रुतार्थकत्वे निगमने

---

**वच्छेदकेति*** विधेयतात्मकेत्यादिः। तथा च विधेयभूतधूमस्य पक्षतावच्छेदकतयापक्षतावच्छेदकनिष्ठप्रकारतेत्यनेन धूमनिष्ठविधेयतायाग्रहणसम्भवादिति भावः। एतेन स्वस्य स्वधर्मितावच्छेदकतावारकप्रकारताश्रयणेऽपि न क्षतिः। एवमुपनयार्थघटकव्यापकताघटकसामानाधिकरण्यघटकधूमप्रकारतायाः पक्षतावच्छेदकनिष्ठप्रकारताशब्देनोपादानमाह। ***एवमिति*** अत्र विधेयतान्यत्वम्। पक्षतावच्छेदकनिष्ठप्रकारतायां विशेषणं तेन विधेयतान्यपक्षतावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपकप्रकारतान्यत्वस्य विधेयतायां सत्त्वान्नातिव्याप्तिरिति न शङ्क्यम्। भट्टाचार्याणां मते प्रकारताविधेयतयोर्नाभेदः। किन्तु साहचर्यमात्रमित्यस्य पक्षताग्रन्थे व्यक्तत्वात्। विधेयनिष्ठप्रकारताया अपि विधेयत्वान्यत्वात्। (न च तादृशप्रकारतान्यत्वं विधेयतायामव्याहतमिति वाच्यम्। विधेयताप्रकारतयो -रेकविशेष्यतानिरूपिततया तादृशविशेष्यतानिरूपकविषयतान्यत्वस्यासत्त्वादन्यतराभावप्रतियोगकोटौ प्रकारत्वनिवेशात्। वस्तुतस्तु धर्मितावच्छेदकताभेदनिवेशात्पक्षतावच्छेदकप्रकारतानिरूपितसंसर्गनिरूपकत्वान्येऽतिव्याप्तिर्दुर्वारैवेति) ***व्यतिरेक्युपनयेति*** गन्धवतीतरेभ्यो भिद्यते गन्धादित्यादावितरत्वव्यापकीभूताभावप्रतियोगिगन्धवतीयमिति वह्न्यभाववान् धूमाभाववान् वह्न्यभावादित्यादौ धूम -व्यापकवह्न्यभाववानयमित्याद्युपनयेत्यर्थः। एतेन एवमप्यादिना हेतोरन्वय व्याप्तिघटकत्वेऽपि तस्य पक्षाविशेषणतां निराकृत्यान्वय्युपनयातिव्याप्तिसम्भवेन तथा च व्यतिरेक्युपनयपर्यन्तानुसरणवैयर्थ्यमश्रद्धावीजं बोध्यम्। यत्तु किं तावत्पक्षाविशेषणत्वेन लिङ्गाविषयत्वं न तावत्पक्षविशेषणतान्यलिङ्गविषयत्वाभावः गन्धवतीतरेभ्यो भिद्यत इत्यादौ प्रतिज्ञायां पक्षविशेषणतान्यत्वस्य गन्धत्वांशे

In Public domain. Digitization Muthulakshmi Research Academy

विशेष्यत्वरूपलिङ्गविषयत्वस्य सत्त्वेनाव्याप्तितादवस्थ्यात्। प्रकारताविशेष्यत्वयोरेव मिथो निरूप्य-निरूपकभावो न तु विशेष्यत्वयोरिति पक्षनिष्ठविषयत्वानिरूपितलिङ्गविषयत्वाभावस्यापि वक्तुम-शक्यत्वात्। नापि पक्षविशेषणतातिरिक्तं यद्धेतुतावच्छेदकधर्मावच्छिन्नविषयत्वं तदभावोऽर्थः। उक्त-प्रतिज्ञायां गन्धत्वांशविशेष्यत्वस्य गन्धत्वानवच्छिन्नत्वान्नाव्याप्तिरिति न शङ्क्यम्। सुरभिगन्धवती इतरेभ्यो भिद्यते गन्धादित्यादौ प्रतिज्ञायामव्याप्तेः। सौरभांशे गन्धत्वावच्छिन्नविशेष्यत्वसत्त्वात्। प्रकृतपक्षविषयत्वाव्यापकलिङ्गविषयत्वाभावोर्थ इत्यपि न। प्रमेयत्वनिष्ठहेतुत्वं प्रमेयं प्रमेयादित्यादौ हेतावतिव्याप्तेः हेतुजन्यबोधीय सलिङ्गविषयत्वस्य पक्षविषयत्वाव्यापकत्वाभावात्। ज्ञानभेदेन विषयता -भेदविरहात्। एवं दधिद्रव्यमित्यादिप्रतिज्ञायामव्याप्त्यभिधानासङ्गतिश्च। पक्षविषयत्वाव्यापकत्वे सति साध्यविषयत्वाव्यापकं यल्लिङ्गविषयत्वं तदभावसत्त्वात्। पक्षतावच्छेदकावच्छिन्नविषयतावच्छेदकता-भिन्नं यत्साध्यतावच्छेदकावच्छिन्नविषयतावच्छेदकताभिन्नं यल्लिङ्गविषयत्वं तदभाव इत्यपि न सत्। अतिव्यापकञ्चोपनयस्येति ग्रन्थासङ्गत्यापत्तेरिति प्रकाशिकाकारेण महताप्रवन्धेनाभ्यधायि। तदप्येतेन परास्तम्। न च तथापि प्रमेयत्वनिष्ठहेतुत्वं वाच्यं प्रमेयत्वादित्यादौ हेतावतिव्याप्तिर्दुर्वारैवेति वाच्यम्। हेतुवाक्यजन्यबोधे हेतुप्रकारताया हेतुत्वत्वावच्छिन्नविशेष्यताया एव निरूपितत्वं न तु हेतुत्वत्व-प्रकारतानिरूपितविशेष्यताया इति सामञ्जस्यात्। न च प्रमेयवद्वाच्यं प्रमेयादित्यादौ हेतावतिव्याप्तिः। प्रमेयविषयतायाः पक्षतावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपितप्रकारतान्यत्वाभावादिति वाच्यम्। प्रकृतपक्षविशेष्यकत्वदलेन तद्वारणादिति। अथात्र गन्धवतीतरेभ्यो भिद्यत इत्यादिप्रतिज्ञा-सुगन्धत्वनिरूपितविशेष्यतायाः प्रकारत्वानन्यत्वमते तदन्यत्वमुक्तं तथा च गन्धवतीतरेभ्यो भित्यत इत्यादौ प्रकारताविशेष्यतयोर्भिन्नत्वमते तथाविधलिङ्गविशेष्यतामादायाव्याप्तिः। तदनवच्छिन्नत्वनिवेशे च तथाविधगन्धप्रकारतायाः प्रकारतानवच्छिन्नत्वादव्याप्तिः। वस्तुतो दण्डिपुरुषवद्भूतलमितरेभ्यो भिद्यत इत्यादावव्याप्तिः। पुरुषत्वावच्छिन्नविषयतायाः पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यता-निरूपितप्रकारतान्यत्वात्। अत एव तादृशप्रकारतान्यलिङ्गतावच्छेदकावच्छिन्नविषयत्वविवक्षणेऽपि न निस्तारः। मैवम्। गन्धवतीत्यादौ पक्षतावच्छेदकवृत्तिप्रकारताया एव निरवच्छिन्नविशेष्यत्वावच्छि-न्नत्वं तन्निष्ठावच्छेदकतायास्तु गन्धत्वनिष्ठावच्छेदकताकत्वमेवेति एवं द्वितीयेऽपि प्रकारत्वं परुषत्वा-वच्छिन्नविशेष्यत्वावच्छिन्नं तत्रोभयत्र गन्धत्वावच्छिन्नविशेष्यताया असत्त्वान्न दोषः। तादृशविशेष्यत्वं तद्वारणाय तादृशविशेष्यतानिरूपितप्रकारतान्यत्वं तादृशप्रकारतात्वविशिष्टभिन्नत्वं वैशिष्ट्यञ्च स्वाश्रय-त्वस्वाश्रयीभूतप्रकारत्वावच्छेदकविशेष्यतात्वान्यतरसम्बन्धेनेति न दोषः। ***यथाश्रुतार्थेति*** साक्षात्सा -ध्यनिरूपितविशेषणताभिन्नत्वोक्तौ वह्निकालीनद्रव्यसामग्रीमान् वह्नेरित्यादावव्याप्तेः। साक्षात्परम्परा-

In Public domain. Digitization Muthulakshmi Research Academy

परम्परया साध्यविशेषणतयैव लिङ्गभानादतिव्याप्त्यापत्तेः। न चैवमपि ज्ञानविषवान् धूमादित्यादिन्यायान्तर्गतनिगमनेऽतिव्याप्तिस्तदवस्थैव, ज्ञानविषयत्वरूपसाध्यतावच्छेदक-प्रकारतानिरूपकविशेष्यतानिरूपितत्वस्य हेतुप्रकारतायां सत्त्वात्। एवं वह्निसाध्यके निगमनजन्यवोधीयहेतुज्ञानज्ञाप्यत्वविशिष्टवह्नित्वादिप्रकारतायां[31] साध्यतावच्छेदकादि-प्रकारतात्वस्याधिकन्त्वित्यादि न्यायेनाक्षततया तादृशप्रकारतावटकहेतुविषयतायाः निरुक्त-विशेष्यतानिरूपितप्रकारतान्यत्वविरहात्तत्राप्यतिव्याप्तितादवस्थ्यमिति वाच्यम्। शुद्धसाध्यता

---

साधारणनिरूपितत्वं निवेश्य दर्शितार्थकत्वे च साध्यतावच्छेदकघटकप्रकारतामात्र एव साध्यता-वच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितत्वं न तु तद्घटकविधेयभूतपञ्चम्यन्तार्थनिविष्टप्रकारतासु स्वस्य स्वधर्मितावच्छेदकत्ववारणायान्तराधर्मितावच्छेदकवृत्तिप्रकारतानिरूपितविशेष्यतास्वीकारात् इति नातिप्रसङ्गः। *सत्त्वादिति* यद्यपि पञ्चम्यर्थज्ञानज्ञाप्यत्वांशे धूमस्य विधेयतयोक्तयुक्त्याज्ञाप्यत्व-त्वप्रकारतानिरूपकविशेष्यतानिरूपितत्वं हेतुप्रकारतायां न सम्भवति। तथापि धूमज्ञानज्ञाप्यत्व-प्रकारतानिरूपितविशेष्यतानिरूपितत्वे बाधकाभावाद्धूमानन्वितपञ्चम्यर्थाभानाच्चातिव्याप्तिसङ्गतिः। एवं जन्यज्ञानविषयत्वसाध्यकेऽपि बोध्यम्। पक्षनिष्ठाभावप्रतियोगित्वं न साध्येऽवाधितत्वमसम्भवात्। किन्तु तादृशाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकवत्त्वं एवञ्च धूमज्ञानज्ञाप्यत्वमात्रं न तदुन्नायकम्। आलोकादिसाधारणतया तद्व्यभिचारित्वात्। अपि तु तद्विशिष्टवह्नित्वादिकमेवेति निगमने तद्भानमेव स्वीकार्यं वह्नित्वाप्रवेशाच्च न वैयर्थ्यं वह्न्यनुयोगिकत्वविशिष्टसमवायेन तद्विशिष्टधर्मः। तादात्म्यसम्वन्धेन तद्विशिष्टवह्निर्वा तदुन्नायकः। अथवा वह्नित्वे या आधेयता व्यक्तिस्तद्घटित-सामानाधिकरण्यसम्वन्धेन तादृशज्ञाप्यत्वविशिष्टधर्मो वह्नित्वमेव तथा च निगमनसामान्येऽतिव्याप्तिः इत्याह। *एवमिति* साध्यतावच्छेदकावच्छिन्नादिनिरूपितप्रकारतात्वस्येत्येतदुपादानञ्च विधेयकोटि -प्रविष्टत्वेऽपि साध्यतावच्छेदकवृत्तिप्रकारताशब्देन विशिष्टवह्नित्ववृत्तिप्रकारताग्रहो भवत्येवेति सूचनाय। (अत्र वह्नित्वादिप्रकारघटकविषयितायां साध्यतावच्छेदकावच्छिन्नादिनिरूपितप्रकारता लभ्येति दलान्तरेऽप्येवमेव विशिष्टहेतुविषयत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकविषयिताया आलोकादौ व्यभिचाराभावान्निगमनसामान्येऽतिव्याप्तिश्चिन्त्या)। *शुद्धेति* उक्तस्थले च साध्यरूप-ज्ञानविषयांशे धूमादित्यन्तार्थधूमज्ञानजन्यज्ञानविषयत्वरूपधूमादिविशिष्टसाध्यतावच्छेदकप्रकारता-निरूपकविशेष्यतानिरूपितत्वस्य हेतुप्रकारतायां सत्त्वान्न दोषः। शुद्धत्वञ्च यत्र यादृशं साध्यता-

---

31. प्रकारकविषयतायामिति पाठान्तरम्

In Public domain. Digitization: Muthulakshmi Research Academy

-वच्छेदकप्रकारतानिरूपकविशेष्यताया एव विवक्षणीयत्वात्। ननु पक्षधर्मलिङ्गविषयकत्व-विवक्षणे दधि द्रव्यं दध्न इत्यादौ नाव्याप्त्यवकाशः। दधि द्रव्यमिति वोधस्य दधिद्व्यणुक-विषयकस्य दधिसमवेतदध्यविषयकत्वसम्भवादतः स्थलान्तरमाह। **प्रमेयत्वमिति** ननु प्रमेयत्वं प्रमाविषयत्वं, तच्च विषयभेदाद्भिन्नम्, एवञ्च घटादिनिष्ठप्रमेयत्वविषयकस्य प्रमेयत्वम-भिधेयमिति बोधस्य प्रमेयत्वरूपपक्षनिष्ठप्रमेयत्वाविषयकस्य सम्भवान्न तत्राव्याप्तिरतः स्थालान्तरमनुसरति। **गोत्वाभाव इति** ननु पक्षतावच्छदेकविशिष्टपक्षविषयतानन्तः-पातिलिङ्गविषयताशून्यत्वनिवेशेनोपदर्शितहेतुपक्षकप्रतिज्ञाया असङ्ग्रहः तदन्तःपातित्वञ्च पक्ष-तावच्छेदकप्रकारतानिरूपितसंसर्गतानिरूपकत्वं पक्षतावच्छेदकप्रकारतापक्षविशेष्यता-साधारणमित्यालोच्य अतिव्याप्तिमाह। **अतिव्यापकञ्चेति**

---

वच्छेदकं तत्र तादृशतत्पर्याप्तत्वं फलतः प्रकारताविशेषणं तेन ज्ञानज्ञाप्यत्वरूपपञ्चम्यर्थैकदेशज्ञाने प्रकृत्यर्थान्वयपक्षेऽपि न क्षतिः। धूमज्ञानजन्यज्ञानविषयवान् धूमादित्यादौ निगमनेऽतिव्याप्तिस्तु न शङ्क्या। निगमनजन्यबोधे व्याप्तिभानेन शुद्धसाध्यतावच्छेदकप्रकारकत्वात्। तुल्यवित्तिवेद्यत्वादिना धूमे ज्ञापकताया अवगमात्कुत इत्याकाङ्क्षानुपगमाच्च। *द्व्यणुकेति* द्रव्यत्वव्याप्यव्याप्यतया दधित्वस्य न परमाणुवृत्तित्वं मूर्तत्वन्तु न जातिरितिभावः। ननु निरुक्तपक्षाविशेषणत्वेन निरुक्तसाध्या-विशेषणत्वेन च यल्लिङ्गप्रकारत्वं तच्छून्यत्वस्य वाच्यत्वान्नदधिद्रव्यं दध्न इति दोषत्रयास्याप्यवकाश इति चेन्न। सिषाधयिषया न्यायप्रयोगोपगमे दधिदधिमद्धन्न इत्यादौ समवायेन साध्यसाधनभावे तथा-विधसाध्यप्रकारतामादायाव्याप्तिः। तदनुपगमेऽपि कालिकसम्बन्धेन दधिनि साध्ये कालिकसमवायो-भयसामानाधिकरण्येन दधिनि हेतावुक्तक्रमेणाव्याप्तिः। पक्षधर्मिकहेतुतावच्छेदकसम्बन्धेन हेतुमत्ता-ग्रहस्य पक्षे साध्यतावच्छेदकसम्बन्धेन साध्यवत्तानिश्चयरूपसिद्धिभिन्नत्वादिति। *ननु पक्षतेति* प्रकाशिकाकारेणेदं पूर्वमेव विवक्षितं तत्र च दधिद्रव्यमित्यादिग्रन्थासङ्गतिरिति स्वयं तद्ग्रन्थं योजयित्वेदमभिहितमिति ध्येयम्। नन्वनन्तः पातित्वमव्यापकत्वं तथा च प्रमेयत्वनिष्ठहेतुत्वं प्रमेयं प्रमेयत्वादित्यादौ हेतावतिव्याप्तिरिति तद्याचष्टे। *पक्षतावच्छेदकेति* नन्वयमाभासोऽसङ्गतः। दधि द्रव्यमित्यादिस्थलत्रयेऽपि दधित्वादिप्रकारतानिरूपितसंसर्गतानिरूपकताकत्वस्य दधित्वाद्यवच्छिन्न-विशेष्यतायामसत्त्वादव्याप्तेरवारणादिति चेन्न। दधित्वादिनिष्ठावच्छेदकत्वापेक्षया प्रकारतायाः अवच्छिन्नविशेष्यतापेक्षया अनवच्छिन्नविशेष्यतायाश्च भिन्नत्वेऽपि तत्र प्रकारतानिरूपकावच्छेदकता-निरूपकसंसर्गताव्यक्त्योर्भेदोनाङ्गीक्रियते तथा च तादृशसंसर्गतानिरूपकविषयताभिन्नलिङ्गविषयता-

In Public domain. Digitization Muthulakshmi Research Academy


**पक्षतावच्छेदकविशिष्टेति** पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यतानिरूपिता या साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारतानिरूपितवैशिष्ट्यविषयता तद्बहिर्भूतलिङ्गविषयताशून्यत्वमित्यर्थः। अथ तद्बहिर्भूतत्वं न साक्षात्परम्परासाधारणं यत्तन्निरूपकत्वं तच्छून्यत्वम्।

---

शून्यमक्षतमेवेति तत्सङ्गतिः। न चैवं स्वस्य स्वधर्मितावच्छेदकत्वापत्तिः। अवच्छिन्नविशेष्यतायास्तादृशसंसर्गतानिरूपितत्वादिति वाच्यम्। तथा सत्यपि धर्मितावच्छेदकप्रकारतानिरूपितत्वाभावे नादोषात्। अथवा संसर्गताव्यक्त्यभेदेऽपि तन्निष्ठावच्छिन्नविशेष्यतानिरूपकतावच्छेदकनिरवच्छिन्नविशेष्यतानिरूपकतावच्छेदकधर्मौ भिन्नौ स्वीक्रियेते तथा च धर्मितावच्छेदकनिष्ठप्रकारतायामनवच्छिन्नविशेष्यतानिरूपकतावच्छेदकधर्मावच्छिन्नसंसर्गतानिरूपकत्वस्यैव सत्त्वेन निरवच्छिन्नविशेष्यतानिरूपकतावच्छेदकधर्मावच्छिन्नसंसर्गतानिरूपितत्वाभावान्न स्वस्य स्वधर्मितावच्छेदकत्वापत्तिः। तादृशधर्मश्चधर्मितावच्छेदकप्रकारतानिरूपितत्वादिः। न चैवं पक्षतावच्छेदकावच्छिन्नविशेष्यताद्वारा हेतुविषयताया अपि तादृशसंसर्गतानिरूपितत्वेनोपनयसामान्यनिगमनसामान्ययोरतिव्याप्तेः सन्दर्भविरोध इति वाच्यम्। तादृशसंसर्गतानिरूपितत्वस्य साक्षान्निरूपितत्वरूपस्य निवेशात्। गन्धसमानकालीनरूपवतीत्यादौ गन्धादेः पक्षतावच्छेदकघटकस्यापि पक्षतावच्छेदकत्वात्। अन्यथा पक्षतावच्छेदकशब्देन पक्षतावच्छेदकघटस्यैव विवक्षणादिति। वस्तुतस्तु संसर्गताभेदेऽपि न क्षतिः। धर्मितावच्छेदकघटकप्रकारतानिरूपितसंसर्गतानिरूपकविषयतान्यत्वे सति साध्यतावच्छेदकावच्छिन्न-प्रकारतानिरूपितसंसर्गतानिरूपकविषयतान्यत्वे सति संसर्गतान्या या साध्यतावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपकविषयतान्यालिङ्गविषयता तदन्यत्वं विवक्षितम्। उक्तस्थले च दधित्वप्रकारतानिरूपितसंसर्गतानिरूपकविषयतादधित्वप्रकारतानवच्छिन्नदधिविशेष्यता च तदन्यासाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितसंसर्गतानिरूपकविषयतासाध्यप्रकारता पक्षतावच्छेदकीभूतदधित्वावच्छिन्नविशेष्यता च तदन्या च यल्लिङ्गविषयता तच्छून्यत्वमादायाभाससङ्गतिरिति दिक्। अतिव्यापकं चेति प्रदर्शितार्थकं धूमवान् वह्निव्याप्यधूमवानित्युपनये पक्षतावच्छेदकप्रकारतानिरूपितसंसर्गत्वानिरूपकलिङ्गविषयत्वं केवलधूम इति ज्ञानीयमेव हेतुत्वं प्रमेयं हेतुत्वादित्यादौ तादात्म्ये न हेतौ नातिव्याप्तिः। तादात्म्येन व्याप्त्यनङ्गीकारात्। हेत्वन्यत्वाभावाच्च एतेन हेतुः प्रमेयं धूमादित्यादौ पञ्चम्यर्थप्रकारको हेतुजन्योबोधः प्रामाणिकस्तदाहेतावतिव्याप्तिः परास्ता। **पक्षतेत्यादि** गोत्वाभावादिपक्षकोक्तप्रतिज्ञासङ्ग्रहाय प्रथमं निरूपितत्वान्तमुक्तवह्निसामग्रीसाध्यकाया आत्मज्ञानवान् ज्ञानादित्यादिविषयतासम्बन्धेन ज्ञानसाध्यकायाश्च तस्यास्सङ्ग्रहाय द्वितीयं तत्। पर्वतो वह्निमान् वह्निसंयोगादित्यादेः सङ्ग्रहायवैशिष्ट्यनिवेशः। **निरूपकत्वमिति** वैशिष्ट्यविषयतानिरूपकत्वमर्थः।

In Public domain. Digitization Muthulakshmi Research Academy


पक्षतावच्छेदकप्रकारताया उक्तयुक्त्या तदनिरूपकत्वात् कथञ्चिन्निरूपकत्वोपपादानेऽपि यत्र संयोगेन वह्नेस्साध्यता वह्निसंयोगत्वेन हेतुता तत्रत्यप्रतिज्ञायामव्याप्तिः। हेतुभूतवैशिष्ट्य-विषयतायाः स्वनिरूपकत्वविरहात्, एवं साक्षात्परम्परासाधारणानुगतनिरूप्यनिरूपकभावः अपि दुर्वचः। परम्परया निरूपितत्वस्य तन्निरूपितनिरूपितत्त्वाद्यात्मकत्वात्। एतेन तादृश-वैशिष्ट्यविषयतानिरूपकविषयत्वानिरूपितत्वं तादृशविषयतावहिर्भूतत्वं, तच्च वैशिष्ट्यविषयता-साधारणं तन्निरूपकप्रकारताविशेष्यतानिरूपितत्वमादाय तन्निरूपकविशेष्यता प्रकारता-साधारणं चेत्युक्तावपि न निस्तार इति चेन्न। तथाविधवैशिष्ट्यविषयताशालिनिश्चयत्वसम-नियतप्रतिवन्धकतानवच्छेदकत्वमेव तद्वहिर्भूतत्त्वम्। निगमनजन्यवोधीयहेतुविषयता च

---

गोत्वाभावे पृथिव्यादिपक्षकोक्तप्रतिज्ञयोः सङ्ग्रहाय साक्षात्परम्परयेत्युभयोपादानम्। *पक्षतेति* धर्मितावच्छेदकताभिन्नत्वादिति भावः। *कथञ्चिदिति* स्वनिरूपकविषयताद्वारा अग्रिमरीत्या स्वतन्त्रप्रकारताया अनुगमेन वा। *स्वनिरूपत्वेति* स्वस्मिन्परम्परयापि स्वनिरूपकत्वानङ्गीकारात्। ननु लिङ्गतावच्छेदकावच्छिन्नविषयताप्रवेश्या संसर्गतावच्छेदकसंयोगत्वादेरभावान्न दोषः। यदि अवच्छेदकावच्छेदेन वह्निसाध्यकप्रतिज्ञायां पक्षतावच्छेदकव्यापकतावच्छेदकसंसर्गतावच्छेदकरूप-लिङ्गतावच्छेदकं भासते। तदा विषयतावच्छेदकतापर्याप्तिर्निवेश्येत्यत आह। *एवमिति* पर्वतो वह्निमान् वह्निसंयोगादित्यादावव्याप्तिमुद्धरतां मतमाह। *एतेनेति* तादृशनिरूप्यनिरूपकभावस्य दुर्वचत्वेनेत्यर्थः। *तच्च* तादृशवैशिष्ट्यविषयतानिरूपकत्वञ्च। *न निस्तार इति* विषयत्वा-निरूपितेत्यत्र निरूपितनिरूपितत्वादिप्रवेशे पृथिव्यादिपक्षकप्रतिज्ञायां साक्षान्निरूपितत्वप्रवेशे गन्ध-समानकालीनरूपवदादिपक्षकप्रतिज्ञायामव्याप्तिरित्यर्थः। *तथाविधेति* अवच्छेदकत्वं स्वरूप-सम्वन्धविशेषः। अत्र तथाविध वैशिष्ट्यविषयत्वावच्छिन्नप्रतिवन्धकताप्रवेशे निश्चयत्वाद्यनिवेशेन लाघवेऽपि अधिकन्त्विति न्यायेन निगमनेऽपि वैशिष्ट्यविषयतावच्छिन्नायाः पक्षस्तस्माद्वह्निमान्नवेति संशयप्रतिवन्धकतायाः अवच्छेदकैव लिङ्गविषयतेति निगमनातिव्याप्तेः। ननु धूमादालोक-वानित्यादावव्याप्तिः हेतुत्वं धूमीयं न वेति संशयप्रतिबन्धकताया वैशिष्ट्यविषयतानवच्छिन्नत्वेऽपि लिङ्ग-विषयतायां पक्षो वह्निमान्नवेति संशयप्रतिबन्धकतावच्छेदकत्वसत्त्वात्। एवं तादृशनिश्चयत्वव्याप्य-प्रतिवन्धकतानिवेशे धूमज्ञानज्ञाप्यवह्निमान्न वा पर्वत इति संशयप्रतिबन्धकतायास्तादृशनिश्चयत्व-व्याप्यतया तदनवच्छेदकीभूतलिङ्गविषयताशून्यबोधमादाय निगमनेऽतिव्याप्तिरतो व्यापकत्वनिवेश इत्याह। *निगमन इति* न च तदनवच्छिन्नप्रतिबन्धकतावच्छेदकत्वं वहिर्भावः कुतो नोक्त इति

In Public domain. Digitization: Muthulakshmi Research Academy

यादृशप्रतिवन्धकतावच्छेदककोटौ निवेश्यते तादृशी न कापि प्रतिवन्धकता तथाविध-निश्चयत्वव्यापिका। हेत्वविषयकतादृशवैशिष्ट्यविषयताशालिज्ञानसाधारण्यात्। अतस्तथाविध-हेतुविषयतायास्तद्बहिर्भूतत्वोपपत्तिरित्यनुषङ्गपक्षेऽपि ननिगमनातिव्याप्तिः। तादृशनिश्चयत्व-व्यापकत्वमात्रस्य प्रतिवन्धकताविशेषणत्वे धूमादालोकवान् पर्वतो वह्निमान्धूमादित्यत्र हेत्ववयवेऽतिव्याप्तिः। तादृशहेतुनिष्ठायाः हेतुत्वं धूमीयं नवेति संशयप्रतिवन्धकतावच्छेदकतादृश-वोधविषयताया निरुक्तविषयतावहिर्भूतत्वानुपपत्तेः। अतस्तादृशनश्चयत्वव्याप्यत्वमपि प्रति-वन्धकताविशेषणम्। न च पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यताकत्वनिवेशस्यावश्यकतया नैतादृशातिव्याप्तिसम्भावनेति व्यर्थं व्याप्यत्वनिवेशनमिति वाच्यम्। तथाप्यनुषङ्गपक्षे धूमाद्वह्नि-मतस्सधर्मा पर्वतो वह्निमान्धूमादित्यादिन्यायस्थलीयनिगमने हेतुत्वं प्रमेयाद्वाच्यत्ववत्

---

वाच्यम्। स्वरूपसम्वन्धरूपावच्छिन्नत्वप्रवेशे धूमादालोकवान् पर्वत इत्यादावव्याप्तेः। न च तादृश-वैशिष्ट्यविषयतान्तःपाति विषयतावच्छिन्नत्वनिवेशेन निस्तारः। तत्रैव हेतावतिव्याप्तेः। एतेन तादृश-निश्चयत्वाव्यापकप्रतिवन्धकतायास्तादृशनिश्चयत्वाव्यापकत्वे सति तादृशनिश्चयत्वाव्याप्यप्रतिवन्धक-तायाश्च निवेशोऽपास्तः। तादृशनिश्चयत्वव्यभिचारिप्रतिवन्धकतानिवेशे तु धूमादालोकवानिति प्रतिज्ञा-यामव्याप्तिः। हेत्वन्यत्वनिवेशस्यान्यूनानतिरिक्तविषयकान्तभागत्यागपक्षीयत्वादेतत्पक्षे समव्याप-कत्वमभिप्रेतं तत्र व्याप्यत्वोपादानप्रयोजनमाह। ***तादृशनिश्चयत्वव्यापकत्वमात्रस्येति*** तादृशो धूमादिरूपः। ***तथापीति*** निगमनघटकतच्छब्दस्य लिङ्गमात्रपरत्वं साध्यवदन्यावृत्तित्वरूपाव्याप्तिः तद्घटकेति वा अभिप्रेत्येदमतिव्याप्त्यभिधानं धूमादालोकवानित्यादौ च आलोको धूमज्ञानज्ञाप्यो न वेति संशयस्येव हेतुत्वं धूमीयं न वेत्यालोकनिष्ठविशेष्यताकसंशयस्यापि प्रतिवन्धकतायाः व्यापकत्वेऽपि निषेधकोटिप्रविष्टवह्निनिष्ठधूमज्ञानज्ञाप्यत्वविषयितातदनवच्छेदिकैव समानविषयकत्वेन प्रतिबन्धकतामत इति तदुपेक्षा। ननु वह्निर्धूमज्ञानज्ञाप्य इति निश्चयेऽपि वह्निव्याप्तिविशिष्टपक्षधर्मता-विशिष्टधूमज्ञानज्ञाप्यो न वेति संशयो जायते तदुच्छेदाय च तस्माद्वह्निमानिति तत्पदस्य व्याप्त्यादि-विशिष्टार्थकत्वमावश्यकं तथा च व्याप्तिघटकधूमाधिकरणेत्यत्र धूमविषयतायास्तद्भिन्नतया नातिव्याप्ति-र्मणिकृद्भिस्तत्पदस्य व्यापकसामानाधिकरण्यरूपव्याप्यत्वविशिष्टहेतुपरताया एवावलम्वनीयत्वादि-त्यत आह। ***हेतुत्वमिति*** इदमुपलक्षणम्। प्रमेयाद्वाच्यत्वसमानाधिकरणज्ञेयत्वादेः साध्यत्वे उक्त-हेतुरपि बोध्यः। यद्यपि समव्यापकत्वमपेक्ष्यलाघवात् तादृशनिश्चयत्वपर्याप्तितावच्छेदकताकप्रति-वन्धकत्वैव प्रवेश्या। तथापि निगमनादिवारणासम्भवात्। अत्रावच्छेदकावच्छेदेन साध्यवत्तानिश्चयत्वं

In Public domain. Digitization Muthulakshmi Research Academy



पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितविशेषणतासम्वन्धावच्छिन्नसाध्याभावप्रकारताशून्यत्वे सति तादृशविशेष्यतानिरूपितपक्षतावच्छेदकव्यापकताविशिष्टसाध्यतावच्छेदकसम्वन्धावच्छिन्नसाध्यप्रकार-ताशालिज्ञानत्वं सामानाधिकरण्येन साध्यवत्तानिश्चयत्वञ्च तादृशविशेष्यतानिरूपितपक्षतावच्छेदक-व्यापकत्वविशिष्टविशेषणतासम्वन्धावच्छिन्नसाध्याभावप्रकारताशून्यत्वे सति तादृशविशेष्यतानिरूपित-सध्यतावच्छेदकसम्वन्धावच्छिन्नसाध्यप्रकारताशालिज्ञानत्वं न तु स्वावच्छिन्नप्रतिवन्धकतानिरूपित-प्रतिवध्यतावच्छेदकत्वस्वसमानाधिकरणत्वोभयसम्वन्धेन विषयिताविशिष्ठविषयिताशून्यत्वम्। एक-धर्मिकविरुद्धकोटिद्वयप्रकारकान्यज्ञानत्वं वा नाहार्यत्वानिवेशेन लघु। तत्र स्वरूपसम्वन्धरूपावच्छे-दकत्वाभावात्। न च तार्णवह्न्यादिसाध्यकप्रतिज्ञायामव्याप्तिः। तादृशनिश्चयत्वस्य तार्णवह्निमान् वह्नि-सामान्याभाववान् न वेति संशयसाधारण्यात्। पर्याप्तिमप्रवेश्य साध्यतावच्छेदकावच्छिन्नप्रतियोगि-ताकाभावनिवेशे पर्वतस्तार्णवह्निमानतारणवह्निमान्नवेति निश्चयासङ्ग्रहः, साध्यतावच्छेदकान्यधर्मान-वच्छिन्नाभावनिवेशे अन्ततः पर्वतः तारणवह्निमानभाववांश्चेति निश्चयासङ्ग्रह इति वाच्यम्। निश्चय-विशेषे सामान्याभावाप्रकारकत्वस्यापि निवेशात्। भेदादिकोटिकसंशयवारणन्तूह्यम्। साध्यवत्ता-निश्चयस्य निवर्त्यत्वे सति निवर्तको यो निश्चयस्तद्विषयतावच्छेदकं यद्रूपावच्छिन्नाभावत्वं तद्रूपा-वच्छिन्नाभावत्वावच्छिन्नाप्रकारकत्वं वानुगतं निवेश्यम्। एवं साध्यविशिष्टशुद्धपर्वतावगाह्यनवगाहिनोः नीलपर्वतो वह्निमान्नवेति संशययोः सङ्ग्रहासङ्ग्रहप्रकारः परिचिन्तनीयः। वैशिष्ट्यपदोपादानेन च तादृश-वैशिष्ट्यविषयताघटितनिश्चयत्वस्य तत्र तत्र नालाभः। तथापि पर्याप्त्यर्थपर्यालोचनायां महागौरवं द्रष्टव्यम्। किञ्च भ्रमसाधारणधर्मस्यैव पर्याप्त्यधिकरणतया तन्निवेशे ह्रदो वह्निमानित्यादावतिव्याप्तिः। साध्यवत्पक्षावगाहिज्ञानवृत्तित्वस्य प्रतिवन्धकतायां निवेशे महागौरवम्। अत्र पर्वतो धूमाद्वह्निमानिति प्रतिज्ञायामव्याप्तिः। धूमाद्वह्निमान् वह्निसामान्याभाववान्नवेति संशयानुरोधेन तादृशनिश्चयत्वे अवच्छेदकतापर्याप्तिर्नेति न शङ्क्यम्। धूमाद्वह्निमानिति (वह्न्यभाववानीति) विशिष्टबुद्धिप्रतिवन्धकता-मादाय पर्याप्त्युपपत्तेः। अत्रेदं चिन्त्यते। समनैयत्योपादानेऽपि हेतुत्वं वह्निमद्वह्नेरित्यादौ हेतुवारणायै तत्कल्पे हेत्वन्यत्वमावश्यकं तथा च तेनैवोक्तहेतुवारणात् व्याप्यत्वविवक्षणं व्यर्थम्। तथा च साध्य-विशिष्टपक्षविषयकनिश्चयत्वव्यापकत्वमात्रनिवेशेनैवोपपत्तौ पृथग्योग्यतापि न विवक्षणीया (समनैय-त्यपक्षे साध्यविशिष्टपक्षविषयकत्वनिवेशासम्भवेन साध्यवत्पक्षावगाहित्वस्य पृथग्निर्देशापत्तेरिति)। इदं पुनरिहावधेयम्। पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकसम्वन्धावच्छिन्नसाध्य-तावच्छेदकावच्छिन्नप्रकारतासामान्यावच्छिन्नप्रतिबन्धकतैव निवेश्या तावतैव दर्शितहेतुनिगमनयो-र्वारणसम्भवान्निश्चयत्वानिवेशलाघवं दुर्वारम्। प्रकृतसाध्यनिष्ठप्रकृतपक्षविषयतासामान्यावच्छिन्नत्वं

In Public domain. Digitization: Muthulakshmi Research Academy


प्रमेयादित्यादिन्यायस्थलीयहेत्ववयवे चातिव्याप्तेर्दुर्वारत्वात्तन्निवेशस्यावश्यकत्वादिति। न च धर्मितावच्छेदकनिष्ठं प्रकारत्वं न प्रतिबन्धकतावच्छेदकमपि तु तत्तन्निष्ठविशेष्यतावच्छेदकत्वमेव, तथा च गन्धवतीतरेभ्यो भिद्यते इत्यादिप्रतिज्ञाजन्यबोधीयहेतुप्रकारतायास्तद्बहिर्भूतत्वाद्व्याप्तिरिति वाच्यम्। विशेष्यतावच्छेदकताया एव प्रकारतात्वोपगमेन तादृशबोधे तदन्यप्रकारतानभ्युपगमात्। एवं सति प्रसक्तस्य भूतलं घटवदित्यादि ज्ञानस्य भूतलत्वांशे तद्धर्मिता -वच्छेदकत्वस्य प्रकारान्तरेण वारणसम्भवात्। अस्तु वा विशेष्यतावच्छेदकताख्यविषयता प्रकारतातोऽन्यैव, तथापि न क्षतिः। तादृशविषयतावहिर्भूतविषयताशून्यत्वं ज्ञानविशेषणमुपेक्ष्यतादृशबहिर्भूतविषयतानवच्छिन्नजन्यतानिरूपितजनकताया वाक्यविशेषणत्वोपगमेन विशेष्यतावच्छेदकताभिन्नगन्धादिविषयतायाः प्रतिज्ञाजन्यबोधे सत्त्वेऽपि तस्याः प्रतिज्ञाजन्यतावच्छेदककोटिनिवेशे प्रयोजनाभावेन तन्निष्ठधर्मतावच्छेदकताया एव तत्र निवेशनी-

---

वा विवक्षणीयमिति न योग्यतानिवेशः। हेतुत्वं वह्निमद्वह्नेरित्यादौ दोषस्तु समान इति। *न प्रतीति* केवलगन्धवतीति ज्ञानस्य कुत्राप्यप्रतिबन्धकत्वात्। *तदिति* भूतलत्वेत्यर्थः। प्रकारान्तरञ्च स्वधर्मितावच्छेदकत्वं स्वप्रकारतानिरूपितविशेष्यतानिरूपितस्वान्यवृत्त्यवच्छेदकत्वं स्वप्रकारतानिरूपितविशेष्यतानिरूपितत्वावच्छेदकतावच्छेदकतात्वाश्रयत्वं वा निरूपितत्वस्याव्यासज्यवृत्तित्त्वेन स्वनिष्ठप्रकारतात्वेनैव तादृशविशेष्यतानिरूपितत्वं नत्ववच्छेदकतात्वेनेति। स्वप्रकारतानिरूपितत्वेन स्वावच्छिन्नविशेष्यतात्वस्य नावच्छेद्यावच्छेदकभाव इति वा। ननु स्वस्य धर्मितावच्छेदकत्वोपगमे को दोष इति चेत्। इच्छासत्त्वे भूतलं घटवदित्यादितो भूतलं, भूतलं न वेति संशयापत्तेः। अस्माकन्तु सामग्रीघटकबाधनिश्चयासत्त्वान्नदोषः। ननु इच्छाया असत्त्वे तादृशबाधवशादुक्तसंशयाद्युपपत्तिस्तु न स्वस्याहार्यत्वेनैव तदापत्त्यनुपपत्तेः भूतले भूतलत्वप्रकारकज्ञानानुव्यवसायापत्तेश्च। ननु यदि धर्मितावच्छेदकतायाः प्रकारतारूपत्वं तदोद्देश्यतावच्छेदकतानिरूपकसंसर्गतानिरूपकविषयतान्यत्वे सति साध्यतावच्छेदकनिष्ठविधेयतावच्छेदकतानिरूपितसंसर्गतानिरूपकविषयतान्यत्वे सति संसर्गतान्यलिङ्गविषयताशून्यत्वमेवास्ताम्। बहिर्भूतत्वानिवेशेन लाघवात्। उद्देश्यताविधेयतावच्छेदकमते साक्षात्परम्परासाधारणे संसर्गतानिरूपकत्वन्तु साक्षादेव। अन्यथा निगमनजन्यबोधीय लिङ्गविषयतानां विशेष्यतादिद्वारा तन्निरूपकतया बहिर्भावानुपपत्तेः। गन्धवतीगन्धसमानकालीनरूपवतीत्यादेः। दधिद्रव्यं दध्न इत्यादेश्च सङ्ग्रहाय प्रथमं सत्यन्तम्। तादृशसंसर्गतानिरूपकत्वस्यावच्छेदकताविशेष्यतयोः सत्त्वात्। प्रकारतामादायाव्याप्तिवारणायावच्छेदकताप्रकरयोरैक्यमतावलम्वः। वह्नि-

In Public domain. Digitization Muthulakshmi Research Academy


यतया अव्याप्त्यनवकाशात्। तादृशवहिर्भूतविषयतासामान्यशून्यत्वनिवेशे अनुमितिसमानविषयकत्वनिवेशनस्य मूलोपात्तस्य वैय्यर्थ्यप्रसङ्गः इति ईदृशलिङ्गविषयताशून्यत्वनिवेशनम्। अखण्डाभावस्य घटकतया न लिङ्गांशवैयर्थ्यम्।

उक्तरीत्या बहिर्भूतत्वनिर्वचनायासविद्वेषात्कल्पान्तरमाश्रयते। **वस्तुत इति** **लिङ्गत्वमिति** व्याप्तिरित्यर्थः। नन्वत्राननुगतयोरन्वयव्यतिरेकव्यस्योस्तद्धटकव्यापक-

---

सामग्र्यादिसाध्यकप्रतिज्ञासङ्ग्रहाय द्वितीयं सत्यन्तम्। तत्र निगमने ज्ञानज्ञाप्यत्वविशिष्टवह्नित्वादेर्विधेयतावच्छेदकतयातिव्याप्तिरतः साध्यतावच्छेदकनिष्ठेति एवञ्च कपालं घटवद्धटादित्यादौ कालिकसमवायसम्बन्धाभ्यां साध्यताधनभावे प्रलयः प्रलयत्वादित्यादौ कालिकदैशिकविशेषणताभ्याञ्च तत्र नाव्याप्तिः। साध्यविधेयतायाः संसर्गतानिरूपकत्वात्। पर्वतो वह्निमान् वह्निसंयोगादित्यादा-वव्याप्तिरतः संसर्गतान्यत्वनिवेशः। वस्तुतः शाब्दबोधे वह्निमतोऽभेद इति सिद्धान्तितत्वात् पक्षांशे अभेदसम्बन्धेन विशेषणतापन्नांशे विषयतान्यत्वं विवक्षणीयम्। एवं पृथिवीतरेभ्यो भिद्यते इत्यादेः सङ्ग्रहाय यादृशपक्षसाध्यकप्रतिज्ञा यद्रूपावच्छिन्ने यद्रूपावच्छिन्नबोधिकास्तद्रूपनिष्ठत्वं साध्यतावच्छेदक-निष्ठत्वशब्देन विवक्षणीयम्। अत्रैव सकलप्रतिज्ञासङ्ग्रहः। तत्तद्रूपनिष्ठविधेयतावच्छेदकतानियामकसंसर्गतानिरूपकविषयतान्यत्वकूटनिवेशात्। एवञ्च धूमवान् वह्निव्याप्यधूमवानित्युपनयेऽपि नातिव्याप्तिरिति। मैवम्। उद्देश्यतादिनिरूपितावच्छेदकत्वनिवेशस्य साक्षात्परम्परासाधारणनिरूपितत्वस्य दूषणग्रस्तत्वात्। ननु निरुक्तविषयताबहिर्भूतविषयताशून्यत्वोक्त्यैव सामञ्जस्ये लिङ्गपदं व्यर्थमित्यत आह। *तादृशेति* *अनुमितीति* पक्षमुख्यविशेष्यत्वरूपेत्यर्थः। *वैय्यर्थ्येति* ह्रदो निर्धूमो निर्वह्नित्वादित्यादावुक्तोदाहरणजन्यबोधस्य निरुक्तप्रतिबन्धकतानवच्छेदकविषयिताशालित्वेन वारणसम्भवात् अखण्डाभावघटकतया लिङ्गनिवेशे तु तत्सार्थक्यमित्याह। *तादृशेति* कल्पान्तरमवतारयति। *उक्तेति* *विद्वेषादिति* उत्तरकल्पे तादृशविषयतात्वेन पक्षविशेषणतापन्नेतिकारणतावच्छेदकग्राहकप्रमाणेन कारणविशेषणतापन्न एव कारणतावच्छेदकत्वस्य तद्विशेषणतापन्न एव तदवच्छेदकत्वस्य विषयीकरणात्। तद्ग्राहकमानञ्च तादृशविशिष्टं कारणमिति ज्ञानमसति बाधके उद्देश्यतावच्छेदके विधेयतावच्छेदकत्वभानात् प्रकृतेऽप्युद्देश्यतावच्छेदकादौ विधेयतावच्छेदकत्वभानादित्यभिप्रायः बहिर्भूतत्वान्तापूरणेन तन्निर्वचनायासो नेति भावः। लिङ्गत्वं हेतुत्वं तच्च व्याप्तिरेव न तु व्याप्तिपक्षधर्मताकत्वमुदाहरणजन्यबोधे पक्षधर्मत्वाभावादित्याशयेनाह। *व्याप्तिरितीति* ननु व्याप्त्यविषयकत्वानिवेशेऽन्वय्युदाहरणेऽतिव्याप्तिः एतत्कल्पे पक्षविशेष्यकत्वासत्त्वादत आह।

In Public domain Digitization Muthulakshmi Research Academy


त्वयोर्वा एकतरमात्रविषयताया उपादाने अन्यतरवोधकोपनयादावतिव्याप्तिरित्याशङ्कया तादृशव्याप्तिघटकव्यापकताद्वयविषयत्वयोरनुगतरूपेणाभावं निवेशयति। **तथाचेति।** प्रकृतहेतुतावच्छेदकावच्छिन्नस्येति गमकत्वान्वितम्। व्याप्तिविषयकत्वमित्यत्रव्याप्तिपदं व्यापकत्वविषयतानिष्ठसाध्यतावच्छेदकादिविषयताव्यावृत्तविलक्षणौपयिकतानिवेशसूचनाय।

अथ किमिदं तादृशगमकतौपकयिकत्वम्? न तावत्प्रकृतहेतुतावच्छेदकावच्छिन्न-हेतुकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकानुमितित्वावच्छिन्नजनकतावच्छेदकत्वम्, पक्ष-धर्मत्वाविषयकोदाहरणजन्यवोधीयव्यापकत्वादिविषयताया अनुमितिजनकतावच्छेदककोट्य-प्रविष्टतया तत्रातिव्याप्तेः। न च हेतुव्यापकत्वादिविषयतात्वेनैव तद्विषयतानां जनकतावच्छेद-ककोटौ निवेशादनुमित्यजनकस्यापि तादृशज्ञानस्य विषयतानां तादृशरूपाक्रान्तानां तथात्व-मक्षतमेवेति वाच्यम्। तादृशविषयतात्वेन पक्षविशेषणतापन्ने हेतुविशेषणतापन्नसामा-नाधिकरण्यविशेषणतापन्नसाध्यादिविषयतानिरूपितव्यापकत्वविषयताया एव कारणतावच्छे-दकघटकत्वादतादृश्यास्तदवच्छेदकत्वाभावात्। यद्रूपावच्छिन्नविषयिताजनकतावच्छेदिका तद्रूपावच्छिन्नविषयिताशून्यत्वनिवेशे च साध्यतावच्छेदकाद्यवच्छिन्नविषयताया अप्यनुमिति-जनकतावच्छेदककोटिप्रविष्टतया तादृशविषयताशून्यत्वस्य तादृशप्रतिज्ञाजन्यवोधेऽप्य-सत्त्वादसम्भवः। यद्रूपावच्छिन्ननिरूपितव्यापकत्वविषयिता जनकतावच्छेदिका तद्रूपावच्छिन्न -निरूपितव्यापकत्वानवगाहित्वनिवेशे च किञ्चिद्रूपावच्छिन्नव्यापकत्वं साध्यस्य पक्षस्य वा घटकं यत्र तत्स्थलीयप्रतिज्ञाया असङ्ग्रहः। यत्त्वतत्त्वनिवेशादनुगमानवकाशश्चेति चेन्न।

---

*तद्घटकेति* असम्भववारणाय व्यावृत्तान्तं वैलक्षण्यहेतुगर्भं गमकत्वमनुमितिजनकत्वमौपयिकत्व-मवच्छेदकत्वमित्याशयेनाह। *नतावदिति* *तत्रेति* एतत्कल्पे पक्षमुख्यविशेष्यकत्वस्यानिवेशनी-यत्वात्। पक्षेत्यादिकथनं तादृशविषयताया अतिरिक्तत्वसूचनाय। *किञ्चिदिति* पर्वत आलोक-व्यापकद्रव्यकालीनवह्निमान् आलोकव्यापकद्रव्यवान् पर्वतो वह्निमानित्यादावित्यर्थः। ननु तथापि चतुर्थविषयतानिरूपितयद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नव्यापकत्वावगाहित्वं प्रकृतानुमिति -जनकतानतिरिक्तवृत्तितदवच्छेदकं वा तद्रूपावच्छिन्नविषयतानिरूपिततद्रूपावच्छिन्नव्यापकतानव-गाहित्वं विवक्षितम्। वह्निर्धूमव्यापक इति ज्ञानमादाय तादृशव्यापकतावगाहिताया अतिरिक्त-वृत्तित्वेऽपि तादृशविषयतानिरूपितत्वेन विशेषणीयत्वान्नदोष इत्यत आह। *यत्त्वतत्त्वेऽपि*

In Public domain. Digitization Muthulakshmi Research Academy


पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितविषयतानिरूपिता या विषयता-तन्निरूपितविषयतानिरूपितविषयतांशे विशेषणविधया प्रकृतानुमितिजनकतावच्छेदकतावच्छेदकतायाः पर्याप्त्यधिकरणधर्मवत्वेन हेतुव्यापकताविशिष्टसाध्यविषयत्वसाध्याभवव्यापकत्वविशिष्टहेत्वभावविषयत्वे अनुगमय्य तदभावस्य निवेशनेनानुपपत्त्यभावात्। तथाहि। प्रकृतानुमितिजनकतावच्छेदिकाया अन्वयिपरामर्शीयहेतुव्यापकत्वावच्छिन्नसाध्यविषयतायाः

*पक्षतावच्छेदकावच्छिन्नेत्यादि* यत्तु विशेषणविधयेत्यस्यानुपादानेऽपि तादृशानुमितिजनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणत्वेन धर्मानुगमः कार्य इति तत्तुच्छम्। तथा सति पक्षादिविषयतानिरूपितत्वसहितहेतुव्यापकसाध्यविषयतात्वस्यैव तादृशपर्याप्त्यधिकरणतयोदाहरणेऽतिव्याप्ते-र्वज्रलेपत्वात्। अस्माकन्तु चतुर्थविषयतानिरूपितत्वविशिष्टांशे विशेषणतापन्नत्वलाभान्नदोषः चतुर्थविषयतानिरूपितत्वस्य स्वविशिष्टांशेऽविशेषणत्वात्। चतुर्थविषयतानिरूपितत्वहेतुव्यापकत्वविशिष्टसाध्यादिविषयतात्वयोर्धर्मितावच्छेदकप्रकारभावापन्नयोरेवावच्छेदकतयाधर्मितावच्छेदकव्यावृत्तप्रकारतापन्नधर्मनिष्ठपर्याप्तिरेवानुगमघटिका न तु तत्साधारणधर्मनिष्ठपर्याप्तिरिति सूचनाय वा विशेषणविधयेति। एतच्च जनकतावच्छेदकविषयतावृत्तेरेव जनकतावच्छेदकतावच्छेदकत्वादिति नियममनुरुध्य वस्तुतस्तु जनकतावच्छेदकताया इत्येव पाठः। तादृशविषयतावृत्तेरेव जनकतावच्छेदकत्वादिति च नियमः। अत एव व्याप्यपक्षोभयवैशिष्टावगाहिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यताया अवच्छेदिकाज्ञानवृत्तिर्जातिरित्यनुमितिलक्षणे स्वावच्छिन्नविधेयकत्वादिरूपपरम्परायासम्बन्धत्वे मानाभावान्नवह्नित्वादेः कार्यतावच्छेदकत्वमिति ज्ञानवृत्तित्ववैयर्थ्यमाशङ्क्य-जन्यतावच्छेदकविषयतावृत्तेरेव धर्मस्य विषयताविशेषणतया जन्यतावच्छेदकत्वमिति नियममनुरुध्य-वह्नित्वादिवारकतया तत्सार्थक्यमुक्तम्। एवं कार्यताग्रहीय स्वसमानाधिकरणविषयतैक्यमेव कार्यतैक्यनियामकमनुमितिः परामर्शकार्येति तद्ग्रहेऽनुमितिनिष्ठविषयतैक्याच्च तदैक्यमिति तत्रैवोक्तत्वात्तद्रीत्या इहापि कारणतैक्यं बोध्यम्। तदीयविलक्षणतावच्छेदकतासामानाधिकरण्यञ्च तदवच्छेदकतानियामकमिति नासिद्धिः। तदीयावच्छेदकतासामानाधिकरण्यमात्रनिबन्धनायाञ्च तदवच्छेदकतायां सधर्मस्यान्यूनानतिरिक्तवृत्तित्वापेक्षा अतथाभूतायाञ्च तदपेक्षेति जनकतावच्छेदकतापर्याप्त्यधिकरणत्वेन न विशेषणमात्रानुगम इत्यतोऽपि तथाविधपर्याप्त्युपेक्षा बोध्या। ननु संसर्गविषयतायाः पञ्चमविषयतामध्येऽनिवेशो व्यतिरेकिपरामर्शीय साध्याभावव्यापकहेत्वभावविषयतायाः पञ्चमीत्वानुपपत्तिः तन्निवेशेऽन्वयपरामर्शीयहेतुव्यापकसाध्यविषयतायास्तदनुपपत्तिरित्यत आह। *प्रकृतेति*

In Public domain. Digitization Muthulakshmi Research Academy

तथा च व्यतिरेकव्याप्तिस्थले धूमपर्वतयोर्यस्संयोगस्तन्निष्ठविषयतामन्तर्भाव्य पर्वतविषयतानिरूपित-संयोगविषयतानिरूपितहेतुविषयतानिरूपितप्रतियोगित्वविषयतानिरूपिततादृशहेत्वभावविषयता पञ्चमी, अन्वयव्याप्तिस्थले तु संयोगविषयतामनन्तर्भाव्यतादृशसाध्यविषयापञ्चमीत्यर्थः। व्यतिरेकि-परामर्शीय विषयतायाश्चतुर्थविषयतानिरूपितत्वेऽन्वयपरामर्शीय विषयतायास्तन्निरूपितत्वं दृष्टान्तः। तेन विनिगमनाविरहेण पक्षविशेष्यतानिरूपितसांसर्गिकविषयतानिरूपितहेतुविषयतेत्यादिक्रमेण तद्विशेष्यतानिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुविषयतेत्यादिक्रमेण च कार्यकारणभावाद्वयोः अपि पञ्चमात्वोपपत्तिः। एवं सत्याधेयताविषयताया अननुगमापत्तिरिति चेत्। का क्षतिः। प्रतिज्ञा-जन्यबोधे तदभानात्। प्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणधर्मवान् पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायामव्याप्तिः। धूमव्यापकवह्निसमानाधिकरणधूमवान् प्रमेयत्वव्यापकवाच्यत्वसमानाधिकरण-धर्मवान् पर्वत इति परामर्शीय पक्षतावच्छेदककोटिप्रविष्टपञ्चमविषयतांशे विशेषणविधयानुमिति-जनकतावच्छेदकतापर्याप्त्यधिकरणं यत्प्रमेयत्वव्यापकवाच्यत्वविषयतात्वं तद्वद्विषयतायाः प्रतिज्ञा-जन्यबोधे सत्त्वादिति पक्षतावच्छेदकावच्छिन्नत्वनिवेशः। तत्रापि पक्षतावच्छेदकनिष्ठावच्छेदकत्वम् आदाय तद्दोषतादवस्थ्यवारणाय पक्षविषयतानिरूपितावच्छेदकत्वान्यविषयतालाभार्थं तन्निवेशः। यदि तु पक्षतावच्छेदकप्रकारतायां पक्षतावच्छेदकावच्छिन्नत्वविशिष्टविशेष्यतानिरूपितत्वं नाङ्गीक्रियते। अन्यथा स्वस्य स्वधर्मितावच्छेद-कतापत्तेः। किन्तु हेतुत्वादिप्रकारतायामेव। तदा तथैव विवक्षणीयं न तु अवच्छेदकतान्यत्वमिति। यत्तु पर्वतत्वव्यापकद्रव्यत्ववान् पर्वतो वह्निमान् धूमादित्यादौ वह्निव्याप्यधूमवत्पर्वतत्वव्यापकद्रव्यत्ववत्पर्वतकालीनोयमिति ज्ञानमादायाव्याप्तेः पक्षतावच्छेदकाव-च्छिन्नत्वमुक्तमिति। तन्न। तस्य पक्षमुख्यविशेष्यकत्वाभावेनाजनकत्वात्। एवं धूमव्यापकसमानाधि-करणधूमवान्पक्ष इति ज्ञानस्याजनकत्वान्नपर्वतो धूमव्यापककालीनवह्निमानित्याद्यसङ्ग्रहः।

अथैवमपि उक्तस्थले पक्षविषयतानिरूपितावच्छेदकतान्यसंसर्गविषयतानिरूपितधर्मविषया -निरूपिताधेयत्वविषयतानिरूपितविषयतायां पञ्चम्यां प्रमेयत्वव्यापकवाच्यत्वाधिकरणविषयतात्वम् इति तद्वद्विषयतावत्त्वेनाव्याप्तिरेव। एवं प्रमेयत्वव्यापकवाच्यत्ववत् ज्ञेयत्ववदभिधेयत्ववत्पर्वतो वह्नि-मानित्यादिप्रतिज्ञायामवच्छेदकत्वान्यसंसर्गविषयतामादाय प्रमेयत्वव्यापकवाच्यत्वविषयतापञ्चम्येवे-त्यव्याप्तिः। न च द्वितीयविषयतायां संसर्गतान्यत्वं निवेशयितुं शक्यते व्यतिरेक्युदाहरणातिव्याप्तेः। चतुर्थविषयतायामभावावृत्तित्वकल्पे संसर्गीभूत-व्यतिरेकव्याप्तिघटकप्रतियोगित्वस्य संसर्गत्वात्। प्रतियोगित्वविषयतामपरिगृह्य चेद्वार्यते तदा वह्न्यभावव्यापकमेयत्ववान्पर्वतो वह्निमानिति प्रतिज्ञा-व्याप्तेः। एतेन पक्षतावच्छेदकताघटकसंसर्गेऽपि संसर्गतान्यत्वोक्तावपि न निस्तारः। यत्र पक्षतावच्छे-

In Public domain. Digitization Muthulakshmi Research Academy

पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितहेतुविषयतानिरूपिताधेयत्वविषयितानिरूपिताधिक-रणविषयतानिरूपितत्ववत् व्यतिरेकिपरामर्शीयसाध्याभावव्यापकत्वावच्छिन्नहेत्वभाव-विषयताया अपि तादृशविशेष्यतानिरूपितसंसर्गीयविषयतानिरूपितहेतुविषयतानिरूपित-प्रतियोगित्वविषयतनिरूपितत्वेन साध्याभावव्यापकताविशिष्टहेत्वभावविषयतात्वस्यापि हेतु-व्यापकताविशिष्टसाध्यविषयतात्ववन्निरुक्तविषयत्वे विशेषणविधया अनुमितिजनकतावच्छेद-कतायाः प्रार्याप्त्यधिकरणत्वात्।

यद्यपि यथा परम्परया पक्षविशेष्यत्वानिरूपितोदाहरणजन्यबोधीयहेतुव्यापकतावि-शिष्टसाध्यादिविषयता नानुमितिजनकतावच्छेदिका तथा तन्निरूपितव्यापकत्वादिविषयतापि

---

दकहेत्वोरेक एव संसर्गस्तत्र व्यतिरेक्युदाहरणावारणादिति चेन्न। अवच्छेदकतानिरूपितसंसर्गतान्य-त्वोपादानात्। धूमवान् वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवानित्यादिपरामर्शे अवच्छेदकतानिरू-पितप्रकारतानिरूपितसंसर्गतयोर्भेद एव। न च प्रमेयत्वव्यापकवाच्यत्ववद्घटकालीनपर्वतो वह्निमान् प्रमेयत्वव्यापकवाच्यत्ववज्ज्ञेयत्ववद्धूमादित्यादौ नीलधूमत्वादेर्हेतुतावच्छेदकतामते प्रतिज्ञायामव्याप्तिः वह्निव्याप्य तथाविध धूमवान्पक्ष इति परामर्शीय पक्षविषयतानिरूपितावच्छेदकत्वान्यधूमविषयता-निरूपितसंसर्गविषयतानिरूपितज्ञेयत्वविषयतानिरूपितप्रमेयत्वव्यापकवाच्यत्वविषयतायाः पञ्चमीत्वा-दिति वाच्यम्। तृतीयतुरीयविषयतयोरवच्छेदकतान्यत्वोपादानात्। यत्तु प्रमेयत्वव्यापकवाच्यत्ववत् वह्निकालीनह्रदो निर्धूमो मेयत्वव्यापकवाच्यत्ववद्वह्न्यभावादित्यादौ प्रतिज्ञायां धूमव्यापकतथाविध-वह्न्यभाववान् पक्ष इति व्यतिरेकपरामर्शीयपक्षविषयतेत्त्यादिक्रमेण मेयत्वव्यापकवाच्यत्वविषयतायाः पञ्चमीत्वादव्याप्तिरतः चतुर्थविषयतायां व्यापकत्वविषयत्वानिरूपितत्वं देयं तथा च पक्षविषयता-निरूपितसंसर्गविषयतानिरूपितहेतुविषयतानिरूपितप्रतियोगित्वविषयतायाश्चतुर्थ्याः व्यापकत्वविषय-त्वानिरूपितत्वेऽपि पञ्चम्याव्यापकताद्वयविशिष्टवह्निविषयताया सत्त्वान्नातिव्याप्तिरिति। तन्न। अभावा-वृत्तित्वकल्पे आलोकवह्निकालीनह्रदो निर्धूमालोकव्यापकवह्न्याभावदित्यादौ द्वितीयहेतुविषयतामादा-याव्याप्तितादवस्थ्यात्। अत्र गुरुधर्मस्य प्रतियोगितानवच्छेदकतया तादृशवह्न्यभावरूपहेतुरेवाप्रसिद्ध इति बोध्यम्। उक्तरीत्यानुगमेऽप्युदाहरणेऽतिव्याप्तिमाशङ्कते। ***यद्यपीति*** अनिरूपितान्तं हेतुगर्भं धूमव्यापकवह्निसमानाधिकरणधूमवान् पक्ष इत्येव जनकज्ञानं तत्र परम्परया पक्षविषयतानिरूपिताया हेतुव्यापकताविशिष्टसाध्यादिविषयता सा जनकतावच्छेदिका, अतो महानसं धूमवद्धूमव्यापकवह्निम-न्महानसान्यच्च धूमवद्धूमव्यापकवह्निमच्चेत्युदाहरणार्थबोधीया सा नावच्छेदिका पक्षविषयतया अनि-

In Public domain. Digitization Muthulakshmi Research Academy


न तथेति तदीयसाध्यादिविषयताविशेषणतया व्यापकत्वविषयत्वनिरूपितत्वस्यानुमिति-जनकतावच्छेदकतावच्छेदकप्रवेशो न सम्भवति। जनकतावच्छेदकविषयतावृत्तेरेव धर्मस्य तादृशविषयताविशेषणतया जनकतावच्छेदकतावच्छेदकत्वसम्भवादिति निरुक्तपक्षविषयता पञ्चमविषयतांशे विशेषणतया अवच्छेदकत्वपर्याप्त्यधिकरणं यत्साधनादिव्यापकत्वविषयता-निरूपितत्वसहितं साध्यादिविषयतात्वं तन्नोदाहरणजन्यबोधीयसाध्यादिविषयतासाधारणम्। तथा चोदाहरणेऽतिव्याप्तिर्दुर्वारैव। तथापि निरुक्तजनकतावच्छेदकतावच्छेदकतापर्याप्त्य-धिकरणधर्मावच्छिन्नविषयत्वावच्छिन्ना या प्रतिवन्धकता तदवच्छेदकविषयतात्वेनोदाहरण-जन्यबोधीयहेतुव्यापकसाध्यादिविषयतायाः सङ्ग्रहो वोध्यः। अनुमितिजनकतावच्छेदकपरा-मर्शीयसाध्यादिविषयतायाः हेतुव्यापकत्वादिविषयतानिरूपितसाध्यादिविषयतात्वेन साध्यं हेतुव्यापकं नवेत्यादिसंशयप्रतिवन्धकतावच्छेदकत्वात् तादृशप्रतिवन्धकतायां तादृश-

---

रूपितत्वादिति भावः। *तन्निरूपितेति* पक्षविशेष्यत्वानिरूपितसाध्यविषयतानिरूपितेत्यर्थः। व्यापकत्वविषयतायाः परामर्शीयत्वविषयिता अनतिरिक्तत्वभ्रमेण तद्विशिष्टसाध्यविषयतायाः जनकतावच्छेदकप्रवेशशङ्कावारणाय। *तदीयेति* उदाहरणजन्यबोधीयेत्यर्थः। *तन्नेति* न च हेतु-व्यापकताविशिष्टसाध्यादिविषयतात्वं परामर्शीयविशिष्टसाध्यविषयतावृत्त्यनुमितिजनकतानिरूपित-निरुक्तावच्छेदकतापर्याप्त्यधिकरणं तच्चोदाहरणजन्यबोधीय विशिष्टसाध्यादिविषयतासाधारणमेव विशिष्टसाध्यादिरूपविषयताभेदादिति वाच्यम्। भ्रमात्मकपरामर्शसाधारण्याय तादृशविशिष्टघटक-तत्तत्पदार्थविषयताकूटस्यैव परस्परनिरूप्यनिरूपकाभावापन्नस्य जनकतावच्छेदके निवेशनीयत्वात्। एवञ्च तादृशहेतुव्यापकत्वविषयतानिरूपितत्वसहितसाध्यादिविषयतात्वघटिकाया जनकतावच्छेदक-धर्मघटकपञ्चमविषयतानिष्ठनिरूपितत्वव्यक्तेरेवानुमितिजनकतावच्छेदककोटिप्रविष्टतया तादृशव्यक्ते-र्भिन्नतयोदाहरणजन्यबोधीयविषयतायां तदसत्त्वेनातिव्याप्तिरस्यैवेति भावः। *निरुक्तेति* न च तादृश -पञ्चमविषयत्वावच्छिन्नमेव प्रतिबन्धकतायां निवेश्यं किन्तादृशधर्मवद्विषयत्वावच्छिन्नत्वेनेति वाच्यम्। तथा सति मुख्यत्वसत्त्वेऽपि गोत्वाभावः प्रमेयत्वव्यापकवाच्यत्ववत्सास्नाभाववान् गोत्वा-भावादित्यादौ प्रतिज्ञायामव्याप्तेः। तत्र तादृशपञ्चमविषयतानिष्ठा सास्नाभावः प्रमेयत्वव्यापकवाच्यत्व-वान्नवेति संशयनिरूपितप्रतिवन्धकतावच्छेदकतापि भवतीति तादृशधर्मरूपेण तादृशविषयतानिष्ठ-प्रतिबन्धकतावच्छेदकत्वप्रवेशात्। संशयाय प्रतिबन्धकतामादाय पञ्चमविषयतायां तदवच्छेदकत्वं प्रदर्श्य तदुदाहरणजन्यबोधीयव्यापकत्वविषयतायामुपपादयति। *अनुमितीति* अत्र वदन्ति योऽयं

In Public domain. Digitization Muthulakshmi Research Academy

रूपेणोदाहरणजन्यवोधीयसाध्यादिविषयताया अप्यवच्छेदकत्वात्। मुख्यविशेष्यतानिवेशाद्गोत्वाभावः प्रमेयत्वव्यापकवाच्यत्ववत्सास्नाभाववान् गोत्वाभावादित्यत्र तादृशविशिष्टसाध्यक-प्रकृतानुमितिजनकपरामर्शीयस्वात्मकपक्षविशेषणतापन्नगोत्वाभावविषयतानिरूपिताधेयत्व-विषयतानिरूपिताधिकरणविषयतानिरूपितसास्नाभावविषयतानिरूपितविषयतांशे विशेषण-विधया अवच्छेदकतावच्छेदकतायाः पर्याप्त्यधिकरणधर्मवत् प्रमेयत्वव्यापकवाच्यत्वविषयता-याः प्रतिज्ञाजन्यवोधे सत्त्वेपि न क्षतिः। (जनकता च साध्यव्याप्यत्वावच्छिन्नधर्मिताकान्य-परामर्शीया ग्राह्या। तेन तद्धर्मिकपरामर्शमादायापि नोक्तप्रतिज्ञायामव्याप्तिः।) न च साध्याभावव्यापकहेत्वभावप्रतियोगिहेतुमानिति परामर्शीयपक्षविशेष्यतानिरूपितहेतुविषयता-निरूपितप्रतियोगित्वविषयतानिरूपिताभावविषयतानिरूपितव्यापकत्वविषयताया अपि निरु-क्तविषयतात्वात् तादृशविषयत्वविशेषणतयाऽवच्छेदकीभूतं साध्याभावव्यापकत्वविषयत्व-मपीति वह्न्यभावव्यापकप्रमेयत्ववान्पर्वतो वह्निमानित्यादिप्रतिज्ञायामव्याप्तिरिति वाच्यम्।

---

प्रतिवन्धकताघटितपरिष्कारः स न सर्वसम्मतः तथाहि व्यापकत्वविषयतानिरूपितत्वस्य भिन्नत्वेऽपि निरूपितत्वस्यानुगततया तेन रूपेण तस्य प्रवेशे क्षत्यभावात्। अन्यथा निरूपितत्वस्य भिन्नत्वे भ्रम-प्रमासाधारणैकप्रतिवन्धकतापि दुर्वचा स्यात्। तथा च हेतुविषयतानिरूपितव्यापकत्वविषयतानिरूपित-साध्यविषयतात्वमनुगतमेवेति नानुपपत्तिरिति तादृशपरिष्कारवैयर्थ्यमिति। *मुख्येति* *स्वात्मके-ति* स्वं गोत्वाभावः। अत्र गोत्वाभावरूपहेतुविषयतामादाय पञ्चमीग्राह्या। *विषयताया इति* तथा च परामर्शीयायास्तस्याः प्रतिवन्धकतावच्छेदकत्ववत् प्रतिज्ञाजन्यवोधीय प्रमेयत्वव्यापकवाच्यत्व-विषयतायाः प्रतिवन्धकतावच्छेदकत्वमित्याशयः। न च साध्यतावच्छेदकांश एव हेतुव्यापकताव-च्छेदकत्वावगाहिपरामर्शस्यैव जनकतया नाव्याप्तिरिति मुख्यत्वं व्यर्थम्। एकव्यक्तिसाध्यके भेदघटित-व्यापकताभिप्रायेण तदुक्तेः। एवं लिङ्गविशेष्यकपरामर्शस्यापि हेतुत्वे मुख्यत्वनिवेशेऽप्यनिस्तारात् पक्षविशेष्यकपरामर्श एव हेतुरिति नव्यमते नायमनुगमो वोध्यः। अत्र वदन्ति। प्रमेयत्वव्यापक-वाच्यत्ववत्सास्नाभावव्याप्यगोत्वाभाववान् गोत्वाभाव इति परामर्शीयगोत्वाभावरूपलिङ्गविषयताया उपादानेऽपि न क्षतिः हेत्वंशे विशेषणीभूतव्याप्तेः प्रकारतावच्छेदकतया तद्विषयतायामवच्छेदकतान्य-त्वाभावात्। विशेष्यतावच्छेदकताभेदं निवेश्य मुख्यत्वसार्थक्यस्य प्रक्षालनाद्धीति[32]न्यायग्रस्तत्वात्। तथा च यथा श्रुताभिप्रायेणेदं प्रयोजनमिति। अत्रेदं चिन्त्यम्। पर्वत आलोकव्यापकवह्निमान् धूमादि-

---

32. प्रक्षलनाद्धिपङ्कस्य दूरादस्पर्शनं वरम् इति।

In Public domain. Digitization Muthulakshmi Research Academy


त्यादौ प्रतिज्ञायामव्याप्तिः। धूमव्यापकालोकव्यापकवह्निसमानाधिकरणधूमवान् पर्वत इति परामर्शीय-पर्वतत्वावच्छिन्नमुख्यविशेष्यतेत्यादिक्रमेण या पञ्चमी आलोकव्यापकवह्निविषयता तदंशे विशेषण-विधया जनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणं यदालोकव्यापकवह्निविषयतात्वं तद्विषयता-शून्यत्वस्य तज्जन्यशाब्दबोधेऽसत्त्वात्। अथ साध्यतावच्छेदकावच्छिन्नविषयतानिरूपिताधिकरण-विषयतानिरूपिताधेयत्वविषयतानिरूपितहेतुविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालि-निश्चयत्वाव्यापिका या निरुक्तपञ्चमीविषयता तदंशे विशेषणविधया अनुमितिजनकतावच्छेदकता-पर्याप्त्यधिकरणं तद्विषयताशून्यत्वनिवेशान्नोक्तप्रतिज्ञायामव्याप्तिः। आलोकव्यापकत्ववह्निविषयतायाः तादृशनिश्चयत्वव्यापकत्वात्। हेतुव्यापकत्वविशिष्टसाध्यतावच्छेदकावच्छिन्नविषयतायाः साध्याभाव-व्यापकत्वविशिष्टहेत्वभावविषयतायाश्च तादृशनिश्चयत्वाव्यापकत्वात्तत्र लक्षणसमन्वयः। केवलसाध्य-समानाधिकरणहेतुमान् पक्षतावच्छेदकविशिष्टपक्ष इति ज्ञानेऽपि तादृशनिश्चयत्वसत्त्वेन तत्र तादृश-विशिष्टविषयताया असत्त्वादिति चेन्न। तथा सति मुख्यपदस्य पक्षतावच्छेदकावच्छिन्नेत्यस्य किञ्चिद्व्या-पकत्वविशिष्टनिरूपितत्वस्य दीधितिकारोक्तसाध्याताहेतुतावच्छेदकोपादानस्यच वैयर्थ्यापत्तेः। तथाहि गोत्वाभावः प्रमेयत्वव्यापकवाच्यत्ववत्सास्नाभाववान् गोत्वाभावादित्यादौ प्रमेयत्वव्यापकत्व-विशिष्टवाच्यत्वविषयतायाः प्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणधर्मवानित्यादौ तादृशवाच्यत्व-विषयताया वह्न्यभावव्यापकप्रमेयत्ववान्पर्वतो वह्निमानित्यादौ वह्न्यभावव्यापकत्वविशिष्टप्रमेयत्व-विषयताया द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवानित्यादौ संयोगव्यापकत्वविशिष्टद्रव्यत्वविषयताया गुण-व्याप्यरूपवानयं स्पर्शवानित्यादौ रूपव्यापकत्वविशिष्टगुणविषयतायाश्च तादृशनिश्चयत्वव्यापकत्वात्। किन्तु तादृशनिश्चयत्वाव्यापकीभूतहेतुतावच्छेदकावच्छिन्नव्यापकताविशिष्टसाध्यतावच्छेदकावच्छिन्न-विषयतैवेति तामादाय तत्र लक्षणस्यैव गमनादिति। किञ्च गोत्वाभावः गोत्वाभावव्यापकवाच्यत्व-वत्सास्नाभाववान् गोत्वाभावादित्यादौ प्रतिज्ञायामव्याप्तिः। तादृशनिश्चयत्वाव्यापिकाया गोत्वाभाव-व्यापकताविशिष्टसाध्यतावच्छेदकावच्छिन्नविषयता तदंशे यथा तादृशविषयतात्वमवच्छेदकतापर्या-प्त्यधिकरणं तथागोत्वाभावव्यापकताविशिष्टविषयतात्वरूपसामान्यधर्मोऽपि तत्पर्याप्त्यधिकरणमिति तत्प्रतिज्ञाजन्यबोधे तद्विषयताशून्यत्वासत्त्वात्। न च तदंशे अवच्छेदकतापर्याप्त्यधिकरणधर्म एव तादृशनिश्चयत्वाव्यापकत्वेन विशेषणीयः। गोत्वाभावव्यापकत्वविशिष्टसाध्यतावच्छेदकावच्छिन्न-विषयतांशे तादृशसामान्यधर्मस्यावच्छेदकतापर्याप्त्यधिकरणत्वेऽपि तादृशनिश्चयत्वाव्यापकतावच्छेद-कत्वविरहात्। तादृशविषयतात्वस्यैव तादृशत्वेन तद्वद्विषयताशून्यत्वस्य तत्र सत्त्वादेव नातिव्याप्तिरिति वाच्यम्। एवमपि गोत्वाभावव्यापकवाच्यत्ववत्सास्नाभाववानिति प्रतिज्ञायामव्याप्तेर्दुर्वारत्वात्। यत्र

In Public domain. Digitization Muthulakshmi Research Academy

किञ्चिद्व्यापकत्वविशिष्टविषयतांशे विशेषणतयाऽवच्छेदकत्वस्यैव निवेशनीयत्वात्। वस्तुतस्तु चतुर्थविषयतायामभावनिष्ठप्रकारताभिन्नत्वस्य निवेशनीयत्वान्न कोऽपि दोषः। व्यापकत्व-विषयतायाश्चातथात्वात् व्यतिरेकपरामर्शीयपञ्चमविषयताया एव अभावप्रकारत्वात्।[33]

प्रमेयवत्सास्नाभावसमानाधिकरणगोत्वाभाववान् गोत्वाभाव इति गोत्वाभावव्यापकवाच्यत्वस्य प्रमेयत्वेन भावं तत्र गोत्वाभावव्यापकताविशिष्टवाच्यत्वत्वावच्छिन्नविषयत्वासत्त्वेन तादृशविषयता-त्वस्य तादृशनिश्चयत्वाव्यापकतावच्छेदकतया पञ्चमविषयतायामवच्छेदकतापर्याप्त्यधिकरणत्वेन चानुगततद्वद्विषयताशून्यत्वस्य तत्राभावात्। एवं प्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणधूमवान् प्रमेय-वानिति प्रतिज्ञायामव्याप्तिः। यत्र प्रमेयत्वव्यापकवाच्यत्वस्य प्रमेयत्वेन भानं तत्र प्रमेयत्वसमानाधि-करणधूमवान् प्रमेयसमानाधिकरणधूमवानिति निश्चये तादृशनिश्चयत्वसत्त्वेन प्रमेयत्वव्यापकत्व-त्वावच्छिन्नप्रकारतानिरूपितवाच्यत्वत्वावच्छिन्नविशेष्यताया असत्वेन तादृशविशेष्यतात्वस्योक्त-रूपाक्रान्तत्वात्।

अथ साध्यतावच्छेदकघटकतावच्छेदकतातिरिक्तानवच्छिन्नावच्छेदकताकसाध्यविषयता-निरूपिताधिकरणविषयतेत्यादिक्रमेण तादृशनिश्चयत्वं निरुच्य तादृशनिश्चयत्वाव्यापकतावच्छेदकत्वं वाच्यम्। उक्तस्थले प्रमेयत्वस्य घटकतानवच्छेदकतया न दोषः। एवं पक्षतावच्छेदकतावच्छेदकता-तिरिक्तानवच्छिन्नावच्छेदकताकपक्षविशेष्यताशालिनिश्चयत्वं निर्वाच्यमतो नोक्तदोष इति चेन्न। एवमपि गोत्वाभावो गोत्वाभावव्यापकप्रमेयत्ववत्सास्नाभाववान् प्रमेयत्वव्यापकवाच्यत्वसमानाधि-करणधूमवान्पर्वतो वह्निमानित्यादिप्रतिज्ञायामव्याप्तेर्वज्रलेपत्वात्। प्रमेयत्वस्यापि साध्यतावच्छेदकता-घटकतावच्छेदकत्वात्। पक्षतावच्छेदकघटकतावच्छेदकत्वाच्च। अथ (अत्राहुः) यद्रूपावच्छिन्नस्य यस्य साध्यतावच्छेदकघटकत्वं तद्रूपातिरिक्तरूपानवच्छिन्नतन्निष्ठावच्छेदकताकसाध्यविषयतेत्यादि-क्रमेण तादृशनिश्चयत्वं वाच्यम्। तथाचोक्तस्थले प्रमेयत्वव्यापकवाच्यत्वत्वरूपेण तादृशरूपस्य साध्यतावच्छेदकघटकतयोक्तनिश्चयत्वस्य वाच्यत्वातिरिक्तप्रमेयत्वावच्छिन्नवाच्यत्वनिष्ठावच्छेदकता-कसाध्यनिष्ठविषयताकतया तादृशनिश्चयत्वाव्यापकत्वस्यासत्त्वान्न दोषः। एवं यद्यद्रूपावच्छिन्नस्य यस्य यस्य पक्षतावच्छेदकघटकत्वं तद्रूपातिरिक्तानवच्छिन्नतत्तन्निष्ठावच्छेदकताकपक्षनिष्ठविशेष्यता-शालिनिश्चयत्वं निरुच्य तादृशनिश्चयत्वाव्यापकतावच्छेदकत्वं वाच्यमिति चेत्तर्हि पक्षतावच्छेदका-वच्छिन्नमुख्यविशेष्यतेत्यादिनिवेशादेवोपपत्तेः (निवेशापेक्षया किं लाघवम्)। न च तादृश-परिष्कारानादरे आलोकव्यापकवह्निसाध्यकप्रतिज्ञायामव्याप्तिरिति वाच्यम्। वह्निव्याप्यधूमवान्पर्वत

33. अभावप्रकारतारूपत्वात् इति पाठान्तरम्।

In Public domain. Digitization Muthulakshmi Research Academy

इति परामर्शीयधूमव्यापकवह्नित्वावच्छिन्नविषयतारूपा या पञ्चमी तस्यां वह्नित्वावच्छिन्नविषयतात्वं धर्मस्तद्वद्विषयताशून्यत्वासत्वादव्याप्तिरतोऽवच्छेदकतापर्याप्तिरुपात्ता सा च हेतुव्यापकत्वादिविशिष्ट-प्रकृतसाध्यादिविषयतात्वे एवेति पर्वत आलोकव्यापकवह्निमानिति प्रतिज्ञायामव्याप्तिपूर्वपक्ष एव नावतरतीत्यलं समाधानप्रत्याशयेति। *किञ्चिदिति* पञ्चमविषयतायां व्यापकत्वावच्छिन्नत्वं देयमित्यर्थः। एवञ्च हेतुपक्षयोस्सम्बन्धविषयतामन्तर्भाव्यैव पञ्चमीति नाव्याप्तिः। ननु पक्षमुख्य-विशेष्यतामारभ्य चतुर्थी या विषयता तदंशे विशेषणविधया जनकतावच्छेदकतापर्याप्त्यधिकरणत्वेन धर्मोऽनुगमनीयः। स च हेतुव्यापकसाध्यवद्विषयतात्वं साध्याभावव्यापकहेत्वभावविषतात्वं चेत्युदाह-रणस्यापि वारणम्। एवञ्च किञ्चिद्व्यापकत्वविशिष्टनिरूपितत्वमपि न देयमिति चेन्न। एवं सति यो यो धूमवानित्याद्युदाहरणे धूमवान् धूमव्यापकवह्निमानिति बोधस्य प्राचां मते सिद्धतया तद्वारणेऽपि यत्र धूमस्तत्र वह्निरित्युदाहरणे धूमव्यापको वह्निर्महानसादाविति बोधस्य तादृशविषयताशून्यस्य जनके अतिव्याप्तेः। नन्वेतत्कल्पे उत्तरकल्पे च वह्न्याभावव्यापकीभूताभाववान् पर्वतो वह्निमान् धूमादित्यादौ वह्न्यभावव्यापकधूमाभावप्रतियोगिमान् पक्ष इति परामर्शीय पक्षविषयतानिरूपितसंसर्गविषयता-निरूपितहेतुविषयतानिरूपितप्रतियोगित्वविषयतानिरूपिताया तादृशपञ्चमीवह्न्यभावव्यापकाभाव-विषयता तस्याः प्रतिज्ञाजन्यबोधे सत्त्वादव्याप्तिरिति चेन्न। तत्पर्याप्तेर्धूमाद्यघटिततादृशविषयतात्वे अनुपगमात्। लाघवादाह। *वस्तुतस्त्विति* *प्रकारत्वात* प्रकारतारूपत्वात्। अथैतत्कल्पे गोत्वं प्रमेयं गोत्वाभावादित्यादौ यत्र गोत्वाभावस्तत्र प्रमेयत्वव्याप्यगोत्वाभाववद्गोत्वमिति परामर्शीयपक्ष-मुख्यविशेष्यतामारभ्य संसर्गविषयत्वाघटितचतुर्थविषताया हेत्वभाववृत्तितया तद्घटितपञ्चमविषताधि-करणविषयतैवेति तादृशो धर्मो हेतुव्यापकत्वविशिष्टसाध्यवद्विषयतात्वमेव तदवच्छिन्नविषयताशून्य-त्वस्योक्तोदाहरणजन्यबोधे सत्त्वात्। न च चतुर्थविषयतायां हेत्वभावत्वानवच्छिन्नत्वं विवक्षितम्। तथा सति धूमव्यापकमेयत्ववान् ह्रदो निर्धूमो निर्वह्नित्वादित्यादौ प्रतिज्ञायामव्याप्तेः। धूमव्यापकवह्न्य-भाववान् तादृशह्रद इति परामर्शीयाया हेतुसंसर्गविषयत्वाघटितचतुर्थविषयताया वह्नित्वावच्छिन्नाया हेत्वभावत्वानवच्छिन्नत्वात्। तादृशचतुर्थविषयतानिरूपितपञ्चमीधूमव्यापकत्वविषयतापीति प्रतिज्ञा-जन्यबोधस्य तच्छून्यत्वाभावात्। तृतीयविषयतायास्संसर्गतान्यत्वनिवेशेऽपि नैतद्दोषवारणसम्भवः। हेतुसंसर्गविषयताघटितप्रतियोगित्वसंसर्गविषयत्वाघटितचतुर्थ्या वह्नित्वावच्छिन्नविषय-तावतापि। तया हेत्वभावत्वानवच्छिन्नत्वात्। नापि चतुर्थविषयतायां साध्याधिकरणप्रतियोगित्वान्यतरवृत्तित्वं विवक्षितमिति शङ्क्यम्। तथाप्युक्तस्थले धूमव्यापकत्वस्य साध्यवत्तया तन्निष्ठचतुर्थविषयतानिरूपित-पञ्चमीधूमवन्निष्ठाभावप्रतियोगित्वविषयता तस्यां तादृशो धर्मस्तथाविधविषयतात्वं तद्वद्विषयता-

In Public domain. Digitization Muthulakshmi Research Academy

शून्यत्वाभावादव्याप्तेर्वज्रलेपत्वात्। अथ हेतुभूताभावप्रतियोगितावच्छेदकानवच्छिन्नत्वं चतुर्थविषयतायां विवक्षितमिति चेत्। एवमपि हेतुसंसर्गविषयत्वाघटितनिरुक्तविशेषणाक्रान्तचतुर्थीधूमव्यापकत्वविषयता तन्निरूपितपञ्चमीधूमवद्वृत्त्यभावप्रतियोगित्वविषयतेत्युक्तरीत्याऽव्याप्तेः। न च तृतीयविषयतायां हेत्वाधेयत्वान्यतरवृत्तित्वं देयं प्रकृते च तृतीयावह्निवृत्तिरेवेति न दोष इति वाच्यम्। पृथिवीत्वव्यापकमेयत्ववद्गगनं पृथिवीत्वाभाववत् अवृत्तित्वादित्यादौ पृथिवीत्वव्यापकाधेयताशून्यं तादृशगगनमिति परामर्शीय तृतीयविषयताया आधेयताया आधेयतावृत्तितया तन्निरूपिता चतुर्थव्यापकत्वनिष्ठविषयता-यास्तादृशधर्मानवच्छिन्नतयोक्तक्रमेण प्रतिज्ञायामव्याप्तेः। न च चतुर्थविषयतायां व्यापकत्वत्वहेतु-प्रतियोगितावच्छेदकान्यतरधर्मानवच्छिन्नत्वमेव निवेश्यते तथा चोक्तस्थले आधेयत्वविषयतैव पञ्चमीति नाव्याप्तिरिति वाच्यम्। वाच्यत्वं स्वरूपसम्वन्धावच्छिन्नघटवृत्तित्ववत् स्वरूपसम्वन्धावच्छिन्नप्रतियोगित्वविशेषाभावदित्यादौ व्यतिरेकिपरामर्शीयायास्तथाविध चतुर्थविषयताया अप्रसिद्धेर्व्यतिरेक्युदाहरणादावतिव्याप्तेः। एवं पर्वतो वह्निमान् वह्निसमानाधिकरणधूमादित्यादौ हेतुतावच्छेदकघटकवह्निविषयतात्वं पञ्चमीविषयतावृत्तितादृशो धर्मस्तद्वद्विषयताया एव वोधे सत्त्वात्। पर्वतो वह्निमान् इति प्रतिज्ञायामव्याप्तिरतो द्वितीयविषयतानिष्ठहेतुतावच्छेदकप्रकारतात्वसंसर्गतात्वान्यतरधर्मवन्निष्ठनिरूपकताकविषयतानिष्ठाधेयत्वत्वावच्छिन्नविषयतात्वहेतुतावच्छेदकावच्छिन्नविषयतात्वान्यतरधर्मावच्छिन्ननिरूपकताकविषयतेत्यादिक्रमेणावश्यं वाच्यतया धूमव्यापकमेयत्ववान् ह्रदो निर्धूमो निर्वह्नित्वादित्यादौ धूमव्यापकवह्न्यभाववानिति परामर्शीय पक्षमुख्यविशेष्यतामारभ्य पञ्चमी धूमसमानाधिकरणाभावप्रतियोगित्वविषयतैवेत्युक्तक्रमेण प्रतिज्ञायामव्याप्तेः इति चेत्। गोत्वं प्रमेयं गोत्वाभावादित्यादौ गोत्वाभावव्यापकप्रमेयत्वसमानाधिकरणगोत्वाभाववद्गोत्वमिति दृष्टान्तगोचरपरामर्शस्य या पञ्चमीविषयता तन्निष्ठतादृशधर्मवद्विषयताशून्यत्वस्य यत्र गोत्वाभावस्तत्र प्रमेयत्वमित्युदाहरणेऽसत्त्वान्न प्रथमो दोषः। वस्तुतो हेत्वभावाप्रवेशस्य वाच्यतया नैतच्छङ्कासमारोहतीति वोध्यम्। तादृशह्रदो निर्धूमो निर्वह्नित्वादित्यादौ धूमव्यापकाभावप्रतियोगिवह्न्यभाववानित्येव परामर्शः कारणमुपगम्यते न तु धूमव्यापकवह्न्यभाववान् इति परामर्शस्तत्र चतुर्थीप्रतियोगित्वविषयतैवेति न द्वितीयोऽपि दोषः। अस्तु वा धूमव्यापकप्रमेयत्ववान् ह्रदो धूमव्यापकवह्न्यभाववान् पृथिवीत्वव्यापकमेयत्ववद्गगनं पृथिवीत्वव्यापकाधेयत्वाभाववदित्यादिपरामर्शादेरपि कारणत्वम्, अभावत्वानवच्छिन्नप्रतियोगित्वरूपसंसर्गविषयतां हेतुसंसर्गविषयताघटितामादाय लक्षणसङ्गतेः। संसर्गविषयत्वाघटितधूमव्यापकत्वविषयतां पञ्चमीमादायोक्तदोष इति चेत्। चतुर्थविषयताया हेतुभूताभावप्रतियोगितावच्छेदकानवच्छिन्नत्वेनापि विशेषणीयत्वात्। वाच्यत्वं घटवृत्ती-

In Public domain. Digitization Muthulakshmi Research Academy



त्याद्युक्तस्थले च घटवृत्तित्वाभावव्यापकप्रतियोगित्वाभाववानिति परामर्शीय चतुर्थविषयतायां प्रतियोगित्वत्वावच्छिन्नविषयताभिन्नप्रतियोगित्वत्वावच्छिन्नप्रतियोगितात्वावच्छिन्नविषयतात्मकतया न दोषः। एवं चतुर्थ्यां अभावरूपव्यापकताविषयताया अभावत्वावच्छिन्नत्वान्न दोषः। एवं व्यापकत्वीयस्वरूपसम्बन्धविषयतामादायाव्याप्तिवारणाय चतुर्थ्यां संसर्गतान्यत्वमपि देयम्। प्रतियोगित्वप्रकारकपरामर्शमादाय तत्प्रसिद्धिर्बोध्या। यदि धूमव्यापकतावच्छेदकवह्नित्वमेव धूमव्यापकत्वम्। तदा तु हेतुसंसर्गवह्निसंसर्गयोरेकतरसंसर्गविषयताघटिता पञ्चमी तथा विध वह्नित्वावच्छिन्नविषयता। हेतुभूताभावप्रतियोगितावच्छेदकावृत्तित्वं चतुर्थविषयतायां निवेश्यं तेन संसर्गविषयत्वाघटितविषयतामादाय चतुर्थ्यां वह्नित्वादिवृत्तित्वेऽपि न क्षतिरिति दिक्। धर्मितावच्छेदकान्यत्वरूपहेतुतावच्छेदककोटिप्रविष्टपदार्थविषयतावारकविशेषणान्न तृतीयदोषः। अभावनिष्ठत्वञ्च अभावत्वावच्छिन्नत्वम्। तेन नाभावपक्षकप्रतिज्ञाया असङ्ग्रहः। अभावत्वं सप्तमपदार्थमात्रवृत्तिनिवेश्यं न तु हेत्वभावत्वादिवैयर्थ्यात्। न चैवं गोत्वाभावः प्रमेयत्वव्यापकवाच्यत्ववत्सास्नाभाववान् गोत्वाभावादित्यादौ मुख्यत्वानुपादानेऽपि गोत्वाभाववद्दचलिङ्गविषयतामादाय चतुर्थ्याः सास्नाभावनिष्ठविषयताया अभाववृत्तितयाऽव्याप्त्यभावान् मुख्यत्वं व्यर्थमिति वाच्यम्। तथापि आधेयत्वं पक्षः। साध्यं पूर्वोक्तमेव आधेयत्वादित्यादौ प्रमेयत्वव्यापकवाच्यत्ववत् सास्नाभावव्याप्याधेयतावदाधेयत्वमिति परामर्शीयव्याप्तिघटकाधेयताविषयतामादायाभावावृत्तिचतुर्थीसंसर्गविषयतावाच्यत्वविषयता च तन्निरूपितपञ्चमीप्रमेयत्वव्यापकवाच्यत्वविषयता व्यापकत्वविषयता वेत्यव्याप्तेर्मुख्यत्वनिवेशात्। *अतिव्याप्त्यभावेति* अन्यथा वह्न्यभावाभावत्वावच्छिन्ने धूमव्यापकतानवगाहित्वे नातिव्याप्त्यापत्तेरिति भावः। द्रव्यत्वव्याप्यसंयोगवानिति तु नोक्तं विशिष्टेऽपि पक्षे संयोगवत्ताया अर्थतो लाभेन हेत्वभिधानाकाङ्क्षाविलयापत्तेः। *द्वितीयेति* रूपत्वावच्छिन्ननिरूपिता इत्यादिः।

अथ पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतेत्याद्यनुगमस्य भट्टाचार्यकृतस्य दीधितिकाराभिप्रेतत्वे एतद्दीधित्यसङ्गतिः। प्रथमे द्रव्यत्वव्याप्यगुणवान् द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवानयमिति परामर्शीयजनकतायामवच्छेदकीभूता पञ्चमीविषयता गुणत्वावच्छिन्ननिरूपितव्यापकत्वविशिष्टद्रव्यविषयतैव न तु संयोगत्वावच्छिन्ननिरूपितव्यापकताविशिष्टद्रव्यत्वावच्छिन्नविषयता तच्छून्यत्वञ्च न प्रतिज्ञाजन्यबोधस्येति हेतुतावच्छेदकपदं व्यर्थम्। एवं द्वितीये स्पर्शव्याप्यरूपवान गुणव्याप्यरूपवानयमिति परामर्शीयजनकतायामवच्छेदकीभूतारूपव्यापकताविशिष्टस्पर्शत्वावच्छिन्नविषयतैव न तु रूपव्यापकताविशिष्टगुणत्वावच्छिन्नविषयतेति साध्यतावच्छेदकपदमपि व्यर्थम्। अथोक्तस्थले तादृशपरामर्शीय पक्षतावच्छेदकीभूततादृशधर्मावच्छिन्नमुख्यविशेष्यतानिरूपिता या धर्मनिष्ठविषयतातन्नि-

In Public domain. Digitization Muthulakshmi Research Academy


रूपिताधेयत्वविषयितानिरूपिताधिकरणविषयतानिरूपितापञ्चमीद्रव्यत्वव्याप्यसंयोगत्वावच्छिन्नविषय-ता एवं द्वितीये रूपव्यापकताविशिष्टगुणविषयतेति तन्निष्ठविषयतात्वस्य जनकतावच्छेदकतापर्याप्त्यधि-करणत्वेन तद्वद्विषयताशून्यत्वाभावादव्याप्तेस्तदुभयोपादानमिति चेन्न। स्वस्य स्वधर्मितावच्छेदकत्वा-पत्त्या द्रव्यत्वव्याप्यसंयोगसमानाधिकरणधर्माद्यवच्छिन्नविशेष्यतानिरूपितप्रकारतायास्तादृशसमाना-धिकरणधर्मादावनङ्गीकारात्। अन्यथा तदुभयोपादानेऽपि प्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणधर्म-वान् पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायामव्याप्तेः। तादृशपक्षतावच्छेदकावच्छिन्नविशेष्यता-निरूपितविषयतायाः पक्षतावच्छेदके उपगमेन तत्क्रमेण प्रमेयत्वव्यापकवाच्यत्वविषयतात्वस्य पर्याप्त्यधिकरणतया तद्वद्विषयताशून्यत्वस्य तज्जन्यबोधेऽसत्त्वात्। नन्वनुमितौ तज्जनकीभूतपरामर्शे वा प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकत्वं न निवेश्यते प्रयोजनाभावात्। तथा चेदन्त्वावच्छिन्नोद्दे-श्यकद्रव्यत्वत्वावच्छिन्नविधेयकानुमितिजनको यः अयं द्रव्यत्वव्याप्य संयोगवानिति इदन्त्वावच्छिन्न-विशेष्यकपरामर्शस्तस्योक्तक्रमेण च पञ्चमी या संयोगत्वावच्छिन्ननिरूपितव्यापकत्वविशिष्टद्रव्यत्व-विषयतातत्वं संयोगत्वावच्छिन्नगुणहेतुकानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणधर्मस्तद्वद्विषयता-शून्त्वस्य प्रथमप्रतिज्ञाजन्यबोधेऽसत्त्वादव्याप्तिरतो हेतुतावच्छेदकावच्छिन्नहेतुकत्वस्यानुमितौ लाभाय, हेतुतावच्छेदकपदोपादायनम्। एवमिदन्त्वावच्छिन्नोद्देश्यको यो गुणत्वावच्छिन्नविधेयकानु-मिति जनकः गुणव्याप्यरूपवानयमिति परामर्शस्तस्योक्तक्रमेण पञ्चम्यां विषयतायां रूपव्यापकता-विशिष्टविषयतात्वं गुणत्वेन स्पर्शविधेयकानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणं तद्वद्विषयता-शून्यत्वस्य द्वितीयप्रतिज्ञाजन्यबोधेऽसत्त्वादव्याप्तिरतस्तत्र साध्यतावच्छेदकावच्छिन्नविधेयकत्व-लाभाय साध्यतावच्छेदकपदोपादानमिति चेन्न। तथा सति प्रमेयत्वव्यापकवाच्यत्वसमानाधिकरण-धर्मवान् पर्वतो वह्निमानिति प्रतिज्ञायामव्याप्तिः। तादृशपरामर्शीय पर्वतत्वावच्छिन्नमुख्यविशेष्यता-मारभ्य पञ्चम्यां प्रमेयत्वव्यापकवाच्यत्वविषयतात्वसत्त्वात्। एवं धूमव्यापकालोकसमानाधिकरण-धूमवान् पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायामव्याप्तिरतः अनुमितौ परामर्शे च प्रकृतपक्षतावच्छेद-कावच्छिन्नविषयकत्वं निवेश्यं तादृशपरामर्शे प्रकृतपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतामारभ्य प्रमेयत्वव्यापकत्वविशिष्टवाच्यत्वविषयता न पञ्चमी किन्तु धूमव्यापकत्वविशिष्टवह्निविषयतैवेति नाव्याप्तिः। न चैवमपि संयोगत्वावच्छिन्नहेतुकाया गुणत्वावच्छिन्नहेतुकायाश्च द्रव्यत्वव्याप्यसंयोग-वद्वृत्तिधर्मवानयं द्रव्यत्ववानित्यनुमितेरेकाकरतया तादृशानुमितिजनकसंयोगत्वावच्छिन्नप्रकारक-परामर्शीय पञ्चमी विषयतामादायाव्याप्तिवारणाय हेतुतावच्छेदकपदं तथा च गुणत्वावच्छिन्नप्रकारक-परामर्शीय पञ्चमीविषयितामादाय नाव्याप्तिरिति वाच्यम्। संयोगत्वावच्छिन्नहेतुकतादृशानुमित्य-

In Public domain. Digitization Muthulakshmi Research Academy


प्रसिद्धेः। द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवानयं द्रव्यत्ववान् संयोगादित्यादिन्यायप्रयोगाभावात्। अत एव दीधितिकृता वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्यादिर्न न्यायप्रयोग इत्युक्तम्। तथा च भट्टाचार्याणां कथमनुगमप्रकार इति। अत्रोच्यते। न्यायप्रयोगासम्भवेन परार्थानुमित्यप्रसिद्ध्या तादृशानुमितिजनकपरामर्शीय निरुक्तपञ्चमविषयताया अप्यप्रसिद्धत्वेन तच्छून्यशाब्दबोधजनकत्व-रूपप्रतिज्ञालक्षणस्योक्तप्रतिज्ञायामव्याप्तेस्तदुपादानम्। तथा चानुमित्यप्रसिद्धावपि गुणत्वावच्छिन्न-हेतुकतादृशपरामर्शानुमितिप्रसिध्यातामादायैव लक्षणगमनान्नाव्याप्तिः। अथवा परार्थानुमितिरेव ग्राह्येति न नियमः किन्तु स्वार्थसाधारणीति संयोगत्वावच्छिन्नहेतुकतादृशपरार्थानुमितेरप्रसिद्धत्वेऽपि संयोगत्वावच्छिन्नहेतुकतादृशस्वार्थानुमितेः प्रसिद्धतया तामादाय तत्प्रतिज्ञायामव्याप्तिरतः हेतुता-वच्छेदकपदं तथा च द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवानयं द्रव्यत्वव्याप्यसंयोगवानिति परामर्शस्य गुणत्वावच्छिन्नाप्रकारत्वेऽपि तादृशधर्मवानयं द्रव्यत्वव्याप्यगुणवानिति परामर्शस्यैव तथात्वे न तदीय-निरुक्तविषयताशून्यबोधजनकत्वान्नाव्याप्तिः। एवं गुणव्याप्यरूपवानयं स्पर्शवान् रूपादित्यादौ गुण-व्याप्यरूपवानयं गुणवानित्यनुमितिजनकपरामर्शमादायाव्याप्तिरतस्साध्यतावच्छेदकपदं, प्रकृत-साध्यतावच्छेदकावच्छिन्नविधेयकत्वलाभार्थमिति। वस्तुतस्तु, हेतुव्यापकताविशिष्टसाध्यविषयता-साध्याभावव्यापकताविशिष्टहेत्वभावविषयतयोर्न ताद्रूप्येण निवेशः। किन्तु पञ्चमविषयतात्वे एव सा च तादृशसाध्यादिविषयता तदन्या वा भवतु परन्तु न यथाकथञ्चित् पञ्चमविषयतात्वेन किन्तु पक्षतावच्छेदकावच्छिन्नेत्यादिक्रमेण तथात्वेनेति सूचनार्थं तत्पदम्। उपात्ते तस्मिंस्तत्र पक्षतावच्छेद-कावच्छिन्नविशेष्यतानिरूपिता गुणत्वावच्छिन्नविषयता ग्राह्या। यथा पञ्चमीसाध्यतावच्छेदकावच्छिन्न -विषयता भवति। न तु पक्षतावच्छेदकनिष्ठप्रकारता तस्या-स्तदवच्छिन्नविशेष्यत्वानिरूपितत्वादिति। तादृशप्रकारतायास्तादृशविशेष्यत्वानिरूपित्वव्युत्पादकोऽप्ययमेव ग्रन्थ इति। अपरे तु तच्चेत्यादिना विशिष्यान्वयव्यतिरेकव्यापकत्वानवगाहित्वयोर्निवेशकल्पोऽपि भट्टाचार्यसम्मतः। दीधितौ वाकाराद्य-भावेऽपि स्वयं विशिष्यापि तदवगाहित्वेनेत्याद्यभिधानात् एवञ्च तत्कल्प एवायं ग्रन्थो नत्वनुगतरूपाव-च्छिन्ननिवेशकल्प इत्याहुः। तथा सति तच्चेत्येतद्व्याख्यानस्यातो नोक्तानुगमविरोध इत्युपसंहारस्य चासामञ्जस्यम्। सर्वग्रन्थस्यानुगमपरत्वे च तादृशधर्मः इत्याकाङ्क्षायां तच्चेत्यादिना विशिष्यतदुभयाव-गाहित्वप्रदर्शनसङ्गतिः विशिष्यापीत्यभिधानञ्च पौनरुक्त्यमात्रसूचकमिति प्रतिभाति। परे तु द्रव्यत्व-व्याप्यसंयोगवद्वृत्तिधर्मवान् द्रव्यत्वव्याप्यगुणवानित्यन्वयव्यतिरेकपरामर्शीयहेतुतावच्छेदकावच्छिन्न-विषयतैवद्वितीयादिविषयताशब्देन ग्राह्या। एवं गुणव्याप्यरूपवान् स्पर्शव्याप्यरूपवानित्यन्वयव्यतिरेक -परामर्शीया पञ्चमी साध्यतावच्छेदकावच्छिन्नहेत्वभावत्वावच्छिन्नान्यतरविषयताग्राह्येति पृथक्सूचक-

In Public domain. Digitization Muthulakshmi Research Academy

द्वयलाभाय यथाश्रुते व्यावृत्त्यभिधानम्। तथा चोक्तं पक्षविशेष्यतामादायान्वयव्यतिरेकव्यापकत्वावच्छिन्नविषयतयोः पञ्चमीत्वं साध्यतावच्छेदकादिनिवेश एव सम्भवतीति नैतद्व्यावृत्त्यसङ्गतिरिति ध्येयमिति वदन्ति। इदं पुनरत्रालोचनीयम्। भट्टाचार्याणां मते एकधर्मिविशेष्यतापन्नस्यापरधर्मिविशेषणतापन्नस्य प्रकारत्वविशेष्यत्वयोर्भेदान्नायमनुगमः साधीयान्। तथाहि। अन्वयपरामर्शीयपक्षमुख्यविशेष्यतामारभ्य हेतुव्यापकताविषयतानिरूपितसाध्यविशेष्यता नवमीव्यतिरेकपरामर्शस्थले साध्याभावव्यापकहेत्वभावविषयतापक्षविशेष्यतामारभ्याष्टमीति पक्षसंसर्गमादायापि न निस्तार इति चेत्। अत्राहुः। व्यतिरेकपरामर्शे यथापक्षविशेष्यतानिरूपितसांसर्गिकविषयताधर्तव्या तथैवापरापि हेतौ प्रतियोगित्वविषयतानिरूपिताप्रतियोगित्वहेत्वभावविषयतानिरूपिता वा सांसर्गिकविषयताधर्तव्येति न नवमीत्यानुपपत्तिरिति अनुगमप्रकारस्तु परिचिन्तनीय इति। इदन्त्वत्रावधेयम्। भट्टाचार्याणामयमनुगमप्रकारोऽवच्छेदकतावच्छेदकसाधारणकारणतावच्छेदकतामङ्गीकृत्य, अथावच्छेदकतावच्छेदकसाधारणावच्छेदकतास्वीकारे नायमनुगमः साधीयानिति चेन्न। पक्षतावच्छेदकावच्छिन्न -मुख्यविशेष्यतानिष्ठानुमितिजनकतावच्छेदकतायां निरूपितत्वसम्वन्धावच्छिन्नावच्छेदकतायाः अवच्छेदकतावच्छेदकतावच्छेदकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणत्वेन धर्मानुगमस्य करणीयत्वात्। हेतुव्यापकसाध्यविषयताविशिष्टाधिकरणविषयताविशिष्टाधेयत्वविषयताविशिष्टहेतुविषयताविशिष्टपक्षविषयताशालित्वेन जनकत्वात्तत्सङ्गतिः। सर्वत्र वैशिष्ट्यं निरूपितत्वसम्वन्धेन बोध्यम्। संसर्गावच्छिन्नहेतुविषयताविशिष्टपक्षविषयताशालित्वेन हेतुविषयताविशिष्टसंसर्गविषयताविशिष्टपक्षविषयताशालित्वेन वा विनिगमनाविरहेण जनकतया न साध्याभावव्यापकहेत्वभावविषयत्वा -लाभ इति। **जयदेवतर्कालङ्कार**[34]प्रभृतयस्तु, किमिदं गमकत्वौपयिकमित्याशङ्क्य पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतेत्यादिक्रमेण पञ्चमविषयतांशे विशेषणविधया प्रकृतानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणधर्मविषयत्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयतात्वेनोदाहरणजन्यबोधीय विषयतायाः सङ्ग्रह इति भट्टाचार्याणामभिधानं तत्राक्षिपन्ति। नन्विदमसम्भवदुक्तिकम्। यतो व्याप्त्यंशे निश्चयत्वानिवेशप्रयुक्तलाघवानुरोधेन व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चत्वेनैवानुमितिजनकताया व्यवस्थापिततया तादृशपञ्चमविषयतांशे तादृशजनकतावच्छेदकतापर्याप्त्यधिकरणं व्यापकत्वनिष्ठावच्छेदकतानिरूपितसाध्यनिष्ठावच्छेदकतात्वमेव, तदवच्छिन्नत्वञ्च न वह्निर्धूमव्यापको न वेति संशयप्रतिवन्धकतावच्छेदकतायां, वह्निर्धूमव्यापक इति ज्ञानीयविषयतासाधारणव्यापकत्वप्रकारतानिरूपितवह्नित्वावच्छिन्नविशेष्यतात्वस्यैव तादृशसंशयप्रतिबन्धकतावच्छेदकतावच्छेदकत्वादिति। न च तादृश

34. नैयायिकः, तत्वचिन्तामण्याः व्याख्याकारः, पक्षधरापरनामकः, हरिमिश्रस्य भ्रातुष्पुत्रः शिष्यश्च

In Public domain. Digitization: Mahalakshmi Research Academy

-रूपवद्विषयत्वावच्छिन्नत्वोपलक्षितविशेष्यत्वावच्छिन्नप्रतिवन्धकताविशेषणीया तथा चानुमितिजनक-परामर्शीय तादृशरूपवती याऽवच्छेदकता तदवच्छिन्नव्यापकत्वावच्छिन्नप्रकारतानिरूपितसाध्यादि-विशेष्यत्वावच्छिन्नां वह्निर्धूमव्यापको न वेत्यादिसंशयप्रतिवन्धकतामादायैव लक्षणसमन्वयान्नोक्तदोष इति वाच्यम्। एवं सति पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिवेशेऽपि गोत्वाभावः प्रमेयत्व-व्यापकवाच्यत्ववत्सास्नाभाववान् गोत्वाभावादित्यादौ प्रतिज्ञायामव्याप्तेर्दुर्वारत्वात्। तत्रान्वयपरा-मर्शीयप्रमेयत्वव्यापकवाच्यत्वप्रकारतानिरूपितसास्नाभावविशेष्यताया अपि निरूक्तरूपवद्विषयत्वा-वच्छिन्नतया तादृशप्रतिज्ञायास्सास्नाभावविशेष्यकतादृशवाच्यत्वप्रकारकसंशयादिप्रतिवन्धकतावच्छे-दकविषयताशून्यबोधजनकत्वात्। न च साध्यतावच्छेदकाच्छिन्नविषयतानिरूपिताधिकरणविषयता-निरूपिताधेयताविषयतानिरूपितहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविष-यताशालिनिश्चयत्वाव्यापकत्वेन तादृशविशेष्यत्वावच्छिन्नप्रतिवन्धकताविशेषणान्नायं दोषः। साध्यता-वच्छेदकघटकपदार्थविषयसंशयादिप्रतिवन्धकतायास्तादृशनिश्चयत्वाव्यापकत्वविरहात्। एवं यत्र प्रमेयत्वव्यापकवाच्यत्वत्ववद्गोत्वाभावत्वादिना पक्षताहेतुता च सास्नाभावस्साध्यस्तत्स्थलीय प्रतिज्ञायां पक्षविषयतानिरूपितसंसर्गविषयतानिरूपितहेतुविषयतानिरूपितसंसर्गविषयतानिरूपिततादृशवाच्य-त्वविषयतां पञ्चमविषयतात्वेनोपादाय, यत्र वा तेन रूपेण केवलपक्षतावच्छेदकघटकता तत्रत्य प्रतिज्ञायां पक्षविषयतानिरूपितसांसर्गिकविषयतानिरूपितहेतुविषयतानिरूपिततदीयसांसर्गिक-विषयतानिरूपितविषयतात्वेन पुनः पक्षविषयतामादायैवाव्याप्तिरपि प्रत्युक्ता। तत्तद्विषयत्वावच्छिन्न-विशेष्यत्वावच्छिन्नप्रतिबन्धकतायास्तादृशनिश्चयत्वाव्यापकत्वाभावात्। यदि च प्रमेयत्वव्यापक-वाच्यत्वघटितस्य विशेषणवैयर्थ्येन न लिङ्गतेति मन्यते तदा घटवृत्तिगन्धकालीनघटः गन्धविशेषवान् घटवृत्तिगन्धवत इत्यादौ तादात्म्येन हेतुतायां पक्षविषयतानिरूपितसंसर्गविषयतानिरूपितहेतु-विषयतानिरूपितसंसर्गविषयतानिरूपितविषयतांशे घटवृत्तिगन्धविषयतात्वं तादृशधर्म इति प्रतिज्ञा-यामव्याप्तिनिरासो द्रष्टव्यः। गन्धस्य च व्यभिचारित्वाद्विशिष्टस्य हेतुत्वम्। एवं प्रमेयत्वव्यापकवाच्यत्व-समानाधिकरणधूमवान् पर्वतो वह्निमान् धूमादित्यत्रापि अव्याप्तिश्च प्रत्युक्तेति वाच्यम्। पक्ष-विशेष्यतायां मुख्यत्वोपादानासङ्गतेः। गोत्वाभावपक्षकप्रमेयत्वव्यापकवाच्यत्ववत्सास्नाभावसाध्यक-गोत्वाभावहेतुकप्रतिज्ञायामव्याप्तिवारणरूपतत्प्रयोजनस्य निरुक्तविशेषणेनैव सम्भवात्। तथापि तादृशपञ्चमविषयतायां प्रकृतानुमितिजनकतावच्छेदकतामात्र निवेशेनैवोपपत्तौ तदंशे विशेषणविधया जनकतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वनिवेशस्य वैयर्थ्यापत्तेश्चेत्। अत्राहुः। व्याप्तिविशिष्ट-वैशिष्ट्यावगाहित्वेनैवानुमितिकारणत्वम्। तद्विशिष्टवैशिष्ट्यावगाहित्वं तदवच्छिन्नप्रतियोगिताकत्व-

विशिष्टसंसर्गावगाहित्वम्। न तु तन्निष्ठविलक्षणावच्छेदकतानिरूपकप्रकारताकत्वम्। अन्तराभासमान -पदार्थनिष्टप्रकारताविशेष्यतयोश्चावच्छेद्यावच्छेदकभावो न त्वभेद इत्यभिप्रायकोऽयं ग्रन्थः। पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतेत्यादिपञ्चमविषयतांश इत्यन्तस्य पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितविषयताविशिष्टविषयताविशिष्टविषयताविशिष्टविषयतांशे इत्यर्थः। द्वितीयतृतीयविषतावैशिष्ट्यं स्वानिरूपितत्वस्वनिरूपितविशेष्यतानिरूपितप्रकारत्वावच्छिन्नानिरूपितत्वोभयसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन द्वितीयविषयता हि संसर्गताप्रकारता वा तस्या एव विशेष्यतानिरूपितत्वात्। तद्विशिष्टापि तथैव। तथाहि। यदि स्वपदेन संसर्गताध्रियते तत्र प्रकारताचामेव स्वानिरूपितत्वविरहात्। प्रकारता यत्र ध्रियते। तत्रापि प्रकारतायामेव प्रतियोगितावच्छेदकताघटकद्वितीयसम्वन्धविरहात्। तस्या एव तादृशभेदवत्त्वसम्वन्धेन स्वविशिष्टत्वात्। यद्यपि स्वावच्छिन्ननिरूपितत्वमेव द्वितीयसम्वन्धस्सम्भवति तथापि संसर्गता यत्र स्वपदेन धृता तत्र सम्वन्धप्रसिद्ध्यर्थं गुरुतरारम्भः, प्रतियोगित्वीय संसर्गतायाः स्वपदेनोपादानेऽपि पञ्चमीत्वप्रसिद्धये अयमेव सम्वन्ध उक्तः। उक्तक्रमेण विशेष्यतायास्तथात्वसम्भवेऽपि तामादाय दोषोऽग्रे निराकरणीयः। निरूपितत्वञ्च सर्वत्र साक्षादेव। नातोऽव्यवहितप्रकारतासंसर्गतोपादानदोषः। प्रतियोगितावच्छेदकताघटकसम्वन्धेन स्ववैशिष्ट्यं विशेषणत्वादौ प्रसिद्धम्। एवं चतुर्थविषयतावैशिष्ट्यं स्वनिरूपितप्रकारत्वानवच्छिन्नत्वस्वनिरूपितविशेष्यतानिरूपितप्रकारत्वावच्छिन्ननिरूपितप्रकारत्वानवच्छिन्नत्वोभयसम्वन्धा -वच्छिन्नभेदवत्त्वसम्वन्धेन, एतादृशसम्वन्धेन तद्विशिष्टापञ्चमविषयताविशेष्यतैव, पूर्वयुक्तेः। एवञ्च जनकतावच्छेदकं प्रतिवन्धकतावच्छेदकतावच्छेदकं च विशेष्यतात्वमेवेति नासम्भवः। न चैवमपि साध्यतावच्छेदकवाच्यत्वादिप्रकारतानिरूपितसास्नाभावादिविशेष्यताया अपि निरुक्तपञ्चमविषयतात्वेन गोत्वाभावप्रमेयत्वव्यापकवाच्यत्ववत्सास्नाभाववान् गोत्वाभावादित्यादिस्थलीय प्रतिज्ञायां मुख्यविशेष्यतानिवेशेऽप्यव्याप्तितावदवस्थ्यमिति वाच्यम्। स्वस्य स्वधर्मितावच्छेदकत्वस्य प्रकारान्तरंण वारणीयतया तादृशविशेष्यता तः प्रकृतहेतुव्यापकत्वप्रकारतानिरूपितत्वविशेष्यताया वा तत एव भेदोपगमेन विशेषणविधया जनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणं यत्प्रकृतहेतुव्यापकत्वप्रकारतानिरूपितत्वसहितं तादृशविशेष्यतात्वं तदवच्छिन्नप्रतिबन्धकतावच्छेदकविषयताशून्यबोधजनकत्वेनाव्याप्तेरभावात्। एतेन पञ्चमविषयतायां प्रकृतानुमितिजनकतावच्छेदकत्वनिवेशेनैवोपपत्तौ तादृशरूपवत्त्वपर्यन्तनिवेशनमफलमिति शङ्कानवकाशः। तादृशरूपवत्त्वस्य प्रतिबन्धकतावच्छेदककोटौ विशेषणविधया निवेश एवोक्तप्रतिज्ञायास्सङ्ग्रहसम्भवेन तदनिवेशे तस्या एव दुस्सङ्ग्रहत्वापत्तेः। गोत्वाभावप्रमेयत्वव्यपकवाच्यत्ववद्गोत्वाभाववत्सास्नाभाववान् तादृशगोत्वाभावादित्यादौ हेतुतावच्छे-

In Public domain. Digitization Muthulakshmi Research Academy



अन्वयव्यतिरेकव्याप्तिघटकव्यापकताद्वयविषयतयोर्विशिष्याभावद्वयनिवेशपरो नायं ग्रन्थः, तथा च सति प्रकृतहेतुतावच्छेदकेत्याद्यनुगतशब्देनोभयोत्कीर्तनवैयर्थ्यापातात् विशिष्यापि तदुभयावगाहित्वस्य तच्चेत्यादिना दर्शनीयतया प्रथमत एव विशिष्य तदुभयावगाहित्वार्थकत्वोपवर्णनानौचित्यात्। **तच्चेति** तादृशगमकत्वौपयिकविषयत्वं चेत्यर्थः।

**हेताविति* हेतुव्यापकताविशिष्टसाध्यविषयत्वमित्यर्थः। अतो नक्तानुगमविरोधः। **हेतुभूताभावप्रतियोगितावच्छेदकेति** तादृशप्रतियोगितावच्छेदकञ्च धूमादिभावहेतुकस्थले धूमाभावत्वादिकं वह्न्यभावादिहेतुकस्थले च वह्नित्वादिकमेतदसङ्ग्रहभयेनैव हेत्वभावत्वावच्छिन्न इति नोक्तम्। तथा सति अयं निर्धूमो निर्वह्नित्वादित्यादौ यत्र धूमस्तत्र वह्निर्धूमव्यापकवह्न्यभाववांश्चायमित्याद्याकारकयोरेवोदाहरणोपनययोः प्रयोगाद्वह्नित्वाद्यवच्छिन्न एव साध्याभावव्यापकतायास्ततः प्रतीतिर्न तु वह्न्यभावाद्यभावत्वाद्यवच्छिन्न इति तत्रातिव्याप्त्यभावाप्रतिपादनेन न्यूनतापत्तेः। हेतुतावच्छेदकसाध्यतावच्छेदकनिवेशनप्रयोजनमाह। **द्रव्यत्वेति** प्रतिज्ञासङ्ग्रहायेति। प्रथमोपदर्शितप्रतिज्ञाविषयसंयोगत्वावच्छिन्ननिरूपितव्यापकताया अपि संयोगत्वेन गुणहेतुकद्रव्यत्वत्वावच्छिन्नानुमितेर्द्वितीयप्रतिज्ञाविषयगुणत्वावच्छिन्नव्यापकताया गुणत्वेन स्पर्शसाध्यकरूपत्वावच्छिन्नहेतुकानुमितेः प्रयोजकतयाऽवच्छेदकद्वयानुपादाने तत्र तत्राव्याप्तेरिति भावः।

नन्वेवं लिङ्गत्वाविषयकत्वविशेषणेनैवोदाहरणस्यापि वारणे पूर्वोक्तोनुमितिसमानविषयकत्वविशेषणस्य व्यावृत्तिर्न सङ्गच्छत इति सत्यन्तोत्तरविषयान्तभागपरित्यागस्यैवाऽव-

---

दककोटिप्रविष्टपदार्थविषयतां प्रमेयत्वव्यापकवाच्यत्ववद्गोत्वाभाववद्गोत्वाभावस्साम्नाभाववान् गोत्वाभावादित्यादौ व्युत्क्रमेण पक्षतावच्छेदककोटिप्रविष्टविषयताञ्चादाय दोषः प्रतिबन्धकतायां प्रकृतहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितप्रकृतपक्षतावच्छेदकावच्छिन्नविषयताशालिनिश्चयत्वाव्यापकतां निवेश्य वारणीय इति न काप्यनुपपत्तिः। अन्ये तु विशेष्ये विशेषणमिति रीत्याव्याप्त्यवगाहिपरामर्शस्यैवानुमिति कारणत्वम्। अन्तराभासमानपदार्थीय प्रकारताविशेष्यतयोश्चाभेद इत्यभिप्रायेणेदम्। तथा च साध्यादिव्यापकत्वप्रकारतानिरूपितविशेष्यत्वादिकमेव जनकतावच्छेदकम्। तदेव च प्रतिबन्धकतावच्छेदकमिति न काप्यनुपपत्तिरित्यन्यत्सर्वं पूर्ववदिति वदन्ति इति कृतं पल्लवितेन।

*सत्यन्तोत्तरेति* मूलोक्तप्रतिज्ञालक्षणघटकीभूतसत्यन्तादुत्तरेत्यर्थः। तेन जनकत्वे

In Public domain. Digitization Muthulakshmi Research Academy

श्यकत्वेनान्यूनानतिरिक्तपदमात्रपरित्यागपरमूलविरोध इत्यालोच्य तादृशमूलस्य च तथाविधसमुदायपरित्यागपरत्वमेवाह। **अन्यूनेति** नन्वेतत्कल्पे हेतुवारणायैव पक्षविशेष्यकत्वपर्यवसिततादृशविशेषणोपादानमावश्यकं तज्जन्यबोधस्य व्यापकत्वाविषयत्वेन लिङ्गत्वाविषयकत्वदानेनावारणादिति कथं समुदायपरित्याग इत्यत आह। **हेतुत्वमिति** **पञ्चम्यर्थपक्षक इति** तथा च पक्षमुख्यविशेष्यकत्वमपि तादृशहेतुजन्यबोधे अक्षतमिति न तेन तद्वारणसम्भव इति भावः। पञ्चम्यन्तान्यत्वस्य निवेशे घटो दण्डात् पटो न दण्डात् इत्यादिप्रतिज्ञाया असङ्ग्रहमालोच्य कल्पान्तरमाह। **हेत्वन्येति** **अवश्यं वाच्यत्वात् इति** तथा च तत एव सकलहेतुवारणे उक्तसमुदायदलपरित्यागो न क्षतिमावहतीति भावः।

ननु ज्ञापकत्वं पञ्चम्यर्थः। स च प्रकृत्यर्थस्य विशेषणतयैव भासते न तु विशेष्यतया। तथा च कथं पञ्चम्यर्थपक्षकन्यायान्तर्गतहेतोः पक्षमुख्यविशेष्यकबोधजनकत्वमत आह। **सङ्ख्येति** विभक्त्यर्थस्यैकत्वादेः प्रकृत्यर्थस्य विशेषणतया बोध आनुभाविकः। तस्य विशेष्यत्वे घटमित्यादित एकत्वं कर्मत्वं च घटीयमित्याद्याकारकस्य सर्वानुभवविरुद्धसमूहालम्बनबोधस्यापत्तेः। अतः सङ्ख्यातिरिक्तेति सुबर्थविशेषणम्। [35]तिङर्थस्येष्टसाधनत्वादेः प्रकृत्यर्थस्य विशेषणतया भानात् प्रत्ययार्थसामान्योपेक्षा। विशेष्यत्वेनैवेत्यत्र युक्तिमाह। **प्रातिपदिकार्थयोरिति** समानविभक्तिकनामार्थयोः क्रियाविशेषणीभूतद्वितीयान्तनामार्थधात्वर्थयोश्चाभेदान्वयबोधोत्पत्त्या **भेदेनेति**। तयोरपि विभक्त्यर्थमन्तराकृत्य परम्परया भेदान्वयबोधात्साक्षादिति। **अव्युत्पत्तेर्वक्ष्यमाणत्वादिति** भूतलं घट इत्यादावाधाराधेयभावादिसम्बन्धेन घटभूतलाद्योः तण्डुलः पचतीत्यादौ च क्रियाकर्मादिभावेन तण्डुलपाकाद्योः अन्वयबोधानुदयादिति भावः। तथा च सङ्ख्यातिरिक्तसुबर्थस्य प्रातिपदिकार्थविशेषणत्वे विभक्त्यर्थस्यान्तराऽभानेन प्रातिपदिकार्थस्य भूतलतण्डुलादेः घटपाकादावाधाराधेयत्व-

---

सतीत्यन्तस्य न त्यागः। घटोदण्डादिति प्रतिज्ञानुपगमेत्वाह। *पट इति* *तिङर्थस्येति* स्वर्गकामो यजेतेत्यादौ विध्यर्थकलिङ्प्रत्ययः तिङ्रूपस्तदर्थ इष्टसाधनत्वं तस्य धात्वर्थे भानम्। *समानेत्यादि* नीलो घटः स्तोकं पचतीत्यादौ। *आधेयत्वेति* भूतले घट इत्यादावाधारतावत्

---

35. लिङर्थस्येति पाठभेदः

In Public domain. Digitization Muthulakshmi Research Academy

कर्मत्वादिसम्बन्धेन साक्षादेवान्वयवोधस्य भूतले घटस्तण्डुलं पचतीत्यादितः स्वीकरणीयतया तदृशव्युत्पत्तिविरोध इत्याशयः। न च भूतले घट इत्यादौ घटाधिकरणं भूतलम् इत्याद्याकारक एवान्वयवोध उपेयते नात उपदर्शितव्युत्पत्तिविरोध इति वाच्यम्। तथा सति शाब्दवोधेऽनुभवसिद्धस्य प्रथमान्तार्थमुख्यविशेष्यकत्वस्य भङ्गप्रसङ्गात्।

ननु विभक्त्यर्थः संसर्गतयैव भासते न तु विशेष्यतया घटादावाधेयत्वादिसम्बन्धेन भूतलादिप्रकारकवोधे च सप्तम्यादिविभक्त्यन्तभूतलादिवाचकपदसमभिव्याहारस्य नियामकत्वान्नोक्तातिप्रसङ्गः। न चैवं भूतले धूमादित्यादिभागमात्रस्याननुभावकत्वप्रसङ्गः। इष्टत्वात्। अस्तु वा विभक्त्यर्थाधिकरणत्वज्ञापकत्वादिविशेषितस्यैव प्रकृत्यर्थस्य तुल्यवित्तिवेद्याधेयत्वज्ञाप्यत्वादिसम्बन्धेनान्वयः इत्यतो विभक्त्यर्थस्याविशेष्यत्वे नेदं मैत्रस्येत्यादौ मैत्रादिविशेषितस्वत्त्वादिरूपस्याभावप्रतियोगिनोऽवान्तरवाक्यादनुपस्थित्या नञर्थान्वयवोधानुपपत्ति-माह। **चैत्रस्येदमित्यादि** मैत्रादेरभावो नञा वोध्यते न तु स्वत्त्वस्यैत्याशङ्कां निराचिकीर्षुणा तदुपगमे चैत्रीयधनेऽपि संयोगसमवायादिना चैत्राद्यभावसत्त्वेन यत्र चैत्रस्य इदमिति व्यवहारः तत्र न चैत्रस्येत्यपि व्यवहारः स्यादिति सूचयितुं चैत्रस्येत्युक्तम्। ननु चैत्रप्रतियोगिकाभाववोधने प्रथमान्तचैत्रपदसमभिव्याहार एव नियामक इत्यत आह। **मैत्रस्य

---

भूतलवान् घट इत्येव बोधस्स्यात्तत्र दीधितिकृद्दर्शितनामार्थयोरिति व्युत्पत्तिविरोध इत्यर्थः। सप्तम्यर्थो अधिकरणत्वमेव तत्र घटान्वयः। घटान्विताधिकरणत्वस्य भूतले इति प्रत्ययार्थस्य विशेषणविधयाऽन्वयस्वीकारेऽपि न व्युत्पत्तिविरोध इत्याशङ्कते। *न चेति* *नोक्तातिप्रसङ्गः* न भूतलं घट इत्यादितो भूतलवान् घट इत्यादिबोधप्रसङ्गः, आधेयतासम्वन्धेन भूतलप्रकारकघटविशेष्यकवोधे सप्तम्यन्तभूतलपदसमभिव्याहृतघटपदज्ञानस्यैव हेतुत्वादिति भावः। भूतले इत्यादितो धूमादिति प्रत्येकं वाक्यप्रयोगे बोधो न स्यादित्यर्थः। दृष्टत्वादित्यधिकदूषणाभिधानं चैत्रस्येत्यादिदूषणस्य धार्ढ्यलाभार्थम्। केवलभूतले इत्यादौ भूतलेतरविशेषणतया अधिकरणत्वस्यैव भानान्नानुभावकत्वापत्तिरिति समाधानस्फोरणाय विभक्त्यर्थः, संसर्गतयैवेति पक्षं परित्यज्य तस्य विशेषणतयापि भानमङ्गीकृत्य नामार्थयोरिति व्युत्पत्तिं परिभूयभेदसम्वन्धेनैव नामार्थयोरन्वयमुपगम्योक्तसमभिव्याहारज्ञानकारणत्वो-पगमेन भूतलं घट इत्यादि प्रयोगापत्तिं वारयतामुपरिचैत्रस्येत्यादिदूषणान्तरमवतारयति। *अस्तुवेति* अधिकरणत्वं भूतले इत्यत्र ज्ञापकत्वं धूमादित्यत्र। *स्यादिति* *न चैत्रस्येदमिति* मैत्र धने एव तादृशव्यवहारो भवतीति नेष्टापत्तिरिति सूचनाय मैत्रस्येत्यप्युक्तमिति बोध्यम्। तादृशस्वत्त्वम्

In Public domain. Digitization Muthulakshmi Research Academy

इदमित्यादि** न च स्वत्त्वादिसम्बन्धेनैव प्रकृत्यर्थस्याभावो दर्शितस्थले नञा बोध्यते तथा च नोक्तातिप्रसङ्ग इति वाच्यम्। वृत्त्यनियामकतया स्वत्त्वादेरभावप्रतियोगितावच्छेदक-सम्बन्धत्वाभावात्, नामार्थप्रतियोगिकाभावस्यानुयोगिनिसप्तमीं विना नञा बोधयितुम् अशक्यत्वाच्च।

वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वोपगमेऽपि स्वत्त्वादिसम्बन्धा-वच्छिन्नाभावस्य षष्ठ्याद्यन्तसमभिव्याहृतनञा बोधने अनुयोगिनि सप्तम्यनपेक्षणेऽपि द्वयोरिदं नेदमेकस्येत्यादावगतेश्च। तथाहि। स्वत्त्वस्य विशेष्यत्वे स्वनिरूपकनिष्ठभेदाप्रतियोगि-निरूपितं यत्स्वत्त्वं तदभावो धननिष्ठः तत्र प्रतीयते। अप्रतियोग्यन्तमेकपदार्थः। सर्वत्र समभि-व्याहृतपदार्थसंसर्गिनिष्ठभेदाप्रतियोगित्वरूपस्वसजातीयद्वितीयरहितत्वस्यैकपदार्थत्वात्स्वत्वं षष्ठ्यर्थः। तथाविधञ्चैकमात्रनिरूपितं स्वत्त्वं न तूभयनिरूपितं तन्निरूपकस्यैकपुरुषस्य तन्नि-रूपकपुरुषान्तरनिष्ठभेदप्रतियोगितया तथाविधभेदाप्रतियोग्यप्रसिद्धेरिति तादृशस्वत्त्वाभाव उभयधने अवाधितः। स्वत्त्वसम्बन्धेन एकपदार्थस्याभावो यदि नञा बोध्यते तदा तु स्वस्वामि-निष्ठभेदाप्रतियोग्येकपदार्थो वाच्यस्तत्र यदि स्वमभावस्यानुयोगिधनं, तदा अप्रसिद्धिः। प्रमेयमात्रस्यैवोभयस्वामिकं यद्धनं तत्स्वामिनिष्ठभेदप्रतियोगित्वात्, यदि धनान्तरमेकमात्र-निरूपितस्वत्त्ववत् तदा तस्य समभिव्याहृतपदार्थत्वाभावादेकपदस्य तादृशार्थसम्बन्धिनिष्ट-भेदाप्रतियोगिबोधकत्वव्युत्पत्तिभङ्गः। एकमात्रस्वत्त्ववद्धनान्तरस्वामिचैत्रमैत्रोभयधनेनेदमेक-स्येति व्यवहारानुपपत्तिश्च। एतदभिप्रायेणैव द्वयोरिदमित्याद्यनुसृतम्।

---

एकमात्रनिरूपितम्। *यदीति* स्वमित्यनुवर्तते। *तादृशेति* समभिव्याहृतपदार्थेत्यर्थः। यदि सम्बन्धभूतस्वत्त्वाश्रयस्वामिनिष्ठभेदाप्रतियोगी एकपदर्थस्तदाप्याह। *एकमात्रस्वत्त्ववदिति* इदम् एतादृशधनासत्त्वदोषाभावप्रकाशनार्थमेकत्वरक्षार्थञ्च स्वत्त्वसम्बन्धेन तथाविधचैत्रमैत्रयोः प्रत्येकस्य तत्र सत्त्वात्। अथ त्रयाणामिदं न द्वयोरित्यत्र कीदृशो बोधः। सजातीयतृतीयराहित्यस्य दुर्वचत्वादिति चेन्न। तस्य तत्र स्वनिरूपकनिष्ठभेदप्रतियोगितानवच्छेदकीभूतप्रकृत्यर्थतावच्छेदकरूपत्वात्। *एतद-भिप्रायेणैव* सजातीयद्वितीयराहित्यमेकपदार्थ इत्यभिप्रायेणैव। अत्र सजातीयद्वितीयान्तर्गतैक-स्वत्त्वाभावपरतयापि द्वयोरिदं नैकस्येति व्यावहार आनुभविकस्तन्निर्वाहाय वक्ष्यमाणप्रकारादरे च दीधितिकारीय स्वत्त्वसंसर्गतामतदूषणस्याप्युद्धारो भवतीत्याशयेन दूषयति। *इदमत्रेति* द्वयोरिदं

In Public domain. Digitization: Muthulakshmi Research Academy

इदमात्रावधेयम्। नेदमेकस्येत्यत्र स्वनिरूपकनिष्ठभेदाप्रतियोगिनिरूपितयत्किञ्चित्स्वभावबोधने[36] एकमात्रधनेऽपि तथाविधधनान्तरनिष्ठस्वत्त्वाभावसत्त्वात्तादृशप्रयोगप्रसङ्गः। तादृशस्वत्त्वसामान्यस्य चैकाभावो न सम्भवति प्रतियोगितावच्छेदकस्य स्वत्त्वघटितत्वेनाननुगमात् अभावकूटस्य चासर्वज्ञदुर्ज्ञेयत्वमित्येकत्वसङ्ख्यावच्छिन्न एकपदार्थः। तदन्वितस्वत्त्वस्य चोभयस्वत्त्वानिरूपितविशेषणताविशेषेणस्वत्त्वस्य समवेतत्वे तादृशसमवायेन वा अभावः प्रतीयत इत्युपगन्तव्यम्, तथा च उभयानिरूपितस्वत्त्वसम्बन्धेन प्रकृत्यर्थाभावबोधोऽपि सम्भवति उभयानिरूपितत्वञ्च स्वनिरूपितत्वस्वभिन्ननिरूपितत्वोभयसम्बन्धेन किञ्चिद्विशिष्टं यत्तदन्यत्वमिति।

ननु स्वत्त्वस्य विशेष्यत्वेऽपि नेदं मैत्रस्येत्यादितः कथं स्वत्त्वसंसर्गाभावबोधः। संसर्गाभावबोधमात्र एव नञा अनुयोगिनि सप्तम्यपेक्षणादित्यत आह। **चैत्रो न पचति इति** नामार्थप्रतियोगिकाभावबोध एवानुयोगिनस्सप्तम्यपेक्षणादिति भावः। यथाश्रुतलिङ्गविषयकत्वनिवेशेन गन्धवतीतरेभ्यो भिद्यते गन्धादित्यादावव्याप्तिं प्रकारान्तरेण वारयतां मतमाह। **हेतुविषयकेति** कासाञ्चित्प्रतिज्ञानां हेतुविषयकज्ञानजनकत्वेऽपि प्रतिज्ञात्वस्य हेतुविषयकज्ञानजनकत्वानियतत्वात्तन्नियतन्यायावयवतावच्छेदकानि हेतुत्वेपनयत्वनिगमनत्वान्येव न तु प्रतिज्ञात्वमिति नाव्याप्तिः। हेतुबोधकप्रतिज्ञानिष्ठतत्प्रतिज्ञात्वादेस्तादृशज्ञानजनकत्वनियतत्वादव्याप्तितादवस्थ्यमतोऽवयवतावच्छेदकेति। अभावहेतुकव्यति-

---

नेदमेकस्येति इदं पदद्वयसमूहालम्वनाभिप्रायेण। *उभयस्वत्त्वेति* एकमात्रस्वत्त्ववद्धनान्तराप्रसिद्धेर्द्वयोर्मध्ये य एकस्तस्येति क्रमेणव्यधिकरणसम्वन्धावच्छिन्नाभावस्यैव प्रत्ययः। अत्र स्वनिरूपकव्यक्तिवृत्तिभेदाप्रतियोग्येव एकपदार्थ इति तु न सत्। निरूपितत्वसम्वन्धेन तद्विशिष्टस्वत्त्वस्यैव सत्त्वात्। एकमात्रस्वत्त्वस्याप्रसिद्धेः सम्वन्धविशेषस्यावश्यकत्वे च गौरवात्। इदमत्रावधातव्यम्। नव्यमते उभयानिरूपितस्वत्त्वेन संसर्गताविरहेऽपि नानुपपत्तिः। तथाहि एकत्वसङ्ख्यावच्छिन्न एकपदार्थः। उभयनिरूपितस्वत्त्वस्वीकारे उभयानिरूपितत्वं षष्ठ्यर्थः। नानास्वत्त्वस्वीकारे स्वत्त्वासमानाधिकरणस्वत्त्वं तदर्थः। सामानाधिकरण्यं चैककालावच्छेदेनैकधर्मिवृत्तित्वमिति। इदन्तु चिन्त्यते। द्वयोर्मध्ये नैकस्येत्यर्थ इत्यपरे षष्ठ्यर्थाप्रसिद्ध्यापत्तेः। भट्टाचार्यमते तु नायं दोष इति। *अभावेति* अयं निर्धूमो निर्वह्नित्वादिस्थलीयस्य यो यो धूमवान् स वह्निमानित्यादेः प्रतिज्ञात्वाद्यभेदे

---

36. यत्किञ्चित्स्वत्वस्याभावबोधने इति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy


रेक्युदाहरणस्य लिङ्गाविषयकज्ञानजनकस्य सम्भवादुदाहरणत्वस्य तादृशज्ञानजनकत्वानियतत्वादुदाहरणातिव्याप्तिरत **उदाहरणान्येति**। प्रतिज्ञात्वादेर्हेतुपक्षसाध्यभेदेन भिन्नत्वाद्गन्धवती इतरेभ्यो भिद्यते गन्धादित्यादावव्याप्तिः तदवस्थैव। तादृशप्रतिज्ञानिष्ठप्रतिज्ञात्वस्य हेतुविषयकज्ञानजनकत्वनियतत्वात् हेत्वादिभेदेन प्रतिज्ञात्वाद्यभेदे तु प्रकृतहेतुविषयकज्ञानजनकत्वनियतावयवतावच्छेदकस्यैवाप्रसिद्धिर्नानाहेतुकहेत्ववयवादिसाधारणहेतुत्वादेरप्यतथा-त्वादित्यस्वरससूचनाय **केचिदिति**। जिज्ञासाफलोपधायकत्वस्याव्याप्तिमाशङ्क्याह।

****जिज्ञासेति**** उदासीनातिव्याप्तिवारणाय न्यायावयवत्वस्यावश्यं निवेशनीयतया वाक्यभिन्नातिव्याप्त्यप्रसक्तेर्वाक्यपदोपादानमनर्थकमित्याशङ्कायां वाक्यपदस्यैव न्यायावयवार्थकतामाह। ****वाक्यत्वमिति****

गन्धवतीतरेभ्यो भिद्यते गन्धादित्यादावव्याप्तिवारणाय **लिङ्गाविषयकेतीति**। ****पूर्वोपदर्शितार्थकमिति**** साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षविषयतावहिर्भूतलिङ्गविषयताशून्यार्थकमित्यर्थः। ****अभावहेतुकेति**** वह्न्यभावहेतुकेत्यर्थः। यो धूमवान् स वह्निमानित्युदाहरणस्य लिङ्गाविषयकत्वादिति भावः। भावहेतुकस्य व्यतिरेक्युदाहरणस्य हेत्वभावत्वेनैव व्यतिरेकवोधकतया न लिङ्गाविषयकत्वसम्भवः। एवमभावहेतुकस्यान्वय्युदाहरणस्य न तथात्वसम्भवः इत्यभावहेतुकत्वव्यतिरेकित्वानुधावनम्। ****लिङ्गि साध्यमिति**** लिङ्गमस्यास्तीति व्युत्पत्या लिङ्गिपदस्य लिङ्गत्वनिरूपकार्थकत्वात् इति भावः। वक्ष्यमाणोदारणे साध्यविषयकत्वसत्वादतिव्याप्तेराह। ****तद्विषयकत्वमिति**** ****तद्वद्विशेषकम्**** तद्वन्मुख्यविशेष्यकं निस्नेहत्वशून्यत्वं स्नेह एव तद्धेतुत्वे उदाहरणजन्यवोधस्य न लिङ्गाविषयकत्वसम्भव इति तत्प्रकारकप्रमाविषयत्वशून्यत्वानुधावनम्। तच्च भावप्रतियोगिकतया अतिरिक्तमिति हृदयम्। जलत्वसन्देहदशायां जलान्यत्वस्य सन्दिग्धतया

---

त्विति तु न विजातीय ज्ञानजनकत्वरूपप्रतिज्ञालक्षणस्य वैजात्याप्रामाण्येन दूषयिष्यमाणत्वं सूचितम्। साध्यादेरपि हेतुत्वादाह। ***प्रकृतेति*** समयसम्वन्धादिना जिज्ञासानुदयस्य मूले व्यक्तत्वादाह। ***अव्याप्तिमिति*** तादृशवहिर्भूतत्वं तच्छालिनिश्चयत्वसमनियतप्रतिवन्धकतानवच्छेदकत्वम्। अत्र स्वरूपसम्वन्धरूपावच्छेदकत्वनिवेशे निगमने ज्ञेयत्वाद्वाच्यत्ववत्सदृशं हेतुत्वं वाच्यं ज्ञेयत्वादित्यादौ च हेतावतिव्याप्तेर्व्यापकत्वव्याप्यत्वयोर्निवेशः। ***मुख्येति*** जलत्वाद्यभावप्रतियोगितावच्छेदक-

In Public domain, Digitization Muthulakshmi Research Academy


तत्प्रकारकप्रमाविषयत्वमपि सन्दिग्धमिति तच्छून्यत्वस्य हेतुतयोपन्यासो न सम्भवतीति प्रथमसाध्ये तदुपेक्षितम्। उत्पत्तिकाले जलस्यापि निस्नेहतया द्रव्यत्वसाध्यकजलान्यत्व-प्रकारकप्रमाविषयत्वशून्यत्वहेतुकस्थलान्तरमनुसृतम्। अत्रोक्तयुक्त्या जलत्वसाध्योपेक्षा। यत्तु, जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वमपि लाघवाज्जलत्वस्वरूपमेवेति जलत्वस्य साध्यत्वेनोदाहरणजन्यबोधस्य साध्यविषयकस्य लिङ्गाविषयकत्वसम्भव[37] इति द्रव्यत्वसाध्य-कानुधावनमिति। तन्न। जलाद्यन्यत्वप्रकारकप्रमाविषयत्वशून्यत्वस्य जलत्वस्वरूपत्वे यन्न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणजन्यबोधस्याप्यन्यत्व प्रतियोगितावच्छेदक-तया लिङ्गविषयकत्वेनासङ्गतेः। पूर्ववद्व्याप्त्यविषयकत्वस्य लिङ्गाविषयकपदार्थत्वे उदाहरणस्य व्याप्तिबोधकतया तत्र लिङ्गिविषयकत्वविशेषणव्यावृत्तिर्न सम्भवतीत्याशयेन तन्मते स्थला-न्तरे व्यावृत्तिमाह। **लिङ्गेति** **पूर्वोक्तेति** उक्तानुगतरूपावच्छिन्नेत्यर्थः। **हेतु-वारणायेति** इतरेषां त्रयाणां व्याप्तिविषयकत्वेनैव वारणादिति भावः। **प्रकृतेति** हेतुतावच्छेदकहेतुत्वविषयतानां भेदनिवेशे साध्यस्य हेतुतावच्छेदकादिरूपत्वे हेतुतावच्छेद-कादिविषयताभिन्नसाध्यविषयत्वाप्रसिध्याव्याप्तिरिति विशिष्टविषयतावहिर्भावनिवेशः। तादृश-विषयतावहिर्भावः पूर्ववन्निर्वाच्यः। न च तादृशविषयतावहिर्भूतविषयतामात्रनिवेशेनैव हेतु-

---

घटकतया जलभानेऽपि नातस्तत्रातिव्याप्तितादवस्थ्यम्। *जलस्यापीति* तथाचावयवि जले हेत्व-सिद्धिरिति भावः। *उक्तयुक्त्या* साध्यस्य जलत्वस्य सन्दिग्धत्वे जलान्यत्वस्यापि सन्दिग्धतया सन्दिग्धो हेतुरपीति युक्त्या। ननु पक्षविषयत्वानिरूपितव्यापकत्वविषयतायाः हेतुतावच्छेदकावच्छिन्न-स्य प्रकृतसाध्यगमकतौपयिकत्वाभावान्नोदाहरणवारणं भवतीत्यत आह। *उक्तेति* निरुक्तपञ्चम-विषयतांशे तथा विध पर्याप्तिमद्धर्मविषयताशून्यत्वमित्यर्थः। *साध्यस्येति* अयं वह्निमान् वह्नि-सामग्रीमत्त्वादित्यादौ। ननु तद्बहिर्भावस्तन्निरूपकत्वाभावः साक्षात्परम्परासाधारणनिरूपकत्वा-प्रसिध्या दुर्निवेश इत्यत आह। *पूर्ववदिति* प्रकृतहेतुतावच्छेदकविशिष्टहेतुत्वविशिष्टहेतुत्वत्वाव-च्छिन्नविशेष्यताशालिनिश्चयत्वव्यापकप्रतिबन्धकतानवच्छेदकत्वमित्यर्थः। धूमादालोकवानित्यादौ तथाविधनिश्चयत्वावच्छिन्नप्रतिबन्धकतामादायाव्याप्तेर्व्यापकत्वनिवेशः। जन्यत्वम्। निरूपकता-सम्बन्धेन ज्ञानस्य ज्ञानजन्यत्वस्य वा साध्यत्वे तद्वत्त्वेन प्रमीयमाणत्वादिति हेतौ तादृशनिश्चयत्व-व्यापकप्रतिबन्धकत्वसत्त्वादव्याप्तेर्निश्चयत्वव्याप्यत्वमपि देयम्। *विषयतामात्रेति* विषयताशालिबोध

---

37. लिङ्गविषयकत्वसम्भव इति पाठान्तरम्।

In Public domain. Digitization Muthulakshmi Research Academy


वारणसम्भवे साध्यांशनिवेशनं व्यर्थमिति वाच्यम्। तादृशविषयतान्तर्भूतसाध्यविषयताभिन्नत्वस्यैवात्र वहिर्भावेनेत्यन्तेन विवक्षिततया दर्शितहेतौ तादृशसाध्यविषयताभिन्नहेतुत्वादिविषयतामादायातिप्रसङ्गस्य वारकतया तत्सार्थक्यात्। भेदप्रतियोगिकोटौ निविष्टस्य साध्यांशस्य चाखण्डाभावघटकतयाऽवैयर्थ्यात्। यत्र च प्रकृतहेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयतान्तर्भूतसाध्यविषयताया अप्रसिद्धिः तत्र बहिर्भूतत्वान्तमनुपादेयमेव शब्दैक्यस्याविवक्षितत्वादिति नाव्याप्तिः। तादृशविषयतान्तर्भूतत्वसाधीयत्व उभयाभाव एव वा बहिर्भावेणे-त्यन्तार्थः। हेतुतावच्छेदकहेतुहेतुत्वानां निवेशस्य प्रयोजनं क्रमशः प्रदर्शयति। **तेनेति** **तत्वेनेति** हेतुत्वेन हेतुत्वत्वेन चेत्यर्थः। [38]हेतुहेतुत्वयोस्तादात्म्यसम्बन्धेन साध्यत्वं वोध्यम्। हेतुत्वावच्छिन्नसाध्यकस्थले हेतुत्वेन प्रमीयमानत्वरूपप्रकृतहेतोरपि साध्यतावच्छेदकाक्रान्ततया हेतुजन्यवोधस्य साध्यविषयकत्वमक्षतमेव, साध्यतावच्छेदकविशिष्टनिरूपितविषयतापर्यन्तस्याविवक्षितत्वादिति हेतुविषयतावहिर्भावनिवेशव्यावृत्ति-सङ्गतिः। न च हेतुविषयितावहिर्भूतत्वनिवेशापेक्षया साध्यतावच्छेदकविशिष्टविषयकत्वनिवेशनमेव लाघवेनोचितमिति वाच्यम्। विशिष्टविषयताबहिर्भावे निवेशनीये हेतुविषयता-

---

-जनकत्वेत्यर्थः। *तादृशेति* हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयतान्तर्भूता या साध्यविषयता तद्भिन्नत्वेत्यर्थः। अन्तर्भूतत्वं तच्छालि निश्चयत्वसमव्यापकप्रतिबन्धकतावच्छेदकत्वम्। व्याप्यत्वनिवेशप्रयोजनं प्राग्वत्। वह्निमान् धूमादित्यादौ हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुविषयतान्तर्भूतसाध्यविषयत्वाप्रसिद्ध्याऽव्याप्तिमाशङ्क्य तत्र लक्षणं भिन्नमेवेत्याह। *यत्रचेति* सर्वत्रैकशब्दाभिलप्यं लक्षणमाह। *तादृशेति* तादृशोभयाभावविशिष्टसाध्यविषयताशालिवोधजनकवाक्यत्वमर्थः। *हेत्विति* अयं हेतुरित्यत्र हेतोरेव तादात्म्येन साध्यत्वमिदं हेतुत्वमित्यत्र च हेतुत्वस्य तादात्म्येन साध्यत्वं दीधितिकाराभिप्रेतम्। अन्यथा प्रथमहेतुत्वस्य साध्यत्वेतरत्त्वेन प्रमीयमाणत्वादिति हेतुजन्य-वोधे हेतुत्वांशे हेतुत्वरूपसाध्याभानात्। द्वितीये हेतुत्वत्वस्य साध्यत्वे उक्तहेतुजन्यवोधे हेत्वंशे हेतुत्व-त्वरूपसाध्याभानादसङ्गतेः। विशिष्टविषयतावहिर्भावश्च न बहिर्भावत्रयम्। किन्तु एक एव। तथा च साध्यतावच्छेदकावच्छिन्नविषयतानिवेशमते हेतुतावच्छेदकवहिर्भूतत्वहेतुत्ववहिर्भूतत्वयोरावश्यकत्वेन गौरवमिति विशिष्टविषयतावहिर्भावनिवेश इत्याशयेनाह। *विशिष्टेति* हेत्वंशमनिवेश्य

---

38. हेतुत्वहेतुत्वत्वयोरिति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

वहिर्भावस्य स्वान्तन्त्र्येणानिवेशनीयतया गौरवानवकाशात्। हेत्वंशमनिवेश्य विशिष्टस्य दुर्निवेशतया विशिष्टनिवेशेनैव तन्निवेशात् हेत्वंशाप्रवेश एव हेतुतावच्छेदकविषयत्वहेतुत्वविषयत्वयोर्वहिर्भावस्य पृथङ्निवेशनीयतया गौरवात्। एवञ्च प्रमेयत्वाद्यवच्छिन्नसाध्यकस्थले अपि हेत्वंशनिवेशेन प्रयोजनसम्भवादयं हेतुरित्युपलक्षणपरं बोध्यम्। लिङ्गिविषयकेत्यस्य पूर्ववत्साध्यवद्विशेष्यकार्थकत्वोपगमे वह्निमान्वह्निसामग्रीमत्वादयं हेतुः तत्त्वेन प्रमीयमाणत्वात् अनयोरतिप्रसङ्गवारणसम्भवेऽपि इदं हेतुत्वमित्यादौ पञ्चम्यर्थस्य तादात्म्यसम्बन्धेन साध्यतया[39] साध्यप्रकारतानिरूपितविशेष्यतार्थकत्वेऽपि स्वरूपसम्बन्धेन हेतुत्व[40]साध्यकस्थले निरूपितत्वसम्बन्धेन ज्ञानत्वावच्छिन्नसाध्यकजनकतात्वावच्छिन्नपक्षकस्थले च हेतावतिव्याप्तिवारणं न सम्भवतीति गुरुतरारम्भः।

लिङ्गिविषयतायाः पूर्वोपदर्शितविषयितायाः वहिर्भावनिवेशनं लिङ्गपदस्य धर्मपरताञ्च विनैव लिङ्गबोधकप्रतिज्ञाविशेषेऽव्याप्तिर्लिङ्गिपदविषयपदयोः साध्यवद्विशेष्यपरतां विनैव दर्शितव्यतिरेक्युदाहरणेऽतिव्याप्तिं प्रकारान्तरेण वारयतां मतमुपन्यस्य दूषयति। **लिङ्गेति** निगमनस्योदाहरणस्य च वारणाय नियतान्तद्वयमवयवतावच्छेदकविशेषणम्। प्रतिज्ञात्वोदाहरणत्वयोरपि लिङ्गलिङ्गिविषयकज्ञानजनकत्वसमानाधिकरणतया

---

विशिष्टस्य दुर्निवेशतया विशिष्टनिवेशे तन्निवेशादित्याह। *स्वातन्त्र्येणेति* *गौरवेति* हेतुतावच्छेदकादिप्रविष्टसाध्यकप्रतिज्ञायामुक्ताव्याप्तिश्चबोध्या। तादात्म्येन प्रमेयसाध्यकं द्रव्यसाध्यकं वा धूमादित्यादिकं न्यूनतापरिहाराय दर्शयति। *एवञ्चेति* ननु लिङ्गिविषयकेत्यस्य साध्यवन्मुख्यविशेष्यकत्वार्थकत्वं परित्यज्य दर्शितविशिष्टविषयतावहिर्भूतसाध्यविषयकत्वरूपगुरुतरारम्भः किमर्थं इत्यत आह। *लिङ्गीति* साध्यवत्तया वास्तविकेत्यादिः। *ज्ञानत्वेति* विषयितापक्षकज्ञानसाध्यके तु मुख्यत्वपर्यन्तप्रयोजनमूह्यम्। *गुर्वीति* अयञ्च लिङ्गाविषयकेत्यत्र लिङ्गं लिङ्गत्वमिति पक्षे व्यापकत्वविषयताशून्यत्वार्थकत्व एव न तु प्रथमकल्पे उदाहरणविशेषेऽतिव्याप्तेरिति बोध्यम्। मतान्तरमवतारयति। *लिङ्गीति* धर्मो लिङ्गत्वम्। *दर्शितेति* यन्नजलं तन्निस्नेहत्वप्रकारकप्रमाविषयः यन्नद्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय इति प्रदर्शितेत्यर्थः। *निगमनस्येति* लिङ्गिविषयकज्ञानजनकत्वनियतावच्छेदकरूपवत्त्वमात्रोक्तौ निगमने लिङ्गाविषयकबोधजनकत्वानियतावच्छेद्यतावच्छेदकरूपवत्त्वमात्रोक्तावुदाहरणे चातिव्याप्तिरिति दलद्वयं निवेशितमित्यर्थः। *निगमनस्येति* हेतूपनययो-

---

39. साध्यवत्तया इति पाठान्तरम् 40. हेतुत्वत्वेति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy


असम्भवादतिप्रसङ्गात्[41] अतस्सामानाधिकरण्यमुपेक्ष्योभयत्र नियतत्वप्रवेशनम्। उदाहरण-विशेषत्वमादायातिप्रसङ्गवारणायावच्छेदकान्तम्। आदिपदात्पञ्चमीविभक्तिमत्त्वनियतलिङ्ग-विषयकज्ञानजनकत्वानियतावयवतावच्छेदकरूपवत्त्वादिपरिग्रहः।[42] **रूपान्तरेति** यद्यपि निरुक्तस्यापि रूपस्यापरिचयादन्तरपदमर्थकम्। तथाप्यात्माश्रयभयेन तथाविध-रूपान्तरपरिचयोऽपेक्षणीयः। तच्च रूपमनुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकवाक्य-त्वादिकमेव। तथा च तस्यैव तद्घटकस्य लक्षणत्वसम्भवाद्व्यर्थविशेषणता। न च तस्य विशिष्याघटकत्वान्न व्यर्थविशेषणतेति वाच्यम्। प्रतिज्ञात्वहेतुत्वादिसाधारणस्यावच्छेदक-त्वस्य दुर्घटकतया विशिष्यैव तन्निवेशनस्यावश्यकत्वादित्येतल्लाभायान्तरपदम्। अत्र च साध्यादिभेदेनाभिन्नप्रतिज्ञात्वं यद्यवच्छेदकत्वेन निवेश्यते तदा तस्य प्रकृतसाध्यविषयकत्व-नियतत्वासम्भवादप्रसिद्धिः। यदि च साध्यादिभेदेन भिन्नं तत् तदा यादृशसाध्यपक्षक-प्रतिज्ञायां प्रकृतलिङ्गबोधकत्वं नियतं तत्राव्याप्तिरित्यपि दूषणं बोध्यम्।

## इति गदाधरीये प्रतिज्ञालक्षणम्

---

स्त्वेकतरविशेषणेनापि सुवारत्वात्त्यागः। *प्रतिज्ञात्वेति* लिङ्गविषयकज्ञानजनकत्वानियतेत्यत्र सामानाधिकरण्यप्रवेशेऽसम्भवः। गन्धवतीतरेभ्यो भिद्यते इत्यादिप्रतिज्ञान्तर्भावेण प्रतिज्ञात्वस्य तत्स-मानाधिकरणत्वात्। दलान्तरे सामानाधिकरण्यप्रवेशे तूदाहरणेऽतिव्याप्तिरित्यर्थः। उदाहरणविशेषत्वं यन्न जलं तन्निस्नेहत्वप्रकरकप्रमाविषय इत्याकारकनिष्ठतद्व्यक्तित्वादिरूपवत्त्वादित्यादिना हेतुत्वबोधक-विभक्तिघटितलक्षणपरिग्रहः। *आत्माश्रयेति* अवयवतावच्छेदकताग्रहेऽवयवतावच्छेदकत्वविशिष्ट-रूपग्रहोऽपेक्षित इत्याशयः। तथाविधरूपान्तरपरिचयवतामेव लक्षणस्य सुग्रहतेत्यत आह। *तथा चेति* विशिष्यानुमित्यन्यूनेत्यादिरूपेण स्वयं दूषणान्तरमाह। *अत्रचेति*

श्रीः। केचित्तु साध्यपक्षविशेषनियन्त्रितं न प्रतिज्ञात्वं तथा सति प्रतिज्ञापदस्य नानार्थत्वं स्यात्किन्तु जातिविशेषः कार्यतावच्छेदकत्वादीनामिव शक्यतावच्छेदकताया अपि जातिसाधकत्वा-दिति वदन्ति। तन्मतं दूषयति मूले। *प्रतिज्ञात्वमिति* अनतिप्रसक्तपदोपादानञ्च न्यायबहिर्भूतप्रतिज्ञा-समानाकारवाक्यसाधारण्यशङ्कावारणाय। *तान्त्रिकेति* शक्यतावच्छेदकतैव जातिसाधिका व्यवहार

---

41. असम्भवातिप्रसङ्गौ इति पाठान्तरम्
42. आदिपदात्पञ्चमीविभक्तिमत्त्वनियतलिङ्गा विषयकज्ञानजनकत्वनियतावयवतावच्छेदकरूपवत्त्वादि-परिग्रह इति पाठान्तरम्

In Public domain. Digitization by Mahalakshmi Research Academy

-स्तु तान्त्रिकेषु प्रसिद्ध इति भावः। *देवदत्तप्रभवत्तादिन्वेति* देवदत्तप्रभवतावच्छेदकवैजात्येनेत्यर्थः। अथैतद्वैजात्यं देवदत्तजन्यपञ्चाशद्वर्णानुगतं तथाचैतद्वैजात्यं विहाय प्रतिज्ञात्वं यज्ञदत्तोच्चरितप्रतिज्ञायां प्रतिज्ञात्वं विहाय निरुक्तवैजात्यमुदासीनवर्णे देवदत्तोच्चरितप्रतिज्ञायाञ्च तद्द्वयसमावेशरूपसङ्कर इति न सम्भवति। निरुक्तवैजात्यस्यैव सिद्धान्तेऽङ्गीकर्तुमशक्यत्वात्। तस्य पञ्चाशद्वर्णानुगततया कत्वगत्वा-दिनासङ्करात्। तादृशवैजात्यं विहाय कत्वादियज्ञदत्तोच्चरितककारादौ कत्वादिकं विहाय तादृशवैजात्यं देवदत्तोच्चरितखकारादौ देवदत्तोच्चरितककारादौ कत्वतादृशवैजात्ययोः समावेशात्। यदि च पञ्चाशद्वर्णेषु देवदत्तप्रभवतावच्छेदकवैजात्यमेकमनुगतं न स्वीक्रियते येनोक्तदोषस्स्यात्किन्तु देवदत्त-मात्रोच्चरितककारमात्रसामान्ये एव। एवञ्च देवदत्तमात्रोच्चरितककारसामान्यवृत्तिवैजात्यं विहाय प्रतिज्ञात्वस्य यज्ञदत्तोच्चरितप्रतिज्ञादौ प्रतिज्ञात्वं तादृशवैजात्यस्य देवदत्तमात्रोच्चरितककारे सत्त्वात्। देवदत्तोच्चरितककारघटितप्रतिज्ञाया उभयोः समावेश इति साङ्कर्यमुच्यते, तदाकत्वादिकमादायैव प्रतिज्ञात्वस्य साङ्कर्यं सम्भवति। कत्वं विहाय प्रतिज्ञात्वं ककारघटितप्रतिज्ञायां प्रतिज्ञात्वं विहाय कत्वमुदासीनककारे ककारघटितप्रतिज्ञायां समावेशादिति देवदत्तप्रभवत्वानुधावनमसङ्गतमेवेति चेत् मैवम्। प्रतिज्ञात्वस्य जातित्ववादिभिरेकदेशातिव्याप्तिवारणाय व्यासज्यवृत्तित्वं स्वीकार्यम्। आंशिक-त्वञ्च न दोषाय तुल्ययुक्त्यापरिकल्प्यम्। वैजात्यमपि न्यायन्तर्गतपर्वतो वह्निमानिति वाक्योदासीन-पर्वतो वह्निमानिति वाक्यसाधारणम्। देवदत्तमात्रोच्चरितपर्वतो वह्निमानिति वाक्यवृत्तिरेकमेवञ्च देव-दत्तमात्रोच्चरितवाक्यवृत्तितादृशवैजात्यं विहाय प्रतिज्ञात्वं यज्ञदत्तोच्चरितपर्वतो वह्निमानिति प्रतिज्ञायां प्रतिज्ञात्वं तादृशवैजात्यं देवदत्तोच्चरितोदासीनपर्वतो वह्निमानिति वाक्ये तदुभयसमावेशश्च देवदत्तो-च्चरितन्यायान्तर्गतपर्वतो वह्निमानिति प्रतिज्ञायां कल्पितवैजात्यमपि व्यासज्यवृत्त्येवेति एकधर्मावच्छि-न्नपर्याप्तत्वरूपैकत्र समावेश इति कल्पितवैजात्यानुसरणम्। एवञ्च कल्पित वैजात्यस्य प्रतिज्ञात्वस्य च कत्वादिना सह नैकधर्मावच्छिन्नपर्याप्तत्वरूप एकत्र समावेशः। कत्वादीनामव्यासज्यवृत्तित्वादिति न तत्साङ्कर्यशङ्कावकाशः। *एतेनेत्यादि* वृत्त्यन्तमवृत्त्यन्तञ्च परिचायकन्तेनैकदेशस्य प्रतिज्ञा-तदितरसमुदायस्य च व्युदासः। *साधनाङ्गम्* न्यायघटिका। *पक्षपरिग्रहे* पक्षे साध्यग्रहे। *प्रमाणम्* ज्ञापकम्। *प्राथम्यात्* प्रथममुचितत्वात्। *समयबन्धः* सदृष्टान्तोदाहरणेन शब्दा-नित्यत्वं साधनीयमित्यादि सङ्केताभिप्रायः। शब्दानित्यत्वं साधयेत्याकाङ्क्षायां शब्दानित्यत्वं कथमिति प्रश्ने वादिनः प्रतिवादिनः। यद्यपि विप्रतिपत्तिः तत्संशयोत्तरं पर्वते वह्निनिर्णयो जायतामित्येकतर-कोटिकनिर्णयेच्छैव युक्ता तथापि प्रतिवादिवन्मध्यस्थस्यापि पर्वतस्य वह्न्यभावत्व एव निर्भरात् को

In Public domain. Digitization Muthulakshmi Research Academy

वह्निमानित्येवाकाङ्क्षेति प्रदर्शनाय वादिन इत्यस्याप्यभिधानम्। तथाचानित्यः इत्येवाकाङ्क्षा बोध्या। यद्वा हेत्वर्थान्वयाय यदि साध्यवानित्येव प्रतिजानीयात्तदा को वह्निमानिति जिज्ञासास्यादतः पक्षः साध्यवानिति प्रतिज्ञाकार्यैति दीधितिकाराभिप्रायः। साध्यं हेतूपन्यासेन। *साध्यनिर्देशम्* प्रतिज्ञाम्। तथा च हेत्ववयवार्थस्य साध्येऽन्वयं विना जिज्ञासानिवृत्त्यसम्भवात् साध्योपस्थितये प्रतिज्ञा आवश्यकीति भावः। *अतिप्रसङ्गात्* पदानुपस्थितस्य विशेष्यतयाऽन्वये द्रव्यत्वावच्छिन्नेऽपि धूमादि -त्यादिहेत्ववयवार्थान्वयप्रसङ्गात्। *प्रतिवादीति* उक्तप्रतिपत्तिरभावकोटावेव प्रमाणमिति। विरुद्ध-प्रतिपत्तिजनकवाक्येनेत्यर्थः। यदि विप्रतिपत्तिपदं तदेकदेशपरं तदानेत्याकारकप्रतिवादिवाक्यमेव प्रतिवादिविप्रतिपत्तिरिति बोध्यम्। *प्रमाणादीति* न्यामतेनैव मया शब्दानित्यत्वे प्रमाणं वक्तव्यमि-त्यादिसमयवन्धेनेत्यर्थः। सर्वमिदं तयोरावश्यकत्वेस्यात्तदेव नेत्यत आह। *परेति* *निराकाङ्क्षत्वा-दिति* जनितान्वयबोधकत्वादिति भावः। *शङ्कते* *न चेति* *अवयवान्तराणाम्* उदाहरणा-दीनाम्। *अतदर्थत्वात्* हेत्वन्वययोग्यसाध्योपस्थापकत्वासम्भवात्। पक्षविशेषणतापन्नसाध्यस्यैव हेत्वन्वययोग्यत्वादिति भावः। *तदनुपस्थानात्* प्राक् निगमनोपस्थानासम्भवात्। कथायामाकाङ्क्षा-क्रमेणैवाभिधानादिति भावः अवयवान्तरेणेत्यादिमूलं क्वचिन्न दृश्यते। *अवयवान्तरेण* उपनयेन। व्यतिरेक्युदाहरणे साध्यवाचकपदाभावाच्छङ्कायास्तुच्छत्वमिति उदाहरणत्यागः। *आक्षेपात्* उपनयेन प्रतीतस्वार्थानुपपत्त्या साध्यवत्तया पक्षानुमानादित्यर्थः। तथा च तेन हेत्वन्वययोग्यसाध्यो-पस्थितिरिति भावः। *साध्यान्वये इति* साध्ये हेत्ववयवार्थान्वये उदाहरणानन्तरं साध्यव्याप्यवान् क इत्याकाङ्क्षयोपनयाभिधानमित्यर्थः। दूषणान्तरमाह। *तस्मादिति* उपनयादित्यर्थः। पक्षस्य साध्य-वत्त्वं विनापि तद्व्याप्यवत्त्वप्रतीतिसम्भवादिति भावः। अयञ्च अपूर्वस्य वाच्यतां विना यागस्य कामिकर्तव्यताबोधस्य भाविनः अनुपपत्त्या मीमांसकैरुपेतः। प्रतीतिसाध्यव्याप्यवत्त्वान्यथानुपपत्त्या-साध्यवत्त्वकल्पनस्योपनयोत्तरकालीनतया हेत्ववयवप्रयोग एव न भवेदिति भावः। पदोपस्थितार्थस्यैव शाब्दबोधे भानात् तथाविधपक्षस्य साध्यवत्त्वमप्रयोजकमित्यपि द्रष्टव्यम्। निवन्धनकृतां मतमाह। *अन्येत्विति* *नाकाङ्क्षा* न प्रश्नः। *विशिष्टे* शब्दानित्यत्वग्राहकत्वविशिष्टे। *न शक्याभिधानम्* न विशिष्टबोधाभिप्रायप्रयुक्तहेत्ववयवे न बोधयितुं शक्यम्। *वादीति* वादिप्रतिवादिनोस्साध्यविवादे वस्तुगत्या यत्साध्यं तत्प्रश्नाभावादित्यर्थः।

**।इति कृष्णम्भट्टीये प्रतिज्ञालक्षणम्।**

In Public domain. Digitization Muthulakshmi Research Academy


## अथ गदाधरीये हेतुः निरूप्यते

****निगमनवारणायेति**** प्रतिज्ञोदाहरणोपनयविशेषाणां विवक्षणीयहेतुविभक्तिमत्त्वविशेषणेन वारणसम्भवान्नतदुक्तम्। ननु साध्याविषयकबोधजनकत्वनिवेशे वह्निमान्वह्निसामग्रीमत्त्वादित्याद्युक्तहेतावव्याप्तिरत आह। ****साध्याविषयकत्वं चेति**** ****बहिर्भावेण इति**** विवक्षणीयमिति शेषः। साध्यांशोपादानं हेतुविभक्तिमत्त्वदलसार्थक्याय। एतत्कल्पे तादृशसाध्याविषयकत्वप्रतियोगिकोटौ साध्यांशमुपादाय दलान्तरोपादानं प्रक्षालनाद्धीति न्यायेन सन्दर्भविरुद्धमतः कल्पान्तरमाश्रयति। ****पूर्वेति**** तस्माद्वह्निमानित्यादिनिगमने मत्वर्थाद्यंश एव साध्यस्य विशेषणतया अतिव्याप्तिरित्यतः **साक्षात्परम्परासाधारणेति**। तथा च तत्र साध्यस्य परम्परया पक्षविशेषणत्वान्न दोषः। हेतुत्वं प्रमेयं प्रमेयादित्यादौ प्रमेयत्वादिसाध्यके हेत्ववयवेऽव्याप्तिः हेतुतावच्छेदकीभूतसाध्यस्य परम्परया पक्षविशेषणत्वादतः पूर्वोपदर्शितेति। प्रकृतसाध्यपक्षकप्रतिज्ञाजन्यबोधे यादृशयादृशं पक्षांशे साध्यस्य

---

## अथ कृष्णम्भट्टीये हेतुः निरूप्यते

अन्यथा। प्रतिज्ञां विना। ननु हेतुविभक्तिमत्त्वमित्यस्य हेतुत्वबोधकविभक्तिमत्त्वमित्यर्थः। तत्र धूमादालोकवान् पर्वतो वह्निमानिति प्रतिज्ञया यो यो धूमवान् स वह्निमान् यथा धूमात् वह्निमन् महानसमित्युदाहरणे पर्वतो धूमादालोकवद्वृत्तिवह्निमानित्यादिस्थलीयधूमादालोकसमानाधिकरणवह्निव्याप्यधूमवानित्युपनये च किं वालोकाद्वह्निसाध्यकप्रतिज्ञोदाहरणोपनयेषु चातिव्याप्तेरकथनेन न्यूनतेत्याशङ्क्याह गादाधर्याम्। ***प्रतिज्ञेति*** ***विवक्षणीयेति*** तथाचोक्तस्थलेषु यथा श्रुतार्थे अतिव्याप्तेरग्रे वक्ष्यमाणपरिष्कृतहेतुविभक्तिमत्त्वनिवेशे अभावान्निगमनमात्रानुसरणमिति। ननु तादृश -विषयताबहिर्भूतविषयताशून्यत्वमेवास्तु किं साध्यांशनिवेशेनेत्यत आह। ***साध्यांशेति*** अखण्डाभावघटकसाध्यांशानिवेशेऽग्रिमव्यतिरेक्युदाहरणस्य निरुक्तविषयतावहिर्भूतविषयताशालिबोधजनकत्वेनैव वरणसम्भवात्तद्दलवैयर्थ्यं स्यात्। न च विषयतान्तर्भूतसाध्यविषयताभिन्ना तादृशविषयतान्तर्भूतत्वसाध्वीयत्वोभयाभाववती वा या साध्यविषयतातच्छून्यत्वमित्यर्थोऽस्त्विति वाच्यम्। द्वितीयस्य साध्यस्यासम्भववारकत्वेऽपि प्रथमस्य तस्याखण्डाभावसम्पादकत्वानपायाद्गौरवस्य त्वाधिक्यात्। ***दलान्तरम्*** हेतुविभक्तिमत्त्वदलम्। इदन्तु बोध्यम्। पूर्वोपदर्शितेत्याद्यग्रिमस्य अनुषङ्गपक्षाभिप्रायकतयाऽननुषङ्गपक्षे इदमेवसाध्याविषयकत्वमावश्यकम्। अवतारिकातु अनुषङ्गपक्षे बोध्येति। ***पूर्वेति*** प्रतिज्ञालक्षणेत्यर्थः। ***प्रकृतेति*** अत्र पूर्वोपदर्शितप्रतिज्ञाजन्यबोधीयसाध्य-

In Public domain. Digitization: Mahalakshmi Research Academy

विशेषणत्वं तादृशोर्थः। तच्च साध्यतावच्छेदकसम्बन्धावच्छिन्नं साक्षात्पक्षनिरूपितं पक्षांशे अभेदादिसम्बन्धेन विशेषणतापन्नसम्बन्ध्यादिनिरूपितञ्च तादृशविशेषणतात्मकसाध्य-विषयताशून्यत्वं समुदितार्थः। अयं वह्निमान् वह्निमत्पर्वतावृत्तिधर्मशून्यत्वादित्यादिहेताव-व्याप्तिवारणाय प्रकृतेति, पक्षतावच्छेदकावच्छिन्नार्थकम्। न चैवमननुषङ्गपक्षे निगमनजन्य-वोधे साध्यस्य पक्षतावच्छेदकावच्छिन्नाविशेषणत्वादतिव्याप्तितादवस्थ्यमिति वाच्यम्। अननु-षङ्गपक्षे पक्षनिष्ठमुख्यविशेष्यतानुरूपितप्रकारतापन्नत्वरूपं पक्षविशेषणतापन्नत्वं यदि निवेश्यते, तदा पक्षतावच्छेदकावच्छिन्नत्वाविवक्षणेऽपि तस्यादितरेभ्यो भिद्यते इत्यादि-निगमनातिव्याप्तेरशक्यपरिहारतया एतत्कल्पस्यानुषङ्गपक्षाभिप्रायकत्वात्।

---

विषयताशून्यत्वं न निवेश्यं निगमनातिव्याप्तेरित्यत आह। *तच्चेति* तादृशसम्वन्धावच्छिन्नपक्ष-विशेष्यतानिरूपितसाध्यप्रकारतायाः प्रकृतपक्षविशेष्यतानिरूपिताभेदसम्वन्धानच्छिन्नप्रकारता-सम्वन्ध्यंशे निरूपितत्वसम्वन्धावच्छिन्नसाध्यप्रकारताया अनुगतरूपेण शून्यत्वं तथा च निगमनजन्य-वोधीयसाध्यविषयतायाः तादृशविषयतानिरूपितसम्वन्धविषयतानिरूपितविषयतारूपत्वान्नाति-व्याप्तिरिति वह्न्यादिसाध्यकनिगमनवारणायैकविधसाध्याविषयकत्वनिवेशेऽपीतरभेदादिसाध्यक-निगमनानां वारणाय तादृशतादृशसाध्यविषयताशून्यत्वकूटं द्रष्टव्यम्। हेतुत्वं प्रमेयं प्रमेयादित्यादौ हेतुजन्यवोधे हेतुत्वे आधेयतासम्वन्धेन विशेषणतापन्नप्रमेयांशे एव प्रकारत्वं न तु अभेदसम्वन्धेन विशेषणतापन्नप्रमेयांशे प्रकारत्वं प्रमेयत्वस्येति नाव्याप्तिः। *साक्षात्* पचतीत्यादौ एतच्च परम्परासाधारणनिरूपितत्वं नास्तीति सूचकम्। *पक्षांशे इत्यादि* वह्निमानित्यादौ। *पक्षतेति* नन्वयं वह्निमान् वह्निमत्पर्वतावृत्तिधर्मशून्यत्वादित्यादौ हेतावेवमप्यव्याप्तिरिति चेन्न। सिषाधयिषया-न्यायप्रयोगानङ्गीकारात्। तदङ्गीकारे तु प्रकारतावच्छेदकतानापन्नत्वेन पक्षतावच्छेदकं विशेषणीयम्। एतेन पक्षतावच्छेदकावच्छेदेन साध्यसाधनस्योद्देश्यत्वे तत्सामानाधिकरण्येन साध्यस्य हेतुघटकत्वे सिषाधयिषाया अनपेक्षणेऽपि नक्षतिः। केचित्तु तदव्याप्तिवारणाय पक्षमुख्यविशेष्यत्वस्यावश्यकतया पक्षतावच्छेदकावच्छिन्नत्वं व्यर्थमेवेत्याहुः। *अननुषङ्गपक्षेति* इदं विशेषणम् अनुषङ्गपक्षे निगमन-सामान्यवारकं नत्वननुषङ्गपक्षे एतत्पक्षे हि पक्षतावच्छेदकावच्छिन्नत्वविवक्षात्यागेऽपि वह्निमत् अवृत्तिधर्मशून्यत्वादितिहेतुसङ्ग्रहाय मुख्यविशेष्यतोपादानेऽपि तस्माद्वह्निमानित्यादिकं कतिपय-निगमनमेव वार्यते नसर्वन्तस्मादितरेभ्यो भिद्यते इत्यादौ भेदाश्रयताया एवाख्यातार्थस्य मुख्यत्वेन भानादिति भावः। *एतत्कल्पस्य* द्वितीयकल्पस्य। अयं तस्मादितरेभ्यो भिद्यते इत्यनुषङ्गपक्षः।

In Public domain. Digitization Muthulakshmi Research Academy



अयं धूमाभाववान् वह्न्यभावादित्यादौ यो यो धूमवान् सवह्निमानित्यादेर्व्यतिरेक्युदाहरणस्य यथाश्रुतहेतुविभक्तिमत्त्वनिवेशनेनापि वारणसम्भवाद्विवक्षणीयस्य प्रकृतसाध्यान्वयबोधनक्षमार्थोपस्थितिप्रयोजकहेतुविभक्तिमत्त्वस्य व्यावृत्तिस्थलमाह। **इदमिति** उदाहरणस्य साध्याविषयकत्वरक्षणाय अभावसाध्यकानुधावनम्। हेतुविभक्तिपदस्य ज्ञापकत्व-रूपहेतुत्वबोधकविभक्त्यर्थकत्वे प्रथमोदाहरणे नातिव्याप्तिस्तत्र जनिधात्वर्थोत्पत्त्यन्वितप्रयोज्यत्वस्यैव पञ्चम्यर्थत्वादतस्थलान्तरमाह। **अयमिति** **व्यतिरेक्युदाहरणस्येति** यत् दण्डाज्जातं तद्दण्डसंयोगाजन्यद्रव्यत्वाभाववत् यो यो धूमादालोकवान् स आर्द्रेन्धनवानित्याद्याकारकस्येति शेषः। साध्याविषयकत्वरक्षार्थं व्यतिरेकिपर्यन्तानुधावनम्। यद्यप्यन्वय्युदाहरणस्य साध्यविषयकत्वेऽपि पक्षतावच्छेदकविशिष्टे साध्याविशेषणकत्वादतिव्याप्तिस्तदवस्थैव-द्वितीयकल्पे। तथापि प्रथमकल्पे व्यावृत्तिघटनाय अभावसाध्यकव्यतिरेक्यनुसरणम्। एतादृशोदाहरणस्य साध्यान्वितस्वार्थबोधकपदशालित्वनिवेशनेनैव वारणसम्भवात्तादृशविभक्तिमत्त्वपर्यन्तस्य व्यावृत्तिस्थलमाह। **हेतुत्वपक्षकेति** **साध्यान्वितेति** निगमनोपस्थाप्यसाध्यान्वितेत्यर्थः। विशेषणतया साध्यान्वितत्वस्याविवक्षणादिति भावः। न चोपनये

---

*यद्दण्डादिति* दण्डसंयोगाजन्यत्वमात्रोक्तौ दण्डरूपे व्यभिचारवारणाय द्रव्यत्वनिवेशः। द्रव्यत्वमात्रस्य घटादौ व्यभिचार इति दण्डसंयोगजन्यत्वनिवेशः। यद्दण्डाज्जातं तद्दण्डसंयोगाजन्यद्रव्यम् इति तु नोदाहरणं दण्डरूपेव्यभिचारात्। हेत्वभावालाभाच्च दण्डरूपे च दण्डसंयोगाजन्यद्रव्यत्वाभावसत्त्वान्नव्यभिचारः। सिद्धान्तेतु विशिष्टाभावस्यातिरिक्ततयाव्यापकत्वम्। अनतिरिक्तत्वे तु वैशिष्ट्यावच्छिन्नप्रतियोगिताकाभावत्वेन वाच्यम्। *अन्वय्युदाहरणस्येति* यद्दण्डसंयोगाजन्यद्रव्यवत् तन्न दण्डाज्जातमित्यादेः वह्निमान् धूमादित्यादिस्थलीयस्यैववा एवञ्चान्वय्युदाहरण एवातिव्याप्तिसम्भवे व्यतिरेकिपर्यन्तानुधावनं व्यर्थमित्याशयः। अत्र यद्दण्डाज्जातत्वाभावाभाववत्तद्दण्डसंयोगाजन्यद्रव्यत्वा-भाववदिति व्यतिरेक्युदाहरणस्यापि सम्भवादन्वयिपदं चिन्त्यम्। प्रथमकल्पे बहिर्भूतसाध्यविषयतासत्त्वादेवातिव्याप्त्यभावाद्द्वितीयकल्पे इति। ननु साध्यविषयतानिरूपितस्वार्थविषयताकबोधो न निवेश्यते येनोक्तदोषवारणाय विभक्तिनिवेशः स्यात् किन्तु साध्यविशेषयतानिरूपितस्वार्थप्रकारताकबोध एवविभक्तित्वानिवेशेन लाघवादित्यत आह। *विशेषणतेति* सिद्धविभक्तित्वनिवेशानुरोधेन विशेषणत्वस्यैव निवेशोनास्तीति भावः। अत्र दीधितिकाराणां हेतुत्वमभिधेयम् इतरभिन्नं वा हेतुत्वात् इत्यादिस्थलीयोपनये विभक्तिव्यावृत्तिप्रदर्शनं किं प्रथमकल्पं किं वा द्वितीयकल्पमभिप्रेत्य उभयथापि

व्याप्तिघटकतया साध्यविषयकत्वसत्त्वान्नातिव्याप्तिः प्रसज्यते, अनुषङ्गपक्षे निगमनोपस्थाप्य-साध्येन सममिदं पदार्थस्य हेतुत्वस्यानन्वयाद्यावृत्तिदानस्याननुषङ्गपक्षाभिप्रायकतया अननु-षङ्गपक्षे च निरुक्तविशिष्टविषयताबहिर्भूतसाध्यविषयताशून्यत्वस्यैव साध्याविषयकत्व-पदार्थतया पक्षविशेषणतया साध्याविषयकत्वस्याप्रयोजकत्वादिति वाच्यम्। उपनयपदस्य इतरत्वव्यापकीभूताभावप्रतियोगिमदिदमित्याद्याकारकाभावसाध्यकव्यतिरेक्युपनयपरत्वात्।

**प्रकृतसाध्येति** प्रकृतसाध्यान्वितस्वार्थबोधप्रयोजिकाकाङ्क्षादिमद्धेतुविभक्तिम-त्त्वमित्यर्थः। उपदर्शितस्थले च धूमज्ञानज्ञाप्यालोकाभावादिरूपसाध्यांशे पञ्चम्यर्थानन्वयात् नातिव्याप्तिरिति भावः। नन्वेवं हेतुपदमनर्थकं साध्यान्वितस्वार्थबोधकविभक्तिशालिनो हेत्व-

---

न सम्भवतीत्याशङ्कते। *न चेति* *व्याप्तिघटकतयेति* इतरभेदसाध्यके व्युपनये अन्वयव्याप्ति-प्रवेशमभिप्रेत्यद्वितीयकल्पाभिप्रायकत्वं चेद्यावृत्तिदानस्योच्यते तदातिव्याप्तिलापनं नास्तीत्याह। *अनुषङ्गपक्ष इति* *इदं पदार्थतस्य* उपनयघटकेदं पदार्थस्य। एतेन साध्यान्वितस्वार्थबोधक-पदशालित्वमात्रेणैववारणमुक्तम्। *अनन्वयात* भिन्नवाक्यत्वेनेत्यादिः। ननूपनयघटकायं पदस्या-वृत्तिरेवानुषङ्गः तथा च निगमनोपस्थाप्य साध्यान्वितस्वार्थबोधकत्वं हेतुत्वबोधकोक्तोपनयघटकायं पदस्याक्षतमेवेति व्यावृत्तिः सम्भवतीति चेन्न। उपनयघटकायं पदसदृशपदान्तरस्यावृत्तिरेवानुषङ्गः। न तूपनयघटकस्यैवावृत्तिस्तथेतिद्वितीयकल्पे अतिव्याप्त्यलग्नकतेत्याशयः। न च तथापिनिगमन-घटकायं पदस्य योर्थस्स एवोपनयघटकतत्पदस्यापीतिद्वितीयकल्पे साध्यान्वितस्वार्थबोधकत्व-सम्भवादतिव्याप्तिर्लगत्येविति वाच्यम्। स्वजन्यपदार्थोपस्थितिसहकारेण साध्यान्वितस्वार्थबोधकत्वा-सम्भवादतिव्याप्त्यलग्नकतैवेत्याशयात्। तथापि पक्षविशेषणतया साध्यविषयत्वमादाय व्यावृत्तिः स्यादित्यत आह। *अननुषङ्गपक्षे चेति* *अप्रयोजकत्वादिति* तस्यानुषङ्गपक्षाभिप्रायकत्वादिति भावः। *अभावसाध्यकेति* हेतुत्वपक्षकेतरभेदसाध्यकहेतुत्वत्वादिहेतुकेत्यर्थः। *प्रकृतेति* अयं न धूमाद्गुणत्वाभावान् रूपत्वादित्यादौ यः धूमाद्गुणत्वाभाववान् सरूपतत्वाभाववानित्युदहरणस्य धूमात् गुणत्वाभावस्य यः कालिकसम्ब्धावच्छिन्नाभावः विषयतासम्वन्धावच्छिन्नाभावः विशेषणता-सम्वन्धावच्छिन्नाभावो वा तस्य विशेषणतासम्वन्धावच्छिन्नाभावस्य साध्यत्वे कालत्वादौ हेतौ यः धूमाद्गुणत्वाभावस्य यः कालिकसम्वन्धावच्छिन्नाद्यभाववान् सकालत्वाभाववान् इत्याद्युदाहरणस्य च वारणाय प्रकृतेति। *स्वार्थबोधजनकेति* स्वार्थभानप्रयोजकेत्यर्थः। क्वचित्तथैवपाठः। शाब्दबोध-स्वरूपयोग्यहेत्ववयवसङ्ग्रहाय आकाङ्क्षादीति। निरुक्तसाध्यविषयत्वशून्यशाब्दबोधजनकत्वं केवल-

In Public domain. Digitized by Muthulakshmi Research Academy



तिरिक्तावयवस्य साध्यविषयकत्वनियमेनातिप्रसङ्गानवकाशात्। न च पक्षविशेषणतया साध्या -विषयकत्वनिवेशपक्षे ज्ञानादिसाध्यके य इच्छति स जानातीत्युदाहरणे ज्ञानादिरूप-साध्यान्वितस्वार्थबोधकाख्यातविभक्तिशालिनि विशेषणविभक्तेरभेदार्थकत्वमते प्रमेयत्वादि-पक्षकप्रमेयत्वादिसाध्यकोपनये पक्षीभूतसाध्यान्विताभेदवोधकप्रमा[43]विभक्तिशालिनि च अति-व्याप्तिवारणाय हेतुपदोपादानमावश्यकमिति वाच्यम्। पक्षविशेषणतया साध्याविषयकत्व-निवेशपक्षे हेतुपदोपादानेऽपि यो यो धूमवान्स वह्निमान्यथा धूमाद्वह्निमन्महानसमिति सदृष्टा-न्तोदाहरणेऽतिव्याप्तेः तद्वारणाय प्रकृतपक्षविशेषणतापन्नसाध्यान्वितार्थवोधकत्वस्यावश्यं

हेत्वर्थबोधमादाय साध्यान्वितस्वार्थबोधकविभक्तिमत्त्वं तु प्रतिज्ञाहेत्वर्थविशिष्टवैशिष्ट्यबोधमादायेति एकथाशाब्दबोधनिवेशोन सम्भवतीति ध्येयम्। यद्यपि साध्यान्वितस्वार्थभावप्रयोजकाकाङ्क्षासाध्य-वाचकपदे नैवेति तन्निवेशस्तु व्यर्थः। तथापि धूमादालोकवानिति पूर्वोक्तोदाहरणे आर्द्रेन्धनशून्यत्वात् इति या पञ्चमी तस्याः साध्यान्वितस्वार्थविषयताप्रयोजकत्वे तत्त्वेन भ्रमविषयोदाहरणघटकपञ्चम्या अपि प्रयोजकत्वादतिव्याप्तिरतः आकाङ्क्षाप्रकृतिसमभिव्याहाररूपानिविष्टा। आदिना योग्यतातात्पर्य-परिग्रहः। तत्रयोग्यतास्वार्थरूपविशिष्टविषयकत्वं न तु स्वार्थघटकपदार्थीय निरूप्यनिरूपकभावापन्न-विषयताकूटं तेन पर्वतो वह्निमान् द्रव्यादित्यादिस्थले द्रव्यादित्यादौ नातिव्याप्तिः द्रव्यनिष्ठस्वज्ञान-जनकभ्रमान्यज्ञानविषयत्वानिरूपकत्वबोधस्य भ्रमान्यत्वावगाहित्वेऽपि तादृशविशिष्टविषयकत्वात् तात्पर्यं च निस्तात्पर्यकशुकाद्युक्तस्यार्थान्तरपरस्य च धूमादित्यादिवाक्यस्य वारणाय। अनुषङ्गपक्षे हेतुपदसार्थक्यं शङ्कते। *न चेति* *विशेषणेति* प्रमेयव्याप्यवाच्यत्ववदिदमित्युपनये इदमंशे अभेदस्य विशेषणत्वात्पक्षीभूतसाध्यान्वितस्वार्थबोधकत्वं प्रथमाविभक्तेरित्यतिव्याप्तिरित्यर्थः। *यो य इति* धूमाद्वह्निमन्महानसः तत् भिन्नश्च धूमवान् धूमाद्वह्निमन्महानसस्तद्भिन्नः धूमव्यापक-वह्निमांश्चेति बोधः। व्यापकतायामानसबोधविषयतापक्षे धूमाद्वह्निमन्महानसो वह्निमानिति बोधानु-दयात्। अथवह्नेरुद्देश्यतावच्छेदककोटिनिविष्टतयातथाविधवोधेन बाधकमिति चेन्न। रक्तदण्डवान् दण्डवानित्यादौ शाब्दबोधवारणाय दण्डवतः घटवान् दण्डवानित्यादेः सङ्ग्रहाय चावच्छेदक-विशेषणतानापन्नोद्देश्यतावच्छेदकताया एवबाधकत्वादिति। येतूद्देश्यतावच्छेदकतापर्याप्त्यधि-करणस्य विधेयतावच्छेदकतापर्याप्त्यधिकरणत्वे शाब्दवोधः रक्तदण्डवान् दण्डवानित्यादावपि दण्डवान् रक्तदण्डवानितिवत् भवत्येवेति वदन्ति तेषामुक्तबोधो भवत्येवेति। इदमित्यादिकेचितित्

43. प्रथमाविभक्तिशालिनीति पाठान्तरम्।

In Public domain. Digitization: Muthulakshmi Research Academy

निवेशनीयतया तादृशोदाहरणोपनययोः तथाविधसाध्यान्वितस्वार्थवोधकविभक्तिमत्त्वविरहेणातिप्रसङ्गानवकाशादित्यत आह। **हेत्वितीति** इदमुपलक्षणम्। पक्षविशेषणतया साध्याविषयकत्वनिवेशकल्पे विभक्तिमत्त्वमपि नोपादेयम्। तत्कल्पस्यानुषङ्गपक्षपरतया तत्पक्षे उपनयस्य निगमनैकवाक्यताविरहेण साध्यान्वितस्वार्थवोधकपदशालित्वाभावाद्दर्शितविभक्तिपदव्यावृत्तेश्च अननुषङ्गपक्षे एव सङ्गतेस्तत्कल्पे व्यावृत्त्यभावादिति केचित्। वस्तुतस्तु अनुषङ्गपक्षे उपनयस्थस्यैव पक्षबोधकेदं पदस्य निगमनघटकीभूय साध्यान्वितार्थवोधकतया तादृशबोधे च प्रयोजनान्तरविरहेण स्वजन्यत्वानिवेशनादुपनये विभक्तिपदव्यावृत्तिस्सम्भवति इत्यवधेयम्।

ननु प्रथमसाध्याविषयकत्वनिर्वचनपक्षे पर्वतः पर्वतभिन्नत्वप्रकारकज्ञानाभाववान् तादृशज्ञानाभावात् यः पर्वतभिन्नत्वेन ज्ञायते स पर्वतभिन्नत्वेन ज्ञायते यथा पर्वतभिन्नत्वज्ञानाभावादुत्पन्नं ज्ञानमित्यादौ विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताकाभावसाध्यहेतुकव्यतिरेक्यु-

---

अत्यन्तं मतान्तरम्। अननुषङ्गपक्षे प्रकृतहेतुविशिष्टहेतुत्वविशिष्टहेतुत्वविषयताबहिर्भूतसाध्यविषयताशून्यशाब्दबोधजनकत्वे सति साध्यान्वितस्वार्थबोधकविभक्तिशालित्वं लक्षणम्। अननुषङ्गपक्षे तु प्रकृतपक्षविशेषणतया साध्यविषयकत्वशून्यशाब्दबोधजनकत्वे सति प्रकृतपक्षविशेषणतापन्नसाध्यान्वितस्वार्थबोधकपदशालित्वं लक्षणं न तु पदेविभक्तिमत्त्वमपि प्रयोजनाभावात् पक्षविशेषणतापन्नसद्भावासद्भावाभ्यां लक्षणभेदस्येष्टत्वादिति भावः। *साध्यान्वितेति* पक्षविशेषणतापन्नेत्यर्थः। *तत्कल्पे* अनुषङ्गकल्पे, उपनयघटकस्यैवायं पदस्यावृत्तिः अनुसन्धानरूपा न तु तत्सदृशपदस्येति आशयेन सिद्धान्तयति। *वस्तुतस्त्विति* *निगमनेति* तदर्थसाध्यविषयतानिरूपितेदं पदार्थविषयताकबोधजनकत्वेन। ननु विभक्तित्वं सुप्तिङ् एतदन्यतरत्त्वं तन्निवेशो गैरवं अनुषङ्गपक्षे इदं पदार्थे साध्यबोधो निगमनजन्य एवनोपनयजन्य इति बोधे लाघवेन स्वजन्यत्वस्यैव निवेशादुपनयवारणादित्यत आह। *तादृशबोधे चेति* *साध्यीभूतेति* ज्ञानाभावादुत्पन्नमित्यत्र पञ्चमी विभक्त्यर्थस्य विशेष्यतया प्रकृत्यर्थे पर्वतभिन्नत्वप्रकारकज्ञानाभावे अन्वितत्वेन तादृशप्रकृत्यर्थस्य साध्यतया चेत्यादिः। नन्वेतावतापि नातिव्याप्तिर्भवति पक्षविशेषणतापन्नसाध्यान्वतस्वार्थबोधकतया विभक्तावभावादित्यत आह। *प्रथमेति* तथा च प्रथमकल्पे केवलसाध्यान्वितस्वार्थबोधकत्वमेव विभक्तौ निविष्टं न तु पक्षविशेषणतापन्नसाध्यान्वितस्वार्थबोधकत्वमित्यर्थः। ननु तथापि पञ्चम्यर्थो निरूपितत्वमेव न तु हेतुत्वं तथा च हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयताबहिर्भूतप्रकृत्यर्थ-

In Public domain. Digitization Muthulakshmi Research Academy



दाहरणेऽतिव्याप्तिः। तत्र हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविशयतान्तर्भूताया[44] एव साध्यविषयतायास्सत्त्वात्। साक्षीभूततादृशाभावान्वितस्वार्थबोधकपञ्चमीविभक्तिमत्त्वाच्च प्रथमकल्पे साध्ये पक्षविशेषणतापन्नत्वानिवेशात् दृष्टान्तोपस्थाप्यस्य तादृशसाध्यस्य पक्षान्वितत्वस्याकिञ्चित्करत्वादित्यत आह। **यदिचेति** सिषाधयिषया न्यायप्रयोगस्य सविवादतया यदि चेत्युक्तं, तस्य चोच्यत इत्यनेनान्वयः। समवायसम्बन्धावच्छिन्नाभावस्य साध्यत्वे ज्ञानस्य समवायेन ज्ञानरूपप्रतियोग्यनधिकरणतया न व्यतिरेकदृष्टान्तत्वसम्भव इति विशेष्यतयेत्युक्तम्। अत एव महानसत्वादिप्रकारकज्ञानाभावस्साध्यतया उपेक्षितः, विशेष्यतयापि ज्ञानस्य तादृशज्ञानवत्वाभावात्। साध्यस्य हेतुतायामेव हेतुत्वविशेषणतापन्नतथाविध -साध्यविषयतायाः हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयतान्तर्भावस्सम्भवतीति तदादरः। **ज्ञानाभावादुत्पन्नमिति** असंसर्गाग्रहविधया तादृशज्ञानाभावस्य पर्वतत्व-

---

रूपसाध्यविषयता शालित्वात्कथमतिव्याप्तिरिति चेन्न। नह्यत्र पर्वतभिन्नद्विप्रकारकज्ञानाभावजन्यमिति दृष्टान्तः किन्तु पर्वतभिन्नत्वप्रकारकज्ञानाभावात्प्रमेयत्ववत्पर्वतत्वज्ञानं तस्यैव पर्वतभिन्नत्वप्रकारकज्ञानाभावादुत्पन्नत्वादिति दीधिति भावः। अयञ्च पञ्चम्याः प्रमेयत्वान्वये ज्ञानज्ञाप्यत्वार्थकतया तथाविधबहिर्भूतसाध्यविषयताशून्यत्वादित्यतिव्याप्तिः। अत्र पर्वतभिन्नत्वप्रकारकज्ञानाभावात्प्रमेयत्वं तादृशज्ञानाभावात्प्रमेयत्ववद्घटोवा उत्पन्नपदपरित्यागेन तादृशज्ञानाभावाज्ज्ञानमिति व्याख्यानानि बोध्यानि। *प्रथमकल्पे इति* द्वितीयकल्पे तत्र तन्निवेशादेव तत्र नातिव्याप्तिः। ननु इत्यत आह यदिचेत्यसङ्गतमित चेन्न। इत्यत इत्याशङ्कायां यदि चेत्यादिना कृतायां तदेत्यादिना समाधानमाहेत्यर्थे नासङ्गतिः। *समवायेति* समवायसम्बन्धावच्छिन्नतथाविधज्ञानाभावस्य साध्यहेतुभावे यः पर्वतभिन्नत्वेन जानाति स पर्वतभिन्नत्वेन जानाति यथापर्वतभिन्नत्वप्रकारकज्ञानाभावात् उत्पन्नज्ञानवान् प्रमेयत्ववच्चैत्रात्मावेति न सदृष्टान्तोदाहरणसम्भवः। जन्यज्ञानस्याव्याप्यवृत्तितया साध्यानधिकरणो न जीवः। ईश्वरस्तु नोत्पन्नज्ञानवान् नापि पर्वतभिन्नत्वप्रकारकज्ञानाभाववान् येन तज्जन्यप्रमेयत्ववान् स्यात् द्रव्यत्वात्सत्तावान् गुण इत्याद्यप्रयोगादित्यनयोर्नदृष्टान्ततासम्भवतीति तदुपेक्षितम्। *तादृशेति* महानसत्वप्रकारकेत्यर्थः। *साध्यस्येति* पर्वभिन्नत्वेन ज्ञानाभाववान् पर्वतरूपादित्यादौ यः पर्वतभिन्नत्वेन ज्ञायते स पर्वतरूपशून्यो यथा पर्वतभिन्नत्वप्रकारकज्ञानाभावादुत्पन्नज्ञानमित्युदाहरणेन प्रथमरीत्यासाध्याविषयकत्वम्। पर्वतो रूपवान् पर्वतभिन्नत्वेन ज्ञानाभावादि-

---

44. हेतुतावच्छेदकविशिष्टहेतुत्वविशयतान्तर्भूताया इति पाठभेदः

प्रकारकज्ञानोत्पादकत्वं बोध्यं, व्यतिरेकिपर्यन्तानुधावनं विशिष्टविषयताबहिर्भूतसाध्यविषयत्वाभावनिर्वाहाय। प्रकृतसाध्ये विशेषणतया अन्वितो यस्स्वार्थः तद्बोधकत्वं च दर्शितहेतुत्वपक्षकोपनयस्थेदं पदस्य नास्तीति तद्विवक्षणे विभक्तिपदवैयर्थ्यमिति विशेष्यविशेषणसाधारणमेवान्वितत्वं निवेशनीयमित्युक्तोदाहरणजन्यबोधे पञ्चम्यर्थस्य साध्यविशेष्यत्वेऽप्यतिप्रसङ्ग एवेत्यभिप्रायः। **अवयवान्तरेति** स्वभिन्नावयवघटकपदजन्योपस्थितिसहकारेण स्वाघटकपदजन्योपस्थितिसहकारेण वा तत्पदार्थान्वितस्वार्थबोधकविभक्तिमत्त्वमित्यर्थः तेन तादृशसाध्यस्य प्रतिज्ञाद्यवयवस्थपदोऽपि स्थापितत्वेपि नातिव्याप्तिः। न चैवमनुषङ्गपक्षे साध्याविषयकत्वविशेषणमनर्थकं निगमनस्य तत्पक्षे उपनयैकवाक्यताविरहेणावयवान्तरोपस्थापितार्थान्वितस्वार्थबोधकविभक्तिमत्त्वाभावाद्व्यावृत्त्यसङ्गतेरिति वाच्यम्। चैत्रः पचतिपाककृतिसामग्रीमत्त्वादित्यादौ पाककृत्यादिसाध्यकप्रतिज्ञायां हेत्ववयवस्थपञ्चम्युपस्थाप्य हेतुत्वा-

---

त्यादावदाहरणेन साध्यान्वितस्वार्थबोधकविभक्तिमत्त्वमिति साध्यहेत्वोरैक्यादर इत्यर्थः। *असंसर्गाग्र-विधया* बाधकज्ञानाभावविधया। *तादृशज्ञानाभावस्य* पर्वतभिन्नत्वप्रकारकज्ञानाभावस्य। अयं पर्वत इति ज्ञानं प्रति अयं पर्वतान्य इति ज्ञानस्य बाधमुद्रया विरोधित्वात्तदभावस्य हेतुताबोध्या। नन्ववयवान्तरेत्यादिदीधितिरसङ्गता। यः पर्वतभिन्नत्वेन ज्ञायते न पर्वतभिन्नत्वेन ज्ञायते यथा पर्वतभिन्नत्वप्रकारकज्ञानाभावादुत्पन्नज्ञानमित्युदाहरणे पञ्चम्याः प्रकृत्यर्थान्वितत्वं वर्तत एव। प्रकृत्यर्थस्य तु वस्तुगत्या पर्वतः पर्वतभिन्नत्वप्रकारकज्ञानाभाववानिति प्रतिज्ञाघटकपदोपस्थितार्थकतया अवयवान्तरोपस्थितार्थान्वितस्वार्थबोधकताया अक्षततया अतिव्याप्तितादवस्थ्यादित्यत आह। *स्वभिन्नेति* उदाहरणाद्बोधे जननीये स्वघटकपदजन्योपस्थितय एव सामग्रीघटिकाः। न तु प्रतिज्ञाघटकपदजन्यपर्वतभिन्नत्वप्रकारज्ञानाभावोपस्थितिस्तथाच तत्संवलिताया उदाहरणघटकपञ्चम्यर्थोपस्थितेरेकसामग्रीघटकत्वाभावेनस्वभिन्नावयवघटकपदजन्योपस्थितिसहकारेण अवयवान्तरघटकपदोपस्थापितार्थान्वितस्वार्थबोधकत्वाभावान्नातिव्याप्तिरिति भावः। स्वभिन्नत्वं यदिस्वनिष्ठावयवत्वपर्याप्त्यनधिकरणत्वम्। तदा स एव दोषः अनुयोगितयावयवत्त्वपर्याप्त्यधिकरणप्रवेशे गौरवमतस्स्वघटकेति अन्वयविशेष्यविशेषणस्साक्षात्परम्परासाधारणः तेन विभक्तित्ववैयर्थ्यम्। *न चैवमनुषङ्गपक्ष इति* अत्र यद्यपि स्वभिन्नावयवघटकपदजन्योपस्थितिसहकारेण तत्पदार्थान्वितस्वार्थबोधकत्वघटित एकः कल्पः। स्वघटकपदजन्योपस्थितिसहकारेण तत्पदार्थान्वितस्वार्थबोधकत्वघटितोऽपरोऽनयोश्च कल्पयोस्तस्माद्वह्निमानिति निगमने अननुषङ्गपक्षे उपनयैकवाक्यतासत्त्वेऽपि तथाविधस्वार्थबोधक-

In Public domain. Digitization Muthulakshmi Research Academy

न्वितस्वार्थबोधकाख्यातविभक्तिमत्यामतिव्याप्तिवारणाय साध्याविषयकत्वोपादानस्यावश्यक-
त्वात्। प्रथमरीत्यासाध्याविषयकत्वनिर्वचनस्याननुषङ्गपक्ष इव अनुषङ्गपक्षेऽपि न सम्भवात्[45]

---

विभक्तिमत्त्वाभावात्साध्याविषयकत्वमनर्थकमेवेत्यनुषङ्गपक्ष इत्ययुक्तम्। तथापि अननुषङ्गपक्षे तस्मात्
इतरेभ्यो भिद्यत इति निगमनेऽतिव्याप्तिः। उपनयघटकायां पदार्थान्विताख्यातार्थाश्रयता-
बोधघटकत्वादतः साध्याविषयकत्वं सार्थकं भवतीत्यनुषङ्गपक्ष इत्युक्तं तत्पक्षे तूपनय घटकमयं पदं
निगमनघटकमेवेति स्वाघटकपदजन्योपस्थितिसहकारेणेत्यनेनैव दर्शितनिगमनवारणात्साध्य-
विषयकत्ववैयर्थ्यमिति। अथावमनुषङ्गपक्षेऽपि स्वाघटकेपीत्यादिकल्पे तत्सार्थक्याभावेऽपि
स्वभिन्नावयवघटकेत्यादिकल्पे तस्मादितरेभ्यो भिद्यत इति निगमने एवानुषङ्गपक्षे उपनय-
घटकस्यैवायं पदस्यावृत्तिरनुषङ्ग इति स्वभिन्नावयवघटकपदजन्योपस्थितिसहकारेणाख्यातार्थाश्रयता-
बोधकत्वादतिव्याप्तिरतः साध्याविषयकत्वं सार्थकमेव। उपनयघटकस्यायं पदस्य स्वघटकत्वेऽपि
स्वभिन्नावयवसाधकत्वादिति चेन्न। उपनयघटकस्यायं पदस्यैवावृत्तिर्नानुषङ्गपदार्थः किन्तूपनय-
घटकायं पदसदृशस्यायं पदस्येति उपनयघटकायं पदस्य स्वभिन्नावयवघटकत्वेऽपि तत्सहकारेण
निगमनस्य न बोधजनकत्वमित्याशयात्। तथा च स्वभिन्नावयवेत्यादिप्रथमकल्पेनायं दोष इति।
नन्वेवं वैयर्थ्यशङ्कालापनेऽपि सन्दर्भाशुद्धिरेव हेतुतावच्छेदकविशिष्टहेतुविशिष्टेत्यादिप्रथमरीत्यासाध्या
-विषयकत्वनिवेशकल्पे यदि चेत्यादिना दीधिति कारैरुदारणेऽतिव्याप्तिमाशङ्क्यावयवान्तरोपस्थापिता
इति समाधानस्य प्रदर्शितत्वात्तस्य स्वभिन्नावयवघटकेत्यादिपरिष्कारस्य कृतत्वेन प्रथमरीत्यासाध्या-
विषयकत्वस्य चानुषङ्गपक्षाभिप्रायकत्वाभावादनुषङ्गपक्षमवलम्ब्यसाध्याविषयकत्ववैयर्थ्याभिधानस्या-
युक्तत्वादिति चेन्न। प्रथमरीत्या साध्याविषयकत्वकल्पस्यानुषङ्गाननुषङ्गोभयपक्षाभिप्रायकत्वे बाधका-
भावादनुषङ्गपक्षमादायापि शङ्कानम्भवत्येव। इयं च शङ्कास्वाघटकावयवेत्यादिपरिष्कारे कृतैवागतेति
ध्येयम्। अत्र प्रथमरीत्यासाध्याविषयकत्वस्यानुषङ्गाननुषङ्गोभयपक्षाभिप्रायकत्वेऽपि अवयवान्तरे-
त्यादिपरिष्कारः प्रथमरीत्या साध्याविषयकत्वघटितलक्षणेकार्य इति चैत्रः पचतीत्यादिप्रतिज्ञाद्या-
लोचयितृणां भट्टाचार्याणामभिप्रायः। येतुतादृशप्रतिज्ञामनालोचयन्तः प्रथमरीत्यासाध्याविषयकत्व-
स्यानुषङ्गाननुषङ्गपक्षाभिप्रायकतया यदिचेत्यादिनोदाहरणेतिव्याप्तिरुक्ता तत्र तदेत्यादिना समाधान-
द्वयमुक्तं तत्राद्यमननुषङ्गपक्ष एव अननुषङ्गपक्षेतु द्वितायमिति वदन्ति तन्मतमाह। *प्रथमरीत्येति*
इयम् अवयान्तरोपस्थापितेत्यादिप्रथमरीत्यासध्याविषयकबोधजनकत्वे सति स्वाघटकपदजन्योप-
स्थितिसहकारेण तत्पदार्थान्वितस्वार्थबोधकविभक्तिमन्न्यायावयवत्वमननुषङ्गपक्षे निर्गलितार्थः। न

---

45. असम्भवादिति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

अननुषङ्गपक्षे एवेयं विवक्षा, अननुषङ्गपक्षे उदाहरणाप्यित्व[46]विशेषणेनानुपदोक्तोदाहरणं वारणीयमित्यपि वदन्ति।

साध्यघटितार्थबोधकोक्तहेतावव्याप्तिं हेतुविभक्तिमदुक्तोदाहरणेऽतिव्याप्तिञ्च प्रकारान्तरेण वारयतां मतमाह। **केचित्त्विति** निगमने हेतुविभक्तिमत्त्वनैयत्यादतिव्याप्तिवारणाया अनियतान्तम्। हेतुत्वस्यापि साध्यबोधकोक्तहेतुवृत्तितया असम्भव इति असामाना-धिकरण्यमुपेक्ष्य अनियतत्वनिवेशः। उदाहरणोपनययोस्साध्याबोधकयोरपि सम्भवादुदाहरणोपनयसामान्यवारणाय नियतान्तम्। हेतुविभक्तिमद्दर्शितोदाहरणवृत्त्युदाहरणत्वमादायातिप्रसङ्गवारणाय सामानाधिकरण्यमुपेक्ष्य नियतत्वनिवेशनम्। विभक्तिमत्त्वमनुपादेयं, हेतुत्व-

---

चाननुषङ्गपक्षमभिप्रेत्यभवत्वियं विवक्षासाध्याविषयकत्वं सार्थकमिति शङ्क्यम्। एतन्मतेऽपि तस्मादितरेभ्यो भिद्यत इति निगमनवारणाय तत्सार्थक्यात्। स्वभिन्नावयवघटकपदजन्योपस्थितिसहकारेणायं पदार्थान्वितस्वार्थबोधकाख्यातशालित्वादिति। *उक्तोदाहरणम्* पर्वतभिन्नत्वप्रकारकज्ञानाभावसाध्यहेतुकस्थलीयोदाहरणम्। उदाहरणान्यत्वे सति प्रथमरीत्या साध्याविषयकबोधजनकत्वे सति साध्यान्वितस्वार्थबोधजनकविभक्तिमन्न्यायावयवत्वं निर्गलितार्थः। एवञ्च निगमनवारणाय साध्याविषयकत्वनिवेशः। स्वाघटकपदजन्योपस्थितिसहकारेण तत्पदार्थान्वितस्वार्थबोधकसुब्विभक्तिमत्त्वन्यायावयवत्वं त्वनिवेश्यमित्युक्तौ त्वनुषङ्गाननुषङ्गपक्षयोस्साध्याविषयकत्वं व्यर्थमिति तत्त्यागः। इदमत्रावधेयम्। सिद्धान्ते प्रथमरीत्या साध्याविषयकत्वं साध्यांशघटितं तदघटितञ्च अत एव द्वितीयरीत्या साध्याविषयकत्वस्यावतारिकायां प्रक्षालनाद्धीतिन्यायेन तत्परित्यागकल्पोऽप्ययुक्तः। तत्राद्ये दलान्तरे पक्षविशेषणतापन्नत्वानिवेशमात्रं सूचितम्। द्वितीये तु दलान्तरोपादानवैयर्थ्यम् अतो द्वितीयरीत्यासाध्याविषयकत्वं दर्शितम्। तत्र हेतुविभक्तिमत्त्वमित्यस्य सार्थक्यञ्च। तत्र हेतौ हेतुत्वस्य प्रकृतपक्षविशेषणतापन्नप्रकृतसाध्यान्वितस्वार्थस्य बोधिकाविभक्तिरित्यर्थात्तदेतत्पदवैयर्थ्यं साध्यांशघटितप्रथमरीत्या तस्य तु पक्षद्वयाभिप्रायकतया तत्र हेतौ हेतुत्वस्यावयवान्तरोपस्थापितार्थान्वितस्वार्थस्य बोधिकेत्यर्थः। उदाहरणन्यत्वं निवेश्यसमाधानं त्वन्वाचयति। *साध्येति* वह्निसामग्रीमत्त्वादित्यादौ। *उक्तेति* धूमादालोकाभावादिसाध्यकेत्यर्थः। *उक्तेति* वह्निसामग्रीमत्त्वादित्यर्थः। *उदेति* अभावसाध्यकव्यतिरेकिणोरित्यादिः। *नियतान्तमिति* हेतुविभक्तिमत्त्वनियतेतिपरित्यागे उभयत्राप्यतिव्याप्तिरित्यर्थः। *दर्शितेति* यः पर्वतभिन्नत्वेन ज्ञायते स पर्वत-

---

46. उदाहरणान्यत्व इति पाठान्तरम्।

In Public domain. Digitization: Muthulakshmi Research Academy

प्रतिपादकपदवत्त्वनैयत्यनिवेशेनैवानतिप्रसङ्गात् हेतुत्वप्रतिपादकपदवत्त्वनैयत्यार्थप्रतिपादकविभक्तिमत्त्वनैयत्ययोर्वैकल्पिकमुपादानं वा। तत्र च द्वितीयकल्पे विशेषणविभक्तेर्निरर्थकत्वमताभिप्रायेण। उदाहरणविशेषत्वमादायोक्तोदाहरणेऽतिप्रसङ्गवारणायावयवतावच्छेदकेति। **चिन्त्यमिति** चिन्ताबीजं पूर्ववत्। यथाश्रुतप्रतीतद्वितीयलक्षणार्थस्य निगमनसाधारणतयाऽन्यथा व्याचष्टे। **विभक्त्यर्थेति** विभक्तिजन्यहेतुत्वोपस्थितिद्वारा हेतुत्वमुख्यविशेष्यकशाब्दधीजनकन्यायावयवत्वमित्यर्थः। तेन हेतुत्वे विभक्त्यर्थत्वविशेषणस्याव्यावर्तकत्वेऽपि न क्षतिः। **निगमनवारणायेति** तत्र तिङर्थस्य विशेष्यत्वादिति भावः। **विशेष्येतीति** हेतुत्वविशेष्यकत्वस्य तत्रापि सत्त्वेन मुख्यविशेष्यतापर्यन्तानिवेशने तत्रातिव्याप्तिरेवेति भावः। ननु घटो दण्डादित्यादिप्रतिज्ञाघटितघटादिपक्षकनिरूपकतासंसर्गकदण्डादिनिष्ठहेतुतासाध्यकन्यायान्तर्गते तस्माद्दण्डादित्याकारकनिगमने अननुषङ्गपक्षे विभक्त्यर्थहेतुत्वविशेष्यकबोधजनकेऽतिव्याप्तिरत आह। **घटो दण्डादिति** ज्ञापकत्वरूपहेतुत्वस्यैव प्रकृते निवेशनीयतया जनकत्वरूपहेतुत्वसाध्यकप्रथमस्थले नातिव्याप्तिप्रसक्तिरित्यतो वह्निपक्षकधूमनिष्ठहेतुतासाध्यकस्थलान्तरानुसरणम्। **तदवृत्तेरिति**

---

भिन्नत्वेन ज्ञायते यथा पर्वतभिन्नत्वप्रकारकज्ञानाभावादुत्पन्नं ज्ञानमित्युदाहरणवृत्तीत्यर्थः। *वैकल्पिकमिति* एक लक्षणे द्वयोर्नप्रवेश इत्यर्थः। *निरर्थकत्वेति* तत्सार्थकत्वे उदाहरणे उपनये चातिव्याप्तिः स्यात्। *उदाहरणेति* यः पर्वतभिन्नत्वेन ज्ञायते इत्यादि इत्यर्थः। *पूर्ववदिति* आत्माश्रयभयेन तथाविधावच्छेदकरूपान्तरस्य परिचयोऽपेक्षितः। तच्च रूपं यदि निरुक्तसाध्याविषयकशाब्दभोधजनकत्वे सति निरुक्तहेतुविभक्तिमन्न्यायावयवत्वादि तदा तस्यैव लक्षणत्वाद्व्यर्थविशेषणता एवं साध्यादिभेदेन हेतुत्वभेदे वह्निसामग्रीमत्त्वादिवृत्तिहेतुत्वस्य साध्याविषयकज्ञानजनकतानियतत्वादव्याप्तिः। धूमादालोकाभावसाध्यकोपनयादावतिव्याप्तिः। साध्यादिभेदेन हेतुत्वाभेदे च मानाभाव इत्यर्थः। *विभक्तीति* विभक्तिजन्यहेतुत्वोपस्थितिजन्येत्यर्थः। ननु हेतुत्वं प्रमेयात् वाच्यत्ववत्तादात्म्येन हेतुत्वात् इत्यादौ प्रतिज्ञायामव्याप्तिः विभक्त्यजन्यहेतुत्वोपस्थित्यजन्येत्युक्तौ तत्रैव हेतावव्याप्तिरिति चेन्न। विभक्तिजन्यहेतुत्वोपस्थित्यसमवधानप्रयुक्तहेतुत्वमुख्यविशेष्यकशाब्दबोधाभावकत्वस्य तादृशोपस्थित्यभावप्रतियोगितन्मुख्यविशेष्यताप्रयोजकत्वपर्यवसितस्य वाच्यत्वात्। अकारणविरहस्याप्रयोजकतयोक्तप्रतिज्ञायां नाव्याप्तिः। अनुषङ्गपक्षे पक्षस्यैव विशेष्यतया नातिप्रसङ्गादाह। *अननुषङ्गपक्ष इति* *तादात्म्येनेति* एतेन तर्कालङ्काराणां यद्व्याप्तिवादे तत्र तत्र

In Public domain. Digitization: Mahalakshmi Research Academy

तादात्म्यातिरिक्तवृत्त्यनियामकसम्बन्धेन व्यापकत्वानभ्युगमादिति भावः। तादात्म्येन स्वस्य स्वधर्मव्यापकत्वादाह। **अतदात्मन इति** **तद्धर्मेति** तद्वृत्तिधर्मेऽत्यर्थः। ज्ञाप्यताया एव नवीनमते पञ्चम्यर्थतया ज्ञाप्यत्वसाध्यकतादृशप्रतिज्ञा सम्भवत्येव। तथाचासम्भववारणाय लक्षणस्थहेतुत्वपदेनापि तादृशस्य हेतुत्वरूपार्थस्यैव विवक्षणीयतया तत्रत्यनिगमने अतिव्याप्तितादवस्थ्यमित्याशङ्क्याह। **सम्प्रदायविरोधाच्चेति**

न्यायान्तर्गतस्य धूमदित्यादिवाक्यस्योदाहरणप्रयोजिकजिज्ञासोपधायकत्वविरहेऽपि तत्स्वरूपयोग्यतामादायातिव्याप्तिं प्रसज्य न्यायावयवत्वदलं सार्थकीचिकीर्षुर्जनकपदस्य स्वरूपयोग्यातापरत्वं स्फुटयति। **क्वचिदिति** अभ्युपेत्य फलोपधाननिवेशेऽपि न्यायावयवत्वनेवेशनमावश्यकमित्याह। **उदाहरणत्वं चेति** **वैयर्थ्यात्** प्रयोजनान्तराभावात्। तथा च यत्रोदाहरणान्तरमेव प्रयुक्तं तत्राप्युदाहरणप्रयोजकजिज्ञासाफलोपधानसम्भवेनातिव्याप्तिवारणाय न्यायावचवत्वनिवेशनं जनकपदस्य फलोपधानपरत्वेऽप्यावश्यकम् एवेति भावः। चतुर्थलक्षणे प्रसिद्धप्रतिज्ञानिगमनयोस्साध्याविषयकत्वविशेषणव्यावृत्तिर्न घटते पञ्चम्यन्तत्वाभावादिति पञ्चम्यन्ततद्विशेषे तद्व्यावृत्तिमाह। **अयं न दण्डादिति** अयं दण्डादित्यादिप्रतिज्ञायास्सम्प्रदायविरुद्धत्वं प्रागभिहितमित्यभावसाध्यकानुधावनम्। वह्निमान् वह्निसामग्रीमत्त्वादित्यादौ यथाश्रुतेऽव्याप्तेराह। **व्याख्यातार्थमिति** हेतुतावच्छेदकविशिष्टेत्यादिनेत्यादिः। **उपनयविशेषेति** साध्याविषयकबोधजनकाभावसाध्यकव्यतिरेक्युपनय इत्यर्थः। उदाहरणस्य च पञ्चम्यन्तस्यापि सम्भवात्तद्वारणायोदाहरणान्यत्वस्य

---

स्वामितादिसम्वन्धेन व्यापकत्वप्रसिद्ध्यभिधानं तदीदृशदीधितिकारप्रदर्शितनियमविरुद्धमित्याविष्कृतम्। *असम्भवेति* अन्यविधहेतुत्वनिवेशे इत्यादिः। *अभ्युपेत्येति* येन हेतुवाक्येन उदाहरणजिज्ञासनजनिता तत्राव्याप्तिरूपं दोषमभ्युपेत्येत्यर्थः। एवञ्च स्वरूपयोग्यतानिवेशे एव न्यायावयवत्वसार्थक्यमिति मन्तव्यम्। फलोपधाननिवेशेऽपि तत्सम्भवात् लक्षणं तु स्वरूपयोग्यताघटितमेव कार्यमिति नाव्याप्तिरिति भावः। फलोपहितमात्रस्य लक्ष्यतामभ्युपेत्येति वार्थः। *साध्येति* हेतुत्वपक्षकेतरभेदसाध्यकस्थलीयेतरत्वव्यापकाभावप्रतियोगिमदिदमित्याकारकस्येत्यर्थः। न नूपनयविशेषानुधावनं व्यर्थं धूमादालोकाभावसाध्यकव्यतिरेक्युदाहरणे एव व्यावृत्तिसम्भवादित्यत आह। *उदाहरणस्य चेति* यत्र पटे दण्डजन्यत्वाभावस्साध्यस्तत्स्थलीयस्य यो दण्डसंयोगाजन्य-

In Public domain. Digitization: Muthulakshmi Research Academy

निवेशनीयतया तत एवोदाहरणसामान्यवारणसम्भवादुपनयपर्यन्तानुधावनम्। धूमादालोका-भावादिसाध्यके धूमादालोकव्यापकाभावप्रतियोगिमानयमित्याद्युपनयेऽतिव्याप्तिवारकतया अन्तपदसार्थक्यं वोध्यम्। उपनयस्य कस्यचिदपि पञ्चम्यन्तत्वासम्भवाद्धेतुपदवैयर्थ्यम् आशङ्क्याह। **हेतुत्वबोधकार्थमिति**

**हेत्विति** तादृशार्थकहेतुपदस्य पञ्चमीपदस्य च वैकल्पिकमुपादानमित्यर्थः। तथा च हेतुत्वबोधकान्तत्वं पञ्चम्यन्तत्वं पृथङ्निवेश्य लक्षणद्वयं करणीयमित्यर्थः। नन्वेवं प्रथमलक्षणे हेतुत्वपक्षके तद्बोधकेदं पदान्तोपनयेऽतिव्याप्तिरित्यत आह। **उपनयस्य चेति** श्रूयमाणविभक्त्यन्तत्वाभावादनुसन्धीयमानेति। तथा च तस्य हेतुत्वबोधकान्तत्वाभा-वादेव नातिव्याप्तिरिति भावः। ननु द्वितीयलक्षणे अयं न गुणो द्रव्यासमवेतत्वादित्यादौ यथा दण्डादित्यादिस्वपरपञ्चम्यन्तपदघटितदृष्टान्तशालिनि व्यतिरेक्युदाहरणे अतिव्याप्तिरित्यत आह। **एवमिति** दृष्टान्तस्येत्यत्रानुसन्धीयमानप्रथमैवान्त इत्यनुषज्यते। **अन्वया-योगादिति** प्रथमान्तत्वं विना समानविभक्तिकत्वाभावेन तादृशशाब्दबोधे प्रथमान्तपदोप-स्थाप्य सा(ध्य)ध्याभावसाधनाभाववदभेदान्वयानुपपत्तेरित्यर्थः। नन्वेवमपि अयं न घटो दण्डाजन्यत्वात् यो घटस्स दण्डादित्यादौ उदाहरणे लक्षणद्वयातिव्याप्तिर्दुर्वारैव साध्या-

---

द्रव्यत्वाभाववान् सदण्डादित्यादेः पर्वतः पर्वतभिन्नत्वप्रकारकज्ञानाभाववान् प्रवतत्वात् यः पर्वत-भिन्नत्वेन ज्ञायते न पर्वतत्वाभाववान् यथा न धूमादित्यादेश्च व्यतिरेक्युदाहरणस्येत्यर्थः। *हेतुत्वेति* स्वाघटकभागपूर्वत्वाभाववद्धेतुत्वबोधकपदकत्वमर्थः। एवं पञ्चम्यन्तेत्यत्रापि। *द्रव्यासमवेतत्वादिति* द्रव्यपदं सम्पातायातम्। भिन्नधर्मिकत्वादवैयर्थ्यं वा स्वं वाक्यं दृष्टान्तः शब्दस्वरूपम्। *उदाहरणे* व्यतिरेकिणि, क्वचित्पुस्तके द्वितीयलक्षणे इदं द्रव्यसमवेतगुणत्वात् इतिपाठः उदाहरणे इत्यनन्तरं द्वितीयरीत्या साध्याविषयकत्वे निर्वचनपक्षे गुणत्वाभावसाध्यके तादृशव्यतिरेकदृष्टान्तशालिन्यु-दाहरणे इति क्वचित्पाठः। *प्रथमैवान्त इति* यद्यप्युदाहरणस्य प्रथमान्तत्वाभावेऽपि न दोषः वक्ष्यमाणेनोदाहरणान्यत्वेनैव तद्वारणात्। तथापि पञ्चम्यन्यन्तान्यत्वाभावे नैव वारणसम्भवादुदाहरणा -न्यत्वानुरोधवैयर्थ्यमित्याशयः। साध्यसाधनवदभेदेति पारे साध्यं व्यापकं साधनं व्याप्यम्। साध्यसाधनाभववदभेदेति पाठस्सुगमः। *सदण्डादिति* अत्र तु प्रथमान्तत्वं नास्त्यैव। पञ्चम्यर्थस्य प्रत्ययार्थत्वेन भेदसम्वन्धेनान्वये प्रथमाया अनुसन्धानं नापेक्षितम् अभेदसम्वन्धस्थल एव तस्यनुसन्धानापेक्षणादिति भावः। यथा दण्डादित्यादि स्वपरस्यत्वन्यतया तत्र हेतुत्वबोधकान्तत्वं

In Public domain. Digitization Muthulakshmi Research Academy

विषयकबोधजनकत्वात् पञ्चम्यन्तत्वाच्चेत्यत आह। **कस्यचिदिति** **पूर्ववदिति** अवयवान्तरोपस्थापितार्थान्वितस्वार्थबोधकत्वोदाहरणान्यत्वयोरन्यतरविशेषणेनेत्यर्थः।

ननु पञ्चम्यास्तसिलि[47]त्यत्र पञ्चम्या इत्यस्य पञ्चम्यन्ततार्थकत्वपक्षे पर्वतो वह्निमान् वह्निप्रमात इत्यादौ हेत्ववयवस्य हेतुपञ्चम्यन्तताविरहादव्याप्तिरित्यत आह। **अत्रचेति** **हेतुपञ्चम्यन्तत्वमिति** हेतुत्वबोधकान्तत्वं पञ्चम्यन्तत्वं चेत्यर्थः। **अर्थवद्भागस्य इति।** स्वघटकार्थवद्भागपूर्वत्वाभाववद्धेतुत्वबोधकादिघटितत्वमेव तदन्तत्वमिह विवक्षितम् इति भावः। अर्थवत्त्वमाकाङ्क्षानिर्वाहकत्वम्। तसिलं विनापि तत्पूर्वपञ्चम्येव प्रकृतान्वयबोधौपयिकाकाङ्क्षानिर्वाहात् तसिलादेराकाङ्क्षानिर्वाहकत्वं न तु किञ्चिदर्थवाचकत्वं तसिलादेरवाचकत्वेऽपि तद्घटकप्रत्येकवर्णानां वाचकत्वात् एकाक्षरकोशे सर्वेषां वर्णानां वाचकत्वबोधनात् उक्तसूत्रे पञ्चमीपदस्य षष्ठ्यन्तत्वमपि सम्भवतीत्यभिप्रायेण यथाश्रुतस्यैव साधुतां समर्थयति।

---

पञ्चम्यन्तत्वं वा नास्त्येवेति तदुपेक्षा। *अवयवान्तरेति* अवयवान्तरोपस्थापितार्थान्वितार्थकहेतुत्वप्रतिपादकपदान्तत्वतादृशपञ्चम्यन्तत्वं वेत्यर्थः। अन्तत्वं तु व्यर्थम्। उदाहरणान्यत्वकल्पेतु अन्तत्वसार्थक्यं पूर्ववत्। *पञ्चम्यन्तेति* तथा च पञ्चम्याः परस्तसिल्स्यादिति सूत्रार्थः। नन्वेवमर्थवद्भागस्य इत्युक्तावपि वह्निप्रमात इत्यत्र तस्य हेतुपञ्चम्यन्तत्वाभाव एव। अन्तस्य तसिलो हेतु पञ्चमीत्वाभावादित्यव्याप्तिः। किञ्च धूमादालोकाभावादिसाध्यके साध्यविषयकबोधजनके धूमादालोकव्यापकीभूतेत्यादिव्यतिरेक्युपनयेऽतिव्याप्तिः। धूमादित्यत्र धूम इत्यर्थवद्भागस्य हेतुपञ्चम्यन्तत्वात् अतः अन्तपदस्य पूर्वत्वाभावोऽर्थः। अर्थवद्भागस्य पूर्वत्वाभाव इति योजना। तथापि उक्तोपनये अतिव्याप्तिरितिपरिष्करोति। *स्वघटकेति* यत्र लक्षणं सङ्गमनीयं तदेवस्वपदार्थः। धूमादालोकव्यापकेत्युपनये स्वघटको योर्थवद्भाग आलोकभागः तत्पूर्वत्वाभाववत्त्वं न पञ्चम्याः सम्भवतीति नातिव्याप्तिः। अत्रापि तादृशपूर्वत्वाभावद्धेतुत्वपदघटितत्वं तादृशपूर्वत्वाभाववत् पञ्चमीघटितत्वं च भिन्नं लक्षणद्वयं वैकल्पिकं द्रष्टव्यम्। ननु स्वघटकार्थवद्भागेत्यादिप्रवेशेऽननुगम इति चेन्न। स्वघटकार्थवद्भागपूर्वत्वाश्रयहेतुत्वबोधकपदघटितं यद्यत्स्वन्तदन्यत्वस्य वाच्यत्वात्। स्वघटकार्थवद्भागेत्यत्रार्थवत्त्वं कीदृशमित्यत आह। *अर्थवत्त्वमिति* एतत्तु शाब्दिकानुसारिमतविशेषः। वस्तुतस्तु अर्थवत्त्वं स्वघटकोत्तरपदार्थान्वितार्थकत्वम्। एकाक्षरकोशलभ्यानामर्थानां तादृशेतरपदार्थान्वितत्वाभावान्न दोषः। एवञ्च तसिलादेराकाङ्क्षानिर्वाहकत्वानुगमे तत्प्रयोगवैयर्थ्यमित्य-

---

47. पञ्चम्यास्तसिल् ।। ५,३.७ ।। इति पाणिनीयं सूत्रम्

In Public domain. Digitization-Muthulakshmi Research Academy


****पञ्चम्यादेरिति**** आदिपदाभ्यां सप्तम्यादेस्त्रलादेश्च परिग्रहः। ****नानुपपत्तिरिति**** तथासति तसिल एव हेतुत्वप्रतिपादकत्वात् पञ्चमीत्वाच्चेति भावः। तसिलादेः पञ्चम्यनादेशतापक्षे उक्तहेतावव्याप्तिवारणाय पञ्चम्यन्तत्वमविवक्षतां मतमाह। ****केचित्त्विति**** ****हेतुत्वप्रतिपादकपदशालित्वमिति**** तथा च पञ्चम्यन्तत्वानिवेशात्तसिलः पञ्चम्यनादेशतापक्षेऽपि न तद-न्तहेतावव्याप्तिरिति भावः। ननु हेतुत्वप्रतिपादकपदस्यान्तत्वाविवक्षणे दर्शितव्यतिरेक्युपनये अतिव्याप्तितादवस्थ्यमित्यत आह। ****पूर्ववदिति**** प्रकृतसाध्यान्वितस्वार्थवोधकतादृशपद-शालित्वरूपमित्यर्थः। एवञ्च प्रथमलक्षणे तादृशस्वार्थवोधकविभक्तिशालित्वं साध्याविषयक-धीजनकत्वं च निरुक्तविशिष्टविषयतावहिर्भूतसाध्यविषयताशून्यधीजनकत्वरूपं निविष्टम्, अत्र तु तादृशहेतुत्वप्रतिपादकपदशालित्वं साध्याविषयकज्ञानजनकत्वं च निर्वक्ष्यमाणमन्य-विधं प्रविष्टमिति भेद इत्यवधेयम्। पर्वतो वह्निमानित्यादिन्यायान्तर्गतप्रतिज्ञादेर्निर्वाच्यसाध्या-विषयकज्ञानजनकताशालिनो वारणाय हेतुत्वप्रतिपादकपदोपादानम्। वह्नेर्द्रव्यत्ववान्

---

पास्तम्। *पञ्चम्यादेरिति* यद्यपि सप्तम्यादेः परस्त्रलादिरित्यर्थोऽपि सप्रम्यास्त्रल् इत्यादेः सम्भवति एवञ्च प्रत्ययप्रकरणे आदेशकथनमपि नास्ति तथापि सप्तम्याव्यवधानेने कुत्रेति प्रयोगो न स्यात् कुतहोरित्यनुशासनाविषयत्वात् अतस्तत्र यथाषष्ठीस्वीक्रियते तथा कुत इति प्रयोगानुरोधेन इहापि षष्ठ्येव युक्तेति दष्टान्तार्थमादिपदम्। अत्र पञ्चमीलोपेन तकारादिप्रत्ययाव्यवधानस्या-श्रयणासम्भवाद-स्वरससूचनाय दीधितौ तुकारः। सप्तम्यादेरित्यादिपदाभ्यां सर्वासां विभक्तीनां तसेश्च परिग्रहः। ***दर्शितेति*** हेतुत्वपक्षकेत्यर्थः। ***प्रथमलक्षणे*** अनुमितिकारणीभूतेत्यादिके। तथा च प्रथमलक्षणे हेतुत्वाप्रतिपादकस्य विभक्तित्वेन प्रवेशः। अत्र तु हेतुत्वप्रतिपादकपदत्वेनैवेति भेदः। न च साध्याविषयकत्वज्ञानजनकत्वस्य चेति समुच्चयार्थकचकारेण तादृशपदशालित्वेऽपि निर्वक्ष्यमाणता लभ्यते तथा च पूर्ववदिति दीधिति विरोध इति वाच्यम्। चकार एवकारार्थस्तथाच साध्यविषयकत्वमेव निर्वक्ष्यमाणमित्यर्थः। न तु तादृशपदशालित्वं तस्य पूर्वमेव निरुक्तत्वात्। ननु प्रकृतसाध्यान्वितस्वार्थ-बोधकपदशालित्वमेवास्तुहेतुत्वप्रतिपादकेतिकिमर्थमित्यत्राह। ***पर्वत इति*** विशेष्यतया साध्या-न्वितार्थकं पदं पर्वतपदादिमतुपादिवातच्छालित्वादतिव्याप्तिरित्यर्थः। ननु हेतुत्वप्रतिपादकत्व-निवेशेऽपि क्वचिदतिव्याप्तिस्स्यात्तद्द्वयेन विवक्षणान्तरकरणे तु हेतुत्वप्रतिपादकत्ववैयर्थ्यमित्यतः प्रयोजनान्तरमाह। ***वह्नेरिति*** पञ्चम्यर्थहेतुत्वस्य विशेष्यविधयान्वयलाभार्थं पक्षतावच्छेदककोटौ वह्नेरिति। तथा च प्रकृतसाध्यान्वितस्वार्थबोधकहेतुत्वप्रतिपादकपञ्चमीरूपपदघटितत्वादतिव्याप्तिः।

In Public domain. Digitization Muthulakshmi Research Academy

वह्निमान् हेतुत्वं प्रमेयमित्यादिन्यायान्तर्गतप्रतिज्ञादावतिव्याप्तिवारणाय विशेषणतया साध्यान्वितत्वनिवेशनेऽपि सुन्दरवह्निमत्सधर्मा पर्वतो वह्निमानित्यादावतिव्याप्तिवारणाय तदावश्यकत्वम्। न चैवमप्यालोकाद्वह्निमतस्सधर्मा पर्वतो वह्निमानित्यादावतिव्याप्तिर्दुर्वारैव तत्रापि विवक्षणीयप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्ट[48]साध्यविषयकज्ञानाजनकत्वस्याक्षतत्वात् इति वाच्यम्। हेतुत्वप्रतिपादकेत्यस्य प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वप्रतिपादकार्थकत्वात्।

यथाश्रुतं साध्याविषयकज्ञानजनकत्वमयं वह्निमान्वह्निसामग्रीमत्त्वादित्यादिन्यायस्थले हेत्ववयवे अव्यापकं, पूर्वनिरुक्ततन्निवेशे च साध्यान्वितस्वार्थबोधकहेतुत्वप्रतिपादकपदशालित्वविशेषणे हेतुत्वप्रतिपादकेत्यस्य वैयर्थ्यं, प्रतिज्ञाया निरुक्तसाध्याविषयकज्ञानजनकत्वाभावादेव वारणादतस्साध्याविषयकज्ञानजनकत्वमन्यथा निर्वक्ति। **साध्येति** एवं च पर्वतो वह्निमानित्यादिप्रतिज्ञायास्साध्यविषयकज्ञानजनकत्वेऽपीतरनैरपेक्ष्येण हेतुत्वविशिष्टसाध्यविषयकज्ञानजनकतया साध्याविषयकेत्यादिनाऽवारणात् हेतुत्वप्रतिपादकत्वं पदविशेषणमर्थवद्भवति। हेत्ववयवस्यापि प्रतिज्ञासहकारेण हेतुत्वविशिष्टसाध्यविषयकज्ञानजनकतया **असम्भववारणायेतरनैरपेक्ष्येणेति**। स्वाघटकपदासहकारेणेत्यर्थकमजनिकेत्यस्य प्रतियोगिविशेषणम्। तथा च स्वेतरावयवाजन्यहेतुत्वविशिष्टसाध्यविषयकज्ञानजनकं यत्तदन्यत्वमिति समुदायार्थः। जनकपदस्य जनकतावच्छेदकधर्मपर्याप्त्याश्रयसमुदायत्वलाभाय

---

***सुन्दरेति*** सुन्दरवह्नीतिभागमादायेति शेषः। ***तदावश्यकत्वम्*** हेतुत्वप्रतिपादकपदस्यावश्यकत्वम्। ***विवक्षणीयेति*** एतेन धूमाद्वह्निमतस्सधर्मापर्वतो वह्निमानित्यादिप्रतिज्ञापरित्यागबीजम् आविष्कृतम्। तत्र धूमाद्वह्नीति भागमादायैव प्रकृतहेतुत्वविशिष्टहेतुविशिष्टसाध्यज्ञानजनकत्वसत्त्वेन वारणसम्भवात्। ***पूर्वनिरुक्ततन्निवेशे च*** हेतुतावच्छेदकविशिष्टहेतुत्वविषयताबहिर्भूतसाध्यविषयताशून्यज्ञानजनकत्वनिवेशे चेत्यर्थः। ***प्रतिज्ञायाः*** सुन्दरवह्निमत्सधर्मा पर्वतो वह्निमान् इत्यादिप्रतिज्ञायाः। स्वं निगमनं तथा च तादृशं यन्निगमनं तदन्यत्वं हेताविति भावः। नन्वितरनैरपेक्ष्येणेति व्यर्थं लाघवेन जनकतावच्छेदकधर्मपर्याप्तिमत्त्वस्यैव निवेशेन तादृशप्रतिज्ञाहेतुसमुदायत्वरूपधर्मपर्याप्त्यनाश्रयत्वेनैवलक्षणगमनादित्यत आह। ***एवञ्चेति*** इतरनैरपेक्ष्येण चेत्यर्थः।

---

48. हेतुविशिष्टहेतुताविशिष्टसाध्यविषयकज्ञानाजनकत्वस्याक्षतत्वादिति इति पाठान्तरम्।

In Public domain. Digitization: Muthulakshmi Research Academy

इतरनैरपेक्ष्येणेति। हेत्ववयवस्य प्रतिज्ञासहकारेण तादृशबोधजनकत्वेऽपि तादृशधर्मपर्याप्त्याश्रयसमुदायभेदस्याक्षततया इतरनैरपेक्ष्याप्रवेशेऽपि लक्षणसमन्वयात्। अयं धूमाद्वह्निमान् धूमाद्वह्निमतोऽन्यत्रावर्तमानधार्मादित्यादिहेतोर्धूमनिष्ठहेतुताविशिष्टसाध्यज्ञानजनकस्य सङ्ग्रहाय **प्रकृतेति**। प्रकृतहेतुतावच्छेदकावच्छिन्नविशिष्टेत्यर्थकम्। प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वमितराविशेषणतया अवगाहिन एव ज्ञानस्येतरनिरपेक्षहेतुवाक्येन जननात्तादृशहेतुत्वप्रकारकज्ञानसामान्यजनकत्वस्यैव सकलहेत्ववयवसाधारण्यात् साध्यांशोपादानमनर्थकमिति तत्परित्यजति। **साध्यं चेति** अत्र साध्यान्वितस्वार्थबोधकत्वनिवेशेऽपि हेतुत्वपक्षकोपनये साध्यान्वितार्थबोधे स्वजन्यत्वनिवेशे अनुषङ्गपक्षे साध्यान्वितपक्षबोधस्योपनयाजन्यतया तद्वारणेऽप्यननुषङ्गपक्षे[49] निगमनोपस्थापितसाध्यान्वितहेतुत्वबोधकेदं पदशालिनि अतिव्याप्तेः। न च हेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वप्रतिपादकपदशालित्वनिवेशनान्न तत्रातिव्याप्तिरिति वाच्यम्। गोत्वाभावविशिष्टहेतुत्वं सास्नाभाववत् गोत्वाभावादित्यादिन्यायान्तर्गतोपनये तथाप्यतिव्याप्तेरवारणात्। अनुषङ्गपक्षेऽप्युक्तन्यायान्तर्गतप्रतिज्ञायामतिव्याप्तेश्च। विशेषणतया साध्यान्वितस्वार्थबोधकत्वं निवेश्य तद्वारणे साध्यांशवैयर्थ्यम्, अनुषङ्गपक्षेऽप्युपनयस्थेदं पदार्थस्य कुत्रापि विशेषणताविरहात् पदान्तरोपस्थापितेन प्रकृतहेतुना साक्षाद्विशेषितहेतुत्वप्रतिपादकपदशालित्वं निवेश्योक्तविशिष्टहेतुत्वपक्षकप्रतिज्ञोपनययोः

---

**तादृशधर्मः** प्रतिज्ञाहेतुसमुदायत्वरूपः। **धूमादिति** वह्निमात्रस्य साध्यत्वे हेतौ धूमादितिव्यर्थं स्यात् साध्ये तन्निवेशेतु अयोगोलके व्यभिचारः स्यादतस्तत्र तन्निवेशः। नन्वत्र हेतुतावच्छेदकग्रहेणैव व्याप्तिग्रहादुदाहरणाकाङ्क्षानुपपत्तिरिति चेन्न। साध्याभाववदवृत्तित्वस्य व्याप्त्यनात्मकत्वात्। धूमाद्वह्निमत्पर्वतादन्यत्रावर्तमानधर्मस्य वाहेतुत्वात्। धूमशून्यवह्निमत्पर्वते व्यभिचारवारणाय हेतौ धूमादिति निवेशात्। **अनर्थकमिति** अखण्डाभावघटकत्वेऽपि प्रयोजनविकलम् इत्यर्थः। **हेतुत्वपक्षकोपनये** **व्यतिरेकिणि** **उक्तेति** गोत्वाभावविशिष्टहेतुत्वपक्षकसास्नाभावसाध्यकस्थलीयेत्यर्थः। निरुक्तहेतुत्वप्रकारकसाध्यविशेष्यकज्ञानाजनकत्वसत्त्वात्। **साध्यांशेति** साध्यान्वितस्वार्थेत्यत्रेत्यादिः। **साक्षादिति** गोत्वाभावविशिष्टहेतुत्वं सास्नाभाववदित्यादिप्रतिज्ञायामव्याप्तिः। पदान्तरीभूतस्वघटकगोत्वाभावपदार्थीभूतेन वैशिष्ट्यद्वारा परम्परयान्वितहेतुत्वप्रतिपादकपदशालित्वदतस्साक्षात्पदम्। तत्र साक्षाद्गोत्वाभावान्वितत्वं नास्ति। किन्तु वैशिष्ट्यमेवेतिनाति-

49. तद्वारणेऽप्यनुषङ्गपक्षे इति पाठान्तरम्

 In Public domain. Digitization by Mahalakshmi Research Academy

वारणेऽपि प्रकृतहेतुत्वविशिष्टाविषयकज्ञानजनकत्वनिवेशेनैवोपपत्तौ नञ्व्यत्यासस्येतरनैरपेक्ष्येणेत्यभिधानस्याकिञ्चित्करत्वमित्यस्वरसः।

पञ्चम्या लाक्षणिकत्वं व्यवस्थाप्य तद्वत्त्वेन निगमनेऽतिव्याप्तिं प्रसञ्जयन् पञ्चम्यन्तपदं सार्थकयति। **हेतुत्वादाविति** हेतुत्वं जनकत्वमादिना ज्ञापकत्वपरिग्रहः। जनकत्वोपादानं दृष्टान्तविधया। गुरुशरीरं तत्क्रियानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वरूपमपादानत्वं वा दृष्टान्तविधया आदिपदग्राह्यं हेतुत्वं ज्ञापकत्वमेव। तर्हि कुत्र तच्छक्तिरित्यपेक्षायामाह। **वृक्षादिति** **इत्यादौ** इत्यादिवाक्यस्थपञ्चमीप्रतिपाद्ये। विनिगमनाविरहं निराकरोति। **लाघवेनेति** वृक्षादिनिष्ठावधित्वस्य निरूपकत्वादिसम्बन्धेन विभागे अन्वयसम्भवेऽपि न वृक्षादित्यादौ वृक्षादिनिष्ठावधिताया आश्रयतासम्बन्धावच्छिन्नाभावस्य वृक्षाद्यवधिकविभागेऽपि सत्त्वेनातिप्रसङ्गभिया तादृशबोधोपगमासम्भवात् वृत्त्यनियामकनिरूपकत्वसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वाद्विभागनिष्ठवृक्षादिनिरूपितमवधिमत्त्वमेव पञ्चम्या

---

व्याप्तिः। *प्रकृतेति* मूले साध्याविषयकेत्यत्र विद्यमानस्य नञः व्यत्यासं कृत्वा जनकत्वमित्यनेन संयोज्य अजनकत्वार्थकत्वं व्यर्थम्। साध्याविषयकेत्यादेः प्रकृतहेतुविशिष्टहेतुत्वविशिष्टसाध्याविषयकेत्याद्यर्थस्यैव सम्यक्त्वादित्यर्थः। वारणेपीत्यपि पदञ्च पदान्तरोपस्थापितेत्याद्यविवक्षणेऽपि नञ् व्यत्यासादेर्वैयर्थ्यसूचनार्थम्। प्रतिज्ञावाक्यधीजन्येति पञ्चमं मूले हेतुलक्षणं, पक्षे साध्यज्ञापकाकाङ्क्षानिवर्तकशाब्दज्ञानजनकत्वेऽपि सति न्यायावयवत्वमर्थः। हेतुविभक्तिमत्त्वं स्वरूपकीर्तनं न तु लक्षणघटकं वैयर्थ्यात्। यद्वा हेतुविभक्तिमत्त्वं पञ्चम्यन्तत्वम्। एवञ्च प्रतिज्ञोदाहरणनिगमनविशेषाणां वारणाय जनकान्तं प्रतिज्ञोदाहरणनिगमनान्यत्वार्थकम्। एवञ्चोपनय वारणाय पञ्चम्यन्तत्वनिवेशः। वाक्यत्वं न्यायावयवत्वम्। दीधितौ। *अनुमतिपरेति* केचित्तु अनुमितिपरवाक्यत्वमवयवत्वमिति व्याख्यानान्तरमेव पञ्चम्यन्तेतिपाठधारणं युक्तम्। चतुर्थलक्षणस्थतत्पदव्याख्यानेन षष्ठलक्षणस्थ तत्पदस्य व्याख्याततत्वादिति प्राहुः गदाधरीये। *पञ्चम्या इति* तथा च लाक्षणिकपदवत्त्वमात्रोक्तौ निगमने पञ्चम्यालाक्षणिकत्वादतिव्याप्तिरतः पञ्चम्यन्तेति। तथा च तत्र पञ्चम्यन्तस्य तत्पदस्य लाक्षणिकत्वान्नातिव्याप्तिरित्यग्रे स्फुटम्। नन्वित्यादौ शक्तेः क्लृप्तत्वादिति दीधितिरसङ्गतोपार्थकत्वात् अतो व्याचष्टे। *इत्यादीति* *विनिगमनाविरहम्* यथावधित्वेऽवधिमत्वेवाशक्तिः स्वीक्रियते तथाहेतुत्वादावपि सास्वीक्रियतामितितन्मूलशङ्का। *लाघवेनेतीति* तथा च गौरवान्न हेतुत्वादौ शक्तिरितिभावः। *न वृक्षादिति* विभजत इति प्रकृतम्। *अति प्रसङ्गः* प्रत्ययातिप्रसङ्गः।

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिपाद्यत इति नव्यमतानुसारेणाह। **अवधिमत्वेनेति** नन्ववधिमत्त्वमवधितानिरूपकत्वमेव। तत्र वृक्षादेरवधितायामेवान्वयस्योपगन्तव्यतया एकदेशान्वयदोषः। निरूपकत्वं च तज्ज्ञानजनकज्ञानविषयकत्वमिति ज्ञापकत्वापेक्षया गौरवमेवेत्यत आह। **द्रव्यनिष्ठम् इति** **सम्बन्धविशेषः** अवधिमन्निष्ठोऽवधितानिरूपितसम्बन्धविशेषः। अवधिमत्त्वम् एव स्वरूपसम्बन्धविशेषः तन्निरूपकत्वमेवावधित्वमिति वैपरीत्यस्यापि सम्भवेन विनिगमनाविरहादिति भावः। **अन्यदेतदिति** अनतिरिक्तत्वेऽप्यवधितात्वादेरनुगमकधर्मस्यानुगत -धर्मप्रतीत्यनुरोधेनावश्यकत्वात्तस्य प्रवृत्तिनिमित्तत्वेन लाघवादिति भावः। नन्ववधित्वादावेव पञ्चम्याश्शक्तौ ज्ञापकत्वादाववधित्वादिसम्बन्धाग्रहे वृत्त्यग्रहेण पञ्चम्याः ज्ञापकत्वबोधकत्वग्रहासम्भवात् तत्प्रत्यायनेच्छया पञ्चमीप्रयोगो न स्यादित्यत आह। **तत्सम्बन्धाग्रहे त्विति** ज्ञापकत्वादाववधित्वसम्बन्धाग्रहेऽपीत्यर्थः। **व्यवहारः** ज्ञापकत्वादिपरपञ्चमीप्रयोगः। **शक्तिभ्रमात्** ज्ञापकत्वादौ शक्तिभ्रमात्। अपादानताघटकविभागत्वजात्यवच्छिन्ने शक्तिवादिनां मतमुपन्यस्यति। **वृक्षादिति** अपैतीत्यर्थोपगमस्स्पन्दमात्रं न तु विभागावच्छिन्नस्पन्दः। तर्हि त्यजतुल्यतया धात्वर्थतावच्छेदकविभागाश्रयतया वृक्षाद्यपादानत्वस्य कर्मताप्रसङ्गात्। नाप्युत्तरसंयोगावच्छिन्नस्पन्दः। वृक्षाद्भूमिं प्रयातीतिवत् वृक्षात् भूमिमपैतीति प्रयोगप्रसङ्गात्। पततीत्यत्राधस्संयोगावच्छिन्नस्पन्दस्स्पन्दत्वावान्तरजात्यवच्छिन्नो वा पतत्यर्थः। उभयत्र वृक्षादिनिष्टविभागजनकत्वं पञ्चमीलभ्यमेवेति प्रवृत्तिनिमित्तलाघवाद्विभाग एवैतस्याः शक्तिरित्यर्थः। नन्वेवं जनकत्वं कुतो लब्धं तदन्तर्भावेण शक्तौ च न ज्ञापकत्वाद्यपेक्षया लाघवमित्यत आह। **जनकत्वं चेति**

---

*तज्ज्ञानेति* अवधिताज्ञानेत्यर्थः। *अवधिमत्त्वमेवेति* यद्यवधित्व एव स्वरूपसम्बन्धरूपत्वं स्वीक्रियते नावधिमत्त्वे तदावधिमत्त्वे एव स्वरूपसम्बन्धरूपत्वं स्वीक्रियतां नत्ववधित्वे इति विनिगमनाविरहादनायत्योभयोरेव स्वरूपसम्बन्धरूपत्वं भवतीत्यर्थः। *वृत्त्यग्रहेण* लक्षणाया अग्रहेण। *अवधित्वादिसम्बन्धः* अवधित्वादिरूपशक्यसम्बन्धः। *उत्तरसंयोगेति* आश्रयोन घटक इत्यतः कर्मत्वापत्तिसङ्गतिः। *अधस्संयोगेति* आश्रयो घटक इति अकर्मकत्वनिर्वाहः। *स्वनिष्ठेति* स्वं पञ्चम्यन्तोपस्थाप्य वृक्षादि। *सहित इति* साहित्यं स्वरूपजनकताघटितं

In Public domain. Digitization Muthulakshmi Research Academy

अथ पत्रादेः स्वनिष्ठविभागानुकूलक्रियाश्रयत्वाद्विभागमात्रस्य पञ्चम्यर्थत्वे स्वस्मात्पत्रं पततीत्यादेरपि प्रयोगस्स्यादिति भेदप्रतियोगितावच्छेदकत्वसहित एव विभागः पञ्चम्यर्थो वाच्यः। स्वनिष्ठक्रियायास्स्वनिष्ठविभागजनकत्वेऽपि स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वविरहान्नोक्तातिप्रसङ्ग इति कुतो लाघवमिति चेन्न। भेदप्रतियोगितावच्छेदकत्वे लक्षणयैवोपपत्तौ तदन्तर्भावेण शक्तेरकल्पनादिति तात्पर्यवशाच्छक्यलक्ष्यार्थयोरपि युगपदन्वयोपगमादिति लक्ष्यार्थभेदप्रतियोगितावच्छेदकत्वविनिर्मोकेण पञ्चम्या विभागावोधकत्वव्युत्पत्तेर्न विभागमात्रतात्पर्येण स्वं स्वस्मात्पततीति प्रयोगप्रसङ्गः। अथवा केवलविभागे पूर्वपूर्वप्रयोगाभावादेव न प्रयोगः। वस्तुतो भेदप्रतियोगितावच्छेदकत्वस्य पञ्चम्यर्थत्वेऽपि वृक्षात्पत्रं पतति इत्यत्र पत्रात्पत्रं पततीति प्रयोगो दुर्वारः। पत्रान्तरनिष्ठभेदमादाय ततः प्रत्येतव्यस्य पत्रनिष्ठभेदप्रतियोगितावच्छेदकत्वे सति पत्रनिष्ठविभागजनकत्वस्य पत्रनिष्ठक्रियायामबाधात्। न च भेद एव पञ्चम्यर्थः तस्य स्वप्रतियोगितावच्छेदकत्वस्वाश्रयनिष्ठविभागजनकत्वोभयसम्बन्धेन क्रियान्वयो वाच्य इति नोक्तातिप्रसङ्गः। तत्पत्रनिष्ठक्रियावच्छिन्नपत्रयोगिताकभेदाश्रयपत्रान्तरनिष्ठविभागजनकतायास्तत्त्क्रियायामसत्त्वेन[50] तस्योभयसम्बन्धेन पत्रान्तरान्वितभेदान्वयायोग्यत्वादिति वाच्यम्। पत्रान्तरनिष्ठतत्क्रियावच्छिन्नभेदस्य वृक्षेऽपि सत्त्वेन तद्भेदाश्रयवृक्षनिष्ठविभागजनकतायास्तत्क्रियायामसत्त्वेन[51] पत्रान्तरनिष्ठभेदस्योक्तसम्बन्धेन तत्क्रियान्वययोग्यताया अक्षतेः। अधिकरण भेदेनाभावभेदाभावात्। अथ पत्रादित्यत्राधेयतासम्बन्धेन प्रविष्टभेद उपतिष्ठते। विशिष्टस्यैव च स्वाश्रयनिष्ठविभागजनकत्वत्व[52]घटितोभयसम्बन्धेनान्वयः। विशिष्टस्याधिकरणमेव विशिष्टनिरूपितपरम्परासम्बन्धघटकं पत्राधेयत्वविशिष्टस्यैव चाऽधेयतासम्बन्धेन पत्रविशिष्टस्याधिकरणं विशेषणीभूतपत्रमेव तु वृक्षः[53] अतो नोक्तोभयसम्बन्धेन पत्रविशिष्टभेदस्य तत्क्रियान्वययोग्यता। भेदप्रतियोगितावच्छेदकत्वदल-

---

सामानाधिकरण्यम्। *युगपदिति* क्रियायित्यादिः। *अप्रयोगः* स्वस्मात्पत्रं पततीति न प्रयोगः। तथा च विभागमात्रे पञ्चमी शक्तिः। भेदप्रतियोगितावच्छेदकत्वञ्च प्रयोगोपाधिरिति भावः। तर्हि विभाग एव शक्तिरस्त्विति विभागे शक्तिमुपसंहर्तुं युक्तमाह। *वस्तुत इत्यादिना* *विशिष्टस्यैव

---

50. तत्पत्रक्रियायामसत्त्वेन इति पाठान्तरम्
51. तत्क्रियायां सत्वेन इति पाठान्तरम्
52. स्वाश्रयनिष्ठविभागजनकत्व इति पाठान्तरम्
53. न तु वृक्षः इति पाठान्तरम्

In Public domain. Digitization Mahalakshmi Research Academy

रक्षायै स्वपदेन पत्रान्तरविशिष्टभेदस्यैवोपादेयत्वात् तदुपादाने तदाश्रयपत्रान्तरविभागजनकत्वस्य तत्क्रियायां घटयितुमशक्यत्वादिति चेत् तर्हि विभाग एव शक्तिरस्तुतस्यैवाधेयतासम्बन्धेन प्रकृत्यर्थविशिष्टस्य स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वसहितजनकतासम्बन्धेन तत्क्रियायामन्वय उपेयताम्। तावताप्युक्तस्थले पत्रात्पत्रं पततीति प्रयोगवारणसम्भवात्, आधेयतया यत्पत्रविशिष्टविभागजनकत्वं तत्क्रियायास्तादृशविशिष्टाश्रयतत्पत्रनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य तत्क्रियायामभावादित्यलमधिकेन।

अत्र जनकतासम्बन्धस्य वृत्त्यनियामकतया पूर्ववदाकाशात्पतति न वृक्षादित्यदौ अनुपपत्तिरिति विभागजनकत्वमेवार्थो वाच्य इति क्व लाघवमित्यस्वरसः। **अत इति** निगमनस्थायं तस्मादिति पञ्चम्याः लाक्षणिकत्वान्निगमनवारणायेति शेषः। **पञ्चम्यन्तेति** तथा च पञ्चमीपदस्य पञ्चम्यन्तत्वाभावान्नातिव्याप्तिरिति भावः। नन्वेवमपि पञ्चम्यन्ततत्पदस्य तादृशधूमादिपदवद्धूमादिज्ञाने लाक्षणिकत्वादुर्वारैव निगमनातिव्याप्तिरत आह। ****तस्मादित्यत्रेति**** ****तत्पदे न लक्षणेति**** न धूमादिज्ञाने शक्तिविरह इत्यर्थः। तेन तत्पदशक्यधूमादिना तज्ज्ञानस्य सम्बन्धसत्त्वाच्छक्तिज्ञानशून्यकाले शक्यसम्बन्धग्रहात्पदान्तरस्येव तत्पदस्यापि तादृशार्थबोधकताया अशक्यापलापत्वाच्च तत्पदे लक्षणायास्तया बोधकत्वस्य च दुरपवादकत्वेऽपि न क्षतिः। लक्षणे च लाक्षणिकत्वं शक्यार्थतात्पर्यराहित्यम्, अतो

---

***चेति*** भेदस्येति शेषः। क्रियायामन्वयः। ***भेदेति*** पत्रान्तरविशिष्टभेदेत्यर्थः। तत्पत्रनिष्ठप्रतियोगितावच्छेदकत्ववाधात्। ***तदाश्रयेति*** तत्पदस्य पत्रान्तरविशिष्टवेधोर्थः। एवं सति वृक्षान्तरतात्पर्येणापि वृक्षात्पर्णं पततीतिप्रयोगापत्तिर्दुर्वारा। योग्यताया अनपायादितीदं चिन्त्यम्। विभाग एवेत्येवकारेण भेदव्यवच्छेदः। भेदत्वस्याखण्डोपाधित्वे प्रमाणाभावः। विभागत्वस्य शक्यतावच्छेदकत्वे लाघवं च सूचितम्। ***पूर्ववत*** अवधित्वस्य पञ्चम्यन्ततामतवत्। अत्र तत्पदेन लक्षणेतिदीधितेः किं निगमनघटकतत्पदस्य धूमज्ञाने लक्षणानास्तीत्यर्थः आहोस्वित् तस्य लक्षणारूपवृत्तिसहकारेण धूमज्ञानवोधजनकत्वं नास्तीत्यर्थः। तत्राद्यं दूषयति। ***तत्पदस्येति*** तत्पदशक्यधूमादिना तज्ज्ञानस्य सम्वन्धसत्त्वाल्लक्षणायादुरपवादत्वेपीति योजना। द्वितीयं दूषयति। ***शक्तिज्ञानेति*** तच्छब्दस्य बुद्धिस्थ वाचकत्वेऽपि तस्य धूमज्ञानेऽपीति शेषः। ***तथा*** बोधकत्वलक्षणया धूमज्ञानबोधकत्वस्य। नन्वेवं निगमने पञ्चम्यन्तलाक्षणिकपदवत्त्वरूपलक्षणातिव्याप्तिरत आह। ***लक्षणे चेति*** तथा च पञ्चम्यन्तशक्यार्थतात्पर्यरहितपदवत्त्वमिति निष्कर्षः। धूमादित्यादौ धूमादिरूपशक्यार्थे

In Public domain. Digitization Muthulakshmi Research Academy

निगमने तत्पदस्य तात्पर्यविषयीभूतधूमज्ञानलाक्षणिकत्वेऽपि नातिव्याप्तिरित्यवधेयम्। **शक्त्यैवेति** तत्पदस्य वक्तृबुद्धिस्थवाचकतत्वाद्धूमादिज्ञाने तात्पर्येण च प्रकृते तत्पद-प्रयोगेण ज्ञानस्य वक्तृबुद्धिस्थताया आवश्यकत्वात् विशिष्टहेतुज्ञानस्याप्रक्रान्तत्वेऽपि न क्षतिरिति भावः।[54]

नन्वेवं तत्पदेन यत्र हेतुनिर्देशः तत्र पञ्चम्यन्तलाक्षणिकपदाभावादव्याप्तिरित्यत आह। **पर्वत इति** वह्निमान् तस्मादित्यत्र हेतुभूतधूमादेरप्रक्रान्तत्वाद्धेतोः प्रक्रान्तत्व-रक्षायै **वह्निसामग्रीमानिति**। अत्र वह्निरूपहेतोः प्रक्रान्तत्वेन तत्पदेन स्फुटतरतत्परामर्शादिति भावः। सम्प्रदायाननुरोधिनां तथा प्रतियोगो दुर्वार एवेत्यत्र लक्षणे वदन्तीत्यस्वरसः सूचितः।

प्रतिज्ञास्थसाध्यवाचकपदस्य ज्ञानलाक्षणिकत्वात् प्रतिज्ञायामपि पञ्चम्यन्तपद-व्यावृत्तिः सम्भवतीति मतमुपन्यस्य दूषयति। **यत्त्विति** अथवा निगनस्थवह्न्यादिपदस्य वह्न्यादिज्ञाने लाक्षणिकतया तस्मादिति पञ्चम्या जनकत्वं जन्यत्वं वाऽर्थः। तथा च पञ्चमी-मादाय निगमने न व्यावृत्तिसङ्गतिः। अवधित्वादेरिव जनकत्वादेरपि स्वरूपसम्बन्धरूपतया विनिगमकाभावेन जन्यत्वस्यापि वाच्यत्वेन पञ्चम्यालाक्षणिकत्वादिति वादिनो मतं दूषयति। **यत्त्विति** एवं चाग्रे जन्यत्वे शक्तावपि ज्ञाप्यत्वे लक्षणैवेत्युपसंहारस्सङ्गच्छते।

---

तात्पर्यं नास्तीति लक्षणसङ्गतिः। तत्पदतात्पर्यस्य धूमज्ञानरूपशक्यार्थे सत्त्वान्ननिगमनातिव्याप्तिः। निगमनस्य तत्पदस्य शक्तिर्वालक्षणावा विशिष्टधूमज्ञाने भवतु उभयथापि तात्पर्यं तत्रैव। सच शक्यार्थे एवेति शक्त्यैवेत्येवकारोपादान सङ्गतिः। तत्र तत्पदस्य प्रक्रान्तवाचितया धूमज्ञाने शक्तिर्दुर्घटेत्याशङ्कां निराकरोति। *तत्पदस्येति* *तत्प्रयोगेण* तत्पदप्रयोगेण। *लाक्षणिकपदेति* शक्यार्थतात्पर्य-शून्यपदेत्यर्थः। *अप्रक्रान्तत्वादिति* एतेन तत्पदस्य बुद्धिस्थवाचकत्वं प्रथमसङ्गतिस्सूचिता। अत एवानुपदमग्रे स्फुटतरेतीतर उपात्तः। *पञ्चमीमिति* तेन वह्निपदमादाय निगमने व्यावृत्तिसम्भवेऽपि न क्षतिः। तस्मान्नदण्डादिति निगमने नञ एवाभावज्ञाने लक्षणा न तु पञ्चमी पदे सास्तीति न पञ्चमीमादाय व्यावृत्तिसम्भवः। एतच्चाग्रिमोपसंहारानुरोधेनाभिप्रायमात्रम्। निर्भरस्तु प्रथमावतारिका-

---

54. न च वह्निसामग्रीघटकतया हेतोर्वह्नेः प्रक्रान्तत्वेऽपि ज्ञानस्याप्रक्रान्तत्त्वादेन बोधनासम्भवः वह्नेश्चायोग्यतया न हेत्वर्थान्वयस्सम्भव इति वाच्यम्। प्रमितवह्निसामग्रीमत्त्वादेस्साध्यत्वे वह्निज्ञानादेरपि प्रक्रान्तत्वेन पञ्चम्यर्थहेतुत्वान्वयोपपत्तेः। (भावः सम्प्रदायेत्येतावन्तरायं ग्रन्थः क्वचिदधिकपाठत्वेन दृश्यते।)

In Public domain. Digitization Muthulakshmi Research Academy

**हेत्वन्वयानुरोधादिति** हेत्वनुशिष्टपञ्चम्या जन्यजनकभाव एवार्थः न तु ज्ञाप्यज्ञापकभावः। "हेतुर्ना कारणं बीजमि"ति कोशाद्धेतुकारणपदयोः पर्यायतास्थितेः। ज्ञापकार्थकताया हेतुपदस्य कोशादावदर्शनात्। तथा च प्रतिज्ञास्थवह्न्यादिपदस्य मुख्यार्थपरत्वे मुख्यार्थस्य वह्न्यादेर्धूमज्ञानाद्यजन्यत्वेन ज्ञाने लक्षणां विना पञ्चम्यर्थान्वयानुपपत्तिः स्यादिति भावः। **ज्ञानलक्षणा** वह्न्यादिज्ञानलक्षणा, तत्पक्षे च तस्य विषयतासम्बन्ध एव मतुबर्थः ज्ञानविषयतापर्यन्तमेव वा वह्न्यादिपदार्थ इति भावः। **ज्ञापकत्व इति** प्रकृत्यर्थवृत्तिकर्मत्वादीनां सुबर्थतावादप्राचीनमतेन। **ज्ञाप्यत्वे इति।** नव्यमतेन **तत्र** वह्न्यादि-पदे। **लक्षणायाम्** लक्षणानिर्वाहकतात्पर्ये। **मानाभावादिति** जन्यजनकभावस्य पञ्चम्यर्थत्वेऽपि तल्लाक्षणिकताया आवश्यकत्वात्तत्रैव ज्ञानान्तर्भावेणोपपत्तावुभयत्र लक्षणाया अयुक्तत्वादिति भावः। न च सुब्विभक्तेरानुशासनिकातिरिक्तार्थे न लक्षणा, अशासनं विनापि तल्लक्ष्यार्थे विभक्तेस्साधुत्वे कर्मत्वादिरूपलक्ष्यार्थे षष्ठ्याद्यनुशासनवैयर्थ्यादिति कथमेतदिति वाच्यम्। हेताविति तृतीयाबोधकसूत्रस्थहेतुपदस्य कारणज्ञापकोभयपरतया तदनुवृत्तिमता **विभाषागुणेऽस्त्रियामि**[55]ति सूत्रेण ज्ञापकत्वेऽपि पञ्चम्या अनुशिष्टत्वात्। यद्यपि तत्र गुणपदं न "**वैशेषिकसिद्धगुणपरं पुण्याभावान्नसुखी**"त्यादौ पञ्चम्यानुपपत्तिरिति पराश्रितपरं तत्, पराश्रितत्त्वञ्च साध्यवदधिकरणाश्रितत्वं, तथा सति उक्तस्थले पुण्याभावाप्रयोज्य[56]सुखाद्यभावाश्रयवृत्तितया तत्प्रयोजकत्वात्पञ्चम्युपपत्तेः। तथा च ज्ञानकरणतावादिमते धूमादिपदार्थज्ञान-

---

यामेवेति बोध्यम्। *विषयता* *विशेष्यता* अभेदेनेति पाठे मतुबर्थः मतुब्जन्यप्रतीतिप्रकारः। मतुपस्सम्बन्ध्यर्थकत्वानुरोधादाह। *ज्ञानेति* *जन्यजनकभावस्येति* स्वरूपसम्बन्धरूपस्य तस्यासम्भवेन तत्र पञ्चम्यालक्षणाया आवश्यकत्वादिति भावः। तत्तल्लक्ष्यार्थज्ञापकत्वादौ विभक्तेः पञ्चम्यदेः। *षष्ठ्यादीति* कर्तृकर्मणोः कृतीतिसूत्रं कृद्योगे कर्तरिकर्मणि च षष्ठीस्यात् इति वृत्तिः। कृदन्तशब्दयोगे कर्तृवाचकात्कर्मवाचकाच्च शब्दात् षष्ठीभवतीतितदर्थः। भारतस्य श्रवणं व्यासस्य कृतिरित्याद्युदाहरणम् एवं चेच्छाया एव लक्षणाकल्पननियामकत्वे कर्तृकर्मणोः कृतीति सूत्रवैयर्थ्यमित्यर्थः। उभयपरताव्याख्यानात्। विभाषागुणे अस्त्रियामस्त्रीलिङ्गात् गुणवाचकात् विकल्पेन पञ्चमी जायते इत्यर्थः। *पुण्याभावेति* वाक्यमिति। तच्छब्दस्य न तज्ज्ञाने लक्षणेति सूचनाय

---

55. विभाषा गुणेऽस्त्रीयाम् ।। २.३.२५ ।। इति पाणिनीयं सूत्रम्

56. पुण्याभावप्रयोज्येति पाठान्तरम्

In Public domain. Digitization by Mahalakshmi Research Academy

रूपहेतुः साध्यवति न समवायादिना वर्तते। तथापि विषयतयैव तत्र वृत्तिरिति नानुपपत्तिः। एवं सति धूमज्ञानाद्वह्निमानिति प्रयोगस्स्यादिति तु न देश्यम्। ज्ञापकताबोधकपञ्चम्यन्त-तत्तदर्थवाचकपदस्य तत्तदर्थज्ञान एवानादितात्पर्यात् धूमज्ञानपदस्य धूमज्ञानज्ञान एव तात्पर्यात्। ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थतामते च ज्ञानविषयधूमादिरूपहेतोस्संयोगादिनैव साध्य-वदाश्रयतत्वान्नानुपपत्तिगन्धोऽपि। प्रतिज्ञास्थवह्न्यादिपदस्य मुख्यार्थपरत्वे मणिकृतो अपि स्वरसं दर्शयति। **अत एवोक्तमिति** **अवृत्ताविति** तेन ग्रन्थेन पुनरनुसन्धीय-मानस्य प्रतिवादिवाक्यसहकारेण मध्यस्थसंशयजनकस्य पूर्वोक्तसाध्यवद्धर्मिबोधकवादि-वाक्यस्य प्रतिज्ञात्वमभ्युपगतं तत्र च वह्न्यादिपदं नतज्ज्ञानादिपरं तथा सति विषयसंशायक-त्वासम्भवाद्विप्रतिपत्तिवाक्याभ्यां कोट्युपस्थिति द्वारा मानसस्संशयो जन्यत इति सिद्धान्ति-भिरपि वह्निः पर्वतोऽभाव इत्यादित आकाङ्क्षादिरहिताच्छब्दात्संशयानुदयेन धर्मिणि तत्तदभाव-कोट्योः प्रत्येकं शाब्दधीजनकसामग्रीभ्यामेव परस्परविरोधेन शाब्दबोधमनुत्पाद्यमानसः संशयो जन्यत इत्यभ्युपगमात्। प्रतिवादिनिवृत्तये पर्वते वह्निस्साधनीयः इत्यभिसन्धेः प्रथमतोऽनियमात् शब्दादेव पर्वते वह्निनिश्चयो भविष्यतीत्यभिप्रायेणापि प्रथमं पर्वतो वह्निमानिति प्रयोगात्पूर्वप्रयुक्तवह्निपदस्य सर्वत्र ज्ञानपरत्वासम्भवाच्छेति भावः।

वर्धमानोपाध्यायानामपि पञ्चम्या ज्ञापकत्वबोधकत्वे संवादमाह। **अत एवेति** **यथासम्भवमिति** समभिव्याहृतद्रव्यादिपदार्थे जन्यनित्यरूपे तत्तदन्वययोग्यतानुसारेण इत्यर्थः। नन्वावृत्तौ सैव प्रतिज्ञेति मणिकृतोऽभ्युपगमवादः न तु तत्र निर्भरः मध्यस्थसंशयात् परतो हेतुवाक्यसमभिव्याहृतसाध्यनिर्देशस्य साम्प्रदायिकत्वात्। हेतुत्वं यथासम्भवमित्युपा-ध्यायग्रन्थोऽपि पञ्चमीप्रतिपाद्यं हेतुत्वं क्वचित् समभिव्याहृतपदमुख्यार्थनिरूपितं क्वचिच्च लक्ष्यार्थनिरूपितं कारणत्वमित्यर्थकतयोपपद्यते, यदप्युक्तमुभयपदे लक्षणानौचित्यमिति, तदपि शिथिलं, ज्ञापकतायाः पञ्चम्यर्थत्वे सूत्रस्थहेतुपदस्योभयपरतया वाक्यभेदापत्तेः। अनु-

---

स्वप्रयोज्येति। *तथातात्पर्यात* अनादितात्पर्यात्। *पञ्चम्यर्थतामते चेति* एतन्मते धूमादित्यादौ धूमादिपदस्य मुख्यार्थतया नैतल्लक्षणमितितु बोध्यम्। *तज्ज्ञानादीति* वह्निज्ञानादीत्यर्थः। *परतोऽपीति* अनन्तरमपीत्यर्थः। तथा च पुनर्निर्दिश्यमानप्रतिज्ञास्थ साध्यपदस्य तज्ज्ञानार्थ-कत्वमुपेयत इति भावः। मुख्यार्थोजन्यद्रव्यादिः लक्ष्यार्थो नित्यद्रव्यादिज्ञानम्। *उभयपरतया*

In Public domain. Digitization Muthulakshmi Research Academy

शासनानुरोधेनोभयत्र लक्षणाया एवोचितत्वादित्यतो युक्त्यन्तरमाह। **अत एवेति** **जिज्ञासा प्रश्नः। धूमवत्त्वादित्युत्तरं चेति** प्रयुज्यत इति शेषः। उपष्टम्भं विवृणोति। **नहीति** **ज्ञाने प्रश्न इति** प्रश्नस्थवह्निपदं वह्निज्ञानपरमित्यर्थः। वह्नेरेव जिज्ञासितत्वादिति शेषः। **लक्षणया ज्ञानेनोतत्तरयेदिति** लक्ष्यार्थज्ञानपरमुत्तरं वाक्यमित्यर्थः[57]। अपि तु प्रश्नसमानविषयकत्वानुरोधान्मुख्यार्थवह्निपरमेव तादृशोत्तरं प्रयुक्तमिति शेषः। तथा च तत्र वह्नौ कुत इति धूमादिति च प्रश्नोत्तरवाक्ययोर्ये पञ्चम्यौ तदर्थान्वयानुरोधेन ज्ञापकत्वं ज्ञाप्यत्वं वा पञ्चम्यर्थौ वाच्य इति भावः। ननु प्रथमप्रश्नानुरोधाद्वह्निपदस्य वह्निपरत्ववत्कुत इति प्रश्नस्थपञ्चम्यर्थान्वयानुरोधात्तदुत्तरधूमादिति पञ्चम्यर्थान्वयानुरोधाच्च ज्ञानपरत्वमप्यविरोधादेकदा शक्यलक्ष्यार्थानन्वयेऽपि वह्निं वोधयित्वा वह्निज्ञानं वोधयिष्यतीत्यभिप्रायेणैवैकपदप्रयोगे बाधकाभावादत एव तथाविधतात्पर्यानुरोधेन नानार्थस्थले आवृत्तिरित्यत आह। **नवेति** **परकीयभाविप्रश्नानुरोधादिति।** तादृशप्रश्नः स्वीयतदुत्तरवाक्यद्वयस्थपञ्चम्यर्थान्वयानुरोधादित्यर्थः। **अजिज्ञासिताभिधानम्** प्रथमजिज्ञासाविषयज्ञानप्रत्यायनेच्छया वह्निपदप्रयोगः परकीयत्वेन भावित्वेन च प्रथमं कुत इति प्रश्नस्याज्ञानात् परकीयवह्निज्ञानहेतुजिज्ञासाया अज्ञानेन वह्निज्ञानप्रत्यायनेच्छायाः प्रथममसम्भवादिति हेतुसूचनाय परकीयत्वभावित्वाभिधानम्। ननु तत्र ज्ञातमित्यध्याहारात्कुत इत्यादिपञ्चम्यर्थस्य ज्ञाने अन्वयो न तु वह्न्यादावित्यत आह। **न चेति** प्रश्नस्थपदस्य उत्तरवाक्येऽनुषङ्गस्य व्युत्पत्तिसिद्धत्वात्कुत इत्यत्र ज्ञातमित्यध्याहारेणैव धूमादित्यत्रापि ज्ञानान्वयसम्भवात् तत्रा-

---

कारणज्ञापकोभयपरतया अन्यतरपरत्वेत्वन्यतरबोधः स्यात्। अबुद्धिजिज्ञासाया उत्तराननुकूलत्वात् आह। *प्रश्न इति* एतेन जिज्ञासायाः कुत इत्याकारकत्वाभावात्प्रश्न इत्युक्तमितिपरास्तम्। तावता केवलजिज्ञासाया उत्तरानुकूलत्वकथन्ताया अनिवृत्ते ननुज्ञाने प्रश्न इत्यसङ्गतं किं वह्निमदिति वाक्यस्य ज्ञानजिज्ञासाबोधकवाक्यत्वसम्भवादत आह। *प्रश्नस्थेति* वह्नेरेवेत्येवकारेण वह्निज्ञानव्युदासः। प्रथमप्रश्नः किं वह्निमदित्येवं रूपः। *वह्निपदस्य* गृहं वह्निमदित्युत्तरस्थस्येत्यादिः। *नानार्थस्थले* सैन्धवमानयेत्यादौ प्रश्नः कुत इत्याकारः। *तदुत्तरवाक्यम्* *धूमादित्यादिः* *प्रश्नस्य* प्रश्नवाक्यस्य। *हेतुजिज्ञासायाः* किं वह्निज्ञानजनकमिति जिज्ञासायाः। एवमग्रेऽपि। *अज्ञानेन*

---

57. वाच्यमित्यर्थः इति पाठान्तरम्

ध्याहारान्तरविरहेऽपि न क्षतिरित्यतः कुत इत्यत्रैव अध्याहारश्शङ्कितः। **मानाभावात् इति** पदार्थान्तरान्वयस्य वक्तुरनभिप्रेतत्वनिश्चयेऽपि बोधस्यानुभाविकत्वात्सर्वत्राश्रुतपद-कल्पनासम्भवादित्यर्थः।

इदं त्ववधेयम्। गृहं वह्निमदिति प्रयोक्तुर्वह्निपदे ज्ञानतात्पर्यं कुत इति वाक्यजन्य-ज्ञाने ज्ञानहेतुजिज्ञासाबोधेऽनुपयुक्तं स्वाभिप्रायस्य स्वबोधाहेतुत्वात् कुत इति पृच्छकपुरुष-तात्पर्यस्यैव तत्रोपयोगात्। तथा च स्वजिज्ञासां बोधयितुकामस्य कुत इति प्रयोक्तुः परप्रयुक्त-वह्निपदोपस्थापितज्ञानमादाय कुत इति पञ्चम्यर्थान्वयबोधोभवत्वित्यभिप्रायं ज्ञात्वैव प्रतिवक्ता प्रष्टुर्वह्निज्ञानहेतुजिज्ञासां कुत इति शब्दादनुषज्यमानस्योक्तवह्निपदसहितात् ज्ञास्यति। एवं गृहं वह्निमदिति प्रयोक्तुः प्रथमं वह्निपदे ज्ञानतात्पर्यविरहेऽपि कुत इति प्रश्नानन्तरं प्रष्टुर्वह्निज्ञानहेतु-जिज्ञासाया ज्ञाने किमर्थमन्यद्वह्निपदं प्रयोक्तव्यं, पूर्वं वह्निपदाल्लक्षणयोपस्थापितज्ञानमादायैव धूमादिति वाक्यं धूमज्ञाने वह्निव्यापकतां बोधयत्वित्यभिप्रायसम्भवात् तज्ज्ञानेन धूमादिति पञ्चम्यर्थस्य ज्ञानान्वयो भविष्यतीति किमनुपपन्नम्। न हि प्रयोक्तृपुरुषस्यैकार्थतात्पर्यं पुरुषा-न्तरस्यान्यार्थतात्पर्यविरोधि अन्यैरप्यन्यतात्पर्येण प्रयुक्तान्यपि पदान्यादायान्यार्थपरश्लोकस्य मौनिना निबन्धनात्। न वा स्वीयप्राथमिकमन्यतात्पर्यमुदीच्यमपरतात्पर्यं विरुणद्धि बीजा-भवात्। युज्यते च वह्न्यादिपदस्य वह्न्यादिप्रकारकज्ञानविषयत्वे लक्षणा, साध्यान्वयिजन्य-ज्ञानविषयत्वस्य पञ्चम्यर्थत्वे गुणस्सत्तावान् द्रव्यत्वादित्यादिप्रयोगस्य दुर्वारतापातात् द्रव्य-त्वादिज्ञाप्यसत्त्वादेर्गुणादावपि सत्त्वात् (अबाधात्) साध्यवाचकपदस्य लाक्षणिकत्वे पक्षान्वयि साध्यतावच्छेदकविशिष्टसाध्यप्रकारकज्ञानविषयत्वरूपसाध्यवाचकपदार्थे पञ्चम्यन्तार्थलिङ्ग-ज्ञानप्रयोज्यत्वान्वयात् द्रव्यत्वादिप्रकारकज्ञानप्रयोज्यसत्त्वादिप्रकारकज्ञानविषयत्वस्य गुणादौ बाधेन कथितातिप्रसङ्गवारणसम्भवात्। न च जन्यज्ञानविषयत्वरूपपञ्चम्यर्थस्य साध्यविशिष्ट-

---

शाब्दबोधानुदयेन *पदार्थान्तरेति* प्रकृते ज्ञातमित्यध्याहृतं पदं बोध्यम्। अत्र गृहं वह्निमदित्युत्तरस्थवह्निपदस्य प्रथमप्रश्नानुरोधाच्छक्यार्थपरतैव न तु द्वितीयप्रश्नानुरोधात् तज्ज्ञाना-र्थतापीत्युक्तं दूषयति। *इदन्त्विति* *हेतु जिज्ञासेति* हेतोर्जनकस्य जिज्ञासेत्यर्थः। एवं हेतु-जिज्ञासायामित्यत्रापि। *तज्ज्ञानेन* अभिप्रायज्ञानेन। हेत्वन्वयार्हप्रतिज्ञादौ तादृशप्रश्नतदुत्तरयोश्च साध्यपदस्य साध्यज्ञानलक्षणां व्यवस्थापयति। *युज्यते चेति* द्रव्यात्वादीति। *ज्ञानम्* प्रमा।

In Public domain. Digitization: Muthulakshmi Research Academy

पक्षेऽन्वयस्स्वीक्रियते सत्तादिरूपसाध्यविशिष्टगुणादिरूपपक्षस्य च न द्रव्यत्वादिलिङ्गज्ञाप्यतेति नातिप्रसङ्गः। वह्न्यादिमतः पर्वतादेः द्रव्यत्वादिरूपसाध्यविशिष्टस्य पृथिवीत्वादिज्ञाप्यत्वे अपि वह्न्यादिविशिष्टस्य न तथात्वमिति विशेषणावच्छिन्न एवं पञ्चम्याः ज्ञाप्यत्वबोधकत्वात् न पर्वतो वह्निमान् पृथिवीत्वादित्यादिप्रयोगः। विषयतायाः पर्याप्तिसम्बन्धेन विशिष्टेऽन्वयोपगमात् द्रव्यत्वादिरूपसाध्यवत्त्वेन वह्न्यादिरूपपक्षतावच्छेदकविशिष्टपर्वतादौ पृथिवीत्वादिज्ञाप्यत्वेऽपि न क्षतिरिति वाच्यम्। एवमपि द्रव्यत्ववान् पर्वतो वह्निमान् धूमान्न पृथिवीत्वादित्यादौ नञर्थान्वयानुपपत्तेर्दुर्वारत्वात् पृथिवीत्वज्ञाप्यतापर्याप्त्यधिकरणद्रव्यत्वविशिष्टपर्वतादौ वह्न्यादिरूपविशेषणान्तरावच्छिन्नेऽपि तज्ज्ञाप्यत्वविरहासम्भवात्। अस्मन्मते च तत्र पर्वताद्यन्वयिनि वह्न्यादिप्रकारकज्ञानविषयत्वे पृथिवीत्वादिरूपलिङ्गज्ञानप्रयोज्यत्वस्य पञ्चम्यन्तार्थस्याभावान्वयात्तदभावस्य तत्राबाधेननुपपत्तिविरहात्। एवं साध्ये ज्ञाप्यत्वान्वयपक्षेऽपि उक्तप्रयोगानुपपत्तिर्दृष्टव्या वह्न्यादेरपि प्रमेयत्वादिना पृथिवीत्वादिज्ञाप्यत्वात्। यदि च प्रयोज्यत्वं समभिव्याहृतपक्षविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नविधेयता च खण्डशो लक्षणयापञ्चम्यर्थः अन्वयबलात्साध्ये पक्षांशे च तत्तद्रूपेण हेतुज्ञाप्यतालाभः। नञ्समभिव्याहारस्थले च लिङ्गज्ञान्वितप्रयोज्यत्वरूपैकार्थस्य निरुक्तविधेयतारूपापरपञ्चम्यर्थेऽभावो नञा प्रत्याय्यत इत्युच्यते। तदा साध्यतावच्छेदकपक्षतावच्छेदकादेर्द्विधाभानाद्गौरवं, साध्यान्वयिनी पक्षविशेष्यतानिरूपितविधेयता, पक्षान्वयिनी साध्यविधेयतानिरूपितविशेष्यता वा पञ्चम्यर्थ इति विनिगमनाविरहः, एकपदस्यार्थद्वये खण्डशो लक्षणा, पदद्वयस्यैव वा प्रत्येकम् अर्थद्वये लक्षणेत्यत्र को विशेष इति।

प्रसङ्गतः पञ्चम्याः जनकत्वज्ञापकत्वार्थकत्वं नञर्थान्वयस्थले अनुपपत्तिप्रदर्शनेन निराकुर्वन् जन्यत्वज्ञाप्यत्वार्थकतां व्यवस्थापयति। **दाहो दहनादित्यादिना** गन्धस्याज्ञापकत्वं पक्षधर्मताविरहेण, शब्दस्यातथात्वं व्याप्तेरपि विरहेणेति प्रदर्शनार्थमुभयोपादानम्। **नञर्थान्वयानुरोधादिति** जनकत्वज्ञापकत्वयोः पञ्चम्यर्थत्वे निरूपकतासम्बन्धावच्छिन्नाभावाप्रसिध्या आश्रयतासम्बन्धावच्छिन्नाभावप्रत्यय एव दाहस्पर्शादौ स्वीकार्यः। तथा च

विषयतायाः विशेष्यतारूपायाः। *विरहासम्भवादिति* विशेष्यपर्याप्तस्य विशिष्टानुयोगिकाभावानुपगमात्। *विनिगमनाविरहादिति* पञ्चम्यन्तपाठे प्रथमान्तपाठे वागौरवं बोध्यम्। ननु पदद्वये

In Public domain. Digitization Muthulakshmi Research Academy

तत्र जलगन्धनिष्ठजनकत्वज्ञापकत्वयोरिव दाहरूपादिनिष्ठयोरपि तयोरभाववत्त्वेन दाहो न दहनात् जलं स्पर्शवन्न रूपादित्यपि स्यादिति भावः। न च दाहादिविशेषितजनकत्वादेरेवाभावः तत्र जलादिरूपप्रकृत्यर्थे प्रतीयत इति वाच्यम्। प्रथमान्तार्थस्य पञ्चम्यर्थविशेष्यतयैव शब्दात्प्रतीतेर्दाहादिविशेषितजनकत्वादिरूपप्रतियोगिनश्शब्दादनुपस्थितस्य नञाऽभावबोधनासम्भवात्। पञ्चम्यर्थस्य प्रकृत्यर्थान्यपदार्थविशेषितस्यापि नञ्समभिव्याहारस्थले भानोपगमे व्युत्पत्तिभेदाद्गौरवम्। सर्वत्रैव प्रकृत्यर्थे विभक्त्यर्थे विशेषणं तत्र निरूपकतया समभिव्याहृतपदार्थान्तरमिति चानुभवसिद्धप्रथमान्तपदार्थविशेष्यताभङ्गेनासम्भवदुक्तिकम्। इन्धनस्य दाहो दहनादित्यादौ तुल्ययुक्त्या दहनादेर्दाहजनकत्वादिविशेष्यत्ववदिन्धनादेरपि दाहसम्बन्धादिविशेष्यतया इन्धनं दाहनसम्बन्धि दहनो दाहजनक इत्यादिसमूहालम्बनबोधस्य स्वीकारेण वाक्यभेदप्रसङ्गात्। यत्रान्यस्य दाहो दहनान्नैतदिन्धनस्य तत्रैतदिन्धनस्य दाहो न दहनादिति प्रयोगानुपपत्तिश्तेति। अत्र वदन्ति। जन्यतायाः पञ्चम्यर्थत्वे दाहो दहनान्न परमाणुपरिमाणादित्यादिप्रयोगानुपपत्तिः। पारिमाण्डल्यस्य कार्यसामान्येऽजनकतया परमाणुपरिमाणादिजन्यत्वाप्रसिद्धेः नञर्थे प्रतियोगितया अन्वयासम्भवात्, दाहाद्यन्वयिनि जन्यत्वे प्रकृत्यर्थस्य निरूपितत्वसम्बन्धेनाभावबोधोपगमे च वृत्त्यनियामकसम्बन्धावच्छिन्नाभावाभ्युपगमः, लक्षणया प्रकृत्यर्थनिरूपितत्वस्य प्रकृत्यर्थस्याभावान्वयोपगमेऽपि गगनं न परमाणुपरिमाणादित्यादौ जन्यत्वान्वययोग्यत्वानुपपत्तिः, पारिमाण्डल्यनिरूपितत्वाभाववज्जन्यत्वाभाववद्गगनमित्याकारिकायाः द्विधा नञर्थावगाहिप्रतीतेरुपगमे च घटो न घटजनकादित्यपि स्यात् घटजनकाद्यनिरूपितजन्यत्वाभावस्य घटादावबाधात्, दण्डाद्यनिरूपित-

---

लक्षणामपेक्ष्यैकपदे लक्षणालघीयसेत्यत आह। *एक पदस्येति* पञ्चमीपदस्येत्यर्थः। ***पदद्वयस्यैव*** पञ्चमीसाध्यपदयोरेव। एवं च पञ्चम्यन्तत्वानुपादाने प्रतिज्ञायामतिव्याप्तिर्भवत्येवेति बोध्यम्। ***व्युत्पत्तिभेदादिति*** प्रत्ययानामिति व्युत्पत्तिभङ्गश्च बोध्यः। ***पदार्थान्तरमिति*** विशेषणमिति पूर्वेणान्वयः। ***अन्यस्येति*** अन्यदाहसम्बन्धिदहनश्चदाहजनकतावानित्यर्थः। ***एतदिन्धनस्य इति*** दाहसम्बन्धि एतदिन्धनं दाहजनकत्वाभाववद्दहन इति बोधः स्यादित्याशयः। सिद्धान्ते च दहनपदस्यैतद्दहनपरतया एतदिन्धनदाह एतद्दहनाजन्य इति तस्य यथाश्रुतार्थपरतया दहनजन्य दाह एतदिन्धनासम्बन्धीति वा बोधो बोध्यः। ***जन्यत्वे*** पञ्चम्यर्थे ***लक्षणयेति*** प्रकृतेरिति शेषः।

In Public domain. Digitization: Muthulakshmi Research Academy


जन्यत्वत्वावच्छिन्नाभावस्य पटादौ वाधेन पटो न दण्डादित्यादेरनुपपत्तेश्च, गगनादेर्जन्यत्व-भ्रमदशायां गगनं न पारिमाण्डल्यादित्यादिवाक्यस्यावोधकतापत्तेः। पञ्चम्यर्थजन्यता-सामान्ये लक्षणया प्रकृत्युपस्थाप्य पारिमाण्डल्यनिरूपितत्वगगनवृत्तित्वोभयत्वावच्छिन्ना-भाववोधोपगमे च जनकतायाः पञ्चम्यर्थत्वेऽपि तत्सामान्ये लक्षणया प्रकृत्युपस्थाप्य-पारिमाण्डल्यवृत्तित्वगगननिरूपितत्वोभयत्वावच्छिन्नाभाववोधोपगमेन सामञ्जस्यम्। न च तत्र लक्षणाया आवश्यकत्वेऽपि दाहो न जलादित्यादौ लक्षणां विनैवोपपत्तौ जन्यत्वस्य पञ्चम्यर्थत्वमिति वाच्यम्। जलादेरपि कार्याजनकत्वभ्रमदशायां दाहो न पारिमाण्डल्यादि-त्यादाविवान्वयवोधस्यानुभविकतया तदनुरोधेन तत्रापि जन्यतायां जलादिनिरूपितत्वाभाव-वोधस्यावश्योपेयत्वादिति।

अत्रेदं तत्त्वम्। शशविषाणं नास्तीति वाक्यवत् दाहो न पारिमाण्डल्यादित्यादि-वाक्यमप्रमाणमेव। तद्वाक्यस्य प्रामाण्यानुरोधेन लक्षणया पारिमाण्डल्यादिनिरूपितत्वाभाव-वोधस्य क्वचिदभ्युपगमेऽपि दाहो न जलादित्यादिवाक्यतो लक्षणाज्ञानशून्यकालेऽप्यन्वय-वोधस्यानुभविकतया जन्यत्वाभाववोधकतापि तादृशवाक्यस्योपगन्तव्येति जन्यत्वं पञ्चम्यर्थ इति। **जन्यज्ञानविषयत्वेति** जन्यत्वान्वयिप्रकृत्यर्थज्ञानं भ्रमभिन्नं ग्राह्यम्। अतो व्याप्ति-

---

***घटजनकादिति*** दण्डादित्याद्युक्तौ कपालादिजन्यतायाः सत्त्वान्नापत्तिस्स्यादतः सामान्ये न घटकजनकत्वेनाभिधानम्। ***जन्यत्वभ्रमेति*** अग्रिमं जलादौ कार्याजनकत्वभ्रमेति विरोधि-ज्ञानसम्पादनम्। ***तत्र*** गगनं पारिमाण्डल्यादित्यादौ। ***अवश्योपेयत्वादिति*** यद्यपि पञ्चम्यर्थो जनतैवनञ् स्थले चावच्छेदकावच्छेदेनैव प्रकृत्यर्थनिरूपितत्वाभाववोधोव्युत्पत्तिसिद्धः। तदसम्भवे च प्रकृत्यर्थनिरूपिततत्वाभाववोधोनैवजायते एवञ्च दाहो न पारिमाण्डल्यादित्यादेः प्रामाण्यं घटो न घटजनकादित्यादेश्च अप्रामाण्यमुपपद्यते। जन्यता भ्रमस्थले च भ्रान्तस्य तादृशभ्रम एवोपेयते न तु द्वेधाभावान्वय इति परिष्कारः न सम्भवत्येव। तथापि निखिलनञ् स्थले एवोभयाभाववोधः सम्भवतीति तदादरणं द्रष्टव्यम्। ***शशविषाणं नास्तीति*** व्यधिकरणधर्मावच्छिन्नाभावं निराकृत्य-मणीकृताशशे शृङ्गाभाव इत्यर्थस्य प्रात्यक्षिकप्रतीतेरेव दर्शितत्वात् शशपदस्य शशीयत्वप्रकारक-ज्ञानविषयलक्षणायाश्चा सार्वत्रिकत्वात्तदपेक्षया तद्वाक्यस्य भ्रमकरणताया एवौ चित्यादिति। ***जन्यज्ञानविषयत्वमिति*** एतस्य धर्मितावच्छेदकावच्छिन्नत्वविशिष्टाश्रयतासम्वन्धेन साध्येऽन्वयः।

In Public domain. Digitization Muthulakshmi Research Academy

पक्षधर्मतावगाहिभ्रमरूपह्रदत्वादिज्ञानस्य पर्वतादौ वह्न्याद्यनुमापकत्वेऽपि पर्वतो वह्निमान् ह्रदत्वादित्यादिप्रयोगस्यानापत्तिः, न वा पर्वतो वह्निमान् धूमात् न ह्रदत्वादित्यादि-प्रयोगानुपपत्तिः। यद्यपि यत्किञ्चिद्विषयकभ्रमान्यत्वं भ्रमसाधारणं भ्रमसामान्यान्यत्वं च तदभाववति तत्प्रकारकत्वरूपभ्रमत्वस्य तत्तत्प्रकारसम्बन्धविशेषघटितत्वेनाननुगततया जगद्गतयावद्वस्तुभ्रमाणां तत्तद्वस्तुभ्रमत्वावच्छिन्नभेदकूटरूपमिति दुर्ज्ञेयम्। तथापि प्रकृत-साध्यहेतुपक्षकपरामर्शे प्रकारीभूता ये ये तत्तत्प्रकारकभ्रमभिन्नत्वमेव विशेषणं देयम्। यद्यपि धूमादिमत्यपि पर्वतादौ समवायादिसम्बन्धावच्छिन्नधूमाद्यभावसत्त्वात् प्रर्वतादौ धूमादि-प्रमायास्सङ्ग्रहाय यत्सम्बन्धेन हेतुप्रकारकं ज्ञानं यत्र हेतुवाचकपदेन विवक्षितं तत्र तत्सम्बन्धा-वगाहितत्प्रकारकभ्रमान्यत्वं प्रतीयत इत्युपेयम्। तथा च स्वरूपादिसम्बन्धेन प्रमेयत्वादेः यत्र हेतुत्वं तत्सम्बन्धेन तद्भ्रमाप्रसिध्या तदन्यत्वं दुर्ग्रहम्। तथापि तत्र तादृशभ्रमान्यत्व-प्रतीतिरेव न स्वीक्रियते अतो न दोषः। वस्तुतस्तु स्वानुयोगिनिष्ठविशेष्यतानिरूपितत्वस्व-

---

तेन वह्न्यादेर्मेयत्वादिना पृथिवीत्वादिज्ञाप्यत्वेऽपि पर्वतो वह्निमान् पृथिवीत्वादिति न प्रयोगः। तत्र वह्नित्वस्यैव धर्मितावच्छेदकत्वात्। न चैवमपि पर्वतो वह्निमान् वाच्यश्चेति समूहालम्बनानुमितेः पृथिवीत्वज्ञानजन्यतया प्रयोगोदुर्वार इति वाच्यम्। जन्यतावच्छेदकविषयत्वविवक्षणात्। न च गुणः सत्तावान् द्रव्यत्वादित्यादिप्रयोगप्रसङ्ग इति वाच्यम्। तस्य पक्षविशेष्यतानिरूपितत्वेन विशेषणात्। वस्तुतस्तु पञ्चम्यर्थविशिष्टसाध्यवैशिष्ट्यभानोपगमान्नक्षतिः। द्रव्यनिष्ठविशेष्यतानिरूपितविधेयता-विशिष्टस्य द्रव्यभिन्ने बाधात् पटादौ घटत्वप्रकारकज्ञानसत्त्वेऽपि घटत्वप्रकारकत्वनिशिष्टासत्त्ववत्। एतेनोक्तविशेषणप्रक्षेपेनानार्थत्वं स्यादित्यपास्तम्। *प्रकृत्यर्थेति* धूमादित्यादौ लाक्षणिकधूमादि-पदार्थोधूमादिज्ञानम्। *तादृशेति* तद्वाक्यस्य पञ्चमीप्रकृतेतिशेषः। यो भ्रमो प्रसिद्धस्तदन्यत्वमात्रं न प्रतीयते यस्तु न प्रसिद्धस्तदन्यत्वन्तु प्रतीयत एवेति सूचनाय तादृशेत्युक्तम्। ननु स्वरूप-सम्बन्धावच्छिन्नघटाद्यभावे हेत्वाभासे वक्ष्यमाणरीत्या प्रमेयत्वादेर्भ्रमः सम्भवत्येवेति चेत्तर्हितदन्यत्वं प्रतीयत एव। अत्रभ्रमत्वं न तदभाववद्विशेष्यकतत्प्रकारकज्ञानत्वं तत्पदार्थाननुगमात्। नापि प्रमासामान्यभिन्नत्वं प्रमात्वस्याननुगमात्, तत्तद्भ्रमभेदकूटस्याप्रत्ययात् अननुभवाद्वक्ष्यमाणदोषाच्चाह। *वस्तुतस्त्विति* *स्वेति* स्वंसम्बन्धः वह्निप्रतियोगिह्रदानुयोगिकसंयोगाभ्यां ह्रदादिविशेष्यक-वह्न्यादिप्रकारकभ्रमद्वयस्य समवायेन पर्वतादिविशेष्यकवह्न्यादिप्रकारकभ्रमद्वयस्य समवायेन पर्वतादि-विशेष्यकवह्न्यादिप्रकारकभ्रमस्य च सङ्ग्रहार्थं क्रमेण सम्बन्धत्रयोपादानमन्यथाप्रकारताया आद्ये

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयतृतीयसम्बन्धाभ्यां द्वितीये प्रथमतृतीयसम्बन्धाभ्यां तृतीये प्रथमद्वितीयसम्बन्धाभ्यां संयोगादिमत्तयासङ्गप्रसङ्गात्। न चवायूरूपनान् इति समवायेन भ्रमासङ्ग्रहः समवायस्यैकत्वादिति वाच्यम्। स्वाश्रयनिष्ठविशेष्यतानिरूपितत्वस्वनिरूपकसम्बन्धप्रतियोगिताश्रयवृत्तित्वस्वनिरूपकसम्बन्धावच्छिन्नत्वैतत्त्रितयसम्बन्धेन सम्बन्धानुयोगिताविशिष्टान्यत्वस्य विवक्षितत्वात्। ननु तथापि लोहितः स्फटिक इति स्वाश्रयसंयोगात्मकपरम्परासम्बन्धेन प्रमायामतिव्याप्तिः। स्वपदेन संयोगोपादने प्रकारतायाः स्वप्रतियोगिनिष्ठत्वाभावात् समवायोपादाने च तदनुयेगिनिष्ठविशेष्यताकत्वाभावात्। न च स्वपदेन परम्परासम्बन्धो ग्राह्य इति वाच्यम्। परम्परायाः प्रत्येकानन्यत्वादिति चेन्न। स्वानुयोगिनिष्ठविशिष्यतानिरूपितेत्यनेन स्वावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितसंसर्गताश्रयानुयोगिनिष्ठविशेष्यतानिरूपितत्वस्य निरूपकसम्बन्धावच्छिन्नप्रकारताघटितोक्तस्य वा वाच्यत्वात्। न च परम्परासम्बन्धस्थले प्रत्येकसंसर्गताया उपगमे विशेष्यतायास्तन्निरूपितत्वपत्तिरिति वाच्यम्। पर्वतो निर्वह्निरिति ज्ञानस्य परम्परया पर्वते वह्निमत्ताज्ञानप्रतिबन्धकत्ववारणाय प्रकारताविशेष्यतानिरूपितसंसर्गतयोर्भेदोपगमात्। केचित्तु समवायैक्यमते रूपप्रतियोगिकत्वविशिष्टसमवायेन वाय्वादौ रूपादिभ्रमेऽव्याप्तिरितिस्वविशिष्टपर्याप्तावच्छेदकताकत्वस्वावच्छिन्नप्रतियोगिनिष्ठत्वस्वविशिष्टावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितसंसर्गतावच्छेदकीभूतधर्मविशिष्टानुयोगिनिष्ठविशेष्यतानिरूपितत्वैतत्त्रितयसम्बन्धेन संसर्गतावच्छेदकविशिष्टान्यप्रकारताशालित्वेन अनुगमः समवायेन वायुरूपवानिति प्रमैव। परम्परासम्बन्धेन प्रमावारणाय भूतान्तमित्याहुः। तदसत्। ह्रदो वह्निमानिति भ्रमा-सङ्ग्रहात्। वह्निप्रतियोगिकैकसम्बन्धः ह्रदानुयोगिकैकसम्बन्धस्तद्द्वयसंसर्गकह्रदो वह्निमानिति भ्रमासङ्ग्रहाच्च वस्तुतस्तुस्वाश्रयानच्छिन्नत्वस्वाश्रयप्रतियोगिवृत्तित्वस्वाश्रयावच्छिन्नप्रकारतानिरूपितविशेष्यताविशिष्टसंसर्गताविशिष्टानुयोगितावद्विशेष्यतानिरूपितत्वैतत्त्रितयसम्बन्धेन संसर्गताविशिष्टान्यप्रकारताशालित्वेनानुगमः। अनुयोगितायां संसर्गतावैशिष्ट्यञ्च स्वाश्रयनिरूपितत्वस्वावच्छेदकावच्छिन्ननिरूपितत्वोभयसम्बन्धेन। तेन ह्रदोवह्निमान् वायूरूपवानितिभ्रमयोः सङ्ग्रहः। उक्तसंयोगद्वयावगाहिभ्रमसङ्ग्रहाय च स्वनिरूपितत्वस्वासमानाधिकरणवृत्तित्वोभयसम्बन्धेन विशेष्यतावैशिष्ट्यं बोध्यम्। न च तादृशविशेष्यतानिरूपितसंसर्गताविशिष्टानुयोगिताव्यापकविशेष्यतानिवेशोस्त्विति वाच्यं घटोरूपवानिति प्रमायामतिव्याप्तेः। न च तद्वारणाय संसर्गताव्यापकप्रतियोगिताकानुयोगिताश्रयविशेष्यतानिवेश्या, पटघटोभयसंयोगवानिति संयोगाभ्यां घटवद्भूतलमिति भ्रमासङ्ग्रहात्। अस्माकं तु स्वाश्रयप्रतियोग्यप्रतियोगिकावृत्तित्वेन संसर्गताविशेषणान्नदोषः। एवं सति वह्निप्रतियोगिकह्रदानुयोगिकसंयोगाभ्यां भ्रमस्य वारणे यत्रैव एव घटः विभिन्नाधिकरणयोस्संयोगाभ्यां

In Public domain. Digitization: Lakshmi Research Academy

प्रतियोगिनिष्ठत्वस्वावच्छिन्नत्वैतत्त्रितयसम्बन्धेन सम्बन्धविशिष्टान्यप्रकारताशालित्वमेवानुगतभ्रमत्वं सुवचम्। अतो भ्रमविषयतयैव प्रमेयात्वादि वाच्यत्वादिज्ञापकमिति भ्रमदशायां वाच्यं प्रमेयत्वादित्यादिप्रयोगस्य तादृशप्रयोगाधीनबोधस्य च वारणाय प्रमेयत्वादिज्ञानस्यापि तद्भ्रमान्यत्वेनैव पञ्चमीप्रकृत्यर्थता वाच्या। सा चाप्रसिद्ध्या न सम्भवतीति दूषणमनवकाशं, निगमनस्थपञ्चम्याः लाक्षणिकत्वमुपसंहरति।

**एवञ्चेति** एवञ्च पञ्चम्या जन्यज्ञाप्यभावार्थकत्वसिद्धौ च। **हेतुमत्त्वे** जन्यत्वे। **ज्ञाप्यत्वे लक्षणैवेति** जन्यत्वापेक्षया तस्य शरीरगौरवादिति भावः। **न चेति** धूमादालोकवान् पर्वतो वह्निमानित्यादिप्रतिज्ञाघटितन्याये आलोकादेर्हेतुत्वे प्रकृतहेत्वन्वितार्थकपञ्चमीनिवेशनेनाप्यतिव्याप्ति[58]वारणसम्भवाद्धूमादिति हेत्वभिधानम्। अत्र पञ्चम्याः प्रकृतसाध्यान्वितस्वार्थबोधकत्वविशेषणमात्रेणातिव्याप्तिवारणसम्भवात्। तादृशसाध्ये विशेषणीयोपस्थापितान्तविशेषणव्यावृत्तये स्थलान्तरेऽतिव्याप्तिं दर्शयति। **धूमात् वह्निमत इति** अत्र वह्निमत्वेन पक्षस्यापि भानात् विवक्षणीयविशेषणे पक्षतावच्छेदक-

---

वर्तते तत्र तदेकतराधिकरणे ताभ्यां संयोगाभ्यां तद्घटभ्रमसङ्ग्रहाय स्वासमानाधिकरणावृत्तित्वस्यावश्यकत्वं बोध्यम्। वस्तुतस्तु। उपदर्शितसंयोगद्वयावगाहिभ्रमस्य संसर्गताभेदेन प्रकारताभेदात्तादृशविशेष्यतानिरूपितत्वस्य निरूपितप्रकारतानिरूपितत्वोभयसम्वन्धेन संसर्गताविशिष्टाया संसर्गतातद्विशिष्टेत्यादिप्राग्वत्। एवञ्च प्रमेयवानिति प्रमासत्त्वात्तादृशविशेष्यत्वासमानाधिकरणसम्वन्धाप्रसिद्धावपि न क्षतिरिति। स्वाश्रयावच्छिन्नत्वस्थाने लाघवात्स्वनिरूपितत्वमपि निवेशयन्ति। केचित्तु स्वानुयोगिनिष्ठविशेष्यतानिरूपित्वेत्यस्य तादात्म्यस्वनिष्ठसांसर्गिकविषयतानिरूपितसांसर्गिकविषयता-श्रयत्वान्यतरसम्वन्धेन स्वविशिष्टो यः स्वावच्छिन्नप्रकारतानिरूपितसंसर्गिताश्रयः तदनुयोगिनिष्ठविशेष्यता निरूपितत्वेत्यर्थः। साक्षात्सम्वन्धेन प्रमावारणाय तादात्म्यनिवेश इत्याहुः। **प्रमेयत्वम् इति** वाच्यत्वादि ज्ञानजनकभ्रमात्मकज्ञानविषयः प्रमेयत्वमिति भ्रमदशायामित्यर्थः। **तद्भ्रमान्यत्वेन** प्रमेयत्वभ्रमान्यत्वेन। सा च सम्भवतीति योजना। **अप्रसिद्ध्या** भ्रमात्मकप्रमेयत्वज्ञानाप्रसिद्ध्या। **अनवकाशमिति** प्रमेयत्वभ्रमाप्रसिद्धावपि वाच्यत्वादिज्ञानजनकप्रमेयत्वज्ञानं भ्रम इति भ्रमत्वनिश्चयस्य विरोधिनिश्चयत्वेन विरोधितयातत्सत्त्वे भ्रमसामान्यभिन्नत्वशाव्दबोधासम्भवादितिभावः। **हेत्वभिधानम्** द्वितीयप्रतिज्ञोत्तरमिति शेषः। **बोधकान्तार्थ इति** उक्तप्रतिज्ञाघटक-

---

58. पञ्चमी निवेशनेनाव्याप्तिरिति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy


पर्यन्तनिवेशस्यात्रैव व्यावृत्तिः, साध्यतावच्छेदकावच्छिन्नत्वांशनिवेशनाय स्थलान्तरेतिव्याप्तिं दर्शयति। **पर्वतो धूमाद्वह्निमानिति** **तत्रत्य निगमने** तस्माद्धूमाद्वह्निमान् इत्याकारके। अत्र च पञ्चम्यर्थविशिष्टवह्नित्वमेव साध्यतावच्छेदकमिति तदवच्छिन्ने पञ्चम्यर्थानन्वयात् साध्यतावच्छेदकविशिष्टान्वितस्वार्थबोधकत्वनिवेशने नातिव्याप्तिः। धूमाद्वह्निमतस्सधर्मेत्यादौ प्रकृतपक्षतावच्छेदकावच्छिन्ने यस्य साध्यस्य द्वितीयवह्निपद-जन्योपस्थितिवशादन्वयः प्रथमवह्निपदोपस्थापिते तत्रैव प्रतिज्ञाघटकपञ्चम्यर्थस्यान्वयात्पक्षा-न्वितसाध्यान्वितस्वार्थबोधकत्वविशेषणेन तद्वारणासम्भवात्साध्ये प्रकृतपक्षान्वितत्वं विहाय प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितत्वं निवेशितम्। यद्यपि उभयत्र वह्निपदेनैकमेव साध्यमुपस्थाप्यते, अतो नैतावताप्युक्तातिव्याप्तिवारणसम्भवः। तथापि प्रकृतपक्षतावच्छेद-कावच्छिन्नविशेष्यतानिरूपिता या विशेषणता तदवच्छिन्नसाध्यतावच्छेदकविशिष्टसाध्यीय-विशेष्यतानिरूपितस्वार्थविषयताप्रयोजकत्वं बोधकान्तार्थः। अतः पञ्चमीत्वमनिवेश्यं प्रयोज-नाभावात्। उपनयोपस्थापितपक्षविशेषणतापन्नसाध्यान्वितार्थबोधकपञ्चम्यन्ततत्पदमादाया-ननुषङ्गपक्षेऽपि निगमनेऽतिव्याप्तेर्वारणं लाक्षणिकपदप्रयोजनम्।

अयमात्मा ज्ञानादित्यादौ ज्ञानपदं मुख्यार्थपरमेव। पञ्चम्यर्थान्वयस्य तत्रैव सम्भवेन लक्षणाबीजभूतान्वयानुपपत्तिविरहादित्यभिमानिनामुक्तलक्षणेऽव्याप्तिशङ्कामुद्धर्तुमुपन्यस्यति। **यत्त्विति** शुद्धज्ञानत्वावच्छिन्नेन समं पञ्चम्यर्थान्वयसम्भवेऽप्यनुमितिजनकज्ञानविषय-तयोपस्थितावेव ज्ञानरूपहेतौ तद्विषयतानिर्वाहकव्याप्त्याकाङ्क्षया यो ज्ञानवान् स आत्मेत्युदा-हरणादि-प्रयोगसम्भव इति ज्ञानविषयकज्ञानत्वावच्छिन्ने तात्पर्यानुपपत्त्या लक्षणाया आवश्य -कत्वमिति समाधत्ते। **तन्नेत्यादिना** **यद्विषयकज्ञानस्य** यद्विषयकज्ञानत्वावच्छि-

---

पञ्चम्याः पक्षतावच्छेदकावच्छिन्नविषयतान्तर्गततादृशसाध्यविषयतानिरूपितज्ञाप्यत्वविषयतामात्र-प्रयोजकत्वान्नातिप्रसङ्ग इति भावः। पक्षांशे साध्यस्य विषयता च पूर्वोपदर्शितसाक्षात्परम्परासाधारणी-बोध्या। *पञ्चमीत्वमिति* बोधकान्तं पञ्चमीपदार्थ इत्यन्ये। हेतुवाक्यजन्यशाब्दबोधे जातेऽपि कथमस्य गमकत्वमित्याकाङ्क्षां विनानोदाहरणादिकं प्रदर्शयितुं शक्यत इत्यतस्तादृशशाब्दबोधस्य तादृशजिज्ञासाहेतुतां प्रदर्शयति। *अनुमितीति* कथमस्य गमकत्वमित्याकाङ्क्षायाः यद्रूपावच्छिन्नस्य तादृशविषयतया हेतुवाक्यादुपस्थितिस्तद्रूपं धर्मितावच्छेदकीकृत्यैव तादृशविषयतानिर्वाहकविषयक-

In Public domain. Digitization Muthulakshmi Research Academy


न्नस्य। **हेतुत्वम्** अनुमितिजनकत्वम्। **तस्य व्याप्त्यादिजिज्ञासायाम्** तुल्यवित्तिवेद्यतया अर्थतो वा तत्र प्रतीतानुमापकज्ञानविषयतया निर्वाहकाकाङ्क्षायामित्यर्थः। **उदाहरणादिप्रयोगः** उदाहरणोपनयाभ्यां तन्निष्ठव्याप्तिपक्षधर्मताप्रदर्शनम्। यद्यपि ज्ञानविषयकज्ञानत्वावच्छिन्ने ज्ञानपदतात्पर्येऽपि मुख्यार्थज्ञानत्वावच्छिन्नपरत्वमक्षतमेवेति पूर्वोपदर्शितमुख्यार्थतात्पर्यराहित्यरूपं लाक्षणिकत्वं नोपपद्यत इति। तथापि शक्यतावच्छेदकविलक्षणरूपावच्छिन्न-तात्पर्यकत्वमेव लाक्षणिकत्वमतो न दोषः। ननु शुद्धज्ञानत्वावच्छिन्नेऽनुमापकत्वबोधेऽपि तत्तन्निर्वाहकव्यस्त्यादिमद्विषयकत्वलाभाय वस्तुगत्या तादृशज्ञानविषयीभूते ज्ञाने व्याप्त्यादिप्रदर्शनसङ्गतिरित्यत आह। **अन्यथेति** जनकज्ञानविषयतयाऽप्रतितेऽपिज्ञाने वास्तवतादृशविषयतां पुरस्कृत्य व्याप्त्युपदर्शने सुखादेरप्यात्मत्वानुमापकज्ञानविषयतया अयमात्मा ज्ञानादित्यत्र यस्सुखी स आत्मेत्युदाहरणप्रयोगप्रसङ्गादित्यर्थः। तथा च सुखादौ व्याप्त्यादिप्रदर्शनेऽपि ज्ञानेऽनुमापकत्व[59]निर्वाहकव्याप्त्यादिमद्विषयकत्वपर्यन्तालाभात् आकाङ्क्षाया अपूरणात् यथा सुखादौ न तत्प्रदर्शनं तथैवैतन्मते ज्ञानेऽपि न तत्प्रदर्शनमुपपद्यत इति भावः।

उक्तप्रतिज्ञादावतिव्याप्तिवारणाय प्रकारान्तरेण लक्षणं परिष्कुर्वतां मतमाह। **केचित्विति** **पञ्चम्यन्तेति** कस्याश्चित् प्रतिज्ञायाः पञ्चम्यन्तलाक्षणिकपदवत्त्वेऽपि धूमज्ञानज्ञाप्यालोकवान्पर्वतो वह्निमानित्यादिप्रतिज्ञायां व्यभिचारेणावयवतावच्छेदकं प्रतिज्ञा-

त्वेन ज्ञानविषयकत्वात्। निर्वाह्यज्ञानस्य निर्वाहकजिज्ञासा जनकत्वादिति भावः। लक्षणानुपगमेऽपि यद्विषयकेत्यादिनियमाव्याहतेः अवच्छेदकनिवेशायाह। *यदिति* तथा च यद्रूपावच्छिन्नविषयकज्ञानत्वं तज्जनकतावच्छेदकं तद्रूपावच्छिन्नस्येत्यर्थः। शाब्दबोधे तुल्यवित्तिवेद्यत्वे मानाबावादर्थत इति। *तत्र* *हेतौ निर्वाहकाकाङ्क्षायाम्* निर्वाहकावान्तरधर्मजिज्ञासायाम्। *तत्र* शुद्धज्ञानत्वावच्छिन्ने परामर्शे। *तन्निर्वाहकेति* अनुमिति जनकत्वनिर्वाहकेत्यर्थः। *वस्तुगत्येति* तथा च यद्रूपावच्छिन्नविषयक्तवमनुमितिजनकतावच्छेदकतया हेत्वर्थस्तद्रूपावच्छिन्नस्यैव व्याप्त्यादिप्रदर्शनम् इति न नियमः। किन्तु यद्रूपावच्छिन्नस्य जनकत्वेन प्रतीतज्ञानीयाविषयतातद्रूपावच्छिन्नेतनिर्वाहकाङ्क्षायोदाहरणादीत्यर्थः। *उक्तप्रतिज्ञादौ* धूमादालोकवान् पर्वतो वह्निमानिति शङ्कोक्तप्रतिज्ञादौ इत्यर्थः। *कस्याश्चित* धूमादालोकवानित्यादेः। *तत्र* अन्यतमत्वशरीरे। *पुत्रः* जन्यत्व-

59. ज्ञानानुमापकत्वेति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

त्वं पक्षादिभेदेन भिन्नमपि न तादृशपदवत्त्वनियतमिति नातिप्रसङ्ग इति भावः। तादृशावच्छेदकं हेतुत्वं दुर्वचं, सुवचत्वे तदेव लक्षणमित्यन्यथापरिष्कुरुते। **तादृशेति** **तादृशपदम्** पञ्चम्यन्तलाक्षणिकपदम्। प्रतिज्ञात्वादिकं च तादृशपदाद्यघटितस्यापि प्रतिज्ञादेः सत्त्वेन तादृशपदवत्त्वव्यभिचारीति तच्छून्यत्वाभावान्न प्रतिजादावतिव्याप्तिः। तादृशपदवत्त्वव्यभिचारिमेयत्वादिशून्यत्वाप्रसिद्ध्याऽवयवतावच्छेदकेति। अत्र प्रतिज्ञात्वहेतुत्वसाधारणस्यावयवतावच्छेदकत्वस्यैकस्याभावात् प्रतिज्ञात्वादिकं विशिष्योपादाय तच्छून्यत्वं निवेश्यम्। तथा च हेतुत्वव्यावर्तनायोपात्तं तादृशपदवत्त्वव्यभिचारित्वविशेषणमनर्थकम्। यदि च प्रतिज्ञा-त्वहेतुत्वादिसाधारणं प्रतिज्ञात्वादिपञ्चान्यतमत्वमवयवतावच्छेदकं[60] तदा तत्र हेतुत्वप्रवेशे तस्यान्यादृशस्य दुर्वचत्वात् सुवचत्वे तदेवास्तु लक्षणम्। अन्यतममध्ये हेतुत्वमन्तर्भाव्य तद्व्यावृत्तये विशेषणान्तरदानं च प्रक्षालनाद्धीति न्यायेनायुक्तमित्यस्वरसः।

पञ्चम्यन्तेत्यादिलक्षणकर्तुरनुमतां धूमादित्यादिवाक्यस्थधूमादिपदस्य ज्ञाने लक्षणां स्वातन्त्र्येण दूषयति। **नव्यास्त्विति** **ज्ञानज्ञाप्यत्वे लक्षणयेति** ज्ञाप्यत्वलक्षणाया अवश्यकत्वात्तत्रैव ज्ञानांशस्याप्यधिकस्य प्रनेशेनैव धूमादिपदस्य मुख्यार्थपरत्वेऽपि धूमादिज्ञानज्ञाप्यत्वलाभसम्भव इत्यर्थः। **न प्रातिपदिके** न पञ्चमीप्रकृतिधूमादिपदे। नन्वेवं ज्ञानस्य पञ्चम्यर्थैकदेशतया तत्र धूमादिपदार्थस्यान्वयायोगात् धूमादिज्ञानालाभः। न च ज्ञाप्यत्वस्य पञ्चम्यर्थत्वेऽपि जन्यत्वरूपतदेकदेशे कथं धूमादिपदार्थतज्ज्ञानान्वयसम्भव इति वाच्यम्। चैत्रस्य पुत्रो घटादन्य इत्यादौ ससम्बन्धिपादार्थैकदेशे जन्यत्वादौ पदार्थान्तरस्यान्वयदर्शनान्निष्प्रतियोगिक एव पदार्थैकदेशे इतरान्वयस्याऽव्युत्पन्नत्वात्। न च स्वतन्त्रोपस्थित एव पदार्थे इतरान्वयजिज्ञासा जायते नत्वितरविशेषणतयोपस्थिते। अत एव गौर्नित्येत्यादौ स्वतरन्त्रगोत्वाद्युपस्थितये लक्षणेत्यत आकाङ्क्षादिविरह एव पदार्थान्तरस्य पदार्थैकदेशेऽनन्वये बीजं स च न प्रतियोगिनिष्प्रतियोगिकैकदेशसाधारण इति वाच्यम्। फलानुरोधेन स प्रतियोगिकपदार्थे विशेषणतयोपस्थितेऽपि प्रतियोगिजिज्ञासा जायत इति कल्पनात्। न च

विशिष्टः पुमान्। *निष्प्रतियोगित एवेति* ज्ञानस्य निष्प्रतियोगिकत्वादिति भावः। *लक्षणा* गोपदस्य गोत्वे इति शेषः। *आकाङ्क्षा* जिज्ञासा। *स चेति* तथा च ज्ञाप्यत्वस्य पञ्चम्यर्थतामते

60. अवयवतावच्छेदकत्वमिति पाठान्तरम्

ज्ञानादिसविषयकपदार्थेऽपि तथोपस्थिते विषयविशेषजिज्ञासा जायत इति युज्यते कल्पका-भावादित्याशङ्क्य सविषयककृतिदृष्टान्तेन पदार्थैकदेशे ज्ञानेऽपि विषयाकाङ्क्षां व्यवस्थापयति। **आकाङ्क्षावैचित्र्याच्चेति** कुत्रचित्स्वतन्त्रोपस्थित एवेतराकाङ्क्षाकुत्रचिद्विशेषणतयाऽप्युप-स्थिते कस्यचिदाकाङ्क्षेति विषयस्वभावाधीनतयाकाङ्क्षावैचित्र्यादित्यर्थः। **कर्तृकृतीवेति** पक्तेत्यादौ तृजाद्यर्थककर्त्राद्येकदेशे कृतौ यथाविषयत्वेन पाकादिक्रियान्वेतीत्यर्थः।

इदन्तु वोध्यम्। जिज्ञासारूपाकाङ्क्षायाः शाब्दधीहेतुत्वमजिज्ञासोरपि शाब्दवोधोद-यान्मणिकृता निराकृतम्। तथा चाकाङ्क्षाविरहः पदार्थैकदेशे पदार्थान्तरानन्वये न वीजम्। गौर्नित्येत्यादौ पदार्थैकदेशे गोत्वे नित्यादिपदार्थभेदान्वयवोधप्रयोजकायास्समानविभक्तिक-तत्पदसमभिव्याहाररूपाया आकाङ्क्षाया अक्षतत्वादतः पदाधीनायास्स्वतन्त्रतदुपस्थितेः पदार्थान्तरस्य तत्रान्वयवोधे हेतुता वाच्या। एवञ्च ज्ञानविशिष्टार्थकात्मादिपदघटितादात्मा न द्रव्यमित्यादिवाक्यात्पदार्थैकदेशे ज्ञाने द्रव्यभेदान्वयवारणाय दण्डजन्यो न दण्डजन्य इत्यादि -वाक्यात्पदार्थैकदेशजन्यत्वादौ दण्डजन्यभेदान्वयवोधवारणाय च कल्पनीये ज्ञानाद्यंशे इतरान्वयवोधे स्वतन्त्रज्ञानाद्युपस्थितिहेतुत्वे कार्यतावच्छेदककोटिप्रविष्टेतरविषयतायां विषयितासम्बन्धावच्छिन्नप्रकारतान्यत्वं विशेषणं देयम्। वस्तुतो ज्ञानादिविषयकशाब्दवोधे स्वतन्त्रज्ञानाद्युपस्थितेर्हेतुत्वेऽपि पञ्चम्यादिजन्यज्ञानज्ञाप्यत्वोपस्थितिप्रकृतिजन्यधूमाद्युप-स्थितियोग्यताज्ञानादिघटितशाब्द-सामग्र्याः पदार्थैकदेशे ज्ञानादौ विषयतादिसम्बन्धेन धूमादिप्रकारकशाब्दवोधजनने बाधकाभावः। तादृशसामग्र्यां स्वतन्त्रज्ञानादुपस्थितेरनन्त-

---

प्रकृत्यर्थान्वयानुपपत्तिर्दुर्वारैवेति भावः। *कल्पकेति* ज्ञानवदर्थकात्पदादौ व्यभिचारात्। *पक्तेत्यादौ इति* आदिना पाचक इत्यादावुणादिकृत्प्रत्ययपरिग्रहः। जिज्ञासारूपाकाङ्क्षायाः शाब्दवोधजनकत्वं दूषयति। *इदन्त्विति* *अक्षतत्वादिति* तथा च शक्त्युपस्थापितगोपदार्थैकदेशगोत्वे नित्यपदार्थान्वयापत्तिरिति भावः। ज्ञाप्यत्वमात्रस्य पञ्चम्यर्थतामते जन्यतायास्स्वतन्त्रोपस्तित्यभावेन प्रकृत्यर्थान्वयानुपपत्तिवत् ज्ञानज्ञाप्यतायाः पञ्चम्यर्थतामते ज्ञानस्य स्वतन्त्रोपस्थित्यभावेन तदनुपपत्तिरिति दूषणं समाधानप्रदर्शने नोद्धरति। *एवञ्चेति* विषयत्वादित्यादिना निरूपितत्व-सम्वन्धपरिग्रहः। *ज्ञानादीति* आत्मानद्रव्यमित्यादौ शाब्दवोधभयेनेत्यादिः तर्हि स्वतन्त्रज्ञानाद्यु-पस्थितेः क्वापि शाब्दसामग्रीघटकत्वं नास्तीत्यात्मानद्रव्यमित्युक्तस्थले ज्ञानादौ द्रव्यभेदवोधप्रसङ्गात्

In Public domain. Digitization: Muthulakshmi Research Academy

र्भावात्तादृशोपस्थितेर्ज्ञानादौ द्रव्यभेदान्वयवोधप्रयोजकसामग्र्यन्तरेष्वव निवेशात्। न चैवं स्वतन्त्रज्ञानाद्युपस्थितेर्व्यभिचारेण हेतुत्वमेव न सम्भवतीति वाच्यम्। यतो यत्रैकरूपावच्छिन्ने पदे पदान्तराकाङ्क्षा गृहीता अन्यरूपेण च वृत्तिः गृहीता तत्रातिप्रसङ्गवारणाय तत्तदानुपूर्वी-विशेषरूपपदविशेषत्वप्रकारेण गृहीतवृत्तिक-पदजन्यतत्तत्पदार्थोपस्थितेर्हेतुतावाच्या। तथा सति तद्धर्मप्राकारेणाकाङ्क्षादिग्रहस्य तद्धर्मप्रकारेण गृहीतवृत्तिकपदाधीनोपस्थितेश्च परस्पर-सहकारेणैव फलजनकत्वोपगमेनोक्तातिप्रसङ्गवारणसम्भवात् तथा च नानानुपूर्वीप्रकारकपद-ज्ञानजन्योपस्थितीनामेकविधशाब्दवोधे विभिन्नरूपेण हेतुतया व्यभिचार आवश्यक इति तद्वावर्त्मनैव दर्शितव्यभिचारस्य वारणमिति। एतेन जन्यत्वांशे इतरान्वयवोधे स्वतन्त्रजनक-त्वोपस्थितेः कार्यकारणभावे कार्यतावच्छेदककोटिप्रविष्टेतरविषयतानां निरूपितत्वसम्बन्धा-वच्छिन्नप्रकारताभेदनिवेशन-मुभयवादिसिद्धम्। अन्यथा औपगव इत्यादौ तद्धितार्थापत्यैक-देशजन्यत्वे निरूपकत्वसम्बन्धेन प्रकृत्यर्थान्वयानुपपत्तेर्ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थत्वमते च स्वतन्त्रज्ञानोपस्थितिजन्यतावच्छेदकघटकज्ञानविषयतानिरूपितेतरविषयतायां विषयतासम्ब-न्धावच्छिन्नप्रकारताभेदनिवेशनमधिकमिति प्रत्युक्तम्। तदनिवेशेऽप्युपदर्शितरीत्या सामा-ञ्जस्यात्। वैयाकरण इत्यादौ तदधीते तद्वेदेत्यनेन विहिततद्धितार्थस्य वेत्तुरेकदेशज्ञाने विषयतया प्रकृत्यर्थस्यान्वयोपपत्तये उक्तस्थले विषयतासम्बन्धावच्छिन्नप्रकारताभेदनिवेशस्य सर्वमत एवावश्यकत्वाच्चेति। प्रकृतेर्मुख्यार्थपरत्वे युक्त्यन्तरमाह। ** **यद्धर्मविशिष्टश्चेति** ** यद्धर्मविशिष्टः पञ्चमीप्रकृत्यर्थः तद्धर्मविशिष्टस्यैवव्याप्यत्वमुपदर्श्यत इति ज्ञानज्ञानत्वस्य पञ्चम्यर्थतामते तद्धर्मविशिष्टस्यैव पञ्चम्या जनकज्ञानविषयत्ववोधलाभादिति भावः।

** **अन्यथा** ** पञ्चम्या ज्ञानजनकत्वेन वोधितप्रकृत्यर्थज्ञाने विषयत्वेन विशेषणता-मवलम्ब्य विषये व्याव्युपदर्शनसङ्गमने। ** **यथार्थधूमज्ञानादिप्रयोगेऽपीति** ** तत्रापि शक्त्यु-पस्थितज्ञाने पञ्चम्यर्थज्ञापकतान्वयेन धूमादेः ज्ञापकज्ञानविषयत्वलाभेन धूमादौ व्याप्यत्व-

---

इत्यत आह। * **तादृशेति** * * **उक्तातिप्रसङ्गः** * यत्रैकरूपेणाकाङ्क्षाग्रहोऽन्यरूपेण वृत्तिग्रहस्तत्र। * **वर्त्म** * अव्यवहितोत्तरत्वनिवेशः। * **दर्शितेति** * पञ्चम्यर्थघटकज्ञाने प्रकृत्यर्थवोधे स्वतन्त्र-ज्ञानोपस्थितेरित्यादिः। * **एतेन** * वस्तुतस्त्विति कल्पस्यादरेण। * **जन्यत्वांशे** * दण्डजन्यो न दण्डजन्य इत्यादौ। * **औपगवः** * उपसमीपवर्तिनी गौः यस्य स उपगुः उपगोरपत्यं पुमानौपगवः।

In Public domain. Digitization Muthulakshmi Research Academy

प्रदर्शनं स्यात्। अस्मन्मते च ज्ञानज्ञाप्यत्वस्यैव पञ्चम्यर्थतया धूमज्ञानज्ञानस्यैव तत्र ज्ञापकत्वं प्रतीयते न तु धूमज्ञानस्येति नातिप्रसङ्ग इति। न च पञ्चम्याः केवलज्ञाप्यत्वार्थमतेऽप्युक्तस्थले ज्ञानपदस्य लक्ष्यार्थे ज्ञानविषयकज्ञान एव तात्पर्यात् न धूमज्ञाने मुख्येऽप्यर्थे ज्ञापकतालाभ इति न धूमादौ व्याप्यत्वोपदर्शनप्रसङ्ग इति न वाच्यम्[61]। मुख्यार्थपरत्वे बाधकविरहेण तत्तात्पर्येणापि प्रयोगसम्भवात्। न वा यत्र पदे अर्थान्तरे निरूढलक्षणाशक्त्युपस्थापितार्थस्तेन न बोध्यते, तद्बोधौपयिकाकाङ्क्षादिसामग्रीकाले तद्बोधस्य दुर्वारत्वात्। अथ तत्र शक्यार्थबोध-स्यापि सम्भवेन तत्रापि कस्यचित्कदाचित्तात्पर्यं सम्भवतु। तथापि तत्रानादितात्पर्यविरहात् न तत्तात्पर्येण न्यायान्तर्गतपदप्रयोगसम्भव इति चेत् माभून्मुख्यार्थतात्पर्यकज्ञानपदघटित-यथार्थधूमज्ञानादित्यादिवाक्यसमुदायस्य न्यायत्वं, तथापि ज्ञाप्यत्वमात्रस्य पञ्चम्यर्थत्वे न्यायान्तर्गतमुख्यार्थपरज्ञानपदघटितयथार्थधूमज्ञानादित्यादिवाक्यस्य धूमादौ व्याप्त्याकाङ्क्षा-प्रयोजकधीजनकत्वं दुर्वारमेव। तच्चानुभवविरुद्धम्। न च ज्ञानज्ञाप्यत्वे पञ्चम्याः लक्षणा-पक्षेऽपि केवलज्ञाप्यत्वे स्वारसिकलक्षणयोपस्थिते धूमज्ञाने ज्ञानजनकताबोधसम्भवादुक्ताति-प्रसङ्गो दुर्वारः, तत्रेष्टापत्तौ च प्रकृतेऽपीष्टापत्तिसम्भवादिति वाच्यम्। स्वारसिकलक्षणया पञ्चम्युपस्थितविषयत्वरूपार्थान्तर इव तादृशज्ञाप्यत्वेऽपि प्रकृत्यर्थान्वये आकाङ्क्षाया मया अनभ्युपगमात् धूमादिज्ञानादित्यतो धूमज्ञानस्य ज्ञापकत्वाबोधनादिति भावः। यत्तु धूमज्ञानादित्यतो लक्षणयोपस्थितधूमरूपविषयविशिष्टज्ञानज्ञाने ज्ञापकताभाने ज्ञापकज्ञान-विषयत्वं धूमज्ञान इव तद्विषये धूमेऽपि भासत इति प्रकृतेर्लाक्षणिकतामते तत्र धूमे व्याप्त्याकाङ्क्षया तदुपदर्शनप्रसङ्गो दुर्वार इत्याशयवर्णनम्। तदसत्। तथापि स्वमतेऽपि

*अधिकमिति* जन्यज्ञानविषयत्वस्य पञ्चम्यर्थत्वेतु नैतदितिभावः। *यत्र* *पदे* अनादित्वम्। परम्परित्वन्धीहेतुत्वम्। धूमज्ञाननिष्ठम्। *स्वारसिकेति* लक्षणयेत्यनुषङ्गः। *धूमज्ञाने* धूमज्ञान-पदोपस्थिते। *अर्थान्तरेति* धूमादित्यादौ पञ्चम्यालक्षणया विषयत्वे उपस्थिते तत्र धूमपदार्थान्वय इत्यर्थः। अत्र लक्षणया ज्ञानविषयतया यद्धर्मविशिष्टः पञ्चमीप्रकृत्यर्थस्तत्रैव व्याप्त्यादिप्रदर्शनमिति नियमोपगमान्नैतद्वक्तुमवसर इत्याहुरित्यस्वरसः। धूमहेतुकस्थले धूमज्ञानादित्यभिधाय तद्व्याप्यत्वोप-दर्शनापत्तिः न हित तत्र ज्ञानज्ञानस्य ज्ञापकत्वे तात्पर्यं येन लक्षणास्यादिति कश्चित् अत्र स्वारसिक-

61. इति वाच्यमिति पाठान्तरम्।

In Public domain. Digitization by Muthulakshmi Research Academy

तद्दोषस्य दुर्वारत्वात्। पञ्चम्यर्थैकदेशे ज्ञाने मुख्यार्थधूमरूपविषयविशिष्टज्ञानान्वयेऽपि धूमे ज्ञापकज्ञानविषयबोधस्य दुर्वारत्वात्। न च तथा च पञ्चमीप्रकृत्यधीनोपस्थितिविशेष्यत्वं यस्य तस्यैव व्याप्त्यादिकं प्रदर्श्यत इति नियमस्य स्वयमुपगमात् न स्वमते दर्शितातिप्रसङ्ग इति वाच्यम्। तत्र धूमादौ ज्ञापकज्ञानविषयतावोधादाकाङ्क्षासम्भवे तादृशनियममननुरुध्य व्याप्त्याद्युपदर्शनस्यानपवादात्।

वस्तुतो लिङ्गज्ञानं प्रकृत्यर्थे पञ्चम्यर्थे वान्तर्भवतूभयथापि धूमज्ञानादित्यत्र धूमज्ञान एव साध्यज्ञापकतावच्छेदकपक्षतावच्छेदकावच्छिन्नविषयतानिरूपितप्रकारता लभ्यते सैव विषयता तस्य व्याप्तिपक्षधर्मतानिर्वाह्येति तदाकाङ्क्षया तत्रैव व्याप्त्याद्युपदर्शनं तद्ज्ञानविशेषण -धूमे च तादृशविषयतावच्छेदकत्वरूपविषयतैव सा च न तत्र व्याप्त्यादिनिर्वाह्या। अतो न तत्र तदाकाङ्क्षेति धूमादित्यादिप्रयोगे धूमत्वादाविव धूमज्ञानादित्यत्र धूमादौ व्याप्त्यादेर्नोपदर्शनम् इति।

इति गदधरीये हेतुग्रन्थः।

---

योपस्थापितज्ञाप्यत्वे प्रकृत्यर्थान्वये आकाङ्क्षायानुपगमेन धूमज्ञानादित्यादौ ज्ञापकत्वाबोधकत्वमिति समाधानमयुक्तं, निरूढलक्षणयोपस्थापिते ज्ञाप्यत्वे तदैवोपस्थापितप्रकृत्यर्थज्ञानान्वये आकाङ्क्षोपगमेऽपि शक्त्युपस्थापिततदन्वये आकाङ्क्षायाः लक्षणकर्तृभिरप्यनङ्गीकारस्य सुवचत्वादिति बोध्यम्। यत्तु कारोक्तदीधित्याशये दूषणान्तरमाह। ✻**वस्तुत इति**✻ लक्षणाद्वयमपेक्ष्यैकलक्षणायां लाघवम् अभिप्रेत्यपञ्चम्यर्थस्योत्तराभिधानम्। ✻**विषयतैवेति**✻ लभ्यत इत्यनुवर्तते अवच्छेदकत्वस्य तद्गत-व्याप्त्यादिनिर्वाह्यत्वोपगमे धूमत्वादौ तन्निर्वाहकाकाङ्क्षायादुर्वारतया तद्गतव्याप्त्याद्युपदर्शनप्रसङ्ग इति युक्तिवारणाय धूमत्वादाविति दृष्टान्ताभिधानम्।

इति कृष्णम्भट्टीये हेतुग्रन्थः

In Public domain. Digitization Muthulakshmi Research Academy


## अथ गदाधरीये प्रतिज्ञादिलक्षणानि निरूप्यन्ते

मूलोक्तलक्षणापेक्षया लघूनि प्रतिज्ञाद्यवयवलक्षणानि स्वयमाह। **इतरान्विते-ति** प्रथमसत्यन्तस्य हेतूपनयनिगमनसाधारणस्योदाहरणव्यावर्तनप्रयोजनं स्वयमेव दर्शयिष्यते प्रतिज्ञाहेत्वोरित्यादिना, इतरान्वितत्वं स्वभिन्नावयवार्थान्वितत्वं स्वाघटकपदोप-स्थापितार्थान्वितत्वं वा। एवं चेतरावयवसहकारेण स्वाघटकपदसहकारेण वा बोधकत्वं समुदायार्थः। तेनोदाहरणबोध्यार्थप्रविष्टसाध्यादेः प्रतिज्ञादिजन्यबोधे इतरान्वितत्वेऽपि न क्षतिः। द्वितीयसत्यन्तानन्तरमग्रिमं न्यायावयवत्वमिति सम्बन्ध्यते। द्वितीयसत्यन्तञ्च हेतुनि-गमनवारकं हेतुजन्ये, तस्मादितरेभ्यो भिद्यते इत्यादिनिगमनजन्ये च बोधे विभक्त्यर्थस्य विशेष्यतया विवक्षणीयविभक्त्यन्तपदार्थविशेष्यकत्वविरहाद्वह्निव्याप्यधूमवांश्चायं तस्माद्वह्नि-मानित्याद्युपनयनिगमनजन्यबोधे च विभक्त्यन्त्यपदमध्येऽन्तर्भूतेदं पदं मतुपाद्यन्तपदार्थयो-

---

## अथ कृष्णम्भट्टीये प्रतिज्ञादिलक्षणानि निरूप्यन्ते

***लघूनीति*** एतेन न्यायावयवसामान्यलक्षणयोर्लघुप्रतिज्ञादिघटितयोर्मूलोक्तयोरेवलघुत्वं न तु मूलोक्तगुरुतरप्रतिज्ञाघटितयोरिति सूचितम्। ***उदाहरणव्यावर्तनम्*** यो यो धूमवान् स वह्निमानित्युदाहरणेऽन्त्यन्तभिन्नयत्पदार्थविशेष्यकान्वयबोधजनकेतिव्याप्तिवारणम्। यथा श्रुते इतरः स्वार्थभिन्नो यः साध्यादिस्तदन्वितस्वार्थबोधकतया नोदाहरणव्यावृत्तिरतो व्याचष्टे। ***स्वभिन्नेति*** अवयवत्वं नावयवप्रतिपाद्यत्वपर्याप्त्यधिकरणत्वं तच्च स्वार्थसाध्यस्य सम्भवति। हेतुघटकपञ्चम्यर्थान्व-यसत्त्वेऽपि तद्घटकप्रकृत्यर्थान्वयाभवादित्यत आह। ***स्वभिन्नावयवघटकपदेति*** यद्यपि तादृशपद-प्रयोज्यविषयतानिरूपितस्वार्थविषयताशालित्वं लभ्यते तथापि वैयर्थ्यात्तदुपेक्ष्याह। ***एवञ्चेति*** न च सहकारेणेत्यनेन बोधे जन्यत्वे न चैतावतोदाहरणव्यावृत्तिरिति वाच्यम्। तदभावप्रयुक्तस्वाभाविकत्वं सहकारः। वैशिष्ट्ये तृतीया, बोधेऽन्वयः। स्वजन्यतावच्छेदकीभूतबोधवृत्तिधर्मावच्छिन्नाभावत्वेन च प्रयुक्तत्वम्। यद्वा तादृशपदप्रयुक्तविषयतानिरूपितस्वतात्पर्यविषयबोधीयविषयताप्रयोजकत्वं हेतूदाह-रणबोधमादायोदाहरणवारणाय तात्पर्यनिवेश इत्यदोषात्। नन्वनुषङ्गपक्षे निगमेऽतिव्याप्तिः स्वभिन्ना-घटकायं पदोपस्थापितार्थान्वितस्वार्थबोधकत्वादतोद्वितीयदलेऽन्त्यभिन्नपदविशेषणं स्वीयत्वस्येतरा-घटकत्वरूपं निवेश्यं यथा श्रुतेन तेन वारणात्तथा च गौरवमित्यत आह। ***स्वाघटकेति*** तच्च स्व-विषयकनिष्ठभेदप्रतियोगितावच्छेदकविषयिताकत्वम्। ***विभक्त्यर्थस्येति*** न चान्त्यत्वे विभक्त्यन्तत्वं न घटकम्। एवञ्चपदे विभक्त्यन्तत्वं न विशेषणं तथाप्युक्तदोषनिरासादिति वाच्यम्। तथा सत्युपनये

In Public domain. Digitization: Muthulakshmi Research Academy

विशेष्यतया अन्त्यभिन्ने स्वीयपदार्थविशेष्यकत्वविरहात्। अन्त्यत्वं च स्वघटकपदेषु चरमत्वम्। उपनयादिस्थेदमादिपदानामपि न पदसामान्यमध्ये चरमत्वं तदुत्तरमप्यन्यवाक्यघटकपदसत्वादित्यतः स्वघटकत्वं पदविशेषणम्। एवञ्च निगमनघटकपदेषु यच्चरमं तदन्योपनयस्थेदं पदार्थविशेष्यकबोधं प्रत्युपनयसहकारेण स्वार्थबोधजनके निगमने तादात्म्येन द्रव्यादिसाध्यके इदं द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ स्वघटकविभक्त्यन्तपदेषु यदन्त्यं सत्तादि -पदं तदन्यविभक्त्यन्तप्रतिज्ञास्थद्रव्यादिपदार्थविशेष्यकान्वयबोधजनके हेतौ चातिव्याप्तिवारणाय स्वीयत्वमत्यन्त्यभिन्नपदविशेषणम्। अत्र स्वत्वपुरस्कारेण लक्ष्यव्यक्तीनां निवेशादननुगम इति प्रतियोगिनि स्वत्वं निवेश्य लक्षणान्तरमाह। **अन्त्यपदवत्त्व इति** अत्राप्युदाहरणवारकं प्रथमसत्यन्तमनुषज्यते, द्वितीयसत्यन्तेन वैकल्पिकं सत्यन्तद्वयं, धूमादित्यादिहेतौ विभक्त्यन्तान्त्यपदाप्रसिद्ध्या एकपदमात्रघटकतत्पदसाधारण्यान्त्यत्वस्य निर्वचनेऽप्यन्त्यभिन्नविभक्त्यन्तस्वीयपदाप्रसिद्ध्या स्वपदेनान्यस्यैवोपादेयतया स्वीयानन्त्यपदार्थविशेष्यकशाब्दबोधाजनकं यत्तदन्यत्वसत्त्वादतिव्याप्तिरतोऽन्त्यपदत्वे सतीति। अन्त्यपदवत्त्वञ्च स्वघटकपदोत्तरपदाघटकं यत्स्वं तदन्यत्वं न तु स्वघटकपदोत्तरपदघटितत्वं, लक्ष्य

---

अतिव्याप्तेरन्त्यत्वे विभक्त्यन्तत्वस्यावश्यकत्वात्। *अन्त्यभिन्न इति* मुख्यविशेष्यतानिवेशया तेन नोपनयादावतिव्याप्तिः। नन्वयं पदमादायैव निगमनत्वपर्यवसानस्याभिधानादुपनयसहकारेण बोधकतैव नास्तीत्यत आह। *तादात्म्येनेति* द्रव्यत्वसाध्यके इदं द्रव्यत्ववदित्येव प्रतिज्ञा तत्र द्रव्यत्व -पदं न विभक्त्यन्तमतस्तादात्म्यसम्बन्धानुसरणम्। एतल्लक्षणे च स्वघटकविभक्त्यन्तत्वपदप्रागभावासमानकलीनस्वघटकविभक्त्यन्तपदभिन्नस्वघटकविभक्त्यन्तत्वप्रवेशाद्धूमादित्येकपदहेतुवारणात् पदद्वयघटितहेत्वनुसरणम्। *हेताविति* न च तादृशपदसहकारेण स्वार्थमुख्यविशेष्यकबोधोपादानान्न दोषः। एवमप्युपनयेऽतिव्याप्तेः अन्त्यीभूतेदं पदान्यनिगमनसहकारेण स्वार्थमुख्यविशेष्यकबोधजनकत्वात्। *स्वीयत्वमिति* यद्यपि स्वीयाद्यपदार्थविशेष्यकान्वयबोधजनकत्वोक्तावप्युपनयादिव्युदासस्सम्भवति तथापि धूमादालोकवानित्यादिप्रतिज्ञास्वव्याप्तेस्तत्त्यागः। अत्र स्वघटकविभक्तिप्रागभावसमानकालीनस्वघटकविभक्तिप्रकृत्यर्थविशेष्यकबोधजनकत्वं सम्यगिति वदन्ति। ननु स्वघटितपदवृत्तिस्वघटकपदप्रागभावसमानकालीनत्वस्याभाववत्स्वघटकत्वरूपान्त्यत्वे स्वघटकपदवृत्तित्वं प्रवेश्यदोषदानमसङ्गतमत आह। *एकमात्रेति* स्वघटकपदप्रागभावासमानकालीनस्वघटकपदत्वमन्त्यत्वम्। *यदिति* उपनयादिकमित्यभिप्रायः। *स्वघटकेति* स्वं धूमादित्यादिपदं

In Public domain. Digitization Muthulakshmi Research Academy


-भूतप्रतिज्ञाव्यक्तीनां स्वत्वेनोपादेयतया अननुगमतादवस्थ्यात् अन्त्यपदवतो हेतुविशेष्यो-पनयनिगमनयोस्तद्वतोस्वीयानन्त्यपदार्थविशेष्यकबोधाजनकयोः[62] तदन्यत्वासत्त्वान्नाति-व्याप्तिः। न चोपनयघटकानन्त्यपदार्थहेतुमदादिविशेष्यकबोधजनकतदेकदेशमतुवन्तादे-र्भेदस्य तद्घटितसमुदायात्मकोपनयादावसत्त्वात्तादृशबोधाजनकं स्वं नोपनयादिकमित्यति-व्याप्तिरिति वाच्यम्। तादृशबोधजनकत्वं यादृशसमुदायावृत्तितादृशसमुदायरूपस्वभिन्नत्व-निवेशे वानति प्रसङ्गात्। उपनयाद्येकदेशवृत्तितादृशबोधजनकताया इदमाद्यन्तपदघटित-समुदायात्मकोपनयावृत्तितया तदन्तपदसमुदायात्मकोपनयादेस्तादृशसमुदायात्मकत्वेन तद्भिन्नत्वाभावात्। तादृशसमुदायाभिन्नत्वं च तद्भेदानुयोगितावच्छेदकावयवतावच्छेदकरूप-

---

तद्घटकमपि तदेवतदुत्तरमुदाहरणादिघटकपदमेव तदविषयकप्रतीतिविषयत्वाद्धूमादित्यादौ नाति-व्याप्तिः। प्रतिज्ञायाश्च घटकपदोत्तरं वह्निमानिति पदन्तदविषयकप्रतीतिविषयत्वाल्लक्षणसमन्वयः। स्व-घटकविभक्त्युत्तरविभक्त्यघटितं यत्स्वन्तदन्यत्वन्तु लघुत्वाज्ज्यायः। अत्र स्वीयानन्त्यपदार्थविशेष्य-कान्वयबोधकत्वावच्छिन्नभेदः तादृशजनकसमुदायभेदो वा व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताक-भेदानुपगमान्न सुनिवेश इत्याशङ्कते। *न चेति* *अतिव्याप्तिरिति* स्वीयानन्त्यपदार्थविशेष्यकान्वय-बोधाजनकस्वाप्रसिद्धिरित्यर्थः। *तादृशबोधेति* ननु महावाक्यार्थबोधेऽवान्तरवाक्यार्थज्ञानस्य हेतुत्वेन वह्निव्याप्यधूमवान् पर्वत इत्युपनयार्थबोधे वह्निव्याप्यो धूम इति ज्ञानस्य निगमनजन्यबोधे च तस्मादित्यर्थज्ञानस्य तस्माद्वह्नीत्यर्थज्ञानस्य वाऽपेक्षणीयतयाऽतिव्याप्तिवारणेऽपि इदं स्पर्शवत् भूतत्त्वे सति मूर्तत्वादित्यादिन्यायान्तर्गतहेतावतिव्याप्तिः। स्वीयानन्त्यपदार्थविशेष्यकबोधस्यैव तत्रानुदयात् इति चेन्न। शोभनं भूतत्वमित्याकारकबोधप्रसिद्धेः। स्वीयानन्त्यपदप्रयोज्यमुख्यविशेष्यताशालिबोध-जनकतासामान्यस्य वाभिधानात्। भूतत्वे इत्यस्माद्विभक्त्यर्थविशेष्यकबोधे विभक्त्यन्तभूतत्वपदस्य जनकत्वात्। तेन यादृशहेतुघटकप्रथमपदात्स्वाघटकपदार्थप्रकारकबोधो प्रसिद्धस्तत्रापि न दोषः। उपनयादिनिष्ठबोधजनकतायां सामान्यान्तर्गतायामुपनयाद्यवृत्तित्वाभावादप्रसिद्धेर्वारणाय मुख्यत्वोपा-दानम्। धूमादालोकवान् पर्वतोवह्निमानित्यादिप्रतिज्ञासङ्ग्रहाय सामान्यपदम्। अथ स्वीयानन्त्यपदार्थ-विशेष्यकबोधजनकं यद्यत्स्वं तद्भिन्नं यद्यत्तद्भिन्नत्वं कुतोनोक्तमिति चेन्न। भिन्नभेदस्य प्रतियोगितावच्छे-दकरूपत्वे अनुयोगिन्येव स्वत्वनिवेशपर्यवसानात्। अभावान्तरतयावैयर्थ्यमिति। पक्षे च व्यासज्य-वृत्तिधर्मावच्छिन्नानुयोगिताकभेदोपगमेनोपनयाद्यवारणात् तादृशजनकान्यत्वस्योपनयादावसत्त्वात्

---

62. अनन्त्यपदार्थविशेष्यकबोधजनकयोः इति पाठभेदः

वत्त्वमतस्समुदायघटकप्रत्येकसकलभागेषु समुदायभेदसत्त्वेऽपि नातिप्रसङ्गः। ईदृश्येन रीतिः अवयवान्तरभेदघटितलक्षणान्तरेऽपि बोध्या।

तस्मात्पृथिवीतरेभ्यो भिद्यत इत्यादिनिगमने स्वघटटविभक्त्यन्तपदमध्ये यदन्त्यं धातुपदं तदन्याख्यातार्थविशेष्यकबोधजनकतया अतिव्याप्तिं अन्त्यभिन्नपदस्य विभक्त्यन्त-रूपताविवक्षणेन वारयति। **पदमिति** **निगमन इति** निगमनपदमपि तस्मात्पृ-थिवीतरेभ्यो भिद्यत इत्यादिनिगमनविशेषपरम्, अन्त्यपदशरीरे वृत्तिमत्त्वरूपपदत्वनिवेशे पुनरुपनयनिगमनयोरेवातिव्याप्तिस्स्यात्। उपनयघटकेदं पदनिगमनघटकमतुप्पदयोरन्ते तद्घटकविभक्तिसत्त्वेनान्त्यभिन्नत्वादतः तत्र विभक्त्यन्तपदमेव निवेश्यमिति भाव इति केचिद्व्याचक्षते। तन्न मनोरमम्। तथाहि। स्वघटकविभक्त्यन्तपदमध्ये यदन्त्यमित्यस्य कोऽर्थः, स्वघटकविभक्त्यन्तपदप्रागभावासमानकालीनविभक्त्यन्तपदमित्यर्थ इति चेत्, उपनयादिस्थेदमादिपदस्य विभक्तिरूपपदप्रागभावसमानकालीनतया तस्यान्त्यत्व निर्वाहाय प्रथमं विभक्त्यन्तत्वं विशेषणमस्तु। चरमविभक्त्यन्तत्वविशेषणमनर्थकम्, तद्धेयमिति चेत् तर्हि अनन्त्यत्वं स्वीयविभक्त्यन्तप्रागभावसमानकालीनत्वपर्यवसितं भिन्नभिन्नत्वनिवेशस्य वैयर्थ्यात्, एवञ्च तस्माद्भिद्यत इत्यादिनिगमनस्थाख्यातपदस्यानन्त्यत्वमेव नास्तीति

---

इति। इदन्तु बोध्यम्। स्वीयान्त्यपदाप्रयोज्यस्वजन्यशाब्दबोधीयमुख्यविशेष्यताकमजनकान्तार्थः। अनुषङ्गपक्षे च सत्यन्तेन निगमनव्युदास इति। *अवान्तर भेदः* हेत्वन्यत्वोदाहरणान्यत्वम्। केचित्तु अन्त्यपदवत्त्वपरिष्कारोप्योवमेवेत्याहुः। तन्न। स्वघटकपदोत्तरपदघटितत्वं यादृशसमुदायावृत्तितादृश-समुदायरूपस्वभिन्नत्वमिति परिष्कारस्य निष्प्रयोजनकत्वात्। घटितत्वस्य स्वघटकपदसाधारणतया समुदायावृत्तित्वाभाधाच्च। सम्प्रदायमतमुपन्यस्यति। *पृथिवीत्यादिना केचित्व्याचक्षत इत्यन्तेन* तस्माद्वह्निमानित्यत्र स्वघटकविभक्त्यन्तपदमध्ये यदन्तं मतुप्पदं तदन्यार्थविशेष्यकबोधाजनकत्वात् आह। *निगमनविशेषेति* एतच्च प्रयोजनं स्वघटकविभक्त्यन्तपदमध्ये इत्यत्र पदस्य विभक्त्यन्तत्वा-विवक्षणेन घटित इत्यतस्तत्रापि तद्विवक्षति। *अन्त्यपदशरीर इति* *अन्त इति* तथाचान्त्यीभूत-सुप्पदभिन्नेदं पदाद्यर्थविशेष्कबोधजनकत्वादतिव्याप्तिरित्यर्थः। *उपनयस्थेति* स्वघटकविभक्त्यन्तपद-प्रागभावासमानकालीनविभक्त्यन्तभिन्नविभक्त्यन्तपदेति। अन्त्यपदयोर्विभक्त्यन्तरूपयोरुपादानेऽपि स्व-घटकपदप्रागभावासमानकालीनत्वरूपान्त्यत्वघटकपदं विभक्त्यन्तमेव निवेश्यम्। अन्यथोपनय-निगमनयोस्तद्घटकीभूतेदं पदम्मतुप्पदयोस्तद्घटकचरमसुब्विभक्तिपदप्रागभावसमानकालीनतया

In Public domain. Digitization: Mahalakshmi Research Academy

किमनन्त्यपदे विभक्त्यन्तत्वनिवेशनेनेति। वस्तुतस्तु तस्मान्नेतराणीत्यादौ निगमने विभक्त्यन्ते -तरपदप्रागभावसमानकालीननञ्पदार्थविशेष्यकशाब्दबोधजनकेऽतिव्याप्तिरेव लक्षणस्थ-पदस्य विभक्त्यन्तपरतया वारिता।

अथ नञ्पदस्यापि प्रातिपदिकत्वेन विभक्त्यन्ततया विभक्त्यन्तत्वविशेषणेन दुर्वारता। न च निपातस्य विभक्तिप्रकृतित्वं न स्वीक्रियते, तदर्थेन विभक्त्यर्थानन्वयात् स्वराद्यव्ययार्थे च

---

तदन्यत्वविरहेणतादृशान्यत्वाश्रयवत्तदुत्तरकालीनवाक्यान्तरघटकविभक्त्यन्तपदभिन्नतया विभक्त्यन्त-तया चातिव्याप्तिवारणासम्भवात्। तत्पतदस्य विभक्त्यन्तरूपस्योपादाने चान्त्यपदभिन्नपदयोर्विभक्त्य-न्तत्वानुधावनं निष्फलम्। उपनयनिगमनघटकयोरिदं पदमतुप्पदयोः स्वघटकविभक्त्यन्तपदप्राग-भावासमानकालीनतया अन्त्यभिन्नत्वासम्भवेनातिव्याप्त्यभावादित्यर्थः। न चान्त्यत्वघटकपदस्य विभ -क्त्यन्तरूपस्य ग्रहणे एव दीधितितात्पर्यम्। तथा सति पदस्य विभक्त्यन्तत्वाविवक्षणे निगमनवदुपनये-प्युक्तरीत्याऽतिव्याप्तिसम्भवेन निगनमात्राभिधानस्य निरभिप्रायकत्वापत्तेरिति वावः। अत्रोक्तानुपपत्ति-भयेनान्त्यभिन्नपदस्य विभक्तयन्तरूपस्य विवक्षाबीजं स्वयमाह। ∗वस्तुतस्त्विति∗ यत्त्वननुषङ्गपक्षे तस्मान्नेतराणीतिनिगमनमेवनोपगम्यते अनुषङ्गपक्षे च सञर्थमुख्यविशेष्यकबोधाजनकत्वस्यैवसत्त्वेन तदन्यत्वस्यैवदुर्घटत्वादिति। तन्नसाधीयः। अनुयोग्यमिश्रितनञर्थविषयकमहावाक्यार्थबोधानुपगमात् अवान्तरवाक्यार्थबोधे बाधकाभावात्। अन्यथा तादृशसम्प्रदाय सिद्धनिगमनापलापापत्तेरिति सिद्धान्त -मभिप्रेत्यैतदभिधानात्। केचित्तु प्राचीनमतेनेदं व्यावृत्तिप्रदर्शनमित्याहुः। तथाचानुषङ्गपक्षेऽनुषक्तस्य न निगमनघटकत्वं पक्षद्वये निगमनत्वसमनियमात् तदनुसन्धानन्तु सामग्रीघटकमात्रमयं पदान्त-र्भावेण निगमनत्वपक्षे तु न्यायावयवत्वं तदन्तर्गतत्वमात्रं नीलः पर्वतो वह्निमान् धूमादित्यादौ धूमाद्वह्नि -मान्पर्वत इति बोधस्यावान्तरवाक्यार्थबोधत्वाभावेन वादितात्पर्यागोचरतया स्वीयानन्त्यपदार्थ-विशेष्यकान्वयबोधाजनकान्यत्वाभावेनैव वारणान्न्यायावयवत्वपर्यन्तवैय्यर्थ्यात्। तथा च निगमनैक-देशे अतिव्याप्तिः। प्राचीनैस्त्वनुयोग्यमिश्रितनञर्थबोधवादिभिस्तस्मान्नेतराणीत्यस्य वाक्यत्वस्वीकारा-दननुषङ्गपक्षे तन्मते व्यावृत्तिरिति सिद्धम्। लक्षणस्थेत्यनेनान्त्यपदस्यातथात्वात्तत्र विभक्त्यन्तत्व-विवक्षायां नदीधितितात्पर्यमिति सम्प्रदायमतदूषणान्तरं सूचितम्। नन्वेवमव्ययानामपि विभक्ति-प्रकृतित्वं न स्यात् तदर्थेनापि विभक्त्यर्थानन्वयात्तथाच स्वः पुरुषार्थ इत्यादि प्रतिज्ञायामव्याप्तिरत आह। ∗स्वरादिति∗ ∗अव्ययीभावयोरिति∗ सुवन्ताव्ययस्यैव अव्ययीभावसमर्थपदत्वात्। न चार्था-भावेऽव्ययीभावविधानसमामर्थ्यादसुवन्तत्वेऽप्यनव्ययीभावो भविष्यतीति नञ् भिन्नाव्ययेनार्थाभावे

In Public domain. Digitization Muthulakshmi Research Academy

अनुसन्धीयमानलुप्तविभक्त्यर्थान्वयेन तादृशतादृशाव्ययोत्तरमेव विभक्तिस्वीकारस्यावश्यक-त्वात्, नञोऽसुवन्तत्वेऽपि नञ् तत्पुरुषविधायकसूत्रसामर्थ्यादेव तेन सह समासो भविष्यतीति वाच्यम्। विभक्तेर्निपातार्थान्वितार्थवोधकत्वेऽपि निर्विभक्तिकप्रातिपदिकस्यासाधुतया साधुत्वाय[63] विभक्तेरावश्यकत्वात्। नञोऽसुवन्तत्वेऽपि नञिति तत्पुरुषविधायकसूत्र-सामर्थ्येन तेन सह पदान्तरस्य तत्पुरुषसमर्थनेऽपि वहुव्रीह्यव्ययीभावयोरनुपपत्तेश्च। सुवन्तत्वे अपि समासाप्रविष्टप्रतियोगिपदार्थानुपरागेण नञोऽभाववोधकतया तत्सापेक्षत्वेनासामर्थ्यान्न

अव्ययीभावानुपगमादिति वाच्यम्। अव्ययं विभक्तीत्यनुशासनघटकस्याव्ययपदस्यैकतया केवलाव्यय -सुवन्ताव्ययरूपार्थद्वयासम्भवात् एवञ्चाव्ययान्तरेण निर्मक्षिकमित्याद्यव्ययीभावोऽपि सिध्यतीत्य-वधेयम्। ननु नञस्सुवन्तत्वोपगमे घटः पटो नश्चघटश्चेति विग्रहसम्भवान्नघटावितिद्वन्द्वापत्तिरत आह। *सुबन्तेति* *समासेति* अथ वृत्तस्य विशेषणयोगेनेति व्युत्पत्तिः तदर्थश्च समासघटक-पदोपस्थाप्ये समासाघटकपदार्थस्य नान्वयः। अन्यथा वुद्धस्य राजमातङ्ग इत्यादिप्रयोगापत्तेः। राजादौ बुद्धादिपदार्थयोग्यतासत्त्वात्। एवं तद्धितान्तस्य कृदन्तस्य नामधातुपदस्य च घटकपदोप-स्थाप्येन तदघटकपदार्थान्वयः। तेन शोभनं वैयाकरण इत्यादौ अध्ययनरूपप्रत्ययार्थैकदेशेन शोभनाद्यन्वयः। तत् कस्य हेतोरिति चेत् आकाङ्क्षाविरहात्। आकाङ्क्षापि न समभिव्याहारमात्रं किन्तु वोधविशेषे पदविशेषयोस्समभिव्याहारः। नामार्थयोरभेदवोधे च समानविभक्तिकनाम्नोस्समभि-व्याहारः। नामार्थयोरभेदवोधे च समानविभक्तिकनाम्नोस्समभिव्याहारः उक्तस्थलेच न सोऽस्ति राज-पदस्य निर्विभक्तिकत्वात्। न चैतावता यथाराजमातङ्ग इति समासोवार्यते तद्वत् नञ्पदेन द्वन्द्वसमासः कथं वार्यते नञर्थे इतरान्वयमात्रस्य वारणीयत्वादिति चेत्। शोभने वनेचर आक्रोशार्थे अरूपायादास्याः पुत्र इत्यादेः साधुतावारणाय सापेक्षमसमर्थवद्भवतीत्यसामार्थ्यातिदेशात्। अन्यथा तत्र शोभनाद्यभेदान्वयबोधौपयिकाकाङ्क्षासत्त्वेन शाब्दवोधापत्तेः। अत एव बुद्धस्य राजमातङ्ग इत्यादौ-अपि राजपदोत्तरविभक्तिस्मृतिकल्पनेऽप्यसामर्थ्यमेव तथाविधप्रयोगवारणं शाब्दिकैरभिधीयते। सापेक्षत्वञ्च प्रकृतसमासाद्यनिविष्टपदार्थान्वितस्वार्थपरत्वं तादृशपदार्थानन्वितस्वार्थातात्पर्यकत्वमिति यावत्। नन्वेवमुत्तमोराजपुरषः दर्शनीयोराजमातङ्ग इत्यादेस्साधुत्वाय स्वार्थः प्रधानभिन्नत्वेन विशेष्यः प्राधान्यञ्च समासजन्यबोधे मुख्यविशेष्यत्वमेव। न च यवीयां संराजपुरुषमानयेति प्रयोगो नस्यात्। सामसिकार्थस्य विभक्त्यर्थकत्वेप्रकारत्वादिति वाच्यम्। समासजन्यावान्तरबोधे मुख्यवेशेष्य

63. साधुतायै इति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

-तामादायोपपत्तेः। समासप्रयुक्तमुख्यवेशेष्यत्वं वाविवक्षणीयं एवञ्च प्रकृतसमासे नञर्थस्य मुख्य-विशेष्यत्वान्नासमार्थ्यमित्याशङ्कावारणाय प्रतियोगीत्युक्तम्। प्रधानीभूतस्वार्थे अभेदेनेतरनामार्थान्वये समासः न तु भेदेनेति भावः। एतेन प्रधानार्थकबोधकपदस्य सापेक्षत्वे समासस्य साधुत्वे शोभनाचित्र-गुरिति समासापत्तिः। मुख्यविशेष्यीभूतचित्रगोस्वामिबोधकगोपदस्य प्रधानार्थबोधकतया तदुपस्ताप्य गविशोभनपदार्थान्वयसम्भवादिति निरस्तम्। तत्र स्वामिविशेषणस्य गोरप्रदानत्वात्। ननु प्रकृतसमा-साद्यप्रविष्टपदार्थानन्विताप्रधानस्वार्थतात्पर्यकत्वस्य सापेक्षत्वरूपत्वे कथं चैत्रस्य दासभार्या, शरैः शातितपत्रो वृक्ष, इत्यादि प्रयोगः दासत्वशातनादिरूपाप्रदानस्वार्थस्य तथाथ चैत्रीयत्वशरकरणकत्व-रूपपदार्थान्वयेन दासशातितादिपदस्य विभक्त्यन्तचैत्रशरादिपदसापेक्षतया समासासाधुत्वाप्रसक्तेः। अभेदेनेतरान्वयस्य सापेक्षताघटकत्वे चैत्रसम्वन्धान्वय विवक्षया चैत्रस्य गोरूपमित्यादिप्रयोगा-पत्तेः। एवं चैत्रस्य सख्युर्धनमित्यर्थे चैत्रसखिधनमित्यादि समासो नस्यात्। पदत्रयतत्पुरुषाभावेन सख्युर्धनं सखिधनमिति समासानन्तरं चैत्रस्य सखिधनं चैत्रसखिधनमिति समासस्यादरणीयत्वात्। तथासति चैत्रसम्वन्धिन एव प्रकृतसमासानिविष्टचैत्रपदलक्ष्यार्थस्याभेदेन सखिपदार्थान्वयात्। चैत्रस्य सखाचैत्रसखा तस्य धनमिति समासादरे च सखिपदोत्तरं समासान्ततत्प्रत्ययप्रसङ्गेन चैत्रसखिधनमि-त्येव प्रयोगः स्यात्। एतेन कारकप्रतियोगिपदातिरिक्तपदसापेक्षपदेनैवनसमासः तदुक्तम् "प्रतियोगि-पदादन्यद्यदन्यत्कारकादपि। वृत्तिशब्दैकदेशेन नतस्यान्वय इष्यते"। इति "कारकप्रतियोगिभ्यां यदि चान्यदपेक्षते। सापेक्षत्वादसमामर्थ्याद्वृत्तिस्तत्रतु नेष्यते"। इति च । तैत्रस्य दासभार्या इत्यादौ दासत्वं न प्रतियोगिकमिति चैत्रादिपदस्य समासपदर्तर्थस्त्प्रतियोगिबोधकतयाशरैः शातितपद इत्यादौ शातनादिक्रियायां शरादिः कारकमिति सरादिपदस्य समासस्थपदार्थक्रियाकारकवोधकतया च समासः साधुरिति निरस्तम्। चौत्र सखिधनमित्यादौ चात्रसम्वन्ध्यर्थकचौत्रादिपदस्य प्रतियोगि-पदत्वाभावात् चैत्रादिसम्वन्धिनः सखित्वाद्यप्रतियोगित्वात्। मैवम्। यत्र हि विशेष्यरूपे समस्यमान-पदार्थे इतरान्वयविवक्षा तत्र नसमासः। यत्र च तादृशपदार्थतावच्छेदके एवतदन्वयस्तत्र भवत्येव। चैत्रस्य दासभार्या इत्यादौ दासत्वे एव चैत्रादिसम्वन्धान्वयः न तु दासपदार्थदासे। शरैः शातितपत्र इत्यादौ शातने शरकरमकत्वान्वयः नतुशातितपदार्थे शातनकर्मण्यतोभवत्येव समासः। चैत्रसखि-धनमित्यादावपि सखित्वे एव चैत्रसम्वन्ध्यन्वयः न तु सखिपदार्थे सख्याविति नानुपपत्तिः। न चैवं दासत्वादौ प्रमेयपदार्थान्वयविवक्षायां प्रमेयस्य दासभार्या इत्यपि प्रयोगः स्यात्। प्रमेयो दास इत्यादावपि दसत्वादावभेदेन प्रमेयाद्यभेदान्वयाभावेन तत्राभेदे नान्वयस्याव्युत्पन्नत्वात्। षष्ठ्याद्युप-स्थितप्रतियोगित्वस्य लक्षणया नामोपस्थाप्यतत्प्रतियोगिकस्य च भेदाभेदसम्वन्धाभ्यां न सम्वन्धिक-

In Public domain. Digitization Muthulakshmi Research Academy

तेन सह द्वन्द्व इति चेत्। सत्यम्। विभक्त्यन्तत्वमत्र शाब्दबोधौपयिकविभक्तिप्रकृतित्वं, पर्वतो वह्निमानित्यादिप्रतिज्ञास्थपर्वतादिपदोत्तरसुब्विभक्तेरर्थविशेषपरताविरहेऽप्यभेदान्वयबोधोपयोग्याकाङ्क्षानिर्वाहकसमानविभक्तिकतासम्पादकत्वेन शाब्दबोधोपयोगिता न तु निपातोत्तरविभक्तेरिति नातिव्याप्तिः। अघटादिशब्देन यत्र प्रतिज्ञायां घटभिन्नादिरूपपक्षनिर्देशः तत्र नञादेर्निरुक्तविभक्त्यन्तताविरहेऽपि विशेष्यीभूतविशिष्टपक्षबोधकाघटादिपदस्य तादृशविभक्त्यन्तत्वाल्लक्षणसमन्वयः। यत्तु यादृशपदोत्तरं कदाचिद्विभक्तेः श्रवणं तदेव विभक्त्यन्तपदेन विवक्षितम्। दध्यादिपदोत्तरं प्रथमैकवचनाश्रुतावपि द्विवचनादिश्रुतेर्दधि द्रव्यमित्यादिप्रतिज्ञासङ्ग्रह इति तन्न। पक्षवाचकस्वरादिपदघटितप्रतिज्ञायामव्याप्तेः।

---

दासत्वादावन्वयोप्युत्पत्तिसिद्ध एव चैत्रस्य दासश्चैत्रदास इत्यादौ तादृशबोधोदयात् अतः चैत्रस्य दासभार्या इत्यादिसमासनिर्वाहः। पितुः स्वर्गकामायेत्यादौ तु स्वर्गपदार्थस्वर्गादौ न पित्रादिसम्बन्धन्वयः किन्तु कामनायामेव स्वर्गभागित्वेन विषयताविशेषणस्य पित्रादिसम्बन्धस्यान्वयः। अत एव पितरि स्वर्गबाधेऽपि न तादृशवाक्यस्यायोग्यता। न चैवमपि कामनाबोधकपदस्य सापेक्षतया समासो नस्यात् तत्पदस्य प्रदानार्थकत्वेऽपि प्रधानार्थकपदस्याप्रधानार्थे इतरान्वय सापेक्षत्वात्। अन्यथा शोभनः चित्रगुरित्यत्रापि गवादौ शोभनान्वयविवक्षायां समासापत्तेरिति वाच्यम्। क्रियाभिन्नप्रदानार्थकपदोपस्थाप्यैकदेशे इतरान्वयेनैव प्रधानार्थकपदस्य सापेक्षताया असामर्थ्यप्रयोजकत्वोपगमात्। प्रकृते कामनायाः क्रियात्वेनानुपपत्त्यभावात्। एवं चैत्रस्य प्रकृतोपकारकोऽयमित्यादावप्यूह्यम्। क्रियाभिन्नत्ववत् सप्रतियोगिकान्यत्वमपि विशेषणं देयम्। तेन चैत्रस्य स्वपुत्रोऽयमित्यादौ पुत्रत्वादौ चैत्रसम्बन्धानुयोगित्वेऽपि न समासानुपपत्तिः। न चैवं चैत्रस्य दुष्टपुत्रो मैत्र इत्यादिरपि प्रयोगः स्यात्। इष्टत्वादिति दिक्। *शाब्दबोधौपयिकेति* केचित्तु विभक्त्यन्तत्वं विभक्त्यर्थान्वयित्वं दधिप्रमेयमित्यादौ च तद्दधीत्यादावलुप्तविभक्त्या एकत्वं प्रत्याय्यते इति नाव्याप्तिः। न तूत्तरविभक्तेश्चार्थाविवक्षया न तस्मान्नेतराणीत्यादावतिव्याप्तिः। निपातसमभिव्याहृतविभक्तेस्तदर्थान्वितस्वार्थबोधस्य केनाप्यनङ्गाकारादिति प्राहुः। *स्वरादीति* स्वो रमणीयमित्यादौ। अत्र वदन्ति। एतल्लक्षणेन्त्यपदवत्त्वं व्यर्थमेव। तथाहि। स्वीयानन्त्यपदेत्यस्यान्त्यपदभिन्नपदेत्यर्थः। तत्रानन्त्यत्वं स्वघटकपदप्रागभावसमानकालीन-विभक्त्यन्तार्थविशेष्यकान्वयबोधजनकत्वं तादृशान्वयबोधजनकयादृसमुदायात्मकं यत्स्वन्तदन्यत्वं वा समुदायार्थः। धूमादित्यादौ च स्वघटकपञ्चमीविभक्तिप्रागभावकालीनविभक्तेरप्रसिद्ध्या नातिव्याप्तिः। उपनयनिगमनयोश्च स्वघटकपदप्रागभावकालीनपदमिदं पदोत्तरमतुप्पदोत्तराज्विभक्तिः

In Public domain. Digitization: Mahalakshmi Research Academy

∗∗निगमनवारणायेति∗∗ इतरान्वितस्वार्थबोधकन्यायावयवत्वमात्रनिवेशे उपनयार्थान्वितस्वार्थबोधकतया निगमनातिव्याप्तिस्यात्तद्वारणायेत्यर्थः। यद्यपीतरान्वितस्वार्थबोधकत्वं निगमनस्येव प्रतिज्ञोपनययोरपि। तथापि विशेषणतया अन्वितत्वनिवेशनेन तद्वारण-सम्भवान्निगमनमात्रकथनम्। यद्यपि निगमनसमुदायार्थः पक्ष एवान्वेतीति साध्यान्वितस्वार्थ-बोधकत्वं निवेश्यापि प्रायशो निगमनवारणसम्भवः। तथापि यत्र साध्यस्य प्रमेयत्वगोत्वाभावादेरेव पक्षता तत्रत्यनिगमनेऽतिव्याप्तिवारणाय पक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितत्वनिवेशनम्। पक्षान्वितस्वार्थबोधकत्वञ्च पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितस्वार्थविषयताप्रयोजकत्वम्। यथाश्रुते उपनयस्थपक्षवाचकेदं पदस्य वस्तुगत्या अभेदेन पक्षसंस्पृष्टो यः पक्षस्तम्बोधकत्वेन, पाषाणमयः पर्वत इत्यादिवाक्यात्, पाषाणमयत्वादिरूपेण पक्षतावच्छेदकावच्छिन्नपक्षसंस्पष्टतया प्रतीयमानो यः पक्षतावच्छेदकावच्छिन्नस्तद्बोधकत्वेन च, तदुपस्थापितार्थान्वितस्वार्थबोधके निगमनेऽतिव्याप्तेरवारणात्। तादृशपदोपस्थापितार्थान्वितस्वार्थबोधकत्वञ्च तादृशपदप्रयोज्यविषयतानिरूपितस्वप्रयोज्यस्वार्थविषयताकत्वम्। यथाश्रुते निगमनार्थान्वयिन एव पक्षतावच्छेदकावच्छिन्नस्य पर्वतो नीलपर्वत इत्यादिवाक्यस्थपक्षतावच्छेदकावच्छिन्नादिविषयतानिरूपितविषयताप्रयोजकनीलपर्वतपदोपस्थाप्यत्वेन निगमनातिव्याप्तेर्दुर्वारत्वात्। पक्षतावच्छेदकावच्छिन्नविषयतानिरूपिता या विषयता तन्निरूपि-तविषयताप्रयोजकत्वं फलितार्थः। पक्षतावच्छेदकावच्छिन्नत्वानिवेशे व्याप्यवत्त्वावच्छिन्ना या पक्षविषयता तन्निरूपितोपनयस्थेदं पदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वमादाय निगमन एवातिव्याप्तिस्स्यादिति तन्निवेशः।

---

तदन्तार्थविशेष्यकान्वयबोधजनकत्वादेव नातिव्याप्तिरिति। एतेन स्वघटकविभक्त्युत्तरविभक्त्यघटितं यत्स्वन्तदन्यत्वमप्यनादेयमेवेति। वस्तुतस्तु। स्वघटकपदप्रतियोगितयावध्वंसाधिकरणोत्पन्नध्वंसप्रतियोगित्वं प्रागभावाघटितमन्त्यत्वम्। यत्किञ्चिदेकध्वंसान्यस्वघटकयावध्वंससमानकालीनत्वं तदित्यन्ये। पक्षसंस्पृष्टत्वेन प्रतीयमान इत्युक्तावप्याह। ∗पाषाणमय इति∗ ∗वाक्यात्∗ उदासीनात्। पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितस्वार्थविषयताप्रयोजकप्रयोज्यविषयतात्वेनोपादानस्य शिरोवेष्टनन्यायग्रस्तत्वादाह। ∗पक्षतेति∗ ननु स्वार्थैकदेशस्य स्वार्थकत्वाभिमानमूलातिव्याप्तिशङ्कया प्रमेयत्वमित्यादिग्रन्थो नावतरणीयः। किन्तु चरमविषयतायाः विषयतात्वेन प्रवेशाभिमानमूलाति-

In Public domain. Digitization Muthulakshmi Research Academy

अथ तन्निवेशेऽपि पक्षतावच्छेदकावच्छिन्ना या उपनयस्थेदं पदप्रयोज्यविषयता तन्निरूपितनिगमनार्थविषयतानिरूपिता उपनयार्थस्य विशेष्यतैवेत्युपनयेऽतिव्याप्तिः। न च चरमविषयता प्रकारकत्वरूपा विवक्षणीया अतो नायमतिव्याप्तिप्रसङ्ग इति वाच्यम्। एवं सति प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र पक्षान्वितपञ्चम्यर्थे विशेष्यतयान्वितं साध्यरूपार्थमादाय प्रतिज्ञातिप्रसङ्गाप्रसक्तेः प्रमेयत्वमभिधेयमित्याद्यग्रिमग्रन्थानुत्थानात्। एवं प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र प्रतिज्ञातिव्याप्तेरेकदेशार्थविषयताव्यावृत्तस्वार्थविषयतानिवेशनेन वारणेऽपि तत्रत्यनिगमनेऽभिधेयत्वव्याप्यप्रमेयत्ववांश्चायमित्युपनयार्थप्रमेयत्वत्व[64]रूपपक्षतावच्छेदकरूपहेतुतावच्छेदकावच्छिन्नान्विततादृशपक्षतावच्छेदकावच्छिन्ने स्वार्थान्वयबोधजनकेऽतिप्रसङ्गो दुर्वारः। पक्षतावच्छेदकावच्छिन्नेत्यत्र विशेषणतयान्विततत्वनिवेशे प्रमेयत्वमित्याद्यग्रिम-ग्रन्थानुत्थितेः पञ्चम्यर्थहेतुत्वस्य विशेष्यतयैव पक्षान्वयित्वेन प्रतिज्ञातिव्याप्त्यप्रसक्तेः। विशेषणतया किञ्चिदन्विततत्वनिवेशेनैवोपपत्तेः प्रकृतपक्षनिवेशवैयर्थ्यापाताश्च। निगमनार्थ-विशेषणतया किञ्चिदन्वितेऽनन्वयेनात्रातिव्यप्तेस्तमनिवेश्यापि वारणसम्भवात्। मैवम्। शुद्धपक्षतावच्छेदकावच्छिन्नान्विततत्वं निवेश्य दर्शितातिप्रसङ्गवारणसम्भवात्। उपनयार्थ-व्याप्यविशिष्टपक्षान्वयिनो निगमनार्थस्य शुद्धपक्षतावच्छेदकावच्छिन्नानन्विततत्वेन तदन्वितार्थ-केऽप्युपनये शुद्धपक्षतावच्छेदकावच्छिन्नान्वितार्थकपदोपस्थापितार्थान्वितार्थकत्वविरहात् प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र व्याप्तिविशिष्टप्रमेयत्वत्व[65]रूपपक्षतावच्छेदकावच्छिन्न एव इदमर्थान्वयेन तदन्वितार्थकतया निगमने निरुक्तरूपविरहात्। एतेन पक्षसाध्ययोरभेदस्थले निगमनार्थघटकसाध्यरूपपक्षान्वितेदं पदार्थान्वितार्थकतया निगमनातिव्याप्तेरपि नावकाशः।

---

व्याप्तिशङ्कैव तथा सति प्रकारतारूपत्वविवक्षयातदुद्धारसम्भवादित्यत आह। *एवमिति* ननु द्वितीय-विषयतायाः प्रकारतारूपत्वाभिधाने नायमतिप्रसङ्ग इत्यत आह। *पक्षतावच्छेदकेति* *विशेषण-तयेति* यत्किञ्चिद्विषयतानिरूपितप्रकारतानिरूपितेत्यर्थः। *निगमनार्थस्येति* उपनयस्थेदं पदार्थेन प्रकारतेति भावः। *पक्षसाध्ययोरिति* प्रमेयत्वं प्रमेयभिधेयत्वाद्गोत्वाभावो गोत्वाभाववान् सास्ना-भावादित्यादौ। न च पक्षतावच्छेकावच्छिन्नविषयतानिरूपितविषयतात्वेन तन्निरूपितविषयता-प्रयोजकत्वनिवेशादेव निर्वाहाच्छुद्धत्वं व्यर्थमिति वाच्यम्। अभिदेयत्वव्याप्यप्रमेयत्ववांश्चायमित्युपन-

---

64. प्रमेयत्वेति पाठान्तरम् 65. प्रमेयत्वेति पाठान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

यत्तु एकविशेषणतापन्नस्य यत्रापरविशेष्यता तत्र विशेष्यत्वविशेषणत्वरूप-विषयतयोर्भेदेन पक्षविषयतानिरूपितविषयतानिरूपितस्वार्थविषयतानिवेशे हेतुमात्र एव लक्षणानुपपत्तिः पक्षविषयतानिरूपितसाध्यीयप्रकारतारूपविषयतया हेत्वर्थप्रकारताया निरूप्यनिरूपकभावविरहादतः पक्षविषयतानिरूपितविषयत्वावच्छिन्नविषयतानिरूपितस्वर्थ-विषयतयैव निवेशनीया एवं चोक्तरीत्या उपनयातिव्याप्तेर्नावकाशः। पक्षविषयतानिरूपित-निगमनार्थनिष्ठप्रकारतानिरूपितविषयतायाः पक्षविषयतानिरूपकतन्निष्ठविषयताया अभेदेना-वच्छेद्यावच्छेदकभावविरहादेवं क्रमेण पक्षसाध्ययोरभेदस्थले निगमनातिव्याप्तेरपि नावतारः, एवं हेतुपक्षयोरभेदस्थले निगमनातिव्याप्तिरपि समाहिता, हेतुप्रकारतानिरूपिताया निगमनार्थ -प्रकारतानिरूपितायाश्चेदमर्थनिष्ठविशेष्यतारूपविषयतायाश्चाभेदेनावच्छेद्यावच्छेदकभावविर-हादिति। तन्न। एकविशेषणतापन्नस्य यत्रापरविशेष्यता तत्र विशेष्यताप्रकारतयोरभेदे बाधक-विरहेण लाघवेन तस्यैवोपगमात् न त्ववच्छेद्यावच्छेदकभावापन्नविषयताद्वयस्य। यदि चैक-विशेषणतापन्नस्यापरविशेष्यतास्थले प्रकारताविशेष्यतयोरभेदे दण्डिपुरुषवानित्यादिबुद्धेः पुरुषादिनिष्ठप्रकारतानिरूपितदण्डादिनिष्ठविशेष्यताशालित्वं दुर्वारमिति तस्याः पुरुषो न वा दण्ड इत्यादिसंशयविरोधिताप्रसङ्ग इति तद्भेदस्समूहालम्बनविषयतावैलक्षण्याय तयोरवच्छे-द्यावच्छेदकाभाव एव च स्वीक्रियत इति मन्यते। तदा हेतुपक्षयोरभेदस्थले निगमनार्थधर्मिता-वच्छेदकहेतुप्रकारतानिरूपिताया निगमनार्थप्रकारतानिरूपितायाश्च विशिष्टहेतुत्वावच्छिन्नाया

---

यार्थघटकप्रमेयत्वरूपपक्षतावच्छेदकात्मकहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितेदं पदार्थविषता-त्वेन तन्निरूपितस्वार्थविषयताप्रयोजके निगमनेऽतिव्याप्तेः शुद्धत्वस्यावश्यकत्वात्। शुद्धत्वनिवेश-वैय्यर्थ्यवादिमतमुपन्यस्यति। *यत्त्विति* *बाधकविरहेणेति* न च दण्डिपुरुषवानिति बुद्धेः पुरुषादि -निष्ठप्रकारतानिरूपितदण्डादिनिष्ठविशेष्यताशालित्वेन दण्डः पुरुषो न वेति संशयप्रतिबन्धकत्वापत्तिः दण्डः पुरुषाभाववानिति बाधबुद्धिप्रतिबध्यत्वापत्तिश्चेति वाच्यम्। दण्डत्वावच्छिन्नविशेष्यतात्वेन पुरुष -त्वावच्छिन्नप्रकारतात्वेन निरूप्यनिरूपकभावानुपगमात्। दण्डवान् पुरुषवांश्च देश इति समूहा-लम्बनाभेदवारणाय तयोरभेदोपगमः। विषयतयोरभेदमते शुद्धत्वनिवेशावश्यकत्वं प्रदर्श्य तयोरवच्छे-द्यावच्छेदकभावमते तन्निवेशायाह। *यदि चेति* *हेतुपक्षयोरिति* प्रमेयत्वमभिधेयं प्रमेयत्वादि-त्यादावभिधेयत्वव्याप्यप्रमेयत्ववांश्चायं तस्मादभिधेयत्ववानिति बोधेऽभेदविद्वेषिभिरवच्छेदकत्वान्य-

In Public domain. Digitization Muthulakshmi Research Academy

इदं पदार्थपक्षविशेष्यताया ऐक्ये हेतोर्हेतुधर्मितावच्छेदकतापत्तिरिति तत्रावच्छेद्यावच्छेदक-भावापन्नविषयताद्वयस्य स्वीकरणीयतया तत्रातिव्याप्तेर्दुर्वारत्वात्।

स्वार्थैकदेशस्यापि स्वार्थत्वाभिमानमूलां प्रतिज्ञाविशेषातिव्याप्तिशङ्कां स्वार्थपदस्य स्वप्रतिपाद्यत्वपर्याप्त्यधिकरणविशिष्टार्थपरतां स्पष्टयन्निराकरोति। **प्रमेयत्वमिति** **प्रतिज्ञार्थः** साध्यविशिष्टपक्षरूपः। **एकदेशार्थः** साध्यमात्रम्। यद्यपि प्रमेय-त्वमभिधेयं प्रमेयत्वादित्यादिन्यायान्तर्गतनिगमने हेतुभूतपक्षान्वितस्वार्थबोधकेदं पदोपस्था-पितपक्षान्वितस्वार्थबोधकत्वं निगमनेऽक्षतमिति विशेषणतया पक्षान्वितत्वं विवक्षणीयमिति कथितस्थले पञ्चम्यर्थः पक्षे न विशेषणमित्यतोऽपि नोक्तप्रतिज्ञायामतिव्याप्तिसम्भवः। तथापि निगमनार्थैकदेशस्य ज्ञाप्यत्वान्तभागस्य तादृशार्थान्विततया निगमनेऽप्यतिप्रसङ्गवारणाय स्वार्थपदस्य स्वप्रतिपाद्यविशिष्टार्थपरताया आवश्यकत्वात् कथितस्थले पञ्चम्यर्थान्वितस्वार्थ-बोधकत्वाभावेनाप्यतिव्याप्तिवारणसम्भवात्तत्कथनम्। केवलेन हेतुवाक्येन पञ्चम्यर्थविशेष्यका -वान्तरवाक्यार्थबोधो जन्यते ततश्च प्रतिज्ञास्थवह्न्यादिपदसहकारेण धूमाज्ञानज्ञाप्यो वह्निरि-त्याकारकस्वार्थविशिष्टबोधो[66] जन्यते, ततस्समुदितप्रतिज्ञासहकारेण पक्षे स्वार्थविशिष्टसाध्य-वैशिष्ट्यबोधश्च, प्रत्येकमेतादृशबोधत्रयजनकताघटितलक्षणत्रयमाह। **स्वार्थेति** प्रथमं तृतीयबोधघटितं द्वितीयं प्रथमबोधघटितं तृतीयं च द्वितीयबोधघटितं बोध्यम्। (तथा च तल्लक्षणत्रयस्य स्वत्वगर्भतया तादृशबोधविशेषणतया स्वत्त्वं प्रविष्टं तादृशबोधमादाय

---

प्रकारतादिस्वीकारेण तत्परिहारासङ्गतेरिति। यद्यपि तत्र तादृशविशेष्यतयोस्सद्भावमात्रेण स्वस्य स्व-धर्मितावच्छेदकत्वापत्तिस्सुवारा। तथापि अवच्छेद्यावच्छेदकभावापन्नसमानाधिकरणविशेष्यताद्वय-सत्त्वे तथाविध प्रकारताविशेष्यतयोः नावच्छेद्यावच्छेदकभावस्सिध्येत अनियमादिति विशेष्यतयोः अप्यवच्छेदकभावोऽङ्गीकृतः। एवञ्च शुद्धत्वनिवेश आवश्यक इति भावः। **स्वार्थपदस्य** द्वितीयस्य। **निगमने** तस्मादभिधेयत्ववानित्याकारके। **तादृशार्थेति** उपनयार्थपक्षे विशेषणतयान्वितसार्थ-रूपार्थेत्यर्थः। अपिकारश्च प्रकृतातिव्याप्तिवारणे उभयोरन्यतरस्यैवोपयोगलाभार्थः। वस्तुत उपनयाति -व्याप्तिवारणाय शुद्धपक्षतावच्छेदकावच्छिन्नेत्युपादानावश्यकत्वादुक्तनिगमनेतिव्याप्तिरेव नास्तीति विशेषणतया पक्षान्वितत्वं न निवेश्यम्। **पञ्चम्यर्थेति** धूमज्ञानज्ञाप्यत्वमिति बोधः। **लक्षण-**

---

66. स्वार्थनिष्ठबोधो जन्यते इति पाठान्तरम्

लक्षणानि सम्भवन्तीति भावः।)

**विशिष्टवैशिष्ट्येति** स्वतात्पर्यविषयबोधीयविशेषणतावच्छेदकस्वार्थबोधजनकन्यायावयवत्वमित्यर्थः। तेन निगमनार्थान्वितोपनयार्थबोधस्यापि निगमनार्थैकदेशविशिष्टवैशिष्ट्यबोधतया निगमनार्थबोधस्य तज्जनकत्वेन यथाश्रुतलक्षणस्य निगमनेऽतिव्याप्तिः इति दूषणं प्रत्युक्तम्। विशेषणतावच्छेदकताया अव्यावर्तकत्वात्स्वतात्पर्यविषयबोधीयत्वं तद्विशेषणम्। **विशिष्टवैशिष्ट्यबोधेति** स्वतात्पर्यविषयबोधजनकतावच्छेदकस्वार्थप्रकारताशालिबोधजनकन्यायावयवत्वमित्यर्थः। तेन निगमनार्थविशिष्टोपनयार्थज्ञानस्य निगमनार्थविषयकत्वेन तादृशज्ञानजननस्वरूपयोग्यत्वेऽपि न निगमनेऽतिव्याप्तिः। लक्षणत्रयमेव हेतौ सङ्गमयन् अवयवान्तराद्यावर्तयति। **एकवाक्यतयैत्यादिना** **इतरोपस्थापितेति** स्वाघटकपदोपस्थापितेत्यर्थः। स्वार्थत्वं स्वजन्यप्रतिपत्तिविशेष्यत्वमतो निगमनजन्यप्रतिपत्तिविशेष्ये मतुबाद्यर्थे तद्घटकपदोपस्थापितसाध्यविशेषणकबोधजनकस्य निगमनस्य वारणायोपस्थापितान्तम्। अत्र प्रथमलक्षणे इतरार्थप्रकारकस्वार्थविषयताकत्वेन द्वितीये च स्वार्थांशे इतरप्रकारकत्वेन बोधस्य निवेशाद्भेदः। **अवयवार्थेति** अवयवजन्यप्रतिपत्तिविशेष्यकस्वार्थप्रकारकबोधजनकावयवत्वमर्थः। सर्वेषामेव वाक्यानां (अवयवानां) स्वार्थघटकविशेष्यांशे स्वार्थघटकार्थान्तरप्रकारकबोधजनकतया तत्रातिव्याप्तिवारणाय स्वार्थप्रकारेति प्रतिज्ञार्थघटकसाध्यरूपविशेषणे हेत्वर्थस्यान्वयेऽपि विशेष्ये पक्षे

---

**त्रयमिति** प्रथमलक्षणं तृतीयबोधघटितं द्वितीयं प्रथमबोधघटितं तृतीयञ्च द्वितीयबोधघटितम्। क्वचित् तथैव पाठः। **स्वतात्पर्येति** स्वं हेत्ववयवः। **स्वार्थबोधः** स्वार्थमुख्यविशेष्यकबोधः। **अव्यावर्तकत्वात्** सर्वावयवार्थसाधारण्यात् स्वार्थविशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानविधया ननायवार्थज्ञानस्य हेतुत्वादतिव्याप्तिरतः स्वतात्पर्येति। **अवयवजन्येति** न च गोत्वाभावोगोत्वाभावोगोत्वाभाववत्वादित्यादौ तादात्म्येन साध्येऽवयवप्रयोज्यविशेष्यतावच्छेदकावच्छिन्नत्वपर्यन्तोपादानेऽपि हेत्वर्थविशिष्टसाध्यविशेष्यकबोधमादाय हेतावतिव्याप्तिः। घटो घट इतिवत्तादृशप्रतिज्ञाया एवासत्त्वात्। अननुषङ्गपक्षेऽवयवप्रयोज्यमुख्यविशेष्यतानिरूपितस्वार्थप्रकारताया उपादानाद्वा। अवयवघटकपदप्रयोज्यत्वं निवेश्यानुषङ्गपक्षसङ्ग्रहे तु धूमाद्वह्निरिति बोधमादाय हेतावतिव्याप्तेः इति। **स्वार्थप्रकारकेति** अन्यूनातिरिक्तविषयकबोधजनकतावच्छेदकविषयताघटितलक्षणेऽनतिरिक्त

In Public domain. Digitization Muthulakshmi Research Academy


तदनन्वयात् प्रतिज्ञायां नोपनयलक्षणातिव्याप्तिः। न वा हेतौ निगमनलक्षणातिव्याप्तिः। उपनयलक्षणे स्वार्थपदस्य निगमनलक्षणे चावयवार्थपदस्य विशेष्यपरत्वादित्याह। **हेत्वर्थ-श्चेत्यादिना** **उक्तप्रायमिति** पूर्वं हेत्वर्थैकदेशे पञ्चम्यर्थस्यैकदेशार्थमात्रान्वयित्वम् उक्तम्। अत्र च हेतुसमुदायार्थस्य तथात्वमिति विशेषात्प्रायमिति।

इति गदाधरीये दीधितिकृत्प्रतिज्ञादिलक्षणानि।

-पदप्रयोजनदासायानुषङ्गपक्षोपन्यासेऽपि तदप्रामाणिकत्वमेव। तत्प्रामाणिकत्वेऽपि निगमनत्वमयं पदान्तर्भावेणैव, तथैव व्यवहारात्। जनकतावच्छेदकविषयिताघटितलक्षणेत्वनायत्याऽयं पदान्त-र्भावेण तथात्वमिति बोध्यम्।

इति कृष्णम्भट्टीये दीधितिकृत्प्रतिज्ञादिलक्षणानि

मूले। *हेतुविभक्तीति* प्रकृत्यर्थे हेतुविभक्त्यर्थान्वयो न स्यात् धूमादिनिष्ठजनकत्वाप्रसिद्धेः इति भावः। युक्त्यन्तरमाह। *तथैवेति* धूमादिज्ञाननिष्ठजनकताबोधनस्यैव कुतो वह्निमानिति जिज्ञासानिवर्तकत्वादित्यर्थः। कस्यचिल्लक्षणमाह। *अनुमितीति* वृत्त्यन्तमव्याप्तिशङ्काया अवृत्त्यन्त-मतिव्याप्तिशङ्कायाश्च वारणार्थम्। तत्र न्यायार्थज्ञानस्य महावाक्यार्थबोधरूपस्यान्यादृशस्य चोपन-यार्थविषयकत्वेन परामर्शत्वेनानुमितिकारणत्वमित्यभिमानेन कारणान्तमुपात्तमित्यभिप्रेत्य दूषयति। *जातिं विनेति* परामर्शत्वं न जातिर्नानाभावात् जातित्वेऽपि महावाक्यार्थबोधे तदनुपगमात्। अन्यरूपेण च न कारणत्वं मानाभावादित्यनुमितिकारणत्वं न्यायार्थबोधेनास्तीत्यसम्भव इत्यर्थः। नन्वेवं कारणान्तं परित्यज्यतां तथापि शेषस्य लक्षणत्वसम्भवादित्यत आह। *वाक्येति* *जन्यता इति* धूमादित्युदासीनवाक्यजन्यबोधव्यावृत्तजन्यतावच्छेदकं विनेत्यर्थः। *दुर्ग्रहात्* उदासीनतद्वा-क्यातिव्याप्त्यवारकत्वात्। तत्साधारण्यास्तु तस्याः मानाभावेन प्रागेव निराकरणादिति भावः। सामान्यलक्षणमुक्त्वा विशेषलक्षणमाह। *अन्वयेति* व्यतिरेकव्याप्तिविषयताशून्यो य इतरान्वित-स्वार्थबोधस्तज्जनकः तदुपस्थापकजिज्ञासाजनकबोधजनकन्यायावयवत्वमर्थः। हेतुविभक्तिमत्त्वं स्वरूपकीर्तनम्। *व्यतिरेकेति* अन्वयव्याप्त्यविषयकेतरानन्वितस्वार्थबोधजनकत्वमर्थः। *अन्वये-ति* इतरानन्वितौ यावन्वयव्यतिरेकव्याप्तिघटितस्वार्थौ तदुभयबोधजनककाङ्क्षोत्थापककाङ्क्षाजनक-बोधजनकत्वे सति न्यायावयवत्वमर्थः। वस्तुतस्तूदाहरणस्यैव व्याप्तिमात्रबोधकत्वेनोक्तलक्षणस्या-सम्भवग्रस्तत्वात् प्राग्लिङ्गत्रैविध्याभिधानात्तदनुरोधेन हेत्ववयवत्रयं लक्षयति। *यद्वेति* प्रकृतहेतु-विशिष्टहेतुत्वविषयताबहिर्भूतसाध्यविषयताशून्यशाब्दज्ञानजनकत्वे सति प्रकृतसाध्यान्वयबोधन-

In Public domain. Digitization Muthulakshmi Research Academy

क्षमार्थोपस्थितिजनकविभक्तिमन्न्यायावयवत्वादिरूपहेतुत्वं हेतुवचनार्थः। सपक्षवृत्तित्वं साध्यसामानाधिकरण्यं विवक्षव्यावृत्तत्वं साध्याभाववदवृत्तित्वम्। आभ्यां व्यतिरेकिसाध्यसामानाधिकरण्येन लिङ्गज्ञानकालीनत्वं तद्घटकशाब्दबोधविशेषणं विवक्षितम्। शेषवैय्यर्थ्यात् एतदेवागृहीतस्वसामानाधिकरण्यकव्यतिरेकिसाध्यकशाब्दबोधघटितं केवलव्यतिरेकिहेतुलक्षणम्। एतन्मते व्यतिरेकिसाध्यक एव अन्वयसहचारग्रहाग्रहाभ्यामन्वयव्यतिरेकित्वकेवलव्यतिरेकित्वव्यवहारात्। केवलान्वयि हेतुलक्षणमाह। *अत्यन्ताभावेति* तादृशसाध्यसमानाधिकरणत्वेन लिङ्गज्ञानकालीनत्वं तद्घटकशाब्दबोधविशेषणं शेषवैय्यर्थ्यात्। वस्तुतस्तु स्वार्थविशिष्टगृहीतान्वयव्यतिरेकिसाध्यवैशिष्ट्यावगाहिशाब्दज्ञानजनकत्वमन्वयव्यतिरिकिहेतुत्वम्। स्वार्थविशिष्टागृहीतान्वयव्यतिरेकिसाध्यवैशिष्ट्यावगाहित्वघटितं व्यतिरेकिहेतुत्वं स्वार्थविशिष्टात्यन्ताभावाप्रतियोगिसाध्यवैशिष्ट्यावगाहित्वघटितमन्वयहेतुत्वं शेषं मूलो स्वरूपकीर्तनम्। व्याप्तिग्राहकसहचारभेद एव हेत्ववयवभेदकः। व्यतिरेकव्याप्त्यभावादिति मतम् अनुरुध्यविशेषलक्षणत्रयमाह। *यद्वेति* कारणान्तं न्यायावयवत्वार्थकम्। साध्यविषयकत्वं प्रकृतहेतुविशिष्टहेतुत्वविषयताबहिर्भावेण। हेतुविभक्तिमत्त्वं प्रकृतसाध्यान्वयबोधनक्षमार्थोपस्थितिजनकहेतुविभक्तिमत्वं हेतुपदं सम्पातायातम्। अवयवान्तरोपस्थापितार्थान्वितस्वार्थबोधकविभक्तिमत्त्वं वा, सर्वत्र प्रयोजनं पूर्ववत्, प्रतीतसाध्यान्वयसाधनत्वञ्च व्याप्तिग्राहकज्ञानविषयसहचारत्वव्यापकप्रकृतव्याप्तिघटकसहचारत्वकत्वं स्वनिष्ठप्रकृतसाध्यविधेयताप्रयोजकप्रकृतव्याप्तिविषयताप्रयोजकसहचारविषयतात्वव्यापकप्रकृतव्याप्तिघटकसहचारविषयतात्वकानुमितिकरणत्वमिति यावत्। तद्वाचकत्वं न विशेषणं, ज्ञानानुमानमते बाधात्, किन्तु तथाविधकरणज्ञानविषयप्रकृतहेतुतावच्छेदकावच्छिन्नविषयताकत्वं प्रकृतसाध्यविषयतानिरूपितविषयताविशेषणम्। *अप्रतीतेति* स्वनिष्ठप्रकृतसाध्याविधेयताप्रयोजकप्रकृतव्याप्तिविषयताप्रयोजकसहचारविषयतात्वव्यापकप्रकृतव्याप्यघटकव्यतिरेकसहचारविषयतात्वकानुमितिकरणज्ञानविषयप्रकृतहेतुविषयतानिरूपितत्वमर्थः। प्रकृतव्याप्तिघटकव्यतिरेकयोर्विकल्पेनोपादानम्। एतच्च तथाविधसहचारविषयतात्वव्यापकप्रकृतव्याप्तिघटकतदघटकसहचारविषयतात्वकानुमितिकरणज्ञानविषयप्रकृतहेतुविषयताकत्वरूपं विशेषणं प्रवेश्यान्वयव्यतिरेकिहेत्ववयवलक्षणं बोध्यम्। केचित्तु। *पक्षेति* ह्रदो द्रव्यं धूमादित्यादौ आभासीभूते हेत्ववयवे अतिव्याप्तेः पक्षवृत्तित्वनिवेशः। पृथिवीतरोभ्यो भिद्यते पृथिवीत्वादित्यादौ व्यतिरिकिणि तत्रातिव्याप्तेः सपक्षवृत्तित्वनिवेशः। सपक्षत्वं निश्चयगर्भम्। धूमवान् वह्नेरित्याद्याभासे इदं वाच्यं ज्ञेयत्वादित्यादौ केवलान्वयिनि चातिव्याप्तेर्विपक्षव्यावृत्तत्वनिवेशः। विपक्षत्वं निश्चयगर्भं तेन वह्निमान् धूमादित्यादौ पर्वतोवह्निरिति ज्ञानदशायां नाव्याप्तिः एतन्मते पूर्वोक्तकेवलान्वयिहेतुलक्षणं न सम्यक्। पर्वतो वह्निमान्

In Public domain. Digitization Muthulakshmi Research Academy



धूमादित्यन्वयव्यतिरेकिण्यतिव्याप्तेरतः केवलान्वयिहेतुलक्षणमाह। *अत्यन्तेति* एतन्मते केवलान्वयिसाध्यकः सर्वोऽपि लक्ष्यः आकाशाभावस्याभावो नास्तीत्याशये नेदम्। तेनाकाशाभावादिसाध्यकस्य नासङ्ग्रहः। प्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नत्वनिवेशान्नासम्भवः। अनवच्छेदकान्तोपादान्नान्वयव्यतिरेकिहेत्ववयवेऽतिव्याप्तिः। सर्वमभिधेयं प्रमेयत्वादित्यनुपसंहारिहेत्ववयव-वारणाय सपक्षवृत्तित्वनिवेशः। सपक्षत्वं निश्चयगर्भमतो न तद्दोषतादवस्थ्यम्। आचार्यमते दशाविशेषे वह्न्यादिसाध्यकधूमादेरन्वयितया तन्मतमनुवर्तमान आह। *यद्वेति* कारणान्तं न्यायावयवार्थकमुदासीनवाक्यवारणाय। धूमादालोकवानित्यादिप्रतिज्ञादिवारणाय जनकान्तम्। प्रकृतहेतुविशिष्टहेतुत्वविषयताबहिर्भावेन साध्याविषयकत्वनिवेशान्न पर्वतो वह्निमान् वह्निसामग्रीमत्त्वादित्यादौ अव्याप्तिः। व्यतिरेकिहेत्ववयववारणाय बोधकान्तम्। प्रतीतः साध्यान्वयः। साध्यसहचारमात्रं यत्र ईदृशं यत्साधनं तद्बोधकेत्यर्थः। प्रतीतान्वयसाध्येति पाठे व्यत्यासेन साध्यान्वयो बोध्यः। एतन्मते अन्वयव्यतिरेकिणि कदाचिद्व्याप्तियोगात्पूर्वोक्तव्यतिरेकिहेत्ववयवलक्षणातिव्याप्तिरतस्तल्लक्षणमाह। *एतदेवेति* प्रतीतोभयसहचारकत्वघटितमन्वयव्यतिरेकिलक्षणं द्रष्टव्यमित्याहुः। मीमांसकैस्तु "प्रतिज्ञादित्रिकं वापि यद्वोदाहरणादिकम्"। इति मतभेदेन लक्षणत्रयं प्रदर्श्य पक्षधर्मताया अप्रदर्शनात् प्रतिज्ञादित्रिकस्यालक्ष्यताद्व्यवयववादिभिरपि पक्षधर्मताप्रदर्शकान्तर्भावेणैव लक्ष्यतास्वीकारादित्याक्षेपं समाधातुं धूमादिति न हेतुः किन्तु धूमवत्त्वादित्येव तथा च हेतुसम्बन्धिनः प्रक्रान्तपदस्य लाभान्न दोष इत्यभिहितं तद्दूषयति। *कथायामिति* व्याप्तिपक्षधर्मतामात्रप्रदर्शकावयवद्वयादिबोधानामपि हेतुसाध्ययोर्ज्ञाप्यज्ञापकभावाप्रदर्शनेऽनाकाङ्क्षिततद्व्याप्तिप्रदर्शनासम्भवात्प्रतिज्ञाहेतूभयप्रदर्शनमावश्यकं, उपनयस्त्वग्रे व्यवस्थाप्यः। एवं पक्षे साध्यस्य प्रतिज्ञातोऽपगमेऽपि दोषविशेषजन्यबाधशङ्कानुच्छेदात्। निगमनप्रदर्शनमिति पञ्चानामवयवत्वसिद्धौ मतुप आधिक्यमित्यर्थः। अपार्थकविशेषोन्वयबोधाजनकः।

हेतुप्रयोगानन्तरमुदाहरणमेव नोपनय इत्यत्र विनिगमकमाह। *व्याप्तेः प्राथम्यादिति* न्यायार्थज्ञानानन्तरं मध्यस्थे परामर्शो जायते तत्र व्याप्तेः प्रकारतावच्छेदकत्वादित्यर्थः। अवच्छेदकाभिलापपूर्वकप्रकाराभिलापादिति भावः। यद्वा कथमस्य गमकत्वमिति जिज्ञासायाः गमकत्वौपयिकलिङ्गनिष्ठप्रकारविषयकत्वादित्यर्थः। *अनुमितीति* जनकान्तं न्यायावयवार्थकं तद्धर्मदर्शितावच्छेदकतद्धर्मव्यापकताविशिष्टवैशिष्ट्यावगाहिताप्रयोजकविषयताश्रयवीप्सावत्त्वं विशेष्यदलार्थः। यो यो धूमवान् स वह्निमानित्यादौ स्वघटकीभूतवीप्सासमभिव्याहृतसाध्यबोधकपदस्य हेतुव्यापकताविशिष्टसाध्ये लक्षणा यो यो न वह्निमान् स न धूमवानित्यादौ तु तथाविधहेत्वभावबोधकपदस्य साध्याभाव-

In Public domain. Digitization Muthulakshmi Research Academy

शब्दोऽनित्यः सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादिति हेतुप्रयोगे हेतुघटकदलयोः प्रत्येकं व्यभिचारितया भेदेन नामार्थयोस्तयोरेकांशे अपरस्य विशेषणतयाऽनन्वयेन च विशिष्टहेतुत्वान्वयासम्भवेन विशेष्यविशेषणभावानापन्नयोर्मिलितयोर्हेतुत्वान्वयो वाच्यः सोऽपि न सम्भवति सामान्यवत्त्वादेस्सप्तम्यन्तपदोपस्थाप्यस्य हेतुत्वार्थकपञ्चमीप्रकृत्यर्थत्वाभावादिति केषाञ्चित्पूर्वपक्षं समाधातुमुपन्यस्यति। **मूले हेतु ग्रन्थे।** ****सामान्यवत्त्व इति**** सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वे विशेषणत्वा[67]सम्भवेऽपि सप्तम्यन्तार्थस्य सामान्यवत्त्वसामानाधिकरण्यस्य तत्र विशेषणतया तादृशविशेषणावच्छिन्ने बाह्यकरणप्रत्यक्षत्वे हेतुत्वान्वयसम्भवान्नापार्थकतेत्याह। ****तन्नेति**** ****सामान्यवत्त्वस्येति**** सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वे विशेषणीभवत्सामानाधिकरण्यप्रतियोगितायोपस्थितावित्यर्थः। अथ सामानाधिकरण्ये सप्तम्या अननुशासनात्कथमेतत्, सतीत्यस्य वा कोऽर्थ इति चेन्न **यस्य च चभानेन भावलक्षणमि**[68]ति सूत्रानुशिष्टसप्तम्याः गोषु दुह्यमानासु गत इत्यादौ यथा गोदोहनादिसमानकालीनत्वं गमनादौ बोध्यते तथा प्रकृतेऽपि समानदेशत्वप्रत्यायनात्। न च तादृशसप्तम्याः क्रियासमानकालीनत्ववत्क्रियासमानदेशत्वस्य कदाचित्क्रियायां न प्रत्यायनसम्भवः। यस्य क्रियया अन्यस्य क्रिया लक्ष्यते विशेष्यते यद्वाचकपदसमभिव्याहृतकृदन्तपदोपस्थापितक्रिया समानकालीनत्वादिसम्बन्धेन क्रियान्तरविशेषणमिति यावत्, तद्वाचकपदात्सप्तमीत्यर्थकत्वात्तादृशसूत्रस्य क्रियासमानकालीनत्वादौ क्रियान्तरविशेषणतया विवक्षिते तादृशसूत्रेण सप्तमीविधानात् सप्तमीप्रकृत्यर्थनिरूपितसामानाधिकरण्यादेरपरनामार्थविशेषणतया विशेषणे सप्तम्यनुशासनात्सामान्यवत्त्वसामानाधिकरण्यस्य प्रत्यक्षत्वे कुतो लाभ इति वाच्यम्। यथा गोषु दुह्यमानास्वागत इत्यादौ गोपदोत्तरसप्तम्यास्समभिव्याहृतक्रिया दोहनरूपार्थः। तत्र समभिव्याहृतकृदन्तार्थान्वितप्रकृत्यर्थस्य कर्मतानिरूपकत्व-

---

व्यापकताविशिष्टहेत्वभावे लक्षणाप्रयोजकीभूतसमभिव्याहारविषयताघटकवीप्साविषयतायाः प्रयोजकत्वाल्लक्षणसमन्वयः। यत्र गोत्वं तत्र गोत्वमित्युदाहरणस्य सङ्ग्राह्यत्वे तत्प्रकारः परिचिन्तनीयः। यो यो वह्निमान् स तेजस्वीत्यादिवाक्यवारणन्तु प्रकृतन्यायावयवत्वविशेषणेनेतिभावः। विशेषलक्षणद्वय-

---

67. विशेषणत्वाविशेषणत्वासम्भवेऽपि इति पाठान्तरम्

68. अष्टाध्यायी ।। २.३.३७।। इति पाणिनीयं सूत्रम्

In Public domain. Digitization Muthulakshmi Research Academy


सम्बन्धेनान्वयः। तस्याश्वसमानकालीनत्वसम्बन्धेन क्रियान्तरेऽन्वय इति तत्र दुह्यमानगोकर्मकदोहनसमानकालीनत्वलाभस्तथा प्रकृतेऽपि शतृप्रकृत्यसिधातोराधारत्वमर्थः। अत्रास्ति घट इत्यादावेतद्देशनिष्ठाधारताप्रतियोगी घट इत्यादिप्रतीतेः, अत्र चाधारत्वरूपक्रियायां सामान्यवत्त्वस्य प्रकृत्यर्थस्य प्रतियोगित्वसम्बन्धेनान्वयः आधारतायाः प्रत्यक्षत्वे समानदेशत्वसम्बन्धेनान्वय इति प्रत्यक्षत्वे सामान्यवत्त्वसामानाधिकरण्यलाभसम्भवात्। भावलक्षणमिति भावशब्दस्य धर्ममात्रपरत्वात्प्रत्यक्षत्वस्य क्रियात्वविरहेऽपि क्षतिविरहात्। सत इत्यस्याध्याहारेण वा प्रत्यक्षत्वसत्त्वेन सामान्यवत्त्वसत्त्वस्य समानदेशतालाभेन सामञ्जस्यात्। कुत्रचित्समानकालीनत्वं क्रियायास्सम्बन्धः कुत्रचित्समानदेशत्वमित्यत्र किं नियामकमिति चेत्। यत्र समभिव्याहृतकृत्प्रत्ययस्य वर्तमानत्वेऽपि तात्पर्यं तत्र समानकालीनत्वं यत्र च न तद्विवक्षणं तत्र समानदेशत्वं सम्बन्ध इति नियमात्। प्रकृते च वर्तमानत्वाविवक्षया समानदेशत्वलाभात्। वर्तमानत्वाविवक्षायामपि विरोधिकालाविवक्षायां लटः साधुत्वात्। यत्र चातीतत्वमनागतत्वं वा कृतौ विवक्षितं दुग्धासु दोग्धव्यास्वित्यादौ तत्रोत्तरत्वं पूर्वत्वं वा सम्बन्ध इति दोहनोत्तरत्वादिकमेव प्रतीयते न तु समानकालीनत्वमित्यवधेयम्।

**इति गदाधर्याम् अवशिष्टहेतुलक्षणम्**

---

माह। *साध्येति* प्रकृतहेतुधर्मितावच्छेदकप्रकृतहेतुव्यापकताविशिष्टसाध्यवैशिष्ट्यावगाहित्वप्रयोजक-विषयताश्रयवीप्सावद्वाक्यत्वं चार्थः। तादृशसाध्यतादृशसाधनाभावावगाहितान्यतरघटितं तु न सामान्य लक्षणं केवलान्वयिन्यव्याप्तेरिति बोध्यम्। प्राचाम्मतमाह। *न्यायेति* न्यायावयवत्वे सति यथा पदार्थान्वितस्वार्थबोधकनामोत्तरप्रथमावत्त्वमर्थः। यथा पदार्थश्च हेत्वादिमति हेतुव्यापकताविशिष्टसाध्यादिमत्त्वमेव। एतन्मते वाक्यद्वयात्मकमुदाहरणम्। यथावदार्थकः इति जिज्ञासाव्युदासाय प्रथमवाक्यस्यावश्यकतेति। *सामयिकवत्वेन* मया सदृष्टान्तमेवोदाहरणं प्रयोक्तव्यमित्यभिलापविशेषनियन्त्रितत्वेन। *असार्वत्रिकत्वात्* सकलोदाहरणाघटकत्वात्। तथाचाव्याप्तिरिति भावः। स्वलक्षणेऽव्याप्तिशङ्कां निरस्यति। *यो य इति* *इत्येव* इति वाक्यादेव। व्याप्तिर्व्यापकत्वम्। *प्रकृतेति* तत्पक्षसाध्यकानुमितिजनकज्ञानविषयव्याप्तिबोधकत्वे सति न्यायावयवत्वं तत्पक्षसाध्यकानुमितिप्रयोजकोदाहरणत्वमित्यर्थः। *उपनयेति* इदमापाततः। व्याप्तिबोधस्य पक्षधर्मत्वाविषयकत्वेन विशेषणात् पञ्चमविषयतांशे विशेषणतया प्रकृतानुमितिजनकतावच्छेदकतावच्छेदकतापर्याप्त्य-

In Public domain. Digitization by Muthulakshmi Research Academy

## अथ गदाधर्यां परिशिष्टावयवमण्यर्थप्रकाशः

ननूदाहरणे यत्पदद्विरुक्तप्रयोजिकायाः महानसत्वमहानसान्यत्वादिना वक्तुर्यावत्सा-धनाधिकरणप्रत्यायनेच्छारूपवीप्सायाः किं प्रयोजनम्? न हि साधनस्य यावदधिकरणे साध्य-वत्त्वज्ञानमनुमितिहेतुर्येन यत्पदे वीप्सां विना यावद्धूमाधिकरणानुपस्थापने तत्पदेन तावदधि-करणानां परामर्शासम्भवात्सकलसाधनाधिकरणे साध्यवत्त्वाप्रतीतेरनुमित्यनिर्वाहस्स्यादिति यत्तत्पदात्तावदधिकरणबोधो वीप्साप्रयोजनं भवेत्, न च व्याप्तिप्रत्यायनेच्छा वीप्सा तस्या-श्चानुमित्यौपयिकबोध एव प्रयोजनमिति वाच्यम्, व्याप्तेश्च पदार्थवाक्यार्थत्वविरहेण तत् प्रत्यायनेच्छायामपि शाब्दतत्प्रत्ययस्यायोगात्। मानसबोधे च वक्त्रभिप्रायानुपयोगात्। यदि च तत्पदसमभिव्याहृतवह्न्यादिपदस्य धूमव्यापकताविशिष्टवह्न्यादिलाक्षणिकतया धूमादौ वह्नि-व्याप्तिलाभ इत्युच्यते, तदा यत्पदे द्विरुक्तिं विनापि तल्लाभसम्भवात् द्विरुक्तिवैयर्थ्यमित्याक्षेपे प्रचीनसमाधानमुपन्यस्यति। **अत्र चेति** उदाहरणस्थयत्पदे चेत्यर्थः। **व्यभिचार-वारणायेति** वीप्सामुद्दिश्य मानसव्याप्तिज्ञानविरोधिव्यभिचारधीवारणप्रयोजनिकामाहुः इत्यर्थः। यावद्धेत्वधिकरणे साध्यवत्त्वनिश्चये तेन विपरीतनिश्चयांत्मकत्वेन साधनाधिकरणे साध्याभाववत्त्वरूपव्यभिचारग्रहस्य प्रतिबन्धक इति भावः। नन्वेवं वाच्यत्वादिसाध्यस्य यत्रोपायान्तरात्केवलान्वयित्वं गृहीतमयमेतदभिन्नः एतद्वृत्तियावद्धर्मावत्त्वादित्यत्र च हेतावेक

---

धिकरणधर्मवद्विषयकत्वे सति चतुर्थविषयताशून्यबोधजनकत्वे सति न्यायावयवत्वं समुदायार्थः। *उपनयेत्यादि* उपनयजन्यशाब्दबोधनिवर्त्यायाः जिज्ञासायाः कः साध्यव्याप्यवानित्याकारिकायाः जनकत्वे सति न्यायावयवत्वमर्थः। पक्षस्साध्यव्याप्यवान्नवेति संशयस्तु जिज्ञासाप्रयोजकः। *अन्व-येति* अन्वयव्याप्तिबोधकोपनयप्रयोजकजिज्ञासाजनकत्वे सति न्यायावयवत्वमन्वय्युदाहरणत्वम्। व्यतिरेकव्याप्तिबोधकोपनयप्रयोजकजिज्ञासाजनकत्वे सति न्यायावयवत्वं व्यतिरेक्युदाहरणत्वम्। अन्वयव्यतिरेक्युदाहरणञ्च नास्त्यैवेति भावः।

युगपत्सकलधर्मिप्रत्यायनेच्छावीप्सेत्याशयेन शङ्कते गादाधर्याम्। *नन्विति* *उद्देश्येति* व्यभिचारशङ्कानिवृत्तौ सहचारग्रहे च मानसव्याप्तिग्रहे इत्यर्थः। तत्र व्यभिचारशङ्कानिवर्तकत्वं प्रदर्शयति। *यावदिति* इदमेवलक्षणं व्यतिरेक्युदाहरणे साध्याभाववति साधनाभाववत्तानिश्चयोऽपि विपरीतनिश्चयत्वेन तच्छङ्काविरोधीवोध्यः। शब्दतो व्याप्तिप्रत्ययार्थमेव व्याप्तिप्रत्यायनेच्छारूपा वोध्येति मतं निराकर्तुमुपक्रमते। *सर्वत्रैवेति* द्विरुक्तपदसमभिव्याहारस्थले तत्पदार्थांशे विधेय-

In Public domain. Digitization Muthulakshmi Research Academy


-मात्रवृत्तित्वं गृहीतं तत्र हेतौ साध्यसामानाधिकरण्यग्रहादेव मानसी व्याप्तिधीस्सम्भवति। प्रथमेऽभावे साध्यीयत्वाग्रहेण द्वितीये साध्याभाववत्तया गृह्यमाणेऽधिकरणान्तरे हेतोरग्रहेण व्यभिचारग्रहासम्भवादित्युभयसिद्धव्याप्तिकसाधकतानुमाने यथोदाहरणं न प्रयुज्यते तथात्र सामानाधिकरण्यलाभायोदाहरणप्रयोगेऽपि द्विर्यत्पदं न प्रयुज्यत इत्यत्रेष्टापत्तिमाह। **यत्र चेति** सर्वत्रैव द्विरुक्तिरनपेक्षितेति स्वमतमाह। **वीप्सायामपीति** अयमाशयः। द्विर्यत्तत्पदप्रयोगेऽपि सकलसाधनाधिकरणपरत्वाग्रहे व्यभिचारतादवस्थ्याद्व्यभिचारधियो अनिवृत्तिः तत्परत्वग्रहापेक्षायाञ्च यद्योगप्राधम्याभ्यां साधननिष्टव्याप्तितात्पर्यमेव गृह्यतां, तत एव लक्षणया व्याप्तिशाब्दबोधसम्भवात् तत्र व्यभिचारशङ्काया अविरोधित्वात् यावत्साधनवति साध्यवत्त्वबोधाय द्विर्वचनमनर्थकमेव। अत एव यन्नैवं तन्नैवमिति प्राचामुदाहरणोपदर्शनमपि सङ्गच्छते, आवश्यकश्च व्याप्तेः शाब्दबोधः। अन्यथा समानप्रकारतामपुरस्कृत्य विपरीतधियो विरोधितायाः दुष्कल्प्यतया महानसत्त्वादिना सकलधूमाधिकरणे साध्यवत्त्वबोधेऽपि धूमवत्त्वप्रकारेण तत्र तत्रैव साध्याभावशङ्काया अनुच्छेदेन मानसव्याप्तिग्रहासम्भवात्,

---

बोधकपदस्य यत्पदार्थविधेयव्यापकताविशिष्टस्वार्थे लक्षणेति निरस्यति। *द्विर्यत्प्रयोगोऽपीत्यादिना* *महानसत्वादिनेति* महानसत्वादिनोपस्थितेष्वधिकरणेषु साध्यवत्त्वप्रतीतावपि धूमवत्त्वावच्छेदेन वह्निमत्त्वाग्रहात्तद्रूपसामानाधिकरण्येन तेष्वेवाधिकरणेषु साध्याभावावगाहिव्यभिचारबुद्धौ बाधकाभाव इत्यर्थः। इदमुपलक्षणम्। व्याप्तिबोधानुपगमे धूमाद्यधिकरणानामेव यत्र बुद्धिस्तथा तत्र यो यो वह्निमान् स धूमवानिति प्रयोगस्यापि प्रामाण्यापत्तेः। तादृशतत्तत्पदार्थेषु सर्वेषु धूमवत्त्वाबाधात्। धूमशून्याधिकरणस्याबुद्धिस्थत्वेन तत्पदार्थताविरहादित्यपि द्रष्टव्यम्। *छन्दोनुरोधादिनेति* अत्र तत्पदे, न वीप्सेति न नियमः। किन्तु वीप्सितयत्पदसमभिव्याहृतपदार्थतावच्छेदकव्यापकत्वबोधे यत्र तात्पर्यं तत्र तत्पदे, न वीप्सेत्येव, यद्यत्पापमित्यादौ नाशप्रतियोगितारूपकर्मत्वे मदीयपापत्व-व्यापकताबोधात्। यत्र तथाविधव्यापकताबोधे नतात्पर्यं तत्र तत्पदे वीप्सा यथा, सञ्चारिणीत्यादौ तत्र पतिं वराकर्तृकव्यत्ययकर्मताविशिष्टमहीपालत्वव्यापकत्वस्य वैवर्ण्यप्राप्तौ बोधनासम्भवात्। तादृश-कर्मतात्वेनानुपस्थितेः। किन्तु तत्र तत्तद्भिन्न कर्मकातीतव्यत्ययस्य समानकालीनवैवर्ण्यप्राप्ति-मत्तत्तद्भिन्नमहीपालस्य समूहालम्बनबोध इति। *व्युत्पत्तिः* सकृदुच्चरितस्सकृदर्थं गमयतीत्याकारा। द्विरुक्तयत्पदेनापि द्विर्वचनस्यादेशरूपतया पदभेदाभावात्। *अविरोधमिति* अथ सकृदुच्चरित इत्यत्र एकं पदानुसन्धानमुभयस्वार्थाबोधकमिति नियमः एकत्वं स्वसमानार्थकपदान्तरानुसन्धानासमवहित-

एवमद्विरुक्तेनापि यत्पदेनैकरूपेण विभिन्नरूपेण वा सकलधूमाधिकरणोपस्थितिसम्भवात् तदर्थकतया द्विरुक्तिसार्थक्यमपि दुर्वचम्। न च सकृदुच्चरितेत्यादिव्युत्पत्तिविरोधादेकस्माद्यत् पदान्नानेकाधिकरणबोधस्सम्भवतीति वाच्यम्। सकृदुच्चरितस्य नानाशक्त्याऽबोधकतायामेव व्युत्पत्तेः। सर्वनाम्नाञ्च बुद्धिस्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नत्वेन नानाधर्मिणामनुगमात् नानार्थेषु शक्तेरैक्येन व्युत्पत्तेरविरोधात्। अन्यथा द्विरुक्तिस्थले एकस्यैव पदद्वयरूपादेशस्थान -तया पदभेदविरहेण द्विरुक्तावपि नानार्थबोधानुपपत्तेः। कथञ्चिदर्थद्वयबोधकत्वनिर्वाहेऽपि भूयोऽर्थबोधस्य निर्वाहयितुमशक्यत्वाच्चेति।

अथ द्विरुक्तस्थल एव व्याप्तौ निरूढलक्षणा, अत एव यत्पदप्रयोगेऽपि वादिवाक्ये स्वारसिकलक्षणाविरहेण नव्याप्तिबोधानिर्वाहः। वस्तुतो व्याप्तिगोचरशाब्दबोधानुरोधेन चेदुदा -हरणप्रयोगः तदोपनयवद्व्याप्यपदेनैवोदाहरणेऽपि व्याप्तिबोधनं युज्यत इति सकलधूमाधि- करणे साध्यवत्त्वबोधनाय यो यो धूमवानित्युदाहरणम्। इत्थं च यत्पदस्य सकलधूमाधिकर- णपरताया आवश्यकतयाऽद्विरुक्तयत्पदस्य तत्परत्वानियमेन तत्परत्वग्रहार्थं द्विरुक्तेरावश्य- कता। एवं नित्यवीप्सयोरिति सूत्रेण द्विरुक्तिविधानस्य नित्यतया सकलधूमाद्यधिकरणपरत्वे यत्पदस्य द्विरुक्तस्य साधुत्वमेव नस्यादित्यतो द्वरुक्तेरावश्यकता इत्याशयेन यत्पदे द्विरुक्ति-

---

त्वमिति न सम्भवति। घटौ घटा इत्याद्येकघटपदानुसन्धानेऽनेकघटबोधकत्वेन व्यभिचारात्। न च तत्रैकशेषेण सरूपपदान्तरलोपात्तत्प्रतिसन्धानादेव नानाघटबोधः। घटपदानुसन्धानस्य समानार्थक- पदान्तरानुसन्धानासमवहितत्वरूपैकत्वाभावादुक्तनियमस्याप्यभङ्ग इति वाच्यम्। तथापि घटावानय इत्यादौ एकेन धातुपदेनानयनद्वयबोधात्तन्नियमासम्भवात्। न च प्रातिपदिकमन्तर्भाव्यनियमोस्त्विति वाच्यम्। तथा सति घटं पदं चानयेत्यादावेकेनापि क्रियापदेन नानानयनादिबोधसम्भवात्तत्र अवृत्तिस्वीकारविरोधात्। एतेन नानावृत्तिविषयार्थाबोधकत्वमिति नियमोऽपि प्रत्युक्तः। उक्तस्थले घट -पटानयनयोरेकशक्त्यैवोपस्थापनेनावृत्ति-स्वीकारविरोधतादवस्थ्यात्। न चानेकवाक्यार्थबोधकत्व- नियमः। घटावानयेत्यादौ घटद्वयरूपवाक्यार्थतस्यैक्याद्घटं पटञ्चानयेत्यादौ घटानयनपटानयनरूप- वाक्यार्थस्य भेदात्सामञ्जस्यमिति वाच्यम्। पदार्थबोधे तद्घटितवाक्यार्थभेदस्यावश्यकतया घटावानय इत्यादौ वाक्यार्थाभेदस्य विचारासहत्वात्। न चैकपदानुसन्धानजन्यबोधे तदर्थनिष्ठानेकविषयताकत्व अभावनियमः घटावानयेत्यादिवाक्यजन्यबोधे घटद्वयत्वाद्यवच्छिन्नघटद्वयादितदानयनत्वाद्यवच्छिन्ना- नयनद्वयविषयता चाभिन्नैव घटं पटञ्चानयेत्यादिवाक्यजन्यसमूहालम्बनबोधे घटानयनत्वपदानयन-

In Public domain. Digitization Muthulakshmi Research Academy


मभ्युपेत्य तत्पदेद्विरुक्तिं खण्डयति। **वीप्सा चेति** द्विरुक्तिनियमेऽपि कदाचिद्यत्पद एव न तु तत्पदेपीत्यर्थः। सर्वत्रैव तत्पदे न द्विरुक्तिरिति नार्थः। **विवर्णभावं स स भूमिपाल**[69] इत्यादौ छन्दोनुरोधादिना द्विरुक्तिदर्शनात्। न्याये तु प्रयुज्यमानेऽधिकस्यान्याय्यतया साधुत्वेऽपि न तत्र द्विरुक्तिः सकलधर्मिप्रत्यायनेच्छारूपवीप्सासत्त्वेऽप्यद्विरुक्ततत्पदस्य साधुतासम्भवः महाकविप्रयोगदर्शनात्, एतदपि स्पष्टयितुं,[70] भवभूतीनां (भवभूतिनान्म्याः) तथा प्रयोगो दर्शयिष्यते, द्विरुक्तयत्पदवोधितनानाधर्मिणामेकेन तत्पदेन परामर्शायोग इत्याशङ्कां निरस्यति। **विरूपेति** महानसत्वमहानसान्यत्वादिना विभिन्नप्रकारेण इत्यर्थः। **तत्पदेन परामर्शात्** तत्पदेन परामर्शसम्भवात्। तत्पदस्य परामर्शकतायां, व्युत्पत्तिविरोधे द्विरुक्तयत्पदेनापि तावद्धर्मिबोधासम्भवात् व्युत्पत्तिविरोध एव न कथमित्या-काङ्क्षायामाह। **बुद्धिस्थवाचकत्वादिति** बुद्धिप्रकारावच्छिन्नेषु सर्वेष्वेकशक्तेरित्यर्थः। व्युत्पत्त्यविरोधं दृष्टन्तेन द्रढयति। **यथेति**

**इति श्रीमन्महामहोपाध्यायगदाधरभट्टाचार्यचक्रवर्तिविरचितायां युक्तिन्किरकल्लोलमालातारङ्गितकल्पनापयःपारावाररूपिण्याम् अनुमानदीधितिटिप्पण्याम् अवयवग्रन्थः सम्पूर्णः।**

---

त्वादिरूपविभिन्नधर्मावच्छिन्नविषयाद्वयमवच्छेदकभेदाद्भिद्यत इति नानुपपत्तिरिति वाच्यम्। घटावान-येत्यादिवाक्यजन्यबोधे एकघटानयनविषयतायाः अपरघटानयनविषयताया अभेदे यत्रानयने यद्धट-कर्मकत्वं बाधितं तदानयननिष्ठविषयतायास्तदानयनावृत्तितद्धटककर्मकत्वावच्छिन्नतद्धटानयनादि-विषयत्वाभेदेन तद्भेदस्य तदवृत्तिधर्मावच्छिन्नतन्निष्ठविषयताकत्वेन भ्रमत्वप्रसङ्गात्। तत्र विषयताभेद-स्यावश्यकतया तत्र तादृशनियमेऽपि व्यभिचारात्। न च तत्पदविषयकैकानुसन्धानजन्यवोधे मिथो विलक्षणतदर्थविषयताकत्वाभावनियमः मिथो विलक्षणत्वञ्च परस्परानवच्छिन्नप्रतिवन्धकतावच्छेद-

69. सञ्चारिणीदीपशिखैवरात्रौ यं यं व्यतीयाय पतिं वरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः।
रघुवंशे 6 सर्गे 67 श्लोकः
यां यां प्रियः प्रैक्षतकातराक्षी सा सा ह्रियानम्रमुखी बभूव।
निश्शङ्कमन्यास्समामाहितेर्ष्यास्तत्रान्तरे जघ्नुरमुङ्कटाक्षैः।
शिशुपालवधे 3 सर्गे 16 श्लोकः

70. कल्याणानान्त्वमसिमहसां भाजनं विश्वमूर्ते दुर्यां लक्ष्मीमिहमयि भृशं देहि देव प्रसीद।
यद्यत्पापं प्रतिजहिजगन्नाथनम्रस्य तन्मे भद्रं भद्रं वितरभगवन् भूयसे मङ्गलाय।
मालतीमाधवीये प्रथमाङ्के नान्दी श्लोकः

In Public domain. Digitization: Mahalakshmi Research Academy

कत्वं घटं पटञ्चानयेत्यादिवाक्यात्समूहालम्बनबोधे घटपटानयनविषयतयोरानयनं घटकर्मकं घटवानयनं पटकर्मकं नवेत्यादिसंशयनिरूपितपरस्परानवच्छिन्नप्रतिबन्धकतावच्छेदकतया मिथो वैलक्षण्यमित्यानयनपदावृत्तिस्वीकारः तत्स्वीकारे क्रमेणार्थबोधः घटावानयेत्यादौ घटद्वयानयनविषयतात्वेन तद्विषयतयोर्ननिरुक्तं वैलक्षण्यं विपरीतज्ञानस्य समानप्रकारकत्वेनैव प्रतिबन्धकतया तद्घटानयननिष्ठोक्तरूपावच्छिन्नविषयतायास्तदानयने तद्घटीयत्वकोटिकयादृशसंशयविरोधितावच्छेदकत्वमन्यघटानयननिष्ठतद्रूपावच्छिन्नविषयताया अपि तदानयने तद्घटीयत्वकोटिकसंशयविरोधितावच्छेदकत्वादिति वाच्यम्। घटपटावानयेत्यादिवाक्यात्समूहालम्वनविलक्षणमानयनत्वावच्छिन्ने युगपद्घटपटकर्मकत्वोभयविशेषणकबोधस्यानुपपत्तेस्तादृशबोधीयघटकमेकत्वावच्छिन्नतदानयनविषयतायाः घटकर्मकत्वावच्छिन्नतदानयनविषयतायाः च निरुक्तवैलक्षण्यसत्त्वात्। तत्रावृत्याक्रमिकानयनद्वयबोधोपगमस्तु न सम्भवति तथा सति घटपदपटपदयोः सामर्थ्याभावेन द्वन्द्वानुपपत्तेः। मैवम्। एकतत्पदानुसन्धानजन्यबोधे एकविषयत्वानिरूपिततत्तदर्थविषयताद्वयाभावनियमोऽभिप्रेतः घटौ आनय घटपटावानयेत्यादौ आनयनभेदेन विषयताभेदेऽपि तन्निरूपितानयनत्वप्रकारतारूपविषयता एकैवोपेयते विषयभेदविरहात् घटं पटञ्चानयेत्यादौ घटानयनं पटानयनञ्चेति समूहालम्बनबोधोपगमे तत्तदानयनविषयतानिरुपितानयननत्वविषयताभिद्यते समूहालम्वनस्य प्रत्येकज्ञानोत्पादकसामग्रीसमाजाधीनतया प्रत्येकज्ञानीयविषयताद्वयनियामकवशादेवविषयताद्वयसम्भवादतस्तत्रावृत्त्याक्रमेणानेकार्थबोधस्वीकार इति। एवञ्च यादृशस्थले एतत्पदविषयकमेकमनुसन्धानमेतत्पदस्यार्थद्वयं बोधयति इत्याकारकतात्पर्यं तत्र घटं पटञ्चानयेत्यादौ समूहालम्वनबोधस्योक्ततात्पर्यघटितानेकार्थबोधसामग्रीवशेनोत्पादसम्भवात् तथाविधनियमे दर्शिततात्पर्यानधीनत्वस्योद्देश्यविशेषणत्वावश्यकतया प्रकृततत्पदेऽपि तदविरोध इत्यर्थः। प्रकृते बुद्धिस्थवाचित्वं प्रक्रान्तवाचित्वोपलक्षणं दीधितिकाराणां विरूपोपस्थितयोरिति लिखताञ्चप्रक्रान्तवाचित्वे एव निर्भरः। समूहालम्वनबोधोऽपि व्यापकत्वानवगाही तदवगाही वेति दीधितिव्याख्यानावसरे ग्रन्थकारैरेवोक्तम्।

इदानीमुदाहरणाभासानाह। ***मूले इदं चेति*** साध्यसाधनोभयाश्रयविकलः इत्यादेराभास इत्यनेनान्वयः धूमवान् वह्नेः वह्निमान् धूमादित्यादौ दृष्टान्तस्यायोगोलकस्य साध्यवैकल्यं साधनवैकल्यं चोदाहरणाभासः तदुभयमाश्रयो निरूपकं यस्याव्याप्तेरिति व्युत्पत्त्या पर्वतो धूमवान् वह्नेरित्यादौ यो वह्निमान् स धूमवानिति प्रकृतसाध्यसाधनव्याप्तिवैकल्यादाभासः। ***अनुपदर्शितान्वयम्*** अनुपदर्शितोऽन्वयोऽन्वयव्याप्तिर्येनेतिव्युत्पत्त्या इदं वाच्यं ज्ञेयत्वादित्यादौ यो यो वाच्यत्वाभाववान् स ज्ञेयत्वाभाववानित्यनुपदर्शितान्वयव्याप्तिकत्वादाभासः। विपरीतोपदर्शितान्वयं विपरीत-

In Public domain. Digitization Muthulakshmi Research Academy


क्रमेणोपदर्शितोऽन्वयोऽन्वयव्याप्तिर्येनेति व्युत्पत्त्या पर्वतो वह्निमान् धूमादित्यादौ यो यो वह्निमान् स धूमवानिति विपरीतक्रमेणोपदर्शितव्याप्तिकत्वादाभासः। अनुपदर्शितव्यतिरेकः अनुपदर्शितो व्यतिरेको व्यतिरेकव्याप्तिर्येनेति व्युत्पत्त्या अयमेतद्घटाभिन्नः एतद्घटत्वादित्यादौ य एतद्घटत्ववान् स एतत् घटाभिन्न इति अनुपदर्शितव्यतिरेकव्याप्तिकत्वादाभासः। विपरीतोपदर्शितव्यतिरेकः विपरीतक्रमेणो-पदर्शितोव्यतिरेकोव्यतिरेकव्याप्तिर्येनेति व्युत्पत्या उक्तस्थले यो य एतद्घटत्वाभाववान् स एतद्घटभिन्न इति विपरीतोपदर्शितव्यतिरेकव्याप्तिकत्वादाभासः। एषु च प्रकृतसिद्धौपयिकव्याप्तिप्रमानुपधायकत्वम् आभासताप्रयोजकं बोध्यम्।

**इति कृष्णम्भट्टीये उदाहरणग्रन्थः**

*__व्याप्तिमिति__* पक्षस्साध्यव्याप्यहेतुमान्नवेत्याकाङ्क्षोपलक्षणमेतत्। साध्यनिष्ठव्यापकता-निरूपकहेतुमान् क इत्यर्थः। *__अनुमितीति__* पक्षांशे प्रकृतसाध्यानुमित्यौपयिकव्याप्तिविशिष्टप्रकृतहेतु-वैशिष्टावगाहिशाब्दज्ञानजनकत्वमर्थः। *__अवयवत्वम्__* न्यायावयवत्वम्। *__साध्येति__* हेतुव्यापकत्व-विशिष्टसाध्यवद्वृत्तिविशिष्टहेतुवैशिष्टावगाहिशाब्दबोधजनकत्वं बोधकान्तार्थः। *__साध्येति__* साध्याभाव -व्यापकीभूताभावप्रतियोगिताविशिष्टहेतुवैशिष्ट्यावागाहिशाब्दबोधजनकत्वं बोधकान्तार्थः। *__तृतीये-ति__* प्रकृतसाध्यानुमित्यौपयिकव्याप्तिविशिष्टपक्षधर्मताज्ञानस्योपनयभिन्नादलाभ इत्यर्थः। *__तृतीये-ति__* प्रकृतसाध्यानुमित्यौपयिकव्याप्तिविशिष्टपक्षधर्मताज्ञानस्योपनयभिन्नादलाभ इत्यर्थः। तथा च तत्सम्पत्त्यर्थमुपनय आवश्यक इति भावः। ननु मीमांसकानां विशिष्टपरामर्शो नानुमितिजनक इति किमुपनयेनेत्यत आह। *__तदिति__* मीमांसकैरनुमितिहेतुत्वेन विशिष्टज्ञानानुपगमेऽपि तेषां व्याप्यता-वच्छेदकप्रकारकपक्षधर्मताज्ञानस्यानुमित्यौपयिकतयोपनयं विना तदसम्भवादित्यर्थः। तथाचोपनय-प्रयोग आवश्यक इति भावः। धूमवत्त्वादित्यादि हेतुप्रयोगाभिमानं निराकरोति। *__न चेति__* *__हेतु-वचनात्__* हेत्ववयवात्। *__तस्य__* हेत्ववयवस्य। *__कोऽत्र हेतुः__* कुतः। *__प्रवृत्तत्वेन__* प्रयुक्तत्वेन। *__हेत्वति__* प्रकृतहेतुविशिष्टहेतुत्वोपस्थापकत्वेनेत्यर्थः। *__अतत्परत्वात्__* पक्षधर्मत्वाबोधकत्वात्। पक्ष-धर्मताया अनाकाङ्क्षितत्वादिति भावः। प्रत्युतमतुप आधिक्यमपि प्रागुक्तं द्रष्टव्यं शङ्कते। *__वादीति__* हेत्वन्तादित्यर्थः। हेत्वन्तेन पक्षे हेतुज्ञाप्य सास्य वत्ता प्रत्ययेन यो यो यद्ज्ञाप्य साध्यवान् स तद्वानिति सामान्यमुखीव्याप्त्या हेतौ पक्षधर्मतानुमानादेव निर्वाहादुपनयवैयर्थमित्यर्थः। समाधत्ते। *__तदर्थस्येति__* हेत्वन्तार्थस्य। *__असिद्धत्वेन__* हेत्वन्तार्थजन्यज्ञानस्य वादिवाक्यजन्यत्वे नाप्रामाण्य शङ्काकलङ्किततया तदभावविशिष्टहेतुमत्तानिश्चयासंम्भवेन। *__अनाक्षेपकत्वात्__* पक्षे हेतुमत्तानुमाप-

In Public domain. Digitization Muthulakshmi Research Academy

कत्वासम्भवात्। *अन्यथा* प्रकारान्तरेण हेतुमत्तानिश्चये प्रामाण्यज्ञानाभावोपेक्षणेऽपि अवयवाधीने तत्र तदभावानपेक्षणे। *प्रतिज्ञेति* प्रतिज्ञाजन्यशाब्दबोधानन्तरं यो यत्साध्यवान् स तद्ज्ञापकहेतुमानितिव्याप्त्या तादृशज्ञापकत्वानुमानसम्भवाद्धेत्ववयवाभिधानवैयर्थ्यप्रसङ्गादित्यर्थः। तथा च प्रतिज्ञाजन्यबोधस्याप्रामाण्यज्ञानानास्कन्दिततया हेत्वभिधानस्येवोपनयाभिधानस्याप्यावश्यकत्वमिति भावः। ननूपनयवाक्याभावेऽपि प्रतिज्ञाहेतुभ्यां साध्यवत्पक्षहेत्वोरुपस्थितौ मध्यस्थादेः पक्षो हेतुमानिति पक्षधर्मतोपनीतभानसम्भवादुपनयनैरर्थ्यक्यमित्याशयेन शङ्कते। *प्रतिपाद्यानामिति* मध्यस्थादीनाम्। *स्वत एव* उपनयप्रयोगं विना। *तदवगमः* हेतौ पक्षधर्मत्वोपगमधमाधत्ते। *तेषामिति* प्रतिपाद्यानाम्। *व्युत्पन्नेति* केषाञ्चित् प्राक्क्षे हेतुमत्ताज्ञानमस्तिकेषाञ्चित्तु तन्नास्तीति सर्वसाधारण्येन पक्षधर्मत्वोपनीतभानासम्भवादित्यर्थः। एतच्च तद्धर्मिकतदुपनीतभाने तद्धर्मिकतदुपनायकज्ञानमेव हेतुरिति मतेन। उपनायकज्ञानमात्रहेतुत्वेऽप्याह। *प्रतिपादकेनेति* वादिनेत्यर्थः। *अन्यथा* कस्साध्यव्याप्यवानिति जिज्ञासायाः शाब्दबोधावगाहित्वमुपगम्यतन्निवर्तकशब्दानभिधाने। *अवयवान्तरेति* उक्तरीत्याज्ञापकोपनीतभानसम्भवेन हेत्ववयादेरनभिधानापत्तेः इत्यर्थः। तत्रापि जिज्ञासायाः ज्ञानविषयकत्वोपगमसम्भवादिति भावः।

**इति कृष्णम्भट्टीये उपनयग्रन्थः**

*अनुमितीति* कारणान्तं न्यायावयवार्थकम्। प्रकृतसाध्यीय प्रकृतव्याप्तिविशिष्टप्रकृतपक्षधर्माविशिष्टप्रकृतहेतुज्ञानज्ञाप्यत्वविशिष्टसाध्यवैशिष्ट्यावगाहिबोधजनकत्वं विशेष्यदलार्थः। अनुषङ्गपक्षे चेदं प्रतिज्ञायामतिव्याप्तिवारणाय विशिष्टान्तं तत्रापि धूमाद्वह्निमतस्सधर्मा पर्वतो वह्निमानितिप्रतिज्ञावारणाय विशिष्टान्तम्। वह्निव्याप्तिविशिष्टपर्वतवृत्तित्वविशिष्टधूमाद्वह्निमतस्सधर्मा पर्वतो वह्निमा-निति प्रतिज्ञावारणाय प्रकृतपक्षनिवेशः। पर्वतो वह्निव्याप्यपर्वतवृत्तिधूमाद्वह्निमान्धूमादित्यादिस्थले प्रतिज्ञावारणाय प्रकृतसाध्यनिवेशः। प्रकृतसाध्यञ्च पक्षे यद्रूपावच्छिन्नबोधिकाः प्रतिज्ञाः सम्प्रदायसिद्धान्ततद्रूपावच्छिन्नमेवञ्च तादृशतद्रूपावच्छिन्नवैशिष्टबोधान्यतमबोधजनकत्वमर्थः। तेन तस्मादितरेभ्यो भिद्यत इत्यादि निगमनानां सङ्ग्रहः। निगमनवैयर्थ्यं शङ्कते। *न चेति* *पर्याप्तेः* *लाभात्* *तेन* *निगमनेव* *अपर्यवसानात्* आनुमित्यसामग्र्यसम्पादकत्वात्। *अभिधानाभिधेययोः* अनुमित्यौपयिकार्थबोधकशब्दप्रतिपाद्ययोः। *पर्यवसानम्* पूर्णत्वम्। *अवयवान्तराणाम्* निगमनानाम्। ननु निगमनानङ्गीकारे पक्षस्साध्यवान्नवेति शङ्कायाः कथं निवृत्तिरित्यत आह। *विपरीतेति* *तत एव* साध्यव्याप्तिविशिष्टवैशिष्ट्यबोधकशाब्दादेव। *अन्यथा* तथाविधात्

In Public domain. Digitization Muthulakshmi Research Academy


उपनयात्ताद्दृशशङ्कानिवृत्त्यङ्गीकारे। *तदवारणात* तदवारणप्रसङ्गात्। विशेषदर्शनत्वरूपविरोधिता-बीजसाम्यं व्युत्पादयति। *नहीति* तथा च ग्राह्याभावावगाहित्वमिव ग्राह्याभावव्याप्तिविशिष्टवैशिष्ट्य अवगाहित्वं विशेषदर्शनत्वमेवेति निगमनं व्यर्थमिति भावः। शङ्कते। *सिद्धेति* निगमनं सिद्धत्व-विशिष्टसाध्यबोधकताया तच्छङ्काविरोधीत्यर्थः। *स्वरूपेति* मात्रपदं सिद्धत्वविषयताव्यवच्छेदार्थं तथा च वादिवाक्ये लक्षणाविरहाद्वह्निपदस्य न सिद्धत्व विशिष्टवह्नेरुपस्थापकत्वं किन्तु वह्नित्वस्य रूप-मात्रस्येति न सिद्धत्वबोधसम्भव इत्यर्थः। एतच्च सिद्धत्वं प्रमाणसिद्धत्वमित्याशयेन हेतुविभक्ति-साकाङ्क्षात्वाभावः सिद्धत्वमित्यत्राह। *सिद्धत्वेति* तथा च निगमनघटकवह्निमत्पदे हेतुविभक्ति-साकाङ्क्षत्वानुगमे तत्साकाङ्क्षत्वस्यैवासत्त्वेन तज्ज्ञानाभावात् वह्न्यादौ हेतुविभक्त्यर्थान्वयो न स्यादि-त्यर्थः। जिज्ञासारूपाकाङ्क्षायावह्न्यावुपगमे समभिव्याहाररूप आकाङ्क्षायाः शाब्दबोधौपयिकत्वा-सम्भवेनाकाङ्क्षाज्ञानाभावासम्भवादिति भावः। *व्याप्तीति* बाधज्ञानं प्रतिव्याप्तिविशिष्टवैशिष्ट्या-वगाहित्वेनैव विरोधिता उपनये च पक्षधर्मता मात्रभानमित्याशयेनेदम्। *साध्येति* साध्य-वत्ताज्ञानप्रतिबन्धकत्वादित्यर्थः। *तदभावेति* अबाधितत्वादिबोधकनिगमन अनुगमे इत्यर्थः। *समीहितानिर्वाहादिति* अवयवान्तरादबाधितत्वादिविशिष्टसाध्यबोधासम्भवाद्बाधनिश्चयादितः साध्य-वत्ताज्ञानानुदयप्रसङ्गादित्यर्थः। साध्याभावनिश्चयो बाध इति तदभावोऽबाधित्वमेवं सत्प्रतिपक्षितत्वं निश्चयगर्भमित्याशयेन शङ्कते। *अथेति* नन्वबाधितत्वबोधे अनुमिति सत्त्वमित्यन्वयव्यतिरेक अनुविधानमेव मानमित्यत आह। *असिद्धेरिति* बाधसत्प्रतिपक्षौ निश्चयागर्भौ इत्याशयेन व्याप्तिमुपन्यस्य समाधत्ते। *यदवगमे सतीति* *अन्वय इति* अबाधितत्त्वबोधकशब्दाभावादिति भावः। हेत्वनाकाङ्क्षितत्वलक्षणसिद्धत्वमबाधितत्वादिति तथा च वह्निपदस्य अबाधितत्वादिविशिष्टवह्नौ लक्षणाविभक्त्यर्थान्वयोत्तरमेव हेत्वन्तेन एकवारं विभक्त्यर्थान्वये जाते पुनर्विभक्त्यर्थान्वय-तात्पर्यानुपपत्त्यालक्षणेति स्फुटयति। *नन्विति* वस्तुतस्तु निगमनात्साध्ये साध्यव्याप्यपक्षवृत्ति-हेतुज्ञानज्ञाप्यत्वं तस्मात्पदलभ्यं भासते तद्धेतुका अबाधितत्वादेरनुमिति उपनयो वा तत्र साध्ये हेतु-विभक्त्यर्थान्वयः कथं सिद्धत्वादित्याशङ्कावारणाय **हेत्विति। ज्ञानादिति।** सत्त्वादित्यर्थः। हेतु-विभक्त्यर्थान्वयप्रयोजकाकाङ्क्षाशून्यत्वं हेत्वनाकाङ्क्षितत्वं तत्सत्वेऽपि नेहाकाङ्क्षाप्रतिबन्धोऽस्ति शुद्धे हेतुज्ञाप्यत्वसिद्धावपि विशिष्टहेतुज्ञाप्यत्वासिद्धेरितिभावः। एवञ्च साध्यांशे अबाधितत्वादिबोधे उपनयोपस्थापितसाध्यव्याप्तिविशिष्टपक्षवृत्तित्वस्य न हेतुता, वैय्यधिकरण्यात्। नापि तादृशपक्ष-वृत्तिहेतुकत्वस्य अप्रयोजकत्वशङ्कासत्त्वात् इति निगमनानुधावनम्। तथा सति साध्याभावस्य पक्षवृत्तित्वे प्रमात्मकपरामर्शजन्यप्रमाविषयत्वानुपपत्तिरूपतर्कसम्भवान्न तच्छङ्केति बोध्यम्।

In Public domain. Digitization: Muthulakshmi Research Academy

तस्मात्तथेति निगमनं निराकर्तुमाह। *इहेति* अशेषरूपं व्याप्तिपक्षधर्मत्वोभयम्। *सिद्धस्थले* मैत्रः पचति अयमपि तथेत्यादिलोकप्रसिद्धस्थले। *विरोधः* उपक्रान्तप्रतिज्ञया सहोपसंहृतनिगमनस्य एकार्थबोधाजनकत्वरूपः। तस्मात्तथेत्युक्तेः तत्पदस्य प्रक्रान्तार्थात्वान्नोक्तविरोधग्रहः। तस्माद्वह्निमान् इत्यभिधाने तु वह्निपदस्यातथात्वात्। एतद्वह्निपदस्यान्य एवार्थ इति भ्रमेणोक्तविरोधग्रहापत्तिः इत्यर्थः। अन्ये तु तस्मात्तथायमिति निगमने प्रतिज्ञया सहान्यूनार्थबोधाजनकत्वात्मको न विरोधः। तस्माद्वह्निमानित्यादौ तु पक्षाभावेन विरोध इत्याहुः। तच्चिन्त्यम्। तथा सति तस्माद्वह्निमानयमिति निगमनेऽदोषात्। वस्तुतस्तु। तस्माद्वह्निमानिति वाक्यं प्राचीनमते सम्प्रदाय विरुद्धमेव। *सम्यक्* *स्वरूपे* पूर्ववाक्यजन्यशाब्दबोधविशेष्ये। *प्रकारे* तथाविधशाब्दबोधविशेष्यभिन्नप्रकारे। *सादृश्ये* तथाविधशाब्दबोधविशेष्यसादृश्ये। *तथेति* हेतुमानित्यर्थः। तथा शब्दहेतुमत् उपस्थितिः। ननु हेतुत्वज्ञानज्ञाप्यो हेतुमानितिशाब्दबोधोऽस्त्वितित्यत इह। *न हीति* तादृश-ज्ञाप्यत्वस्योद्देश्यतावच्छेदकत्वे उद्देश्यालाभः हेतुमत्त्वस्य तथात्वे च न तात्पर्यमभेदे ज्ञाप्यज्ञापक-भावान्वयस्याव्युत्पन्नत्वात् साध्ये एव तस्माच्छब्दार्थान्वयाभिप्रायाच्चेति भावः। पक्षस्योपनयजन्यबोध-विशेष्यस्यापि सामान्यतोधिकरणत्वादिनाऽन्वयव्याप्तिघटकत्वेन प्रकारत्वात् तत्रैव निगमनजन्य-बोधीय प्रकारान्यो वाच्यः पर्वतो हेतुमत्त्वज्ञानज्ञाप्य इति बोधे च न तात्पर्यमित्यर्थः। हेतुः पूर्वोक्त एव। *अभेदेति* चकारो भिन्नक्रमः। *तस्मादिति* उक्तनिगमनघटकतथाशाब्दार्थसादृश्यान्वय असम्भवात् इत्यर्थः। घटो घटाभिन्नो घटत्वादित्यादौ घटसदृशे घटत्वाव्यापकत्वेन घटत्व-ज्ञाप्यत्वाभावात् प्रमेयपक्षके भेदघटितपक्षसादृश्याप्रसिद्धेश्चेति भावः। ननु तथापदं बुद्धिस्थत्वेन साध्य-बोधकमिति साध्ये पञ्चम्यर्थान्वय इत्यत आह। *बह्नामिति* प्रक्रमे बुद्धिस्थे विशेष्यनियमतः साध्ये एव तदन्वयस्य दुर्वचत्वात्। अन्यस्यापि बुद्धिस्थत्वादिति भावः। नन्वन्यत्र बाधान्न पञ्चम्यर्थान्वय इत्यत आह। *वादिवाक्ये इति* बुद्धिस्थे इत्यर्थः योग्यतार्वये। बाधाभावबलात् पञ्चम्यर्थ अन्वयाङ्गीकारेऽतिप्रसङ्गात्। बुद्धिस्थक्रमसंयोगादावपि निगमनघटकपञ्चम्यर्थान्वयप्रसङ्गात्। तथाचोप -क्रमोपसंहारयोर्विरोधो दुष्परिहर एवेति भावः। एतच्च तथाचायमित्युपनयदूषणोपलक्षणं तदुपनये तथाशब्दस्य पूर्ववाक्यजन्यबुद्धिविशेष्यकार्थकत्वे हेतुमद्दृष्टान्तस्य तत्रविशेष्यत्वात्तत्रायं पदार्थानन्वयः। तद्विशेष्ये सति प्रकारार्थकत्वे तथाविधदृष्टान्त एव सहचर्यघटकत्वेन प्रकार इत्युक्तदोषो दुर्वारः। सादृश्यार्थकत्वे च तादृशदृष्टान्तसादृश्ये अयं पदार्थानन्वय इति द्रष्टव्यम्। ननु तस्माद्वह्निमानिति निगमनवादिमतेऽपि कथं तद्घटकपञ्चम्यर्थान्वयः तच्छब्दस्य बुद्धिस्थ वाचितया घटादेर्बुद्धिस्थत्वेन तज्ज्ञाप्यत्वस्य साध्ये बाधादित्यत आह। *तस्मादित्यत्रेति* साध्यान्वयि पञ्चम्यर्थज्ञाप्यत्वे

In Public domain. Digitization Muthulakshmi Research Academy


योग्यतातात्पर्याभ्यां प्रकृतहेतोरेवान्वय इत्यर्थः। ननु निगमनोत्तरं कुत इत्याकाङ्क्षा कुतो न जायते इत्याशङ्कायामाह। *तस्मादिति* *विशिष्यसिद्धता* प्रकृतसाध्ये हेतुविभक्त्यर्थान्वयनिराकाङ्क्षता। *साध्यतयोक्तस्य* हेतुज्ञानज्ञाप्यत्वेन बोधितस्य। *समर्थेति* व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञान-ज्ञाप्यत्वेन पुनर्बन्धनात् इत्यर्थः। तथा च हेतुविभक्त्यर्थबोधो तत्र बोधविषयविभक्त्यर्थवत्त्वसङ्गेन तादृश-निराकाङ्क्षत्वानुमितिः आकाङ्क्षाज्ञानविघटकेति न तादृशाकाङ्क्षासम्भव इति भावः। *अन्यथा* निगमनान्तरमनुमानात्तथाबोधाङ्गीकारे। *तद्वैयर्थ्यात्* निगमनवैयर्थ्यप्रसङ्गात्। एतच्चाबाधितबोधो वा निराकाङ्क्षत्वबोधोऽपि निगमनप्रयोजनमिति मतेन। वस्तुतस्तु तस्मादित्यत एव हेतुज्ञाप्यत्वस्य लाभान्नाकाङ्क्षाप्रवृत्तिः। न च हेतुसम्बन्धसाध्ये तदाकाङ्क्षा तादृशसाध्यत्ववादिनाऽपरिग्रहात्। तादृश-साध्ये भवद्भिरपि न निराकाङ्क्षत्वबोधानुपपादनाच्चेति। ननु साध्यसंशयादेरपि अवयवत्त्वात्तेषां पञ्चत्व-कथनासङ्गतिरित्यत आह। *संशयेति* *प्रयोजनम्* साध्यनिर्णयेच्छा। आदिना हेत्वाकाङ्क्षादयः। क्षणम्। उचितानुपूर्वीकत्वघटितमानुपूर्व्याः शब्दधर्मत्वात्। *न्यायाङ्गत्वेन* न्यायसम्पादकत्वेन। उपयुज्यन्ते। अपेक्ष्यन्ते। कण्टकोद्धारस्य। को वह्निमान् कुतो वह्निमान् कथमस्य गमकत्वमिति प्रश्नसमूहस्य। *समयेति* कादाचित्कत्वादित्यर्थः। प्रकारान्तरेण प्रतिवादिनस्तथाविधाकाङ्क्षाबोधेन क्रमिकपञ्चवाक्यप्रयोगस्थले कण्टकोद्धारासम्भवादिति भावः।

**इति श्री मन्महामहोपाध्यायकृष्णम्भट्टविरचितायां गदाधरीयव्याख्यायां विवरणापराख्यायाम्**

**अवयवग्रन्थस्सम्पूर्णः**

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ion Muthulakshmi Research Academy

## About the Editors

**Sukeshacharya** has undergone the traditional Gurukula system of learning for 12 years under the great Madhwa Scholar Pandit Baligaru Srinivasacharya of Bangalore. At the young age of 18 years, he composed a superb Kavya titled "Acharya Vijaya" on Panditraj Jalihal Srinivasacharya, his Grandfather and a very renowned Madhwa Scholar. (Kashi Vidvatsabha had honoured him as Panditraj) After learning the Vedanta & Nyaya Shastras he moved to Hyderabad in 2006 to pear higher Nyaya Shastra under Rashtrapati Puraskruta Mahamahopadhyaya Ramachandra Koteshwara Shastri.

Sukeshacharya conducted a Shastra Sabha of Adwaitins, Tarkikas & Madhvas at Hyderabad in the year 2013. He is leading a pious life dedicated to continuous learning as also teaching to a large number of Dwaita & Adwaita students in Hyderabad city, without spending time or energy on any job/profession as prescribed in dharma.

**Dr. V. Subrahmanyam**, M.A, M.Ed, Ph.d, is currently working as Deputy Director in Sanskrit Academy. Formerly he was the teaching faculty of Bhopal Campus of Rashtriya Sanskrit Sansthan, New Delhi. He taught Sanskrit Teaching Methodology for B.Ed students and he served his duties for four years in this campus. He has completed his Ph.D in Micro Teaching under the guidance of Prof. V. Muralidhara Sharma.

He was the one among the Sanskrit Textbook Writers for Composite and Oriental disciplines for SCERT, Madhya Pradesh and Andhra Pradesh States.

As part of his duties in Sanskrit Academy, he has edited 5 books and 5 Journals. And he has coordinated Seminars, Lecture series and Publications.

SANSKRIT ACADEMY

Adarsh Shodh Sanstha,
Recognized by Rashtriya Sanskrit Sansthan
Osmania University Campus, Hyderabad - 07
2013

ISBN - 978-93-80171-33-3